# ŚAṄKARA-MADHVA-RĀMĀNUJĀCĀRYĀṆĀṂ ŚRĪMAD BHAGAVADGĪTĀ VYĀKHYĀNĀNI - EKAṂ TULANĀTMAKA PAṬHANAM

# शङ्कर-मध्व-रामानुजाचार्याणां श्रीमद्भगवद्गीताव्याख्यानानि एकं तुलनात्मकपठनम्

*Thesis submitted to*
*the University of Calicut in the partial fulfilment of*
*the requirements for the degree of*

**DOCTOR OF PHILOSOPHY IN SANSKRIT**

by


**SUBRAHMANIAN M.**

**DEPARTMENT OF SANSKRIT**
UNIVERSITY OF CALICUT


2020

**Dr. C. Sreekumaran**
Associate Professor (Retd.)
Department of Sanskrit
Zamorin's Guruvayurappan College,

# CERTIFICATE

This is to certify that the thesis entitled **"ŚAṄKARA-MADHVA-RĀMĀNUJĀCĀRYĀṆĀṂ ŚRĪMAD BHAGAVADGĪTĀ VYĀKHYĀNĀNI - EKAṂ TULANĀTMAKA PAṬHANAM"** is an authentic record of research work carried out by **Subrahmanian. M**, for the degree of Doctor of Philosophy in Sanskrit of University of Calicut, under my supervision and guidance and that no part thereof has been presented before for any degree, Diploma or Associateship in any other university.

Calicut University

**Subrahmanian. M**
(Supervising Teacher)

Subrahmanian M. “ Śaṅkara-madhva-rᾱmᾱnujᾱcᾱryᾱṇᾱṃ Śrīmad Bhagavadgītᾱ Vyᾱkhyᾱnᾱni - Ekaṃ tulanᾱtmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# DECLARATION

I, **Subrahmanian. M.,** do hereby declare that this thesis, entitled **“ŚAṄKARA-MADHVA-RĀMĀNUJĀCĀRYĀṆĀṂ ŚRĪMAD BHAGAVADGĪTĀ VYĀKHYĀNĀNI - EKAṂ TULANĀTMAKA PAṬHANAM”** is a genuine record of the research work done by me under the supervision of **Dr. C. Sreekumaran**, Associate Professor (Retd.), Department of Sanskrit, Zamorin’s Guruvayurappan College, Calicut, and that no part of the thesis has been presented earlier for the award of any other Degree, Diploma, Title or Recognition in any other University.

Calicut University **Subrahmanian. M**

# आभाषः

भारतीयेषु इतिहासद्वयेषु महत्वात् भारवत्वात् च प्रमुखं स्थानमलङ्करोति महाभारतम्। तस्य ग्रन्थस्य सारसर्वस्वभूता भवति षष्ठे भीष्मपर्वणि अन्तर्भूता भगवद्गीता। अस्माकं देशस्य सामूहिक-सांस्कारिक-दार्शनिक जीवितमण्डले अस्य अतिमात्रं स्थानं वर्तते च। महाभारते न केवलं भगवद्गीता, अन्याश्च गीताः सन्ति; तथापि महाभारतस्य साहित्यमणडले कियत् प्राधान्यम् अस्ति ततोfप्यधिकं वा गीतायाः प्राचुर्यं, प्रामुख्यञ्च अस्ति। तस्योत्तमं दृष्टान्तं भवति गीतायाः ३४०० अधिकं व्याख्यानानि, आगतानि आगच्छन्ति च इति। अत एवास्मिन्नवसरे प्राचीनानां भाष्यत्रयाणां तुलनात्मकपठनस्य प्रसक्तिः अस्त्येवेति चिन्ता प्रबन्धस्यास्य मूलकारणम्। अत्र शंङ्कर-मध्व-रामानुजाचार्याणां गीताभाष्याणां तुलनात्मकपठनमेव अनेन शोधकार्येण उद्दिश्यते । संस्कृतभाषा चास्याः माध्यममिति सविशेषतैव।

सप्ताध्यायात्मकं भवति प्रबन्धोऽयम्, आद्याध्यायेन भगवद्गीतायाः सामान्य परिचयमेव उद्दिश्यते। गीतायाः आविर्भावसन्दर्भपरिचयम्, अष्टादशाध्यायात्मकस्य ग्रन्थस्य घटनासविशेषता, अन्यगीताः, गीतायाः लक्ष्यञ्च अध्यायेfस्मिन् अन्तर्भवति। द्वितीयेन अध्यायेन त्रयाणाम् भाष्यकाराणाम् आचार्याणां लघुपरिचयं कृत्वा तृतीयेन अध्यायेन कर्मयोगमधिकृत्य विचारयति। अध्यायेfत्र कर्मविषयमधिकृत्य वैदिकादिषु ग्रन्थेषु कथं विवरणम्, कर्मविषये गीतायाः वीक्षणं, कर्मविषये व्याख्यातृणां मतमित्यादिकं विशदयति। ज्ञानयोग इति चतुर्थाध्याये गीताशास्त्रे कर्मविचिन्तनं भाष्यत्रयेषु मतभेदानुसारेण कथं व्याख्यातमिति चिन्तनमेव। अनेन साकम् उपनिषदादिषु ज्ञानविषयमधिकृत्य चर्चापि अस्यामन्तर्भवति। विषयेfस्मिन् व्याख्यातृणां मतानां तुलनात्मकमध्ययनमपि कृत्वा अध्यायोfयमुपसंहरति। अथ पञ्चमाध्याये भक्तितत्त्वमधिकृत्य निरूपयति। गीतादर्शने भक्तिः, भाष्यकाराणां भक्तिसमर्थने गीताप्रमाणम् एतादृशविषयान् विचिन्त्य अध्यायोऽयं समाप्तिं याति। अग्रिमाध्यायेन कर्म-ज्ञान-भक्त्यादीनतिरिच्य इतरे विषयाः संग्रहरूपेण वर्णयति। अन्तिमाध्यायेन पूर्वाध्यायेषु विचारित विषयाणां संग्रहं प्रतिपाद्य निबन्धोfयमुपसंहरति।

प्रबन्धस्यास्य निर्देशकः डा. सि श्रीकुमारन्महाभागानां कृते प्रथमतया कृतज्ञतां निवेदये। कालिकट् विश्वविद्यालयस्य संस्कृतविभागाध्यक्षा प्रो. के. के गीताकुमारिमहाभगा, तथा प्रो. एन् के सुन्दरेश्वरमहाभागः, डा. के के अब्दुल् मजीद् महोदयः, अतिथि अध्यापकरूपेण कार्यं कृतवन्तः डा. टि वि अजेष्, डा. शरत् पि नाथ्, डा. सजीष् सि एस्, डा. अजितन् पि ऐ, डा. जयलक्ष्मि टि वि, विभागस्य कार्यालये कार्यं कृतवन्तः, विभागग्रन्थालयकार्यकर्त्री षक्कीला कारी, एषुत्तच्छन् ग्रन्थशालायाः कार्यकर्तारः, अस्मद् सतीर्थ्याः डा. अनिल् नारायणन्, डा. वृन्दा पि एम्, डा. श्रीदेवी, डा. निकिता ,डा. उमा ए, एवमन्ये शोधच्छात्राः सरिन्, हरीष् के पि, प्रीता सि, राजेष् के, निमिषा एन्, अनुपमा, शारिका, अञ्जु के सि, गिरीष्  सि आर्  एवं २०१५-२०२० वर्षेषु विभागस्य एम्.ए, एंफिल् छात्राः, विश्वविद्यालयस्य इतरविभागानाम् अध्यापकछात्रादयः, अधुनातन एम्.ए छात्रा मीरा इत्यादीनां साहाय्यम् अस्यां वेलायां कृतज्ञतापूर्वं स्मरामि। संस्कृतविभागस्य पूर्वाध्यापकाः प्रो. के एन् नीलकण्ठन् इलयत्, प्रो. सि राजेन्द्रन्, प्रो. पि नारायणन् नम्बूतिरि एते महाभागाः च अस्य निबन्धस्य कृते महत्साहाय्यं कृतवन्तः। एवमस्मद् ज्येष्ठसदृशौ डा. रांशक्ति ए, डा. दीपेष् वि के इत्येतेषां कृते विशेषतया धन्यवादान् समर्पयामि। तथा बिबीष्, राकेष्, सुधीष् इत्यादिभ्यः सर्वेभ्योऽपि सुहृद्भ्यः कृतज्ञतापूर्वकस्मरणं वितन्यते।

मम आदरणीयपिता इदानीं मया साकं न चेदपि तेषां कृते स्मरणाञ्जलिः समर्पयितुमपि अवसरोऽयमुपयुज्यते। एवं मम माता गौरि अम्मा, ज्येष्ठः श्रीकुमारन्, ज्येष्ठपत्नी रिजि, पुत्री श्रीरञ्जिनि इत्येतेषां साहाय्यं प्रचोदनं च विना प्रबन्धोऽयं सम्पूर्णं न भवेत्। एवं कालिक्कट् आदर्श संस्कृतविद्यापीठस्य अध्यापकवृन्दानां योगदानं चाधुना स्मरामि।

कालिक्कट् विश्वविद्यालयस्य सि एच्च् स्मारकग्रन्थालयः, केरल राज्यस्य साहित्य अक्कादमि, अप्पन् तम्पुरान् स्मारकग्रन्थालयः, देशपोषिणी ग्रन्थशाला, कालिक्कट् आदर्श संस्कृतविद्यापीठीय ग्रन्थशाला च अत्र स्मरणीयाः। अस्य प्रबन्धस्य मुद्रणकार्यं कृतवन्तः बिना मुद्रणालयस्थाः बालुवेट्टन्, राजेषेट्टन्, श्रीजित्, तत्रत्याश्चान्ये प्रवर्तकाः, एवमन्येषां साहाय्यकानां सर्वेषां कृते धन्यवादान् समर्पये।

# विषयविवरणम्


**प्रथमोऽध्यायः भगवद्गीतायाः विषयः घटना च** १-४०

१.१ उपोद्घातः

१.२ गीतायाः आविर्भावस्य सन्दर्भः

१.३ भगवद्गीता महाभारतं च

१.४ वैदिकचिन्ता गीतायाम्

१.५ उपनिषद् चिन्ता गीताशास्त्रे

१.६ प्रस्थानत्रयं भगवद्गीता च

१.७ गीता वेदान्तत्रयश्च

१.८ भगवद्गीतायाः लक्ष्यम्

१.९ भगवद्गीता अन्याश्च गीताः

१.९.१ ईश्वरगीता, व्यासगीता च

१.९.२ देवीगीता

१.९.३ ब्रह्मगीता

१.९.४ वसिष्ठगीता

१.९.५ अष्टावक्रगीता

१.१० भगवद्गीतायाः घटनात्मकं वैशिष्ट्यम्

१.१०.१ गीता काण्डत्रयात्मिका

१.११ भगवद्गीतायाः व्याख्यानानि

१.१२ उपसंहारः

**द्वितीयोऽध्यायः आचार्यत्रयाणां परिचयः** ४१-७२

२.० उपोद्घातः

२.१ अद्वैतं श्रीशङ्करश्च

२.१.१ श्रीशङ्करः

२.१.२ अद्वैतदर्शनम्

२.१.३ शङ्करपरम्परायाः दार्शनिकसविशेषताः

२.१.४ श्रीशङ्करः प्रस्थानत्रयश्च

२.२ मध्वः द्वैतपरम्पराश्च

२.२.१ मध्वाचार्यः
२.२.२ द्वैतदर्शनम्
२.२.३ मध्वपरम्पराः दार्शनिकसविशेषताः
२.२.४ मध्वः प्रस्थानत्रयश्च
२.३ श्रीरामानुजः विशिष्टाद्वैतश्च
२.३.१ श्रीरामानुजाचार्यः
२.३.२ विशिष्टाद्वैतदर्शनम्
२.३.३ रामानुजपरम्परायाः दार्शनिकवैशिष्ट्यम्
२.३.४ रामानुजाचार्यः प्रस्थानत्रयश्च
२.४ उपसंहारः
**तृतीयोऽध्यायः, कर्मयोगः** ७३-१३५
३.० आमुखम्
३.०.१ कर्मयोगमधिकृत्य प्रवृत्तानि इतरगीताव्याख्यानानि
३.० २ आचार्यत्रयः कर्मयोगश्च
३.१ कर्मयोगः
३.१.१ मनुस्मृतौ कर्म
३.१.२ गीताशास्त्रे कर्म विजिन्तनम्
३.२. शांकरसिद्धान्ते कर्म
३.२.१. ब्रह्मसूत्रे कर्मसङ्कल्पः
३.२.२. उपनिषद् भाष्येषु कर्म
३.३ कर्मव्याख्यानानि भगवद्गीतायाम्
३.४ शङ्करमते कर्मसङ्कल्पः
३.४.१ मध्वमते कर्मसङ्कल्पः
३.४.२ रामानुजमते कर्मसङ्कल्पः
३.५ कर्मयोगः ज्ञानयोगश्च
३.६ कर्मयोगः भक्तियोगश्च
३.७ कर्मयोगः सन्यासयोगश्च
३.८ उपसंहारः
**चतुर्थोध्यायः ज्ञानयोगः** ७४-२१९
४.० उपोद्घातंम् .
४.१ ज्ञानशब्दस्य व्युत्पत्तिः, वेदे, वेदाङ्गे, दर्शनेषु, स्मृतौ, इतिहासौ पुराणे च

४.१.१ भारतीयदर्शने ज्ञानम्
४.१.२ भारतीय दर्शनेषु प्रमाणविचारः
४.१.३ ज्ञानस्य विभागः
४.१.४ ज्ञानस्य वैशिष्ट्यम्
४.१.५ प्रस्थानत्रये ज्ञानम्
४.२ भागवद् गीता व्याख्याने ज्ञानम्
४.२.१ गीताव्याख्याने ज्ञानं कर्म च
४.२.२ ज्ञानकर्मसमुच्चयवादः, तस्य निरासश्च, अस्योपर्याचार्यत्रयाणां व्याख्या च
४.३ ज्ञानं भक्तिः च अस्योपर्याचार्यत्रयाणां व्याख्या
४.३.१ भक्तियोगे ज्ञानस्य प्राधान्यम्
४.४ ज्ञानम् अद्वैतवेदान्तश्च
४.५ ज्ञानं द्वैतवेदान्तश्च
४.६ ज्ञानं विशिष्टाद्वैतश्च
४.७ आचार्यत्रयाणां ज्ञानविषये तुलनात्मकमध्ययनम्
४.८ अध्यायोपसंहारः

**पञ्चमोऽध्यायः भक्तियोगः** **२२०-३०२**

५ : उपोद्घातम्
५.१ : भक्त्याः स्वरुपं,विकासश्च
५.१.१ : भक्तिलक्षणम्, व्युत्पत्तिः, वेदे, स्मृतौ, इतिहासे, पुराणे च
५. १ .२ : भारतीयभक्तिप्रस्थानस्य विकासः
५ .२ : भारतीयदर्शनेषु भक्तिः, भागवते, नारदीयभक्तिसूत्रे, शाण्डिल्यभक्तिसूत्रे च
५.३ : प्रायोगिकवेदान्ते भक्तिः
५.४. : भगवद्गीतायां भक्तिः
५.४.१ : भक्तिः कर्म च गीताशास्त्रे
५.४.२ : भक्तिः ज्ञानं च गीताशास्त्रे
५.५ : आचार्यत्रयाणां मते भक्तिः/ भक्तिदर्शनम्
५.५.३ : रामानुजभाष्येभक्तिः
५.५.४ : मध्व-रामानुजयोः भक्तिविषये सारुप्य-वैरुप्याणि
५.६ : भक्ति समर्थने भगवद्गीतायाः प्रमाणम् आचार्यत्रयेषु

५.७. : आचार्यत्रयाणां भक्ति विषये तुलनात्मकमध्ययनम्
५.८ : अध्यायोपसंहारः
**६ षष्ठोऽध्यायः भगवद्गीतायाम् अन्येषां योगानां निरूपणम्** **३०३-३७२**
६.० उपोद्घातः
६.१ अन्ये योगाः
६.१.१ आत्मस्वरुपम्
६.१.२ यज्ञचक्रम्
६.१.३ सन्यासम्
६.१.४ ध्यानम् योगञ्च
६.१.५ देवयान-पितृयान विचारौ
६.१.६ दैवी-आसुरी स्वभावौ
६.१.७ वर्णाश्रमधर्मादिनिरुपणम्
६.२ सात्विक-राजस-तामसभेदाः
६.२.१ तपः
६.२.२ दानम्
६.२.३ त्यागम्
६.२.४ कर्त्ता
६.२.५ बुद्धिः
६.२.६ धृतिः
६.२.७ सुखम्
६.२.८ भोजनविचारः
६.३ विभूतियोगम्
६.४ विश्वरूपदर्शनयोगम्
६.५ प्रकृति-पुरुषयोगम्
६.६ उपसंहारः
**सप्तमोऽध्यायः उपसंहारः** **३७३-३८१**
**निदर्शकाः ग्रन्थाः** **३८१-३९१**

Subrahmanian M. " Śaṅkara-madhva-rᾱmᾱnujᾱcᾱryāṇāṃ Śrīmad Bhagavadgītᾱ Vyᾱkhyᾱnᾱni - Ekaṃ tulanᾱtmaka pathanam". Thesis.Department of Sanskrit, University of Calicut, 2020

# प्रथमोऽध्यायः
# भगवद्गीतायाः विषयः घटना च


१.१ उपोद्घातः
१.२ गीतायाः आविर्भावस्य सन्दर्भः
१.३ भगवद्गीता महाभारतं च
१.४ वैदिकचिन्ता गीतायाम्
१.५ उपनिषद् चिन्ता गीताशास्त्रे
१.६ प्रस्थानत्रयं भगवद्गीता च
१.७ गीता वेदान्तत्रयश्च
१.८ भगवद्गीतायाः लक्ष्यम्
१.९ भगवद्गीता अन्याश्च गीताः
१.९.१ ईश्वरगीता, व्यासगीता च
१.९.२ देवीगीता
१.९.३ ब्रह्मगीता
१.९.४ वसिष्ठगीता
१.९.५ अष्टावक्रगीता
१.१० भगवद्गीतायाः घटनात्मकं वैशिष्ट्यम्
१.१०.१ गीता काण्डत्रयात्मिका
१.११ भगवद्गीतायाः व्याख्यानानि
१.१२ उपसंहारः

रामायण-महाभारते भारतीयेतिहासत्वेन भावयन्ति पौराणिकाः। वाल्मीकिविरचिते रामायणे विष्णोरवतारस्य श्रीरामस्य जन्मतः स्वर्गारोहणपर्यन्ताः कथाः विशदयति। *महाभारतं* तु वेदव्यासस्य रचना इति भारतीयसङ्कल्पः। तत्र कुरुवंशस्य अधिकारयुद्धादि विषयाः वर्णयति ऋषिः। इतिहासद्वये न केवलं कथात्मकानि कार्याणि किन्तु भारतीयतत्वचिन्तायाः आदर्शमप्यावहति। महाभारते तत्वचिन्तायाः प्रधानाख्यानमस्ति *भगवद्गीता* । *महाभारतम्* अष्टादशपर्वसु विभक्तमस्ति। तेषु षष्ठपर्वणि, भीष्मपर्वणि अन्तर्भूता *भगवद्गीता*। तृतीयोपपर्वत्वेन तत्र भगवद्गीतायाः स्थानम्। भीष्मपर्वणि पञ्चविंशति(२५) अध्यायात् आरभ्य द्विचत्वारिंशत् (४२) परम् अष्टादश अध्यायाः *भगवद्गीता* इति *सनातनधर्मपरिचयमिति* [१] ग्रन्थे व्यवह्रियते। एतेषु अष्टादशाध्यायेषु सप्तशतश्लोकाः वर्तन्ते।

कुरुक्षेत्रभूमौ युद्धाय सन्निहितयोः कुरुपाण्डवसैन्ययोः मध्ये रथं स्थापयितुं प्रार्थयति कृष्णम् अर्जुनः। पञ्चविंशतियोजनात्मकस्य अस्य युद्धक्षेत्रस्य मध्ये[२] स्थित्वा सम्पूर्णान् योद्धुकामान् अवलोक्य स्तब्धः कम्पितः अर्जुनः -

> "न कांङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।
> किं नो राज्येन गोविन्द किं भोगैर्जिजीवितेन ।१/३२। " [३]

इत्युक्त्वा स्वबान्धवहननेन पापस्य कीर्तिः न मे रोचते इत्यादि उक्त्वा विषीदन्तस्य अर्जुनस्य कृते विविधान् विषयान् उपदिशति भगवान् श्रीकृष्णः। भगवतः श्रीकृष्णस्य एतानि उपदेशानि इत्यस्मात् भगवद्गीता ( भगवता गीयते ) इति अस्य ग्रन्थस्य नाम। द्वितीयाध्यायादारभ्य कृष्णोपदेशः 'क्लैब्यं मा स्म गमः पार्थ नैतत्वय्युपपद्यते " इत्यादिभ्यः प्रारभ्यते [४] पुनश्च शिष्टेषु सप्तदशाध्यायेषु गीयते। ग्रन्थकारेण कुरुक्षेत्रभूमौ अर्जुनं निमित्तीकृत्य सर्वेभ्यो लोकेभ्यः उपदिशति कृष्णः भगवद्गीतायाम् [५] । वेदान्तदर्शने ब्रह्मसूत्राणि, *उपनिषदः*, *भगवद्गीता* च प्रस्थानत्रयमिति नाम्ना प्रसिद्धमस्ति। अस्य ग्रन्थस्य शङ्कराचार्यादयः बहवः लघु-विस्तृताश्च व्याख्याग्रन्थाः अकुर्वन्।

'अन्यस्याः उपनिषदः समाहरितैः मनोहरतत्वकुसुमैः निर्मितं मञ्जीरवत् भासते गीता 'इति विवेकानन्दस्य आग्ङलेयदेशभाषणे [६] उद्घोषितमस्ति। १ .९ .१९४० तमे वर्षे गीताजयन्ति अनुबन्धभाषणे हरिजनसत्रे गांन्धिजि एवमकथयत्- गीतायाः सन्देशः" अनासक्तिः इति विषये मे सन्देह नास्ति। अतः एव मम गीताभाष्यस्य व्याख्यायाः नाम अनासक्तियोगः भवति इति" [७]। संस्कृते तथा अन्यासु भाषासु च गीतायाः बहूनि व्याख्यानानि सन्ति। *भगवद्गीतयुटे तत्वशास्त्रम्* " इति कैरलीग्रन्थे भगवद्गीतायाः ३४०० उपरि व्याख्यानानि सन्तीति कथ्यते टि सुब्बरावु महोदयेन चोक्तम् [८]। "संस्कृतभिन्नं प्रथमव्याख्यानं मराट्टिभाषायाम् अभवदिति तस्य व्याख्याता *ज्ञानेश्वर*भाष्ये ए डि १२९० तमे वर्षे "अभवदिति[९] विस्तरति।" १७८४ तमे गीतायाः प्रथमा आङ्गलेयपरिभाषा [१०]मुद्रिता"। अद्य विविधासु भारतीयभाषासु तदा वैदेशिकभाषासु अपि बहूनि व्याख्यानानि आगतानि, आगच्छन्ति च। संप्रति गीताविषये बहूनि अध्ययनानि प्रचलन्ति। अनुसन्धानविषये च गीतायाः प्राधान्यम् अधुना अधिकमस्ति। किंच प्रबन्धविषये अपि भगवद्गीताम् अधिकृत्य परिवेषणानि आयोजयन्ति, चर्च्चयन्ति च। अस्मिन् प्रबन्धे भगवद्गीतायाः प्रसिद्धानां शंङ्कर-मध्व-रामानुजाचार्याणां भाष्याणां तुलनात्मकमध्ययनं क्रियते। इदमध्ययनं पूर्वेभ्यः भिन्नमित्यस्मात् अस्य प्राधान्यं साङ्गत्यं च अधिकं वर्तते।

अस्य प्रबन्धस्य प्रथमाध्यायेऽस्मिन् *भगवद्गीतायाः* परिचयः, गीतायाःघटना, अस्य ग्रन्थस्य आशयानां सृष्टिः, आशयसृष्टेः साहचर्यः, भगवद्गीता भारतीयतत्वचिन्ता इति वादः वेदान्तदर्शने, प्रस्थानत्रयेषु च भगवद्गीतायाः स्थानम् इत्यादि विषयान् विचिन्तयति। तथा भगवद्गीतायाः घटनात्मकं वैशिष्ट्यं, तस्य उत्पत्तिः, अस्याः दार्शनिकपद्धतिः, गीता वेदस्यसारसंग्रहभूता इति शङ्करमतस्य औचित्यस्य विशकलनं च अस्याध्यायस्य विषयाः। व्याख्यातृणां विषये, भगवद्गीतायाः कर्म-ज्ञान-भक्ति विषये तथा गीतायाः अन्यासु विषयेषु च अन्येषु अध्यायेषु पर्यालोच्यते व्याख्यानत्रयाणां माध्यमेन।

## १.२ गीतायाः आविर्भावस्य सन्दर्भः

कुरु-पाण्डवयोः विद्वेषात् जातं कुरुक्षेत्रयुद्धं तत्र अर्जुनस्य धर्मविषये अयथार्थज्ञानं च प्रायेण गीतोपदेशस्य कारणम्। महाभारते भीष्मपर्वणि प्रथमाध्याये युद्धस्य नियमविषये, तस्य युद्धस्य कालविषये, दु;श्शकुनादि विषये च प्रतिपादयति। तस्मिन् काले नक्षत्राणां स्थानं, गति-विगतयः च प्रतिपादयति[११]। युद्दभूमौ सैन्यव्यूहस्य, सैन्यविन्यासस्य च विस्तरप्रतिपादनम् अस्मिन् ग्रन्थे प्राप्यते। कल्हणस्य राजतरङ्गिण्यां युद्धकालस्य अवस्थां प्रकाशयति [१२]।एवं भवति नरेन्द्रभूषण् महोदयस्य[१३] मतम् । पश्चात् दर्शनेन पाण्डवशिबिरं, प्राच्यदर्शनेन कौरवशिबिरञ्च युद्धे सन्निहितम्। अष्टादशदिनानि यावत् युद्धमासीत् कुरुक्षेत्रे [१४]। पाण्डव-कौरवयोः व्यूहरचना, युद्धसामर्थ्यं च तत्र वर्णयति।

"अन्धस्य धृतराष्ट्रस्य ज्ञानाय वेदव्यासानुग्रहेण दिव्यदृष्ट्याः साहाय्येन सञ्जयः युद्धस्य साक्षात् दर्शनरूपेण विवृणोति" [१५]। "पक्षद्वययोः शंखघोषात् अनन्तरं युद्धवीरान् द्रष्टुम् इच्छुकामः" अर्जुनः उभयोः सेनयोः मध्ये रथं स्थापयितुं कृष्णं प्रार्थितवान्[१६]। अत्र उभयोः सेनयोः सङ्कल्पेन प्रतिलोमानुलोमसङ्कल्पयोः मध्ये इतिकर्तव्यमूढत्वं प्रापयति अर्जुनः। शोकसंविघ्नमानसः पतति रथे अर्जुनः प्रतिलोम-अनुलोमभिन्नः भावः अत्र अर्जुनस्य। अतः "क्लैब्यमिति"[१७] सम्बोधनया उपदेशेनारभ्यते कृष्णेन। स्वबान्धवान्-स्वगुरुन् च दृष्ट्वा एतान् हत्वा न विजयं न राज्यं कांक्ष्यते इति उक्त्वा अर्जुनः कर्ममौढ्यः अभवत्। अर्जुनस्य एतस्मात् जातावस्थाविशेषात् गीतायाः आख्यानं साधितम्।" संग्रामे एतावत् श्लोकाः, ज्ञानयोगः, कर्मयोगः च कदापि न उपदिशन्ति इति वादयन्ति"[१८]। किन्तु अन्ये गीतायाः सारोपदेशः एषः इति चिन्तयन्ति। कृष्णस्य उत्तरं" द्वितीयाध्याये एकादशतः षट्चत्वारिंशत् पर्यन्तैः श्लोकैः आसीत"[१९]। तत्र अर्जुनस्य संशयः वर्धितः एतेषां प्रत्युत्तरत्वेन भगवद्गीतायाः व्याप्तिः वर्धयति च। तत्र विजयं धार्मिकानां पाण्डवानाम् अभवत्। धर्मसंरक्षणमिति धिया युद्धे पक्षद्वयेऽपि युद्धनियमानाम् उल्लंघनं कृतमिति तत्र तत्र दृश्यते। दुर्योधनवधं, कर्णवधं,

जयद्रथवधं तदा अभिमन्युवधं, पाण्डवपुत्राणां वधं च तत्र कानिचन उदाहरणानि। युद्धानन्तरं पाण्डवानां राजशासनं च दृश्यते महाभारते। युद्धेन पक्षद्वयेऽपि भीमः नाशः अभवत्।

महासंग्रामानन्तरं शिष्टाः तु पाण्डवपक्षे पञ्चपाण्डवाः, कृष्णः, युयुत्सु च। कौरवपक्षे तु अश्वत्थामा, कृपः, कृतवर्मा, दृष्टकेतुः चैव अवशिष्टाः। युद्धं तु यावत् बृहदस्तीति युद्धे भागभागीनां राष्ट्रानां चिन्तनेन ज्ञातुं प्रभवति। द्वारका, काशी, केकया, मगधा, चेदि, पाण्ड्यं, मथुरा इत्यादयः पाण्डवपक्षे सप्त अक्षौहिणी[२०] सैन्येन समवर्तते। एकादश अक्षौहिणि सैन्येन कौरव पक्षे केकय, सिन्धुदेशं, प्राग्ज्योतिषं, मत्स्यम्, अंगं, माहिष्मति, अवन्ति, तमिषकं, गान्धारं, बाष्कीलम् आदिराष्ट्राः[२१]साक्षात् यवनाः, शकाः, तुषाराः आदयः भागभाजः यदा अभवन् अनेन विश्वमहायुद्धप्रतीतिः तत्र जाता। दुष्प्रधर्षं, दुरासदम् इत्यादि नामानि युद्धस्य प्रभावं प्रकटयन्ति। तूणीरम्, उपासंगं, निषंगम्, ऋष्टि, क्षेपणि, गद, शक्ति, प्रासम्, असि, तोमरं, मुसलं[२२], क्षुरप्र, खड्गं,[२३] परश्वध, निष्त्रिंशं, भल्लं, पषाणम्[२४] इत्यादयः युद्धे आयुधविषये च प्रबोधयति[२५] अस्मान्। "अर्धचन्द्रव्यूहं, गरुढव्यूहं, मण्डलार्द्धव्युहं, क्रौञ्चव्यूहं, चक्रव्यूहं, मकरव्यूहं, वज्रव्यूहं, श्वेनव्यूहं, पद्मव्यूहं, सूचीमुखव्यूहम् आदयः केचन सैनिकव्यूहाः"[२६] महाभारतयुद्धे प्रयुक्तविन्यासः।

कुरु-पाण्डवयोः राष्ट्रविषये, देयविषये च सञ्जाते युद्धे अस्ति श्रीकृष्णस्योपदेशः अर्जुनाय। अस्मिन् विषये सन्देहः यथा युद्धभूमौ सप्तशताधिकस्य श्लोकस्य उपदेशः औचित्ययुक्तः वा इति। युद्धसन्नद्धानां जनानां मध्ये यथावदुपदेशः शक्यः इति समस्या काचित् तत्र वर्तते। "स्वबान्धवान् अन्यान् युद्धवीरान् च दृष्ट्वा अर्जुनस्य स्थैर्यं नीचमागच्छति"[२७]। सः कर्मविमुखः भूत्वा तत्वानि अकथयत् कृष्णाय कर्मणि प्रवर्तयितुम् अर्जुनम् उद्दीपयति कृष्णः भगवद्गीतोपदेशैः। अथवा तादृशः सन्दर्भः चित्रीकरोति महाभारतस्य कर्ता व्यासः। विविध विषयेषु कृष्णस्योपदेशात् अर्जुनस्य प्रतिवचनं तत्र तत्र आख्यायति कविः। अनेन प्रतिवचनेन तत्वचिन्तायाः ऊर्धोर्ध्वं स्थानं प्राप्यते अयं ग्रन्थः।

सामान्यजनानां जीवनमपि युद्धवदेव। तत्र उपदेशानि अग्रगमनाय चोदयन्ति च। अतः जीवितरणाङ्कणे भगवद्गीतायाः उपदेशः प्राधान्यमावहन्ति।

“अस्मिन् संग्रामे महत्तमः सम्भवः महनीयाः अमृतात्मिकायाः च दिव्यवाण्यः गीतावाण्यः “ इति स्वामि विवेकानन्तस्य अभिप्रायः[२८] अन्यत्र सः एवं वदति ‘कौरव-पाण्डवयोः मध्ये युद्धमभवत् इति विषये नास्ति मम सन्देहः। युद्धे एकोऽध्यायमेव गीता तस्याम् अन्तर्निहितः आध्यात्मिकसारः सद्-दुर्वासनयोः मध्ये मनुष्याणामन्तकरणे जातस्य युद्धस्य विषये इति” [२९]। किन्तु हरिसेनवर्मणः वाक्ये “गीतासारः तत्र कृष्णस्योपदेशः, तस्य सारस्य विपुलोपदेशः गीताकारेण कृतः इति” [३०]। परन्तु *शिवारविन्द*भाष्यकारः एवं चिन्तयति यत् “युद्धारम्भात् परं दशम्यां तिथौ भीष्मपतनानन्तरम् आरब्धः गीतोपदेशः” इति[३१]। समानाभिप्रायः एव दृश्यते *सनातनधर्मपरिचय*मिति ग्रन्थे च [३२]। अस्त्र-शस्त्र-राजधर्मपारङ्गतस्य सञ्जयस्य युद्धविवरणेन लभ्यते भगवद्गीता। नरेन्द्रभूषणस्याभिप्राये “अर्जुनेन धर्मसंस्थापनं सुसाध्यं समस्तप्राणिगणानाम् औन्नत्यं च लक्ष्याय गीतामुपदिशति”[३३]। पशुसमानातिनीचावस्थायां वा अत्युत्कृष्टात्मविषये वा अप्रविष्टः एव नरः तस्मात् एकस्मै ज्ञानतत्वोपदेशेनैव समस्तमनुष्यवर्गाणाम् उपदेशफलप्राप्तिः लभ्यते इत्यतः गीताशास्त्रस्य प्रसिद्धिः एवं प्राप्त्यति इति सिद्धान्तयति सः। केचन किमपि युद्धमत्र न प्रवृत्तं सर्वं ग्रन्थकर्तुः भावना इति वदन्ति। तत्र अरविन्दः स्वगीताव्याख्यायाः प्रारम्भे सञ्जयस्य दिव्यचक्षोः यथार्थमिति स्थापयितुमपि प्रयत्नः अकरोत्। स्वानुभवेन तत्र सः प्रतिपादयति[३४]। किन्तु बालगंगाधरतिलकः स्वग्रन्थे विचिन्तयति यत् युद्धात्, समयाभावात् दशविंशति यावत् श्लोकाः, तेषां भावार्थाः वा अर्जुनायोपदिशति एतान् अनन्तरं सञ्जयः धृतराष्ट्राय विवृणोति[३५]।

युद्धसमयोपदेशात् एतादृशः बहवः अभिप्रायः गीताविषये दृश्यन्ते। नतु सन्दर्भविषये उपदेशविषये एव गीतायाः प्राधान्यं वर्तते। युद्धन्तु संङ्कल्पः वा यथार्थं वा तत्र कर्मयोगस्य कौशलमेव प्राधान्यमावहति इति गीतायाः सङ्कल्पः।

*महाभारते* युद्धचित्रणेन व्यासः सामान्यजीवितस्य लाभनष्टानां निर्गुणत्वं बोधयति। "युद्धानन्तरं पाण्डवानां कौरवानां च सैन्य-धनादि विषयेषु "भीमनष्टमभवत्[३६]। जीवितयुद्धस्य निष्प्रयोजनमेव व्यासः अत्र चित्रीकरोति। जीवितस्य अवस्थाऽपि एवमेव भवति इति भगवद्गीतया द्योतयति कविः। आनन्दवर्धनस्याभिप्राये महाभार*तं* काव्यं शान्ताङ्गिरसात्मकम् अस्तीति एतस्मिन् विषये प्रमाणं ददाति। अतः महाभारतस्य सम्पूर्णकथायाः सारतत्वचिन्तात्मिका भवति *भगवद्गीता*।

### १ .३ भगवद्गीता महाभारतं च

*भगवद्गीतायाः* एते श्लोकाः *महाभारते*ऽपि अन्यत्र बहुषु स्थलेषु दृश्यन्ते। गीतायाः सप्तम-अष्टम अध्याययोः संग्रहः शान्तिपर्वणि शुकानुप्रश्ने क्रियते व्यासमहर्षिणा। किं च अश्वमेधपर्वणि एव वर्तते *अनुगीता*। अस्यां गीतायां *भगवद्गीतायाः* दशमाध्यायस्य आशयान् चित्रयति। आशयभाषा सादृश्येन भारत-गीतयोः अभेदत्वं ज्ञायते। *भगवद्गीता*-षष्ठाध्यायस्य-

"उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः। ६ /५।
बन्धूरात्मात्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्ततात्मैव शत्रुवत्। ६./६ "[३७]

महाभारते उद्योगपर्वणि यथा -

"आत्मनाऽत्मनमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः।
आत्माह्येवात्मनो बन्धूरात्मैव रिपुरात्मनः"।।३४/६४।[३८]

*वाल्मीकिरामायणं, व्यासभारतं* च न केवलं कथाग्रन्थाः भारतीयानाम्। इतिहासमिति एतयोः संज्ञात्र आर्षभारतस्य दार्शनिकतत्वानि सामान्यजनानां ज्ञानाय कथाबीजेन उपदिशन्ति एतादृशाः ग्रन्थाः। अतः एतयोः ग्रन्थयोः महत्प्राधान्यम् वर्तते। भारतीयानां जीवितचर्या च एतेषां प्रमाणेन स्वीकुर्वन्ति सामान्यजनाः। अत्र *महाभारतस्य* कश्चित् भागः भवति गीता। तथाऽपि गीतायां बहूनां दर्शनानां विचाराणां च समग्रवीक्षणमुपलभ्यते। इतिहासे प्रथमं भवति आदिकविना वाल्मिना विरचितं *रामायणम्*। आदिकाव्यमिति अस्य ग्रन्थस्य विशेषणं, सप्तकाण्डैः रघुवंशजातस्य श्रीरामस्य कथा अस्मिन् काव्ये विवृणुते। रामस्य अयनम् *रामायणम्*। अनया रामकथया एकपत्नीव्रत सङ्कल्पं वाल्मीकिः अग्रे संस्थाप्य कथां कथयति। रामो विग्रहवान् धर्मः इति सङ्कल्पः तस्मात् जातः।

व्यासविरचितं *महाभारत*मिति अत्रत्यानां सङ्कल्पः कुरु-पाण्डववंशानाम् उदन्तकथनेन आख्यानोपाख्यानैः श्रुतिस्मृतिधर्माणां वैशिष्ट्यनिर्देशम् अष्टादशभागैः कृतं *महाभारते*। धर्मजयमेव *महाभारतस्य* सङ्कल्पः। गान्धारि देव्याः “यतो धर्मस्ततोजयः “[39] इत्यादि वाक्यानि तदेव साधयति। किन्तु मार्गादुपरि लक्ष्यस्य प्राधान्यं दृश्यते *महाभारते* युद्धवेलायां कृष्णस्य प्रवृत्तिः एतदेव सूचयति। धर्मसंस्थापनमेव गीतायाः लक्ष्यम्। कृष्णस्य लक्ष्यम् अर्जुनं प्रवृत्युन्मुखं करोति गीता। श्रीशङ्करस्य सङ्कल्पानुगुणं गीतायाः विषयः - “द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च” [४०]। आचार्यमते धर्मः तु- “यतोऽभ्युदयनिश्रेयसः स धर्मः”[४१]। धर्मस्य निर्वचनेन गीतायाः धर्मः, धर्मविग्रहस्य कथा तु *रामायणम्*। अतः एतयोः ग्रन्थयोः एक्यम् बहुधा दृश्यते।

“यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम”्। ४ / ७। [४२]

अनेन श्लोकेन धर्मस्य प्राधान्यं कियदस्ति गीतायाम् इति अस्मान् बोधयति। *रामायणे* च धर्मपक्षस्थस्य रामस्य विजयं रावणात् इति धर्मोन्नतिः सूचयति। तथा

सात्विकप्रधानस्य विभीषणस्य राज्याभिषेकमपि धर्मजयमेव। महाभारतयुद्धे धर्मबोधविनष्टस्य अर्जुनस्य धर्मबोधस्थापनं लक्ष्यते गीतोपदेशेन कृष्णेन। धर्मजयस्य प्राधान्यं *महाभारते* बहूत्र चिन्तयन्ति। गीताऽपि *महाभारतान्तर्गता*ऽस्ति तदाऽपि गीताशयसदृशाः श्लोकाः *महाभारते* अन्यत्र च बहवः श्लोकाः उपलभ्यन्ते।

### १.४ वैदिकचिन्ता गीतायाम्

प्राचीनभारतीयाः पञ्चमवेदत्वेन परिकल्पयति व्यासविरचितं *महाभारतम्*। यथा "महाभारतो नाम पञ्चमं वेद" इत्याद्याः उक्तयः महाभारत-पुराणादिषु बहुत्र लभ्यन्ते। *भागवत-विष्णुपुराणा*दिषु " इतिहासपुराणानि पञ्चमं वेद उच्यते [४३]। गीतायां वेदचिन्तायाः सारतत्वं प्राप्यते इति शाङ्करभाष्योपोद्घाते दृष्टं च उक्तं च आचार्यैः -" तद् इदं गीताशास्त्रं समस्तवेदार्थसारसङ्ग्रहभूतं दुर्विज्ञेयार्थं "[४४] ," द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च"।

किं च - "वेदानां सामवेदोऽस्मि देवानामस्मिवासवः "। १०.२२ ।[४५]

एवमेव -" बृहत्साम तथा साम्नां गायत्री छन्दसामहम्"। १०.३५।[४६]

इत्यादीनि गीतावाक्यानि च प्रत्यक्षे एव वेद सम्बन्धप्रदर्शनाय तथा शङ्कर-मध्व-रामानुजाचार्यादयः स्वभाष्येषु सर्वथा कृतीनां परमप्रमाणत्वं स्वीकृतमिति अस्य वेदप्रामाण्यं निदर्शयति। आस्तिकानां दार्शनिकानां परमप्रमाणं वेदाः एव, तेषां दर्शनानाम् आधुनिक परम्पराः गीता प्रमाणत्वेन स्वीक्रियन्ते इति अस्य प्राधान्यं प्रबलीकरोति। उपनिषद्चिन्तायाः सारूप्यं बहुत्र *भगवद्गीतायां* दृश्यते। *छान्दोग्योपनिषदि* दृष्टमानस्य महावाक्यस्य ' तत्त्वमसि ' इति वाक्यस्य आधारेण गीतायाः काण्डत्रयं कृतमिति पूर्वमेव चिन्तितवन्तः[४७]। एतदपि उपनिषद् गीतयोः दर्शनानां सामञ्चस्यं परिकल्पयति। एवं बहुत्र उपनिषत्विचाराः गीतायाः मार्गदर्शनमित्यतः अग्रे विचारयिष्यति। द्वितीयोऽध्यायस्य दशमश्लोकतः भाष्ये उपनिषदः

प्रामाण्यम् अधिकतया आविष्क्रियते, कुत्रचित् पुराणानां च साहाय्येन भाष्यमकरोत् शङ्करः। किन्तु मध्व-रामानुजौ स्वमतस्थापनाय अधिकतया पुराणादीनाम् एवं *भागवतादीनां* सिद्धान्तानां स्वरीत्या प्रतिपादनं भाष्येषु सर्वत्र कृतवन्तो इति अस्य प्रमाणस्य प्राधान्यमेव चित्रयति। मध्वः स्वीयभाष्ये *ऋग् अथर्वयजुः सामा*दीनां शाखानां प्रयोगः बहुत्र उपयुज्यते[४८]।

रामानुजस्तु *यजुर्वेद, शतपथब्राह्मणे, सामवेद, ऋग्वेदा*दीनां प्रयोगः कृतवान् स्वभाष्येषु। यज्ञसंस्कारादिषु विषयेषु गीताविचारस्य प्राधान्यं कल्पितमिति दृश्यते। षोडशाध्याये आचारादि विषयाणां विचारवेलायां गीताकारस्य प्रवचनवैचित्र्यं कुशाग्रत्वं प्रकटमेव। अतः शङ्करः स्वीयभाष्यारंम्भे गीता वेदार्थसारसंग्रहमिति चिन्ता परिकल्प्यते[४९]

## ४ .५ उपनिषद्विचिन्तनं गीताशास्त्रे

वेदानाम् अन्तः, सारः वेदान्तः अथवा वेदान्तो नामोपनिषत्प्रमाणं तदनुसारिणि शारीरकसूत्राणि च[५०]। उपनिषद्विचाराः गीतायां कियन्तः सन्ति इति अत्र विचिन्तयति। उपनिषद् गीतायाः अभेद्य सम्बन्धः वर्तते तत्वचिन्ताविषये।

| **उपनिषदः** | **भगवद्गीता** |
|---|---|
| छान्दोग्योपनिषद् | नासतो विद्यतो भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोर्तत्वदर्शिभिः।।२.१६। |
| छान्दोग्योपनिषद् | यं यं वापि स्मरन् भावं त्यजत्यन्त्यकलेवरम्। तं तं एवैति कौन्तेय सदा तद्भावभावितः।।८.६। |
| स्वर्गेलोकेनभयंकिञ्चनास्तिनतत्रत्वंनजरयाबिभेति।उभेतीर्त्वाअशनायापिपासेशोकातिगोमोदतेस्वर्गलोके॥१२॥ | ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति। एवं त्रयी धर्मम् अनुप्रपन्ना गतागतं कामकामा लभन्ते।।९.२१। |
| बृहदारण्यकोपनिषद् | ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते। ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्।।१३.१७। |
| श्रवणायापिबहुभिर्योनलभ्यःशृण्वन्तोऽपिबहवोयंनविद्युः।आश्चर्योवक्ताकुशलोऽस्यलब्धाआश्चर्योज्ञाताकुशलानुशिष्टः॥७॥ | आश्चर्यवद्पश्यति कश्चिदेनम्। आश्चर्यवद् वदति तथैव चान्यः।आश्चर्यवच्चैनमन्यः श्रृणोति। श्रुत्वाऽप्येनं वेद न चैव कश्चित्।।२.२९। |

| | |
|---|---|
| नजायतेम्रियतेवाविपश्चिन्नायंकुतश्चिन्नबभूवकश्चित्।अजोनित्यःशाश्वतोऽयंपुराणोनहन्यतेहन्यमानेशरीरे॥१८॥ | न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।२.२०। |
| इन्द्रियाणिहयानाहुर्विषयांस्तेषुगोचरान्।आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः॥४॥ | इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर् यो बद्धेः परतस्तु सः।।३.४२। |
| नतत्रसूर्योभातिनचन्द्रतारकंनेमाविद्युतोभान्तिकुतोऽयमग्निः।तमेवभान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभाति॥१५॥ | न तद् भासयते सूर्यो न शशाङ्को न पावकः। यद् गत्वा न निवर्तन्ते तद्धाम परमं मम।।१५.६। |
| ऊर्ध्वमूलोऽवाक्शाखएषोऽश्वत्थःसनातनः।तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते।तस्मिंल्लोकाःश्रिताःसर्वेतदुनात्येतिकश्चन।एतद्वैतत्॥१॥ | ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्। छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्।।१५.१। |

अत्र गीतासमानश्लोकाः उपनिषदि इति इत्यस्य पट्टिका/तालिका। उपरि विद्यते एवमेव श्लोकवत् उपनिषदः श्लोकांशः च बहुत्र गीतायां विद्यते। यथा – "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" (९/२१) इति *कठोपनिषदः* [५१] समानाशयश्लोकः। एवमेव पञ्चदशाध्यायस्य संसारवृक्ष वर्णना *कठोपनिषदि* च विद्यते[५२]। एवं द्वितीयाध्यायस्य ( ५६,५७) एते श्लोकाः तथा क्षेत्रक्षेत्रज्ञविचारश्लोकाः, क्षराक्षरविचारश्लोकाः च उपनिषद् सदृशाः देवयान-पितृयानविषये *बृहदारण्यक-छान्दोग्य*सदृशाः चिन्ताः गीतायामपि प्राप्यन्ते।आत्मस्वरुपविषये -

'न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणोन न हन्यते हन्यमाने शरीरे'।। २ २०।

नासतो विद्यते भावो नाभावो विद्यते सतः।

उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः'।२ १६। [53]

इत्यादीनां श्लोकानां समानचिन्ता *कठोपनिषदि* च विद्यते।

'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।

एवं त्रैधर्म्यमनुप्रपन्नागतगतं गतागतं कामकामा लभन्ते'। ९ .२१। [५४]

एतस्य गीताश्लोकस्य समानाः मन्त्राः *बृहदारण्यकोपनिषदि* च विद्यते।

'ज्योतिषामपि तज्जोतिस्तमः परमुच्यते।

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदिसर्वस्य विष्ठितम्'। १३ .१७। [५५]

'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।

विनाशमव्ययस्यास्यनकश्चित्तकर्तुमर्हति'। २. १७।[५६]

एतेषां गीताश्लोकानामपि समानचिन्ता *बृहदारण्यकोपनिषदि* वर्तते। एतस्मात् ज्ञायते यत् एतेषु सर्वेषु समानाः विषयः चर्चयति। एवमेव उपनिषदः शैली च संवादात्मिका शैली गीतायामपि दृश्यते। यथा गीतायाः -२/१६, ८/१६ एतौ श्लोकौ *छान्दोग्योपनिषदः* आशयसमानौ वर्तते। एवं १५/६ अस्य श्लोकस्य सदृशश्लोकाः *कठोपनिषदि, श्वेताश्वतरोपनिषदि* च कैश्चन भेदैः प्रतिपादितोऽस्ति। एवमेव अक्षरब्रह्मयोगे २३,२४,२५ श्लोकेषु [५७] विचारित देवयान-पितृयानविचार विषयौ *ब्रह्मसूत्रे* चतुर्थाध्याये २,३ पादेषु विचारयति। समानविषयमेव *छान्दोग्योपनिषदि* ५ अध्याये दशमखण्डीय श्लोकेषु द्रष्टुं शक्यते [५८]। ६/११ अस्य गीताश्लोकस्य[५९] सदृशः वर्तते *श्वेताश्वतरेयोपनिषदः*[६०] २/१० अयं मन्त्रः।

अनेकासु उपनिषत्सु गुरु शिष्यसंवादशैली अनुवर्तते। संवादशैल्यां प्रधानाः वर्तन्ते – *कठं, प्रश्न, बृहदारण्यक, छान्दोग्यादयाः* उपनिषदः। गीतायां स्वबान्धवम् अर्जुनं निमित्तीकृत्य कार्याणि उपदिशति। अत्राऽपि संवादात्मकशैली अनया शैल्या उपनिषद् दर्शनानि, स्पष्टयति गीता। उपनिषद् भिन्नाः नूतन विचाराः च प्रस्तौति गीतायाम्।

अन्यथा गीतायाम् अर्जुनविषादात् आरभ्य मोक्षसंन्यासे समापयति। एतयोः मिथः ज्ञान-कर्म-भक्त्यादयः विषयाः विचिन्तयति, विचारयति च गीतायाम् । एतादृशाः विषयाः

उपनिषदि च परिदृश्यन्ते। गौणविषयः अस्ति उपनिषदां भक्तिः। सा तु गीतायां वेदान्तेन कर्मयोगेन समन्वयति। किन्तु एषां समन्वयशैली गीतायामेव वर्तते। त्रिगुणात्मकरीत्या, वस्तूनां विभजने भोजनविषये च सुस्पष्टम् विशदयति गीता षोडशाध्याये आचाराणां प्रतिपादनं सम्यग्तया गीतातात्पर्यानुगुणं विशदयति। ज्ञानयोगस्य, कर्मयोगस्य च विशदीकृत्य प्रतिपादनम् अन्यासु बहुषुपनिषत्सु विद्यते। किन्तु गीतायाम् एतेषां समन्वयं क्रमीकृत्य दृश्यते। अतः गीतायामुक्तम् च –

'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्वं कर्मौखिलं पार्थ ज्ञाने परिसमाप्यते'। ४.३३।[६१]

एस् राधाकृष्णन् महोदयस्य मते "उपनिषदः मुख्यं तत्त्वमेव गीतायामिति"[६२]। "*छान्दोग्योपनिषदः* घोराङ्गिरसः शिष्यः देवकी पुत्रस्य कृष्णस्य सिद्धान्तमेव *महाभारते* हरिवंशे च वर्णितस्य कृष्णस्य जीवितेन समानः"[६३]। नरेन्द्रभूषण् महोदयस्याभिप्राये ज्योतिशास्त्रगणनानुगुणं *छान्दोग्यस्य शतपथब्राह्मणस्य महाभारतस्य* च एकः एव कालः इति अनुमीयते। गीतायाः त्रयोदशाध्याये "ब्रह्मसूत्रपदैश्चैव[६४] "इति पदेन *ब्रह्मसूत्रं* परिचाययति गीता। एवमुपनिषदः गद्यविषयाः पद्यात्मिक्या शैल्या वर्णितं गीतायाम्। उपनिषदानां तत्वानां संग्रहरुपेण आख्यायते गीता अतः शैल्यां द्वयोः मध्ये *कठोपनिषदः* मन्त्राणां साम्यम् अधिकतया गीतायां वर्तते। तथा च *छान्दोग्यं, बृहदारण्यकम्* इत्यादीनां च समानाशयाः विद्यते *भगवद्गीता*याम्।

## १ .६ प्रस्थानत्रयं भगवद्गीता च

*ब्रह्मसूत्रं, दशोपनिषदः, भगवद्गीता* च प्रस्थानत्रयमिति आख्यातमस्ति वेदस्य चतुर्भागाः वर्तन्ते भरतीयसिद्धान्तानुसारं ते तु संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् च अत्र प्रथमयुगलस्य (संहिता,ब्राह्मणौ) कर्मणि प्राधान्यं वर्तते। द्वितीयस्य तु ज्ञाने च।

तत्रान्तिमभागः चतुर्थभागः उपनिषद् वर्तते। "वेदशाखानुसारम् ११८० उपनिषदाः वर्तन्ते, तेषु प्राधान्ययुक्तम् १०८ इति च तत्र विशदयति" [६५]। किन्तु अद्य बह्यः शाखाः न प्राप्यन्ते वेदस्य संहिता विषये तथा च उपनिषद् विषये। तेषु उपनिषत्सु प्रधानाः वर्तन्ते १०८ संख्यात्मिकाः *मुक्तिकोपनिषदि* च एतेषु विषये परामृशन्ति। (*सनातनधर्मपरिचयम्* इत्यस्मिन् ग्रन्थे ११८० इति मुक्तिकोपनिषद् संख्या, एवं पतञ्जलि महर्षिणा ११३१ इति संख्या च प्रतिपादयति [६६]) एतासु दशोपनिषदाम् इतोऽपि महत् प्राधान्यं वर्तन्ते। तत्र च *माण्डूक्योपनिषदः* प्राधान्यादिकं वर्तन्ते। यथा -

'माण्डूक्यमेवालं मुमूक्षूणां तिथिक्षये (विमुक्तये)।

तथाप्यसिद्धं चेत् ज्ञानं दशोपनिषदं पठ'। [६७]।

इत्यादि श्रुतिप्रामाण्येन *माण्डूक्यस्य* एव व्याख्यानं कारिकारूपेण श्रीशङ्करभगवद्पादस्य परमगुरुणा गौडपादाचार्येण कृतमिति दृश्यते। तथा एतासां दशानां शङ्करभाष्यमपि उपलभ्यन्ते अतः दशोपनिषदां वेदान्ते प्राधान्यमस्त्येव। तस्मात् कारणात् प्रस्थानत्रयेषु अन्तर्भवति दशोपनिषदः एताः तु श्रुतिप्रस्थानमिति संज्ञया प्रसिद्धाः दशोपनिषत्सु उक्तं च - '*ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-ऐतरेय-तैत्तिरीय-छान्दोग्यं-बृहदारण्यकं* '

तथा। प्रस्थानत्रयेषु अपरप्रस्थानं सूत्रप्रस्थानम् इति विख्यातं *ब्रह्मसूत्रम्* एतानि सूत्राणि बादरायणेन विरचितानि इति मन्यते । ब्रह्मसूत्रे प्रायेण ५५५ सूत्राणि समन्वय-अविरोध-साधन-फलाध्यायैः विभक्तानि दृश्यते। एकैकेषु अध्यायेषु पादचतुष्टयञ्च वर्तते। तदा प्रतिपादे अधिकरणानि च वर्तन्ते। आहत्य ब्रह्मसूत्रे १६ पादाः, एवं १९१ अधिकरणानि च सन्ति।

श्रुतिप्रस्थानरूपेण *भगवद्गीता* च परिगणयति एतेषां त्रयाणां भाष्याणि उपलभ्यन्ते आचार्यत्रयाणाम्। तत्र प्रस्थानत्रयाणां मध्ये आशय ऐक्यं कुत्रचित् वैरुध्यं च दृश्यते। किन्तु प्रमाणत्वविषये परमसत्यविषये च एतेषां समन्वयमेव प्राप्यते। उपनिषदां, गीतायाः च सम्बन्धे

पूर्वमेव चिन्तितमस्माभिः वेदार्थसारसंग्रहः अस्ति *भगवद्गीता* इत्यतः प्रायेण उपनिषद् चिन्ताः भगवद्गीतायां तत्र तत्र साक्षात् परिवर्तनेन च दृश्यते। किन्तु भक्तिविषये दशोपनिषदां मौनं भजन्ते। अन्यत्र गीतायाम् भक्तेः महत् प्राधान्यम्। कर्म-ज्ञानानां भक्तियोगेन समञ्चसति गीता। अयं मार्गः उपनिषद् मार्गात् भिन्नः। ज्ञानयुक्तस्य कर्मयोगस्य वीक्षणमेव स्थापयति गीतायाम्। तत्र भक्तेः प्राधान्यम् अधिकं वर्तते। शास्त्रादीनां समन्वयमेव ब्रह्मसूत्रे लक्ष्यते।

अतः ब्रह्मसूत्र-गीतयोः सम्बन्धः अधिकः। तद्यथा -

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।

ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः। १३.४।[६८]

| **ब्रह्मसूत्रम्** | **भगवद्गीता** |
|---|---|
| स्मृतेश्च १.२.६ | ईश्वरः सर्वभूतानां हृद्देशोऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यंन्त्रारूढानि मायया।।१८.६१। |
| अपि च स्मर्यते १.३.२३ | न तद्भासयते सूर्यो न शशांको न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।।१५.६। |
| उपपद्यते चाप्यु २.१.३६ | न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा। अश्वत्थमेनं सुविरुढमूलमसंगशस्त्रेण दृढेन छित्वा।।१५. ३। |
| अपि च स्मर्यते २.३.४५ | ममैवांशो जीवलोके जीवभूतः सनातनः। मनः षष्ठाणानींद्रियाणि प्रकृतिस्थानि कर्षति।।१५.७। |
| दर्शयति चाथो ३.२.१७ | ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते।।१३.१२। |
| अनियमः सर्वासाम् ३.३.३१ | शुक्लकृष्णे गती ह्योते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः।।८.२६। |
| स्मरन्ति च ४.१.१० | शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।।६.११। |
| योगिन प्रति च ४.२.२१ | यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ।।८.२३। |

इति गीतावाक्ये ब्रह्मसूत्रपदस्य अस्य तात्पर्यस्य च गीतायाः सम्बन्धः अस्मान् बोधयति। इदमेव वाक्यं शङ्करः ब्रह्मप्रतिपादात्मकं श्रुतिवाक्यमिति व्याख्यायति। किन्तु मध्व-रामानुजादयः ब्रह्मसूत्रमेव अत्र लक्ष्यते इति सिद्धान्तयन्ति। अस्मात् विषयात् अन्यत् कार्यमपि ज्ञायते यत् ब्रह्मसूत्ररचनायाः परमेव भगवद्गीतायाः रचना अथवा *महाभारतस्य* रचना इति। किन्तु स्मृति इति ब्रह्मसूत्रप्रयोगं गीतादीनां विषये अस्तीति वदन्ति। अष्टौ सूत्राणि एतस्मिन् विषये चिन्तयन्ति। एवमेव अन्येषु बहुषु विषयेषु *ब्रह्मसूत्र-भगवद्गीतयोः* सादृश्यं दृश्यते। क्षेत्र-क्षेत्रज्ञविचाराः तत्र उदाहरणं ददाति। एतस्मात् ज्ञायते प्रस्थानत्रयेषु परस्परसम्बन्धः अस्तीत्येव अथवा एतानि प्रस्थानानि परस्परपूरकाणि। अथवा तत्वस्थापनाय श्रुतीनां स्मृतीनां च परस्परसाहाय्यं पश्चात् स्वीकृतमिति विचिन्तनीयः यतः शङ्कर-मध्व-रामानुजाचार्याणां भाष्यात् एवं ज्ञातुं प्रभवः। सैद्धान्तिकदृष्ट्या वेदान्तत्रयः भिन्नः चेदपि परस्पराश्रयणीयः एते इव प्रस्थानत्रयाणां विषये च।

### १.७ गीता वेदान्तत्रयश्च

शङ्कराचार्यस्य अद्वैतं, मध्वाचार्यस्य द्वैतं, रामानुजाचार्यस्य विशिष्टाद्वैतं च अत्र वेदान्तत्रयेण लक्ष्यते। सिद्धान्तत्रयमिति एतेषां नामान्तरं च वर्तते। एते त्रयः आचार्याः *भगवद्गीतायाः* व्याख्या स्वपक्षानुसारं कृता इति दृश्यते। एतेषां लक्ष्यन्तु न केवलं गीतायाः व्याख्या अपि च स्वमतसंस्थापनं च एतेषां लक्ष्यमासीत्।

वैदिकसाहित्ये ब्रह्मविद्या विषये योगशास्त्रस्य आधारः अयं गीताग्रन्थः। अतः गीताध्ययनमिति वैदिकाध्ययनमेव लक्ष्यते। अद्वैते अज्ञानस्य नाशनेन ज्ञानस्य प्राप्तिः तथा अन्तरात्मनः साक्षात्कारः च मोक्षेन परिरक्ष्यते। किन्तु द्वैत-विशिष्टाद्वैतेषु कर्मणा ईश्वरप्रसादेन मोक्षसिद्धिः संलक्ष्यते।

शङ्करमते जीवात्मा—परमात्मा च एकेव तथा त्रिकालाबाधितं सत्वं च ब्रह्मैव नामरुपात्मकम् इदं जगत् मिथ्या इति च। अतः अस्यां पद्धतौ निर्गुण- ब्रह्मोपासनायाः

प्राधान्यमस्ति। किन्तु द्वैतीनां जीवात्म-परमात्मा च भिन्नसत्ता वर्तते। अतः तेषां सगुणब्रह्मोपासनायाः प्राधान्यमस्ति। विशिष्टाद्वैते ईश्वरः, आत्मा, जगत् इति सत्वत्रयाः वर्तते। एवञ्च प्रकृतिः ईश्वरनियन्त्रणे, ईश्वरैव परमसत्वमिति तेषां मतम्। जगदपि सत्वमिति तेषामाशये। किन्तु द्वैते ब्रह्मसत्यं जगत् सत्यम् च जीवात्मा परमात्मा च पृथगिति। दार्शनिकतया वेदान्तमिति सामान्य नाम्ना प्रसिद्धम् एते त्रयः सिद्धान्तः। अद्वैतात्मके गीताभाष्ये उपोद्घाते श्रीशङ्कराचार्यः कथयति यत् ‘‘सर्वलोकानुग्रयार्थम् अर्जुनं निमित्तीकृत्य आह भगवान् वासुदेवः’’ इति[६९]। एतस्मात् वाक्यात् आरभ्य मोक्षमार्गपद्धतिः प्रदर्शयति शंङ्करः गीताभाष्ये अस्य मते ‘‘मोक्षस्तु सर्वकर्मसन्यासेन ज्ञानेन एव प्राप्तम् इति। अयमेव विषयः अस्य मते भगवान् अर्जुनाय उपदिशति’’[७०]। अतः कर्मवादीनां पूर्विकानां निरासः शंङ्करः भाष्ये तत्र तत्र करोति। शंङ्करमते ज्ञानादेव कैवल्यप्राप्तिः तथा च ज्ञानं प्राप्तः एकः स्वस्य पूर्वकर्मणां पापपुण्यादीनां क्षयपर्यन्तम् अत्र वसेत् इति भारतीय मोक्षशास्त्रसङ्कल्पः। यदा पापपुण्यादीनां क्षयः सम्भवति ज्ञानी मरणं च प्राप्यते। तदा तस्य निर्विकल्पसमाधिः। अयमेव सङ्कल्पः वेदान्तीनां मते दृश्यते। (यथेन्द्रजालमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति उक्तं च वेदान्तसारे- ‘‘स चक्षुरचक्षुरिव सकर्णोऽकर्ण इव ‘‘ इत्यादिश्रुतेः उक्तं च –

> सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः।
> तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः।। )

अतः निर्गुणब्रह्मोपासनायाः महत्प्राधान्यं शङ्करपक्षे वर्तते। रामानुजाचार्यः तु सगुणब्रह्मोपासनायाः प्राधान्यम् अधिकं ददाति च। ज्ञानं, कर्म, भक्तिः इत्यादि विषयः विशिष्टाद्वैतमते विचारयति चेदपि वासुदेवभक्तिः कर्मणः ज्ञानस्य च उत्पादकत्वेन तात्विकतया सङ्कल्पयति चेदपि व्यावहारिकपक्षे भक्तेः प्राधान्यं ददाति इति अनुभवः। एवं च अद्वैते सन्यासवत् प्राधान्यं प्रयच्छति विशिष्टाद्वैतकारः। अद्वैते ज्ञानकर्मसमुच्चयवादनिरासः

लक्ष्यते चेत् विशिष्टाद्वैते कर्मसन्यासात्मकेन कर्माचरणेन चित्तशुद्ध्या यथार्थज्ञानप्राप्तिः लभ्यते। तदा ब्रह्मजिज्ञासा आगच्छति। तदेव उक्त्वा अन्यथा यथा स प्रेम्णा वासुदेवभक्तौ विलीनस्य मोक्षप्राप्तिः सञ्जायते इति। तस्मात् वासुदेवभक्तिरेव यथार्थमोक्षस्य कारणमिति एतेषां मतम्। रामानुजपक्षे प्रकृतिः, क्षरात्मिका जीवात्मा तु अक्षरात्मिकः सर्वेषाम् आद्यन्तर्वर्ति। ईश्वरः पुरुषोत्तमः इति च सङ्कल्पेन प्रकृतेः जीवात्मनः च उपरि वर्तते ईश्वरः इति विशिष्टाद्वैतवादिनः चिन्तयन्ति। मध्वमते च भक्तिसिद्धान्तस्य अतिप्राधान्यं वर्तते। तथा जगत् सत्यम् ब्रह्म च सत्यम् एवं जीवात्मपरमात्मनोः द्वैतभावात्मको अस्य सङ्कल्पे अस्य सङ्कल्पे अस्य गीताभाष्ये केषाञ्चित् श्लोकानां व्याख्या च न दृश्यते। अद्वैतिनां निष्कामकर्मणः महत्वं ते विशदयन्ति चेदपि तत् तु केवलं साधनामात्रं भवति इति माध्वानां मतम्। तथा च भक्तिरेव एतेषां परमा निष्ठा भक्त्युपादानात् कर्मणः प्राधान्यमपि नास्ति, कृतं चेत्, अकृतं चेदपि। किन्तु गीतायां यथा –

'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः'।। ३/५।[७१]

एतादृशानां सङ्कल्पानां विरुद्धपक्षः एव अस्मिन् विषये माध्ववीक्षणे। एतेषाम् आचार्यत्रयाणां सङ्कल्पविषये इतोऽपि चिन्तनीयः। अतः अग्रिमेषु अध्यायेषु विषयाः इमे विचिन्तयामः।

### १. ८ भगवद्गीतायाः लक्ष्यम्

महाभरतयुद्धे स्वधर्मात् विगतम् अर्जुनं स्वकर्मणि नियोजनमिति लक्ष्यं साधितं श्रीकृष्णेन। एवम् अर्जुनं निमित्तीकृत्य लोकान् स्वधर्मे परियोजयितुम् उपदिष्टवान् श्रीकृष्णः इति आचार्यादीनां मतम्। कर्म-भक्ति-ज्ञानयोगादिना विविधानि तत्वानि आविष्करोति गीता। अस्यां गीतायां ७०० श्लोकाः अष्टादशाध्यायैः उपदिष्टाः। अर्जुन विषादयोगादारभ्य

मोक्षसंन्यासयोगपर्यन्तं *भगवद्गीता*ध्यायाः संज्ञिताः दृश्यन्ते। प्रथमे अर्जुनविषादयोगाध्याये अर्जुनस्य विषादान् युद्धान्तरीक्षं च चित्रयति। अनेन अस्मिन् विषये प्रस्थावना साधिता वर्तते। अतिप्राचीनाः भाष्याणि न दृश्यते *भगवद्गीतायाः*। किन्तु शङ्कराद् आरभ्य समकालीनाः च बहवः बहूनि ब्ख्यानानि भाष्याणि च रचितानि इति दृश्यन्ते। भाष्येषु प्रथमाध्यायेषु प्राधान्यं न दत्तमिति सामान्यानुभवः। किन्तु द्वितीयाध्याये भाष्यकाराः अपि ऊर्जितया रीत्या प्रवर्तन्ते। द्वितीयाध्याये एव कृष्णस्य उपदेशानि एव प्रारभ्यते। कर्म-भक्ति-ज्ञानयोगेन त्रिधा केचन गीतां विभक्ता इति दृश्यते। अन्यत्र तत् त्वम् असि इति वेदमहावाक्यानुसारं गीतां विभज्यते।

द्वितीयाध्यायस्य द्वादश श्लोकात् आरभ्य पञ्चविंशति पर्यन्ताः श्लोकाः आत्मनः नित्यत्वम् आत्मनः लक्षणम् इत्यादि विषयाः स्फुटयन्ति। परञ्च भागेषु स्वधर्मानुष्ठानेन कर्मणा, कथं चित्तशुद्धिः साध्यमिति च निरूपयति। अनन्तरम् अनुबन्धाः विषयाः प्रतिपादयन्ति। यथा कर्माधिकारि, कर्मफलं, निष्कामकर्मणः प्राधान्यम् अनेन चित्तशुद्धिः, शुद्धस्य मनसः आत्मानुभूतिः इत्यादयः विषयाः सांख्ययोगे द्वितीयाध्याये विचिन्तयन्ति। कर्मयोगमिति तृतीयाध्याये कर्मयोगस्य, कर्मसंन्यासस्य च अधिकारी कः इति सूचयति। निष्कामकर्मणः प्राधान्यम्, अनेन मनसः निर्मलत्वं, ज्ञानमार्गे दोषाः विषयाः, कर्मणः प्राधान्यम्, आत्माश्रयस्य प्राधान्यं, श्रेयसाधनादि विषयाः तृतीयाध्याये अर्जुनस्य संशयदूरीकरणर्थम् आह भगवान् कृष्णः। चतुर्थाध्याये कर्मसन्यासयोगे कर्मयोगात् श्रेयः मार्गः ज्ञानयोगमिति उपदिशति। धर्मस्य पुनःस्थापनं, चातुर्वर्ण्यस्य उत्पत्तिः, कर्म, विकर्म, अकर्म, कर्मयोगी, इत्यादयः विषयाः विचिन्तयति, अस्मिन्नध्याये तथा विद्वांसः लक्षणं, ज्ञानीकः यज्ञानां फलनिरुपणं तथान्ते ज्ञानेन सर्वेषां बन्धनानां मुक्तिः साध्यते इति च कृष्णः उपदिशति। पञ्चमाध्याये कर्मसंन्यासयोगे सन्यासकर्मणोः मध्ये किम् अर्जुनस्य श्रेष्ठः इति, तेषु विषयेषु अधिकारी कः, इति च उपदिशति। एवं तत्र आगतानां संशयनिवारणाय चित्तशुद्धेः कानि आवश्यकानि नवद्धारपुरस्य शरीरस्य तत्वं परमात्मनः स्वरुपं ब्रह्मजिज्ञासिनः

लक्षणं, जीवन्मुक्तानुभवम् अस्य प्राप्तिः कथम् इत्यादयः विषयाः विचिन्तयन्ति कर्मसन्यासयोगे अध्याये।

ध्यानयोगमिति षष्ठाध्याये निष्कामकर्मिणः संन्यासं, योगारूढस्य लक्षणं, समाधेः पूर्ववृत्तिः स्थिरनिष्ठितस्य लाभः समाधेः अध्यासः मनस्थायित्वस्य मार्गः योगभ्रष्टनिरुपणं, ज्ञानस्य फलम्, ब्रह्मज्ञानिनः श्रेष्ठत्वं च अस्मिन्नध्याये विद्यते। ज्ञानविज्ञानयोगमिति सप्तमेऽध्याये ज्ञानसम्पादनस्य विविधाः मार्गाः मोक्षप्राप्तिः कस्मै, परा-अपराप्रकृतयः, सत्वरागादिगुणाः, ज्ञानी स्वयमेव भगवत्स्वरूपः इति विचिन्त्य परमात्मनः वैशिष्ट्यम्, सगुणोपासनायाः फलं च उपदिशति अस्मिन् सप्तमाध्याये । अक्षरब्रह्मयोगम् इति अष्टमे अध्याये ब्रह्म, अध्यात्मादयः विषयः विशदयति अधिदैवम्, अधिभूतम्, अधियज्ञम्, इत्येतद् ज्ञात्वा ब्रह्मप्राप्तिः कथं साधयति, ब्रह्मोपासना, अस्य सिद्धिसाधनानि, ब्रह्मणः अहोरात्रादि वर्णनम्, परमात्मनः, शाश्वततत्वम्, उत्तरायण-दक्षिणायनमार्गाणां वैशिष्ट्यं च उपदिश्य सगुणब्रह्मोपासनायाः फलं निरूप्य अयमध्यायः परिसमाप्यते। राजविद्या-राजगुह्यमिति नवमे अध्याये ज्ञानस्य उत्कृष्टत्वं परमात्मनः वैशिष्ट्यम् उपासनायाः वैविध्यत्वं, स्वर्गप्राप्तेः पुनर्जन्म, ईश्वरार्पणं, ज्ञानस्य महिमा च विस्तरति अस्मिन्नध्याये। विभूतियोगमिति दशमाध्याये ज्ञनाधिकारि कः, भगवद् विभूतिः, वेदान्तश्रवणस्य प्राधान्यम्, भगवत्प्राधान्यविभूतेः विस्तरणं, तथा तस्य उपासकभेदानुसारं निरूपणं, मूढानाम् उपासनायाः विभ्रान्तिः परमात्मनः अंशः अयं लोकः इति निरूपणं च अस्य अध्यायस्य विषयाः। एकादशमे विश्वरूपदर्शनयोगे अध्याये तु विश्वरूपं प्रदर्शयति कृष्णः अर्जुनस्य प्रार्थनायाः ततः विश्वरूपस्य महिमानं विशदयति। कृष्णः तत्र अर्जुनस्य आश्चर्यादयः परिहरति च इयं विश्वरूपस्य प्राधान्यं तथा विष्णोः स्वरूपवर्णाना, सगुणनिर्गुणादयः च वर्ण्यते। भगवतः मत्स्वरूपस्य उपसंहाराय अर्जुनस्य प्रार्थना तथा भक्तिं चास्मिन्नध्याये विशदयति।

द्वादशाध्याये भक्तियोगे निर्गुण-सगुणोपासनायाः तथ्यं च विशदयति। एतस्याः उपासनायाः कृते चित्तशुद्धेः आवश्यकता, भगवत्प्रियानां लक्षणं च उपदिशति। त्रयोदशतमेऽध्याये क्षेत्र-क्षेत्रज्ञानां विषये विचिन्तयति। एवं प्रकृति पुरुषादीनाम् अनादित्वं, ब्रह्म आत्मा साधूकरणम्, अधिकारित्रयम्, आत्मज्ञानेन मुक्तिः ब्रह्मविदः ब्रह्मप्राप्तिः, क्षेत्रक्षत्रेज्ञज्ञानेन परमपदप्राप्तिः अनेन मार्गेण महत्पदप्राप्तिः च अस्मिन्नध्याये चित्रयति। चतुर्दशोऽध्याये श्रेयस्वरुपनिरुपणं, प्रकृतिः लोकमाता इति निरुपणं, परमात्मा-पिता इति निरुपणं, सत्यादि गुणानां जीवबन्धनं, सत्व-रज-तमो गुणस्वरुपम्, एतेषां गुणानां भेदेन का गतिः इति तथा गुणादीनां कर्मस्वरुपम् इति च अस्याध्यायस्य विषयाः अग्रिमः अध्यायः पुरुषोत्तमयोगः पञ्चदशाध्यायः संसारवक्षस्वरुपवर्णनया प्रारभ्यते। आत्मा इन्द्रियद्वारा विषयान् ज्ञायते इति विषयमुद्बोधयति अयमध्यायः। जठराग्नि वर्णना, कार्यकरणात्मकयोः क्षराक्षरपुरुषयोः स्वरुपनिरुपणम्, उत्तमपुरुषस्य प्रत्यगात्मनः स्वरुपं, परमात्मज्ञानफलं च अध्यायेऽस्मिन् वर्तते। दैवासुरसम्पद् विभूतियोगमिति षोडशेऽध्याये दैवीं-आसुरीं सम्पदानां गुणानां स्वभावानां च विचिन्तनं नरकद्वाराणां वर्णनं, शास्त्रस्य परमप्रामाणिकत्वम्, इत्यादयः विषयाः अत्र निरुप्यन्ते। परञ्च सप्तदशतमेऽध्याये आहारं, यज्ञम्, इत्यादीनां सत्वादिगुणभेदम्, आहारभेदान्, यज्ञभेदान्, तपसः, भिन्नभेदान् च, भिन्नस्तरान् च, कथयन्ति एवं दानभेदाः, ओंकारनिरुपणं च अस्याध्यायस्य विषयाः। अन्तिमे अध्याये मोक्षसन्यासयोगे सन्यासस्य त्यागस्य च अर्थः, यज्ञानां विवरणं, त्यागस्य भेदाः, कर्मनिर्वहणस्य पञ्चकारणानि, ज्ञानस्य महत्वं, ज्ञातज्ञानभेदः, कर्मभेदाः, कर्तृभेदाः, बुद्धेः भेदाः, धृतेः स्तराः, सुखानां निरुपणं, ब्राह्मणादि वर्णविभजनं, तेषां कर्म, ब्रह्मप्राप्तेः ईश्वरानुग्रहः, शाश्वतपदनिरुपणं, मोक्षेच्छुः वैशिष्ट्यम् इत्यादयः अस्याध्यायस्य विषयाः। कृष्णस्योपदेशात् बोधप्राप्तः अर्जुनः स्वयं ज्ञात्वा युद्धसन्नद्धः अस्तीति कृष्णं बोधयति। अन्ते अर्जुन-कृष्णयोः ऐक्येन विजयं सुनिश्चितमिति प्रेरणाश्लोकेन गीताशास्त्रं परिसमाप्तिं याति।

## १ .९ भगवद्गीता अन्यगीता च

भगवद्गीतासदृशाः गीताः मूलकृतौ महाभारते च बह्व्यः वर्तन्ते। "अश्वमेधपर्वणि गीतायाः सारं पुनरपि ज्ञातुमिच्छतीति अर्जुनस्य अपेक्षायाः उत्तरमस्ति अनुगीता। अन्यत्र वनपर्वणि व्याधस्योपदेशः कौशिकब्राह्मणाय व्याधगीता इति प्रसिद्धम्। एवं कृष्णार्जुनसंवादात्मिका उत्तरगीता, कृष्ण-उद्धवयोः मिथः उद्धवगीता, अवधूतगीता, अष्टावक्रगीतादयः अन्याः गीताः महाभारते उपलभ्यन्ते"[७२] । एवमेव विदुरनीतिः, सनत्सुजातीयम् अनुगीता इत्यादि तत्वोपदेशग्रन्थाः भवन्ति। तेषु विदुरनीतिः उद्योगपर्वणि ३३ आरभ्य ४० पर्यन्ताध्यायाः, सनत्सुजातीयमपि उद्योगपर्वणि ४१ तः ४६ पर्यन्ताध्यायाः, अनुगीता आश्वमेधिकपर्वणि १६ आरभ्य ५१ पर्यन्तं च वर्तते। संस्कृतभाषायां बह्व्यः गीताः स्वतन्त्ररूपेण एवं ग्रन्थान्तर्गतेन च पुराण-इतिहासादिषु उपलभ्यन्ते। तासां गीतानां सूचनासंग्रहः अत्र प्रदर्शयति।

### १.९.१ ईश्वरगीता व्यासगीता च

"कूर्मपुराणे उत्तरार्धे एकादशाध्यायतः ईश्वरगीता इति व्यवह्रियन्ते"। अस्यां गीतायाम् ऋषि व्याससंवादरूपेण विषयान् प्रस्तौति पुराणकारः[७३]। भगवद्गीतावत् अध्यायानां परिचयः अध्यायान्ते वर्तते। अस्यामपि " गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे " इति अत्र। "कूर्मपुराणे एव उत्तरार्धे द्वादशाध्यायतः षट् चत्वारिंशत्यध्यायपर्यन्तं व्यासगीता "इति[७४] अत्र सूचयति अस्याम् अध्यायस्य प्रकरणमिति नाम। श्रौतकर्मविषर्ये, दानविषयेषु, प्रपञ्चवर्णनायां च इयं गीता उपकारिणी।

### १.९.२ देवीगीता

"*श्रीमद्देवीभागवते* सप्तमस्कन्धे एकत्रिंशत् आरभ्य चत्वारिंशत् परम् अध्यायेषु व्यास-देवी संवादात्मिका" गीताऽस्ति[७५] *देवीगीता*।

### १.९.३ ब्रह्मगीता

" *गरुडपुराणे* २१९ तमे अध्याये संवर्तिताः षट्त्रिंशत्श्लोकाः *ब्रह्मगीता* इति नाम्ना[७६] "व्यवह्रियन्ते। भगवान् -ब्रह्मणोः मिथः संवादः *ब्रह्मगीता* इति भणति।

### १.९.४ वसिष्ठगीता

भारतीय दार्शनिक मण्डले प्रमुखस्थानमलङ्करोति *वसिष्ठगीता*। ग्रन्थस्याऽस्य उपज्ञाता वाल्मीकि महर्षिः इति प्रसिद्धिः। अस्यां षट्सु प्रकरणेषु २९२८९ श्लोकानि च वर्तन्ते। *भगवद्गीतायां* भगवता अर्जुनं निमित्तीकृत्य उपदेशः" चेत् *वसिष्ठगीता* श्रीरामं निमित्तीकृत्य वसिष्ठेन[७७] उपदिष्टा"। तत् श्रुत्वा वाल्मीकिः स्वशिष्यं भरद्वाजम् इयम् उपदिदेश। अस्यां वैराग्यप्रकरणे ११४६ श्लोकाः, मुमुक्षुव्यवहारप्रकरणे ८०७ श्लोकाः, उत्पत्तिप्रकरणे ६३०४श्लोकाः, स्थितिप्रकरणे २४१४श्लोकाः, उपशमप्रकरणे ४३२२श्लोकाः, निर्वाणप्रकरणे १४२९६ श्लोकाः च सन्ति । श्लोकानां संख्याविषये मतभेदाः वर्तन्ते । ग्रन्थोऽयं इक्ष्वाकुवंशशराज्ञः रामस्य तद्गुरोः वसिष्ठस्य च वादप्रतिवादरुपेण वेदान्तविषयान् प्रतिपाद्यते ।

### १.९.५ अष्टावक्रगीता

"*महाभारते* आरण्यपर्वणि अर्जुनस्य तीर्थयात्रावसरे १३२-१३४ अध्यायाः *अष्टावक्रगीता* इति नाम्ना" [78] प्रसिद्धम्। अस्य प्रतिपाद्यन्तु अष्टावक्रमुनि-जनकमहाराज्ञोर्मिथःसंवादरूपेण वर्तते। अष्टावक्रमुनिमधिकृत्य विष्णुपुराणे, रामायणे च परामर्शाः दृश्यन्ते। अस्यां २० अध्यायानि सन्ति, *अष्टावक्रसंहिता* इति अपरनाम्ना च इयं प्रथिता।अस्यामात्मनः स्वरूपादिकं एवम् अद्वैततत्वानि च विचार्यन्ते यथा –

"ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवम्।
अज्ञानाद् भाति यत्रेदं सोऽहमस्मि निरञ्जनः।।"[79]

### १.९.६ हंसगीता, भिक्षुगीता, कपिलगीता च

" *श्रीमद्भागवतपुराणे* एकादशस्कन्धे त्रयोदशाध्याये वर्तते *हंसगीता* "[80]। उद्धव-कृष्णयोः संवादरूपे अस्यां गीतायां द्विचत्वारिंशत् श्लोकाः वर्तन्ते। आत्मनः विषये प्रतिपादयति गीता एषा।' *भागवतपुराणे* एकादशस्कन्धे एव त्रयोविंशति तमे अध्याये द्विषष्ठिः श्लोकाः *भिक्षुगीता* 'इति व्यवह्रीयते[८१]। अत्राऽपि कृष्ण-उद्धव संवादरूपश्लोकाः विद्यन्ते।" *श्रीमद्भागवते* तृतीयस्कन्धान्तर्गतं (२३-३३) भवति कपिलगीता[८२] इयं गीता" । अष्टसु अध्यायेषु शौनक, सूतः, मैत्रेयः, देवहूतिः, श्रीभगवता इत्यादयः विषयाः विवृणोति ।

### १.९.७ यमगीता

"*विष्णुपुराणे* तृतीयांशे सप्तमाध्याये नवविंशति श्लोकाः *यमगीता* इति" प्रसिद्धा[८३]। मैत्रेयी-पराशर-भीष्म-कपिल-यमादीनां मिथः संवादः *यमगीता* इति प्रसिद्धम्। *यमगीता* इति नाम्ना एव *योगवासिष्ठे* उत्तरार्धे १७३ तः १८१ पर्यन्ताः अध्यायाः प्राप्यन्ते।

अन्याः गीताः *शिवगीता, गणेशगीता, ईश्वरगीता, हारीतगीता, सूर्यगीता, सरस्वतीगीता, सरलगीता, शौनकगीता, शिवगीता, शम्पाकगीता, व्यासगीता, विचख्युगीता, वामदेवगीता, वानरगीता, रुद्रगीता, याज्ञवल्क्यगीता, मङ्किगीता, पराशरगीता, व्याधगीता, गुरुगीता, उद्धवगीता, पाण्डवगीता, भिक्षुगीता* एवं बहवः गीताख्या ग्रन्थाः उपलभ्यन्ते। अत्र *शिवगीतायाम् ईश्वरगीतायां* च *भगवद्गीता* सदृशश्लोकाः बहुत्र उपलभ्यन्ते।

### १.१० भगवद्गीतायाः घटनात्मकं वैशिष्ट्यम्

*भगवद्गीतायाम्* अनुष्टुप्, आर्यादयः छन्दांसि दृश्यन्ते। तत्रापि अधिकाः अत्र अनुष्टुप् छन्दसि श्लोकाः। ६४५ श्लोकाः अनुष्टुप् छन्दसि स्थीयते। एवमेव इन्द्रवज्र, उपेन्द्रवज्र, उपजाति। एकादशाध्याये पञ्चदशतः पञ्चाशत् पर्यन्ताः श्लोकाः त्रिष्टुप् छन्दसि वर्तते। अत्र प्राचीन भाष्यकाराः स्वतूलिकां न उपयुज्यन्ते। परन्तु रामानुजाचार्यः केचन

श्लोकाः अत्र व्याख्यानाय स्वीकरेति । **भगवद्गीतायाः धृतराष्ट्रस्य, सञ्जयस्य, अर्जुनस्य, श्रीकृष्णस्य, च उक्तानां श्लोकानां संख्या अत्र प्रदर्श्यते-**

| अध्यायं | धृतराष्ट्रः | सञ्जयः | अर्जुनः | श्रीकृष्णः | आहत्य |
|---|---|---|---|---|---|
| १ | १ | २५ | २१ | ० | ४७ |
| २ | | ३ | ६ | ६३ | ७२ |
| ३ | | ० | ३ | ४० | ४३ |
| ४ | | ० | १ | ४१ | ४२ |
| ५ | | ० | १ | २८ | २९ |
| ६ | | ० | ५ | ४२ | ४७ |
| ७ | | ० | ० | ३० | ३० |
| ८ | | ० | २ | २६ | २८ |
| ९ | | ० | ० | ३४ | ३४ |
| १० | | ० | ७ | ३५ | ४२ |
| ११ | | ८ | ३३ | १४ | ५५ |
| १२ | | ० | १ | १९ | २० |
| १३ | | ० | (१) | ३४ | ३४ (३५) |
| १४ | | ० | १ | २६ | २७ |
| १५ | | ० | ० | २० | २० |
| १६ | | ० | ० | २४ | २४ |
| १७ | | ० | १ | २७ | २८ |
| १८ | | ५ | २ | ७१ | ७८ |
| च्र्दृघङ्ठ | १ | ४१ | ८४(८५) | ५७४ | ७००(७०१) |

अष्टादशाध्यायैः सप्तशतश्लोकैः विषयान् विस्तारयति *भगवद्गीतायां* व्यासः। केचित् एकोत्तरसप्तशतं श्लोकाः वर्तन्ते इति चिन्तयन्ति[८४]। अधुना *भगवद्गीतायाः* अध्यायाः प्रत्येकं नाम्ना उपलभ्यते। तस्मात् अष्टादशनामानि अध्यायानां वर्तन्ते[८५]। अष्टादशाध्यायेषु बृहत्तमः अष्टसप्ततिश्लोकैः परिलसति अष्टादशाध्यायः। लघुतमस्तु द्वादश पञ्चदशश्च अध्यायः-विंशति श्लोकसंख्या। धृतराष्ट्रप्रश्नेन आरभ्यते गीता। एक एव धृतराष्ट्रस्य प्रश्नः। अस्य प्रश्नस्य उत्तररूपेण सञ्जयः कुरुक्षेत्रस्य युद्धसंभवं विशदयति। अत्र सञ्जयस्य एकचत्वारिंशत् श्लोकाः वर्तन्ते। अर्जुनस्य समस्यायाः परिहारः गीतया प्राप्यते तत्र अर्जुनस्यैव श्लोकसंख्या चतुरश्शीतिः(८४), कृष्णस्य चतुःसप्तत्युत्तरपञ्चशतं ( ५७४) श्लोकाः वर्तन्ते। *भगवद्गीतायाः*

एते श्लोकाः एव कृष्णगीता, हरिगीता, अथवा *भगवद्गीता* [८६] । गीतायाः सप्तशतश्लोकसंख्या(७००) पक्षीयाः भवन्ति शङ्कराचार्यः, रामानुजाचार्यः, ज्ञानेश्वरः बालगंगाधरतिलकः इत्यादयः। सप्तशताधिकेकमिति (७०१) पक्षीयाः श्रीमध्वाचार्याः चिन्मयानन्दादयश्च। अधिकः एकश्लोक त्रयोदशाध्याये क्षेत्रक्षेत्रज्ञविभागयोगेऽस्ति। यथा-

" प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च।

एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव।। १३.१। "[८७]

अयं श्लोकः त्रयोदशाध्यायस्य प्रथमश्लोकः इति मध्वाचार्यः, एस्. राधाकृष्णन्, चिन्मयानन्दादीनां व्याख्याकाराणां वादः[८८] । अस्य वादस्य साङ्गत्यं तु गीता अर्जुनस्य शङ्कायाः निवारणार्थम् उपदिशति इत्यस्मात् अर्जुनस्य प्रश्नोत्तररूपेण कृष्णः विषयं प्रस्तौति गीतायाम्। इत्यतः क्षेत्र-क्षेत्रज्ञयोगे अर्जुनस्य प्रश्नः अयं श्लोकः। अतः अस्य श्लोकस्य प्राधान्यमस्त्येव। अष्टादशाध्यायेषु बृहत्तमः अध्यायः अन्तिमाध्यायमेव, अस्याम् अष्टसप्ततिः (७८) श्लोकाः सन्ति। लघुतमाध्यायः द्वादश(१२), पञ्चदशाध्यायाः(१५), तत्र विंशति(२०) श्लोकाः तेषु अन्तर्गतम्। प्रथमाध्याये भगवता एकश्लोकमपि न उक्तम्। ७,९.१३,१५,१६ अध्यायेषु अर्जुन प्रश्नोऽपि नास्ति च। तस्यार्जुनस्य धर्माधर्मविवेचनाभावः गीतोपदेशस्य कारणम्। उपदेशः द्वितीयाध्याये प्रारभ्यते। अतः अर्जुनस्य प्रश्नं विना कृष्णस्य उत्तरमपि न भवेत्। अर्जुनसंशयस्य विवरणमत्र कृष्णस्य गीता। संशयाभावे गीतायाः अभावः भवेत् इत्यस्मात् अर्जुनस्य प्रश्नस्य प्राधान्यमपि गीतायां वर्तते। तद् साहित्यरूपेण, तात्विकतया च अर्जुनस्य संशयाभावे क्षेत्रक्षेत्रज्ञयोगस्य उपदेशः नावश्यकः अतः अर्जुनप्रश्नः अत्र संङ्गतः

शैल्या अत्र। भाष्ययोर्मध्ये अध्यायानां नाम विषये च मत भेदानि सन्ति यथा-

| गूढार्थदीपिकानुसारेण | | | |
|---|---|---|---|
| (१) कर्मकाण्डम् | | | |
| | | श्रीधराचार्यकृत सुबोधिनी व्याख्या | |
| (१) अर्जुनविषादयोगः | अर्जुनविषादयोगः | अर्जुनविषादयोगः | अर्जुनविषादयोगः |
| (२) सांख्ययोगः | सांख्ययोगः | सांख्ययोगः | सांख्ययोगः |
| (३) कर्मयोगः | कर्मयोगः | कर्मयोगः | कर्मयोगः |
| (४) ब्रह्मार्पणयोगः | ज्ञानकर्मसन्यासयोगं | ज्ञानकर्मसन्यासयोगं | कर्मब्रह्मार्पणयोगः |
| (५) कर्मसन्यासयोगः | सन्यासयोगं | कर्मसन्यासप्रकृतियोगः | सन्यासयोगं |
| (६) आत्मसंयमयोगः | आत्मसंयमयोगः | आत्मसंयमयोगः | अभ्यासयोगः |
| (२) उपासनाकाण्डम् | | | |
| (७) ज्ञानयोगः | ज्ञानविज्ञानयोगः | ज्ञानविज्ञानयोगः | ज्ञानयोगः |
| (८) अक्षरब्रह्मयोगः | अक्षरपर ब्रह्मयोगः | महापुरुषयोगः | अक्षरब्रह्मयोगः |
| (९) राजविद्याराजगुह्ययोगः | राजविद्याराजगुह्ययोगः | राजविद्याराजगुह्ययोगः | अध्यात्मयोगः |
| (१०) विभूतियोगः | विभूतियोगः | विभूतियोगः | विभूतियोगः |
| (११) विश्वरूपदर्शनयोगः | विश्वरूपदर्शनयोगः | विश्वरूपदर्शनयोगः | विश्वरूपदर्शनयोगः |
| (१२) भक्तियोगः | भक्तियोगः | भक्तियोगः | भक्तियोगः |
| (३) ज्ञानकाण्डम् | | | |
| (१३) क्षेत्रक्षेत्रज्ञविभागयोगः | क्षेत्रक्षेत्रज्ञविभागयोगः | क्षेत्रक्षेत्रज्ञविभागयोगः | क्षेत्रक्षेत्रज्ञविभागयोगः |
| (१४) गुणत्रयविभागयोगः | गुणत्रयविभागयोगः | गुणातीतयोगः | गुणत्रयविभागयोगः |
| (१५) पुरुषोत्तमयोगः | पुरुषोत्तमयोगः | पुरुषोत्तमयोगः | पुरुषोत्तमयोगः |
| (१६) दैवासुरसम्पद्धिभागयोगः | दैवासुरसम्पद्धिभागयोगः | दैवासुरसम्पद्धिभागयोगः | दैवासुरसम्पद्धिभागयोगः |
| (१७) श्रद्धात्रयविभागयोगः | श्रद्धात्रयविभागयोगः | श्रद्धात्रयविभागयोगः | श्रद्धात्रयविभागयोगः |
| (१८) मोक्षसंन्यासयोगः | मोक्षसंन्यासयोगः | मोक्षसंन्यासयोगः | मोक्षसंन्यासयोगः |

भगवद्गीता समग्रं संवादात्मिका वर्तते। महाभारतस्य अन्येषु अध्यायेष्वपि संवादरुपात्मकः भागाः दृश्यन्ते। किन्तु गीतासदृशः दीर्घसंवादः कुत्रापि नास्ति। भिन्नविषयेषु वर्तमानानां संशयनाशाय दूरीकरणम् अत्र कृष्णेन क्रियते। अर्जुनविषादयोगादारभ्य

मोक्षसन्यासयोगं यदा प्राप्यते तदा संशयविनाशयुक्तः कर्तव्यबोधयुक्तः अर्जुनः प्रदर्शयति भगवद्गीतायाः रचनया गीताव्याख्यातारः प्रमुखाः प्रथमाध्यायस्य नाधिकं व्याख्याः अरचयन्। तत्र भिन्नः प्रधानञ्च शङ्कराचार्यस्य उपोद्घातभाष्यम्। उपोद्घातभाष्ये गीतायाः विशेषणः- समस्तवेदार्थसारसंग्रहः इत्यस्य महत्वम् [८९] उद्घोषयति । किं च दुर्विज्ञेयार्थमिति [९०] अस्य ग्रन्थस्य अर्थव्याप्तिं च ज्ञापयति शङ्करः। प्रथमाध्याये अर्जुनस्य एकपक्षीयसम्भाषणः वर्तते। अत्र कृष्णस्य वाक्यं रथं सेनयोः उभयोर्मध्ये संस्थाप्य यथा– पार्थ पश्यैतान् समवेतान् कुरून् इत्येव वर्तते। युद्धाय ये आगताः इति ज्ञात्वा युद्धं करिष्यतीति अर्जुनस्य बलहीनत्वम् एव प्रदर्शयति। आत्मविश्वासस्य लक्ष्ये दृढतायाः च अभावमत्र अर्जुने दरीदृश्यते। विजयमीक्षितः अर्जुनः युद्धस्यकारणं दुर्योधनः एवास्तीति कथयति। एतद् अर्जुनस्य स्वपक्षन्यायीकरणं वर्तते। अत्र व्याख्यानाय स्वीकरोति। अर्जुनस्य भावः अत्राचार्यस्य विषयः।

### १.१०.१ गीता काण्डत्रयात्मिका

अष्टादशाध्यायत्वात् षट्काध्यायरुपेण भगवद्गीतायां काण्डत्रयेण केचन व्याख्याकाराः कथयन्ति। मधुसूदनसरस्वति इत्यादयः एवं भगवद्गीतायाः काण्डत्रयं कथयन्ति [९१] । तत्र प्रथम षट् अध्यायाः कर्मकाण्डेन, पुनः षट् अध्यायाः भक्तिकाण्डेन अथवा उपासनाकाण्डेन अन्ते षट्काः ज्ञानकाण्डेन च विभक्तमस्ति।

सच्चिदानन्दरूपं तत्पूर्णं विष्णोः  परं पदम्।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः।।
कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात्।
तद्रूपाष्टादशाध्याय्या गीता काण्डत्रयात्मिका।। [92]

अथवा महावाक्येषु एकस्य “ तत्वमसि “ इति महावाक्यस्य बलेन काण्डत्रयेण विभज्यते। अत्र तत् पदेन परमात्मानं, त्वं पदेन जीवात्मानम्, असि इति पदेन

जीवब्रह्मैक्यञ्च लक्ष्यते अद्वैतिनः। तत्र प्रधानव्याख्याकारः मधुसूदन सरस्वतिकृते [९३] गूढार्थदीपिकायाम् विशदयति । अस्मिन् विभजने स्वस्वविप्रतिपत्तिः उद्घोषयति तिलकः स्वगीता व्याख्याने। अद्वैतपक्षीयानां वीक्षणे त्वं पदस्य कर्ममार्गः प्रथमकाण्डः [९४], तत्पदेन परमात्मानः स्वरुपं द्वितीय काण्डे[९५], भक्तिकाण्डे असि इति पदस्य जीवात्म-परमात्मयोरैक्यं तृतीयकाण्डे[९६] ज्ञानकाण्डे च वर्ण्यते।

अत्र प्रथमकाण्डे प्रथमाध्याये तृतीयाध्याये च कर्मविषयस्य प्राधान्यं सम्यक् सुचिन्तितं तस्मात् इदं काण्डं कर्मकाण्डः इति सुष्टुः विभजनं वर्तते। किन्तु द्वितीयाध्याये, ज्ञानविषये सम्यक् विदितं वर्तते। तथा च अध्यायोऽयं कृष्णस्य उपदेशस्य प्रवेशिका वर्तते तस्मात् *भगवद्गीतायाः* सम्पूर्णं दर्शनम् अत्र संग्रहेण सूचितं वर्तते। चतुर्थाध्याये गुणकर्मादीनां विभागस्य प्राधान्यम् अधिकं वर्तते। तथा कर्मब्रह्मार्पणयोगः इति अस्याध्यायस्य नाम[९७]। अतः अस्यापि तात्पर्यं कर्मणि वर्तते। पञ्चमाध्याये द्वितीयश्लोके कर्मसन्यासस्य विशेषत्वं कल्पयति। अतः अत्रापि कर्मणः प्राधान्यं वर्तते। षष्ठोऽध्यायः सन्यासमेव योगमिति प्रचक्षते। योगेच्छुः मुनेः लक्ष्यमार्गः कर्म एव इति अस्मिन् अध्याये तृतीयश्लोके उपवर्ण्यते। अत्रापि कर्म्मणः प्राधान्यम् अस्त्येव। सप्तमे ईश्वराश्रयत्वम् (७.१ ), अष्टमे उपासकत्वम् (८.९), नवमे भगवदुपासना (९.१४), दशमे परमेश्वरभजनं(१०.८,९ ), एकादशतमे भगवतः विश्वरूपम् (११.९) अनेन सगुणभक्त्या द्वादशे निर्गुणोपासकानां (१२.१) विषयाः संगृह्यन्ते। तस्मात् इदम् उपासनाकाण्डम् अथवा भक्तिकाण्डम् इति सुव्यक्तमस्ति।

गीतायाः उपसंहारं तृतीयकाण्डेन साधयति। अद्वैतसिद्धान्ते ज्ञानस्यैव प्राधान्यमस्ति अतः स्वरुपज्ञानेन मोक्षपदं प्रदर्शयति त्रयोदशाध्यायः। अत्र क्षेत्रं शरीरं क्षेत्रज्ञः आत्मा च। चतुर्दशाध्याये (१४.२२ ) गुणत्रयाणां स्वरुपं लक्षणादिकं वर्णयित्वा गुणातीतज्ञानं प्रदर्शयति। पञ्चदशाध्याये अस्य जगतः स्वरुपं विचिन्त्य परमात्मज्ञानस्य (१५.१९) फलं निरुपयति। षोडशे दैवी आसुरिकानां स्वरुपानुसन्धानेन आत्मज्ञानी निर्दोषयुक्तेन मुक्तिं प्राप्तव्यमिति इति

(१६.२२) निरूपयति। सप्तदशे गुणत्रयानुसारं तपः आहारादीनां निरूपणेन (१७.२५) तत्पदस्य ब्रह्मपदस्य ज्ञानं प्रयच्छति। अन्तिमे अष्टादशाध्याये सात्विकादि गुणातीनां त्यागेन ज्ञानशास्त्रस्य प्राधान्यं (१८.६९) प्रदर्शयति अतः काण्डमिदं ज्ञानयोगे वर्तते।

### १.११ भगवद्गीतायाः व्याख्यानानि

भिन्नाः भाष्यकर्तारः भिन्नाः व्याख्याताराश्च गीतां स्वस्वसिद्धान्तानुसारं व्याख्यायन्ति। श्लोकः इत्यस्य अनुवादः ओवि इति अस्ति ज्ञानेश्वरस्य भाष्ये। लभ्यमाणेषु प्राचीनेषु व्याख्यानेषु शंङ्करभाष्यमेव प्रचारे अग्रे तिष्ठति। सः तु प्रवृत्ति-निवृत्तिलक्षणात्मकं भाष्यं *भगवद्गीतायाः* अरचयत्। ज्ञान-कर्मसमुच्चयवादनिरासः एवं स्वमतस्थापनं च शंङ्करस्य मतम्[९८]। तत्तु तृतीयाध्याये सुष्ठु कृतं शङ्करेण। शङ्करभाष्ये ज्ञानयोगस्य प्राधान्यमधिकं वर्तते। अतः अयमाचार्यः उपोद्घातभाष्यस्य अनन्तरं केवलं द्वितीयाध्यायस्य दशमश्लोकतः एव भाष्यं पुनरारब्धवान्। एवमस्य व्याख्याने प्रामाणिकग्रन्थाः उपनिषदादयः अधिकाः उपयुज्यन्ते। तथा च लौकिकोदाहरणानि तत्र तत्र परियोजयति आचार्योऽयम्। एवं स्वसिद्धान्तानुकूलाः श्लोकाः सुष्टुः व्याख्यायति शंङ्करभगवद्पादः[९९]। एतेभ्यः श्लोकेभ्यः ज्ञानेनैव मोक्षयोग्यता लभ्यते इति सिद्धान्तिता अनेनाचार्येण गीतायाम्।

विशिष्टाद्वैतदृष्ट्या रामानुजाचार्यः गीतायाः स्वमतानुसारं व्याख्यानं चकार। अद्वैतिनाम् अद्वैतं मायावादं च त्याज्यमिति अस्य पक्षः। ईश्वरस्य शरीरं जीवः जगत् च जीवात् भिन्नः इति अस्याभिप्रायः जीवस्य जगतश्च विशिष्टचैतन्यमस्तीति एतेषां मतम्। ईश्वरः एकः एव ईश्वरशरीरात् अन्यानि चैतन्यानि उद्भवन्तीति एतेषां सिद्धान्तः। यद्यपि अद्वैतस्य सन्यासे प्राधान्यं तथापि अत्र भक्तिविषये प्राधान्यं कल्पयति। अस्य आशयानुसारं भक्तिरेव गरीयसि, भक्तिरेव कर्तव्यमिति। अतः अस्य कर्मसन्यासविशिष्टमिति मतसंज्ञा प्रेच्छति केचन[१००]। शंङ्करापेक्षया अयं गीतायाः सर्वेषां श्लोकानां कृते व्याख्यानमरचयत्।

मध्वाचार्यस्य द्वैतसिद्धान्तं गीतायाः निष्कामकर्मफलस्य साधना चित्रयति। भक्तिरेव परमनिष्ठा इति एतेषां सङ्कल्पः। निष्ठया कर्मो क्षीयते भक्तिविषयेषु निष्कामकर्म एव श्रेष्ठमित्यपि एते सिद्धान्तयन्ति। अस्य भाष्ये तु बहूनां श्लोकानां विस्तृतं भाष्यं विना अग्रे सरति। त्रयोदशाध्यायस्य अधिकश्लोकस्य, प्रथमश्लोकस्य स्वीकरणम् अनेन कृतमिति दृश्यते। आचार्यत्रयेषु एष एव अस्य श्लोकस्य स्वीकारः कृतः। अस्य *भगवद्गीतायाः* व्याख्यानद्वयं वर्तते *गीताभाष्यं, गीतातात्पर्यं* च। द्वयोरपि पुराणादीनां प्राधान्यं प्रमाणत्वेन अधिकं वर्तते। एतेषु भिन्नः पैशाचीभाष्यं गीतायाः। हनुमान् पण्डिट्ट् इति भागवतव्याख्याता अस्य[१०१] कर्ता। सन्यासमार्गावलम्बितं भाष्यमिदं कुत्रचित् शंङ्करभाष्येण सादृश्यमवलम्ब्यते।

शुद्धाद्वैतसिद्धान्ताचार्यः वल्लभः, निम्बार्कः, च *भगवद्गीतायाः* भाष्यं चकार। केशवकाश्मीरभट्टस्य तत्वप्रकाशिका नाम निम्बार्कमतानुसारं भाष्यं वर्तते। शङ्करभाष्यस्य आनन्दगिरेः, मधुसूदनसरस्वत्याः व्याख्यानमूपलभ्यते। रामानुजभाष्यस्य वेङ्कटनाथस्य, मध्वभाष्यस्य जयतीर्थस्य व्याख्यानं च वर्तते। पैशाचीभाष्यस्य वेङकटनाथस्य तत्वदीपिकायाः पुरुषोत्तमस्य, यामुनमुनेः *गीतार्थसंग्रहस्य* वेग्ङटनाथस्य व्याख्या च प्राचीनव्याख्यानानि *भगवद्गीतायाः* दृश्यते।

### १.१२ भारतीयतत्वचिन्तायाः संग्रहः

गीतायाम् अतिप्राचीनाः प्राच्यचिन्तायाः तत्वसंस्कृतेः लेख्यमाविष्क्रियते गीतायाम्। आर्षसंस्कृतेः वेदादीनां भारतीयदर्शनानां सारः भवति *भगवद्गीता*। कर्म-ज्ञान-भक्ति-सन्यास-योगसिद्धान्तानां विविधसङ्कल्पानां पद्धतिः गीतायां दृश्यते। अतः एव अद्वैत द्वैतादीनां च व्व्यानार्हा अभवत् इयं गीता। अतिप्राचीनदर्शनस्य सांख्यदर्शनस्य तदा योगादिदर्शनानां च संग्रहः गीतायाम् उपलभ्यते। *'प्रपञ्चरूपरेखा गीतयिल्* ' इत्यस्मिन् ग्रन्थे सांख्ययोग-दर्शनानि शैववैष्णवादयः आरभ्य यज्ञपूजादीनां च तात्विकांशः गीतायाम् अस्तीति अस्य ग्रन्थकारस्याभिप्रायः [१०२] । अतः भाष्यकाराः स्वस्वमतानुसारं गीताव्याख्यानं साधयन्ति।

शंङ्करस्य व्याख्याने ज्ञानस्य प्राधान्यमस्ति। अन्यत्र ज्ञानेश्वस्य व्याख्यायां भक्तेः प्राधान्यं वर्तते। ध्यानादिविषयेषु गीताश्लोकः गीतायाः योगपद्धतेः साम्यं प्रकल्पयति। मनो नियन्त्रणविषये भगवतः वाक्यं पतञ्चलेययोगसूत्रस्य प्रथमपादवत् वर्तते। गीतायाम् यथा –

' समः कायशिरोग्रीवं धारयन्नचलं ध्रुवं।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।।६.१३।

प्रशान्तात्मा विगतभीर् ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः'।।६.१४।[१०३]

इति श्लोकस्य आशयसदृशं सूत्रं योगदर्शने च दृश्यते। योगदर्शनस्य द्वितीयपादस्य आशयाः मरणविषये गीतायामपि दृश्यते। ( यं यं वापि स्मरन् ) इति गीतावाक्यं योगदर्शनात् अभिन्नमस्ति। सांख्यदर्शनविषये वेदान्तदर्शनविषये च साम्यत्व-व्यतिरिक्तत्वकार्याणि गीतायां वर्तते। अयं प्रपञ्चः मायाकृतमिति वेदान्तिनां पक्षः, प्रकृतिकृतमिति साङ्ख्यानां मतम्। अन्यत्र 'अविद्या नानात्वभ्रान्तिरिति वेदान्तिनां मते प्रकृतिपुरुषविवेकाभावः इति सांख्यानां चिन्तायाम्'[१०४]। जीवात्मानां बहुत्वं कल्पयन्ति वेदान्तिनः। किन्तु सांख्यानाम् आत्मबहुत्वं च दृश्यते। 'बाह्यलोकस्तु मनोकृतमिति सांख्याः मायाकृतनिति वेदान्तिनश्च सिद्धान्तयन्ति'[१०५]। तथा च भगवद्गीतायां सांख्यस्य एवं कपिलमुनेः च परामर्शः च वर्तते। गीतायाः सांख्ययोगस्य ज्ञानयोगमिति व्यवह्रियते। सांख्य-योगयोः भेदद्वयमेव वर्तते " इति स्वामि विवेकानन्दस्य मतम्[१०६]। प्रस्थानत्रयेषु एका भगवद्गीता तथाऽपि अन्येषां प्रस्थानानां साम्यवैरुद्ध्यादयः गीतायां वर्तन्ते। भारतीयदर्शनस्य नानात्वे एकत्वं गीतायामपि विस्तारयति। विविधानां दर्शनानां संयोजनेन गीतायाः सार्वलौकिकत्वम् अन्येषां ग्रन्थानां नास्तीयेव, लोकधर्मसाहित्ये इति पाश्चात्यदार्शनिकेन आल्टक्स् हस्कलि महाशयेन उक्तमासीत्। शाश्वततत्वज्ञानं सकलविषयेषु सम्पूर्णतया

असन्निग्धतया च गीतावत् अन्ये कस्मिश्चिदपि ग्रन्थे न प्रदर्शयति स्म। अतः कारणात् एस् राधाकृष्णन् महाशयः भारतीय-विचारपद्धतिषु अन्यतम स्वाधीन ग्रन्थः गीता इति अकथयत्। दार्शनिकतायाः कविप्रतिभायाः मध्ये एव गीतायाः स्थितिः इति अस्य निरीक्षणम्। तात्विकात्मतया गीता भारतीय तत्वसंहितायाः निधिरिति निस्संशयेन वक्तव्या अस्ति।

### १.१३ भारतीयदर्शनतत्वानि गीतायाम्

आस्तिकदर्शनतत्वानि तत्र तत्र गीतायां दृश्यन्ते। एतेषां तत्त्वानां सामान्यपरिचयः अत्र विचिन्त्यते। सांख्य-योगदर्शनानि शैववैष्णव मतानि च गीतायां वर्तते इति कथ्यते[१०७]। अतः गीता न केवलम् एकस्य प्रस्थानस्य अनुवादं शक्यते। गुणत्रयाणाम् अथवा सत्व-रज-तमोगुणानां प्रकृतिजत्वं तथा पुरुषस्य प्रकृतेः च ऐक्यमित्यादयः सांख्यतत्वानि गीतायामपि दृश्यते। कार्यकारण कर्तृत्वेषु प्रकृतिरेव हेतुः। अनश्वरात्मनः देहात् आत्मनः च अभिज्ञानत्वम् अस्यविवेचनत्वम्। अविद्या अनादिविषये च सांख्याः वेदान्तिनः बौद्धाः समानाभिप्रायाः स्वीकुर्वन्ति। साङ्ख्यानां पुरुषः, वेदान्तिनां ब्रह्म च नाशरहितः। आत्मविषये विभुत्वं नित्यत्वं च स्वीक्रियन्ते साङ्ख्याः वेदान्तिनःऽपि। अन्तकरणान्तवर्ति पुरुषः एव जीवः इति साङ्ख्यपक्षे वेदान्तिनां भिन्नाभिप्रायः नास्ति एव। प्रपञ्चं तु मायाकृतमिति मायावादिनः, प्रकृतिकृतमिति साङ्ख्याः च मन्यन्ते। तेषां पुरुषः चेतनः, प्रकृतिस्तु अचेतना च। मायावादीनां ब्रह्म चेतनविशिष्टं, माया तु अचेतना च। न्यायवैशेषिकानां तु आत्मनः सर्वव्यापित्वं सांख्यवेदान्तिनां समदर्शनमेव। अपि च परमात्मा एतेषां सर्वज्ञः भिन्नः च अथवा अल्पज्ञः। एतादृशेषु विषयेषु एतेषां दार्शनिकानां समानमत्र दृश्यते। योगदार्शनिकानां च अस्मिन् विषये चिन्ता गीतायाः ध्यानयोगाध्याये विद्यते। उक्तं यथा -

‘ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।

सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चावलोकयन’।। ६.१३।[१०८]

अत्र ध्यानविषये उपदिश्यते। तत् तु यौगिकचिन्तायेव आत्मसाक्षात्कारेण नष्टे दैवभावः प्रकृतिलयत्वभावः वा न अपेक्षते इति तेषां मतम्।‘रसोऽप्यस्य परं दृष्ट्वा निवर्तन्ते ’ कर्मविषये कर्मफलत्यागविषये च यौगिकानां मतं गीतायामपि दृश्यते। यथा –

“यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।

यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्”।।९.२७।[१०९]

एतादृशानि बहूनि तत्वानि गीतायामपि दृश्यते। तथा च एकरूपायाः अव्यक्तप्रकृतेः पुरुषसम्बन्धेन व्यक्कस्य नाना रुपात्मकतायाः प्रकृतेः विकासः साध्यः इति सांख्यसिद्धान्तः गीतायामपि अङ्गीक्रियते। मीमांसाविषये गीता वेदप्रामाण्यविषये वैदिकविधिषु च न त्याज्यभावं स्वीक्रियते। अन्यथा एषः सविशेष संस्कारपदविशिष्ठानाम् एव उपयुक्तः इति अभिप्रयति। श्रद्धात्रयविभागयोगे ( सांख्ययोगाध्यायस्य ४२ तः ५५ पर्यन्ताः ) श्लोकाः कर्मणः अपेक्ष्य ज्ञानस्य प्राधान्यं परिचिन्तयन्ति। नवमाध्याये २०-२१ श्लोकौ स्वर्गप्राप्त्यादयाः विशदयतः। न एतौ श्लोकौ मोक्षसम्बन्धौ मोक्षसङ्कल्पविषये सुव्यक्त दर्शनं मीमांसकानां नास्तीति गीतायाः अभिप्रायः इति विचिन्तनीयः अस्ति एतादृशानां श्लोकानामनुसन्धानेन।

नास्तिकदर्शनानां तत्वानि च गीतायां दृश्यन्ते। कुत्रचित् निषेधः अपि स्वीक्रियते। गीता आत्मज्ञानस्वरूपः इति विषये जैनानां वेदान्तिनां च एकत्वं दृश्यते। किन्तु रज्जुसर्पविषये जैनानां भिन्नाभिप्रायः। जगन्मिथ्यात्वविषये बौद्धवेदान्तीनाम् ऐक्यमस्ति। प्रपञ्चोत्पत्तिविषये युगपद् सृष्टिः सांख्यानामाशयः चार्वाकानामपि। ब्रह्मणि अध्यस्तं जगदिदमिति वेदान्तिनां पक्षः, किन्तु प्रपञ्चस्य अस्तित्वस्य निषेधे वेदान्तबौद्धानां मतमेकमेव परोक्षरूपेण वेदप्रामाण्य निषेधं क्रियते। केचन श्लोकाः बौद्धदर्शनानां मतमेव निरूप्यते ( २.४२,४५,४६ ) आहार

विषये बौद्धमाध्वानां सामान्यत्वं गीतायामपि दृश्यते ( ६.१६)। अत्र चार्वाकाः दार्शनिकाः गीतां निषेधयति। सर्वज्ञविशिष्टः आत्मा अविद्यायाः आवरणात् जीवत्वेन परिणीयते। अयं वादः वेदान्तिनामत्र परमात्मनः अंशः एव जीवात्मा इति जैनानां पक्षः ऐक्यरूपः प्राप्यते। राधाकृष्णमहाभागस्य *भारतीयदर्शने* [११०] उक्तं च " गीतासन्देशस्य व्याप्तिः सार्वत्रिकमेव। जनसाधारणस्य हिन्दुदर्शनस्य दार्शनिकमूलः अयं"गार्बे महाशयस्य[१११] चिन्तायां –" गीतायां न केवलं एकस्य मतस्य अवलम्बिनः दृश्यतेऽपि च दार्शनिकपद्धतीनां कविप्रतिभादीनां मध्ये गीतायाः स्थायित्वं वर्तते " इति।

### १.१२.उपसंहारः

*भगवद्गीतायाः* प्राधान्यं व्याप्तिश्च अनेन चिन्तनेन कियदस्तीति अवगम्यते । इदमेव अस्य अध्यायस्य लक्ष्यं च । तथा च गीतायाः स्थानं, गीतायाः सङ्कल्पः तत्वचिन्ता च कथमिति प्रायेण ज्ञातुं शक्यते । अनेन गीतायाः व्याख्यानानां तुलनात्मकपर्यवेषणं साधितुं प्रभवति । कृष्णस्योपदेशानि न केवलं योद्धुः कृते अपि च परमपुरुषार्थस्य , भारतीयजीवितसंस्कृतेः च परिरक्षणार्थं अवगमनाय च साहाय्यं प्रददाति । अत्र अस्याः चिन्तायाः वीक्षणभेदाः बहवः सन्तीति गीतापठनानि अस्मान् प्रबोधयति । तेषु पठनेषु प्रमुखं प्राचीनं च भवति अत्रत्यभाष्यत्रयम्। एतानि भाष्याणि विविधेषु कोणेषु गीताम् समीक्षयति । एकत्र अद्वैतमिति, द्वैतस्य निषेधात्मकः सङ्कल्पः, अन्यत्र त्रयात्मकस्य विशिष्टाद्वैतस्य सिद्धान्तः अपरत्र द्वैतानुभूतिश्च । भिन्नाः एते कार्याणि एकस्यां गीतायामेव परिलक्षयति आचार्यत्रयाः । एते सङ्कल्पाः प्राचीनत्वात् संस्कृतभाषात्मकत्वाच्च अस्य चिन्तनात् प्राग् एतिहासिकात्मकानि, भाषात्मकानि च तत्वानि अनेनाध्यायेन ज्ञायन्ते । तथा च एतेषाम् आचार्याणां दर्शनानां सङ्कल्पानां चर्याणां च प्राग् ज्ञानं प्रबन्धे अवश्यः विषयः तस्मात् अग्रिमाध्याये विचारयति एतानि कार्याणि ।

## अध्यायटिप्पणि

1. Sanatanadharmaparicayam,(mal), Chidanandapuri swami, sanatanadharmapedham, Calicut University , p.545
2. महाभारतं तृतीय खण्ड , उद्योगपर्व १९५.१५, गीताप्रेस् गोरघपूर्, २५४० पुटे
3. श्रीमद्भगवद्गीता शाङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरख्रपूर् ,२१ पुटे १/३२
4. *Ibid.*, २४ पुटें,।। २.३।
5. *Ibid* ., २६ पुटें
6. Swami Vivekanandanum Bhagavad Geethayum (mal) Lakshmikumari M, Lendon speech 15.4.1896
7. Bhagavad gita palakaalam palakazhchakal, (Editor)Somasekharan, पुटे १५८
8. Gitayute thatvasastram(mal) *(The Philosophy of Bhagavad Gita )* ), Nair MG K, (Transalator), पुटे५
9. Jnaneshwari(mal)(*Interpretation of Bhagavad geetha by Jnaneshwar*) , Chandrasekharan Pillai (Transalator) , पुटे ३७
10. *Op. cit* Bhagavad gita palakaalam palakazhchakal पुटे २४६
11. Yogeswaranaya Sreekrishan (mal), Acharya Narendrabhooshan, D C Books, पुटे
12. *Ibid.*, १६,१७,पुटे
13. Dhanurvedam; Purathanabharathathinte Ayodanasastharam , (mal) Ramankutty P v पुटे ८३,८४
14. महाभारतं,(भीष्मपर्वम्), डा श्रीपाद दामोदर सातवलेकर ६.२ .८, पुटे ८
15. *Op. cit*, श्रीमद्भगवद्गीता शाङ्करभाष्य हिन्दी अनुवादसहितं, १.२१ , १९ पुटे
16. *Loc. cit*।।२.३।
17. *Op. cit* Bhagavad gita palakaalam palakazhchakal, पुटे ८८
18. *Op. cit* , Sanatanadharmaparicayam,(mal), ५५० पुटे
19. Appendix 1
20. *Op. cit* , Dhanurvedam; Purathanabharathathinte Ayodanasastharam , पुटे ७३
21. *Op. cit* , महाभारतं,(भीष्मपर्वम्), ७३ .३,४३२ पुटे
22. *Ibid* ., १०३,२२-२५, ६८३ पुटे
23. महाभारतं, (द्रोणपर्वं), डा श्रीपाद दामोदर सातवलेकर , ३७.२४,२२७पुटे
24. Yogeswaranaya Sreekrishan (mal), Acharya Narendrabhooshan, D C Books पुटे १४०,१४१
25. *Ibid* ., पुटे १३८
26. *Op. cit*, श्रीमद्भगवद्गीता शाङ्करभाष्य हिन्दी अनुवादसहितं ,१.२५-३७, २१ पुटे

27. Vivekananda sahitya sarvaswam-7 ,(mal) , ३१ पुटे

28. Vivekananda sahitya sarvaswam- 4 ,(mal), ५०६ पुटे

29. Prapancharooparekha Geethayilninnu, ( mal) , Harisena varma, 27 पुटे

30. *Ibid* ., २७ पुटे

31. Srimad Bhagavad Gita (Sivaravindam), Mahabhashyam, Balakrishnan Nair G, १५ पुटे

32. *Op. cit*, Sanatanadharmaparicayam,(mal), २५२ पुटे

33. *Op. cit*, Yogeswaranaya Sreekrishan (mal), पुटे १००,१०१

34. *Op. cit*, Srimad Bhagavad Gita ,Sivaravindam,(Mal), Mahabhashyam, पुटे ६

35. Sreemad Bhagavadgeetharahasyam, (mal), LokmanyaBal Gangadar tilak, Narendra Bhooshan(Transalator), २७ पुटे

36. *Op. cit*, Yogeswaranaya Sreekrishan (mal), १३६

37. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं , पुटे ८७

38. महाभारतं तृतीयखण्डं , अनुवाकं, पण्डित रामनारायणदत्त शास्त्री,२१४० पुटे

39. महाभारतम्

40. *Ibid* ., पुटे १

41. *Loc. Cit* पुटे १

42. *Ibid* ., पुटे १०९

43. *Op. cit*, Sanatanadharmaparicayam,(mal), Chidanandapuri swami, २०४ पुटे

44. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं , १४ पुटे

45. *Ibid* .,, पुटे २५३

46. *Ibid* .,, पुटे २५७

47. *Op. cit,* Srimad Bhagavad Gita (Sivaravindam), Mahabhashyam, Balakrishnan Nair, पुटे 322

48. सर्वमूलग्रन्थाः ,प्रथमं सम्पुटम् ,गीताभाष्यम् , गीतातात्पर्यम् , प्रो.पाण्डुरंङ्गि, ४१ पुटे

49. *Loc. Cit* पुटे १४ पुट

50. वेदान्दसारः चौखाम्बा सुरभारती विद्याभवन् वारणासि, ९७ पुटे

51. कठोपनिषद् ,( हिन्दी व्याख्या सहितम् ), डा पुष्पा गुप्ता, पुटं १५

52. *Ibid* .,, पुटे १४४

53. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं , ४१,५० पुटे

54. *Ibid* .,, पुटे २३८

55. *Ibid* .,, पुटे ३२९

56. *Ibid* .,, पुटे ३७

57. *Ibid* .,, पुटे २२३,२२४

58. Chandogya Upanisad , Swami Swahanada , (5.10.2-5.10.8),367-378 पुटे

59. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं , १७८ पुटे

60. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः २८७

61. *Op. cit*, १३५ पुटे

62. *Op. cit*, भारतीयदर्शनं पुटे ४८०

63. *Op. cit*, Prapancharooparekha Geethayilninnu, ( mal) , Harisena varma, पुटे २७

64. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं , १३.४, ३१४ पुटे

65. भगवता श्रीरामः मारुतिं प्रति उपदिष्टमिति मुक्तिकोपनिषद् इति वदन्ति। तत्र चतुर्वेदेषु ११८० शाखाः सन्ति, एवं प्रत्येकं एकैक शाखानां एकैकं उपनिषदपि सन्ति इति च वदन्ति। तेषु प्रधानानि १०८ उपनिषदानि अधिकृत्य विशदयति। माण्डूक्योपनिषद् ( श्रीरामकृष्णमठं ) पुटे ११

66. *Op. cit*, Sanatanadharmaparicayam,(mal), Chidanandapuri swami, ४२६ पुटे

67. *Ibid* .,,p496

68. *Loc. Cit*, ३१४ पुटे

69. *Ibid* .,, पुटे २६

70. *Ibid* .,, पुटे १५

71. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, पुटे ८७

72. *Op. cit*, Sreemad Bhagavadgeetharahasyam, (mal), LokmanyaBal Gangadar tilak, Narendra Bhooshan(Transalator), २५-२७ पुटे

73. कूर्मपुराणं (ब्राह्मीसंहितासमेतम् ), श्रीमानमहर्षि ,गोपाल् प्रिन्टिङ् वर्क्स् ,१९५ पुटे आरभ्यते

74. *Op. cit*, २२६ पुटे

75. देवीगीता संस्कृत मूल हिन्दी अनुवाद सहितं , हनुमान् प्रसाद पोद्दार, चिम्मन् लाल् गोस्वामि , गीताप्रेस् गोरखपूर् , पुटे ४०२-४२१

76. The Garuda Mahapuranam (*Sanskrit text with English Translation Ɛ notes* )Vol- 1 , M N Dutt, New Bharayiya Book Corporation , 545 पुटे

77. *Op. cit*, Sreemad Bhagavadgeetharahasyam, (mal), LokmanyaBal Gangadar tilak, Narendra Bhooshan(Transalator), २२ पुटे

78. महाभारतं,(वनपर्वम् ), द्वितीय खण्ड पण्डित रामनारायणदत्त शास्त्री पाण्डे, स्वाध्याय गीताप्रेस् गोरख् पूर् १६१७ पुटे

79. महाभारतं द्वितीयखण्डं , अनुवाकं, पण्डित रामनारायणदत्त शास्त्री,१६१७ पुटे

80. श्रीमद्भागवतपुराणम् (श्रीव्यासमहषि प्रोक्तम् ), श्रीधरस्वामिविरचितया भावार्थबोधिनी नाम्नी मोतिलाल् बनारसी दास, दिल्ली ६५५-६५८ पुटे

81. *Ibid* .,, पुटे ६८२-६८६

82. *Ibid* .,, पुटे १३८-१६०

83. विष्णुपुराणम् ,महर्षिवेदव्यासप्रणीतं ,(Translated ) H H . Wilson , Nag Publishers,P 529

84. *Op. cit*, Prapancharooparekha Geethayilninnu, ( mal) , Harisena varma, ७४ पुटे

85. विषादयोगोऽर्जुनस्य प्रथमे परिकीर्तितः द्वितीये सांख्ययोगश्च कर्मयोगस्त्वनन्तरम्। ज्ञानयोगश्चतुर्थे सन्यासयोगस्तु पञ्चमे आत्मसंयमयोगश्च ज्ञानविज्ञानयोगस्तु सप्तमाष्टमयोरपि। नवमे तु राजगुहययोगः कृष्णेन कीर्तितः विभूतियोगस्तु दशमे विश्वरूपस्य दर्शनात् ऐकादशे प्रकटितं भक्तियोगश्च द्वादशे क्षेत्रक्षेत्रज्ञयोगश्च विवृतस्तदनंन्तरम्। प्रकृतिगुमत्रयविभागयोगश्चतुर्दशे। पुराणपुरुषोत्तमयोगः पञ्चदशे श्रुतः। दैवासुरसम्पद्विभागयोगश्च षोडशे। श्रद्धात्रयविभागस्तु श्रुतः सप्तदशे ततः। अष्टादशे च सन्यासयोगः कृष्णेन कीर्तितः।

86. Appendix 2

87. *Loc. Cit*, ७४ पुटे

88. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, पुटे १४

89. *Ibid* .,, पुटे १४

90. Srimad Bhagavad gita athava Jnanayogam , kalady, १५६ पुटे

91. श्रीमद् भगवद्गीता, श्रीधर्मदत्तशर्मा , मुन्शीराम मनोहरलाल पब्लिशर्स प्रं लिं, विषयानुक्रमणिका

92. गूढार्थदीपिका पुटे

93. तत्र तु प्रथमे काण्डे कर्मतत्त्यागवत्मना। त्वं पदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते।। श्रीमद्भगवद्गीता Wasudevlaxman sastri pansikar, Munshiram manohar lal publishers p 1,2

94. द्वितीये भगवद्भक्तिनिष्ठावर्णनवत्मना। भगवान्परमानन्दस्तत्पदार्थोऽवधार्यते।। *Loc. Cit*,१,२ पुटे

95. तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्। एवमप्यत्र काण्डानां संबन्धोऽस्ति परस्परम्।। *Loc. Cit*,१,२ पुटे

96. श्रीमल् भगवल्गीता (mal) स गोपालन् नायर् पि ,७८ पुटे

97. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, ७७ पुटे

98. *Ibid* .,, ७६-८०,२९८-३१३ पुटे

99. *Op. cit*, Sreemad Bhagavadgeetharahasyam, (mal), LokmanyaBal Gangadar tilak, ३६ पुटे

100. *Ibid* .,, ३५ पुटे

101. *Op. cit*, Prapancharooparekha Geethayilninnu, ( mal) 28,29 p

102. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, १७९,१८० पुटे

103. Bharattiyadarsanangal , Vasudevan bhattatiri, C .V, N B S Kottayam, ६४० पुटे

104. *Ibid* .,, ६३० पुटे

105. *Ibid* .,, १५३ पुटे

106. Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-1, Radhakrishnan S , पुटे ४८१

107. *Loc. Cit,* १७९ पुटे

108. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, २४१ पुटे

109. *Ibid* ., ४७९ पुटे

110. Indian Antiquary, Garbe, p 3

Subrahmanian M. “ Śaṅkara-madhva-rᾱmᾱnujᾱcᾱryāṇāṃ Śrīmad Bhagavadgītᾱ Vyᾱkhyᾱnᾱni - Ekaṃ tulanᾱtmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# द्वितीयोऽध्यायः

# आचार्यत्रयाणां परिचयः


२.० उपोद्घातः

२.१ अद्वैतं श्रीशङ्करश्च

२.१.१ श्रीशङ्करः

२.१.२ अद्वैतदर्शनम्

२.१.३ शङ्करपरम्परायाः दार्शनिकसविशेषताः

२.१.४ श्रीशङ्करः प्रस्थानत्रयश्च

२.२ मध्वः द्वैतपरम्पराश्च

२.२.१ मध्वाचार्यः

२.२.२ द्वैतदर्शनम्

२.२.३ मध्वपरम्पराः दार्शनिकसविशेषताः

२.२.४ मध्वः प्रस्थानत्रयश्च

२.३ श्रीरामानुजः विशिष्टाद्वैतश्च

२.३.१ श्रीरामानुजाचार्यः

२.३.२ विशिष्टाद्वैतदर्शनम्

२.३.३ रामानुजपरम्परायाः दार्शनिकवैशिष्ट्यम्

२.३.४ रामानुजाचार्यः प्रस्थानत्रयश्च

२.४ उपसंहारः

## २.० उपोद्घातः

भारतीयतत्वचिन्तायां प्रामुख्यसिद्धान्तेषु प्रथमगणनीयाः भवन्ति अद्वैत-द्वैत-विशिष्टाद्वैतादयः। एतेषां सिद्दान्तानां आचार्याः यथाक्रमं शङ्कराचार्यः-मध्वाचार्यः-रामानुजाचार्यश्च। एतैः तु स्वदार्शनिकसिद्दान्तमण्डनाय यद्यपि बहवः स्वतन्त्रग्रन्थाः न रचिताः तथापि स्वसिद्दान्तानां विशदीकरणाय समर्थनाय च व्याख्याः यथा- *भगवद् गीता- उपनिषद्-ब्रह्मसूत्रादयः* कृताः। अथवा प्रस्थानत्रयभाष्यमेव एतेषां प्रधानग्रन्थाः। ईश्वरप्राप्तेः अथवा मोक्षार्जनस्य उपाधिरिति धिया स्वसिद्धान्तानां समर्थनाय प्रस्थानत्रयाणाम् अवलम्बनमेव कृतं एतैः आचार्यैः। तथाऽपि प्रस्थानत्रयभिन्नाः रचनाः वा व्याख्यानानि च एते कृतवन्तः। एतेषां तत्वानुसारं शङ्कर-मध्व-रामानुजाचार्याः अद्वैत-द्वैत-विशिष्टाद्वैतसिद्धान्तानां स्थापकाः न सन्ति, अन्यथा पुनस्थापकाः।

अद्वैतदर्शने गुरुपरम्पराक्रमः सदाशिवाद् प्रारभ्यते तत्र मध्यमः भवति श्रीशङ्करः। अतः अस्य सिद्धान्तस्य स्थापकः नैव शङ्करः इत्यवगम्यते। एवमेव अन्येषां भारतीयदार्शनिकानां गुरुपरम्पराक्रमः दृश्यते च। अत्र एतेषाम् आचार्यत्रयाणां व्याख्यानैः तेषां सिद्धान्तानां प्रतिपादनं कथं कृतमिति विचिन्त्यते।

### २.१ अद्वैतं श्रीशङ्करश्च

अद्वैतिनां मते बादरायणोऽस्ति अद्वैतदर्शनस्य प्रथमाचार्यः [१]। ब्रह्मसूत्राणां कर्ता बादरायणः। एतानि उत्तरमीमांसासूत्राणि पञ्चपञ्चाशदुत्तरपञ्चशतं (५५५) इति संख्यात्मकानि इति प्रायेणाङ्गीकृतानि, किन्तु वेदान्ते द्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-भेदाद्वैत-भेदादीनां आचार्याणां वीक्षणे संख्याभेदः वर्तते सूत्रविषये। शारीरकमीमांसा इति नाम्ना प्रख्यातस्य ब्रह्मसूत्रस्य शङ्करभाष्यमेव लभ्यमानेषु ब्रह्मसूत्रभाष्येषु प्राचीनतमम्। ब्रह्मसूत्रस्य एकविंशति (२१) भाष्याणि आसन् इति कथ्यते। शङ्करात् प्राक् वेदान्तसूत्राणां व्याख्यातृणां आचार्याणां नामानि शाङ्करभाष्यात् एव सिद्ध्यति। काशकृत्स्नः, औडुलोमिः, आत्रेयः,

बादरिः, इत्यादयः आचार्याः शङ्करपूर्विकाः आसन् इति ब्रह्मसूत्रभाष्याद् अवगम्यते[२]। शङ्कराचार्यैणापि स्वपरमगुरुं गौडपादं स्मृत्वा श्लोकाः रचिताः इति शङ्करकृतिषु उपलभ्यन्ते। बहवः ग्रन्थाः शङ्करेण रचिताः इति दृश्यन्ते। ते ग्रन्थाः विषयानुसारं विभक्ताश्च दृश्यन्ते। प्रधानतया ते तु भाष्यग्रन्थाः, प्रकरणग्रन्थाः, स्तोत्रग्रन्थाः, तन्त्रग्रन्थाः इत्यादिरूपेण परिकल्पयन्ति। अत्र गीता-*ब्रह्मसूत्र-उपनिषदां* भाष्याणि भाष्यग्रन्थेषु प्रधानानि सन्ति। तथा च *सनत्सुजातीयभाष्यं, लळितात्रिशतिभाष्यं, विष्णुसहस्रनामभाष्यं, हस्तामलकग्रन्थभाष्यं च भाष्यग्रन्थेषु दृश्यन्ते। अपरोक्षानुभूतिः, आत्मबोधः, उपदेशसाहस्रि, पञ्चीकरणप्रकरणं, विवेकचूटामणि, शतश्लोकि, प्रबोधसुधाकरं, लघुवाक्यवृत्तिः* इत्यादयः प्रकरणग्रन्थेषु प्राधान्ययुक्ताः। स्तोत्रकृतिषु चतुषष्ठिः (६४) स्तोत्रानि शृङ्गेरीमठेन प्रकाशितानि परिलभ्यन्ते। तेषु नदीतीर्थ स्थानस्तुतिः गणेश-विष्णु-देवि-राम-सुब्रह्मण्यस्तवपराः सन्ति। *प्रपञ्चसारः सौन्दर्यलहरी* च तन्त्रविषये अन्तर्भवन्ति। *शाङ्करस्मृति*रिति केरलीयाचारस्मृतिग्रन्थाः शङ्करेण कृतः इति विश्वासः अयं ग्रन्थः आचार्यस्य नास्ति इति विप्रतिपत्तिः आचार्याणां वर्तते। एवं सौन्दर्यलहरीभजगोविन्दादि ग्रन्थविषये च मतभेदाः दृश्यन्ते। प्रायेण शताधिकषट्( १०७) कृतयः शङ्करस्य सन्ति इति प्रशस्तिः। तथा च शङ्करात् परमेव अद्वैतदर्शनस्य प्रचारः उत्तरोत्तरं वर्धितः। अस्य हेतुः दृश्यते, यथा ब्रह्मसूत्रस्य द्वितीयाध्याये अन्येषां दार्शनिकानां सर्वेषां शङ्करः स्वसिद्धान्तानुसारं खण्डयति इति। श्रीशङ्करः एव प्रस्थानत्रयस्य भाष्यकारेषु प्राचीनतमः। तथा *विवेकचूडामणिः, उपदेशसाहस्री*त्यादिभिः प्रकरणग्रन्थैः अद्वैततत्वस्य मण्डनं सुष्ठुः कृतं शङ्करेण।

### २.१.१ श्रीशङ्करः

भारतीयतत्वचिन्तायाः मण्डले सूर्यतेजसा प्रशोभितः दार्शनिकः अस्ति श्रीशङ्करः। दार्शनिकमण्डले अद्वैतदर्शनस्य प्रचारे स्वीकार्ये च शङ्करस्य स्थानम् अमूल्ययुक्तं भवति। केरले एरणाकुळं जनपदे आलुवादेशस्य समीपे पूर्णानद्याः तीरे कालटिग्रामे शङ्करस्य जन्म

अभवत्। वटक्केक्कराकैप्पळी गृहे शिवगुरोः, मे.षपारूर् गृहे आर्याम्बायाः च पुत्रत्त्वेन क्रिस्तुवर्षे (सप्तशताधिकाष्टाशीतिः) ७८८ तमे आसीत्तस्य जन्म[३]। भारतीयपरम्परानुसारं वैशाखमासस्य शुक्लपञ्चम्यां पुनर्नवनक्षत्रे मध्याह्ने आसीत्तस्य आचार्यस्य लोकप्रवेशः इति महादेवः अभिप्रैति [४]। "*केरलसंस्कृतसाहित्यचरित्रे*" अस्य जन्म कोल्लवर्षे इति केरलपरम्परा गणनावर्षात् पूर्वं ३७ वर्षे इति च अस्य जन्मविषये चिन्ता दृश्यते। तथा च कुञ्जुण्णि राजा महाभागस्य ग्रन्थे आस्याचार्यस्य ज्योतिषरीत्यनुसारं गृहस्थितिविषयाः प्रतिपादयन्ति [५]। *मेषमासस्य वैशाखाशुक्लपञ्चम्यां पुनर्नव नक्षत्रे कर्किटकलग्ने इति जन्म इत्यस्मात् तत् तु आद्रतायामासीतिति गृहयोगः। ग्रहयोगः विशदयति यथा -सूर्यः बुधः च मेषे कुजः मकरे शनिः तुलायां, चन्द्रः मिथुने शुक्रः उच्चस्थाने, गुरुः स्वक्षेत्रे, कर्किडगलग्ने ' इति*[६]*।* अन्यत्र शङ्करमन्तारसौरभमिति ग्रन्थेऽस्य जन्म (एकोननवत्युत्तराष्टत्रिंशत् शततमे) (३८८९) तमे कलिवर्षे समाधिः (एकविंशत्युत्तरएकोनचत्वारिंशत् शततमे) (३९२१) कलिवर्षे च इति सूचयति[७]। दैवज्ञस्य कण्णशप्पिल्ला स्वामिनः मते क्रिस्तुवर्षे (पञ्चाधिकअष्टशततमे) ८०५ तमे वर्षे शङ्कराचार्याय सुधन्वभूपतिना प्रदत्ते ताम्रपत्रे युधिष्ठिरशतके त्रिषष्ट्युत्तरषटशताधिकद्विसहस्र (२६६३) तमे इति दृश्यते[८]। अनेन अयं सिद्धान्तयति यत् त्रिषष्टुत्तरषटशीत्यधिकद्विसहस्र (२६६३) तमे इति वर्षानुसारं श्रीशङ्करः क्रिस्तोः पूर्वं पञ्चमशतके आसीत् इति। बृहत्शंङ्करविजये अयं त्रिनवत्युत्तरपञ्चशताधिकद्विसहस्र (२५९३) तमे कलिवर्षे जातः इति प्रतिपादयति। तथा ग्रहस्थितिश्च स्पष्टयति त्रिनवत्युत्तरपञ्चशताधिकद्विसहस्र (२५९३)तमे कलिवर्षः क्रिस्तोः पूर्वे ५०९ इति वक्तते ) एतद्विषयसूचनाः भविष्योत्तरपुराणे, माधवीयशङ्करविजये[९] चोपलभ्यते। जिनविजयः इति जैनग्रन्थानुसारं जन्म ईशवीयात् प्राग् नवोत्तरपञ्चशत (५०९) तमे ( कलिवर्षः -२५९३) समाधिः सप्तसप्तत्युत्तरचतुःश्शत(४७७) तमे च भवति। कुमारिल्लभट्टेन सह अस्य मेलनं ४९५ तमे आसीत् इति मठाम्न्वयानुसारं शङ्करस्य कालः इति दृश्यते। जन्मनः परम् एकादशाह्नि बालस्य नामकरणं जातम्। कटपयादिसंख्या प्रकारेण बालकस्य जन्मतिथिः,

पक्षः, मासश्च नाम्ना एव ज्ञायते। चन्द्रवर्षस्य द्वितीयमासे वैशाघे जनिमभवत् (२-र ), शुक्लपक्षस्य प्रथमपक्षे जन्म ( १-क) पञ्चम्यां तिथौ (५-श ) इति विपरीतक्रमे श क र इति सिद्ध्यति[१०]। अस्य जन्मसम्बन्धी बह्वः कथा बहूनि ऐतिह्यानि च वर्तन्ते। हुयाञ् साङः इति चीनादेशीयस्य यात्रिकस्य विवरणे क्रिस्तुवर्षस्य ५९० तमे समीपे मगधा शासकः पूर्णवर्मा इति राजानमधिकृत्य ब्रह्मसूत्रे परामर्शः दृश्यते [११]। स साङ् महोदयः एव शङ्करस्य काश्मीरसन्दर्शनं ६३१ तमे वर्षे इति भणति। बाल्ये एव अस्य पिता मृत्युमुपगतवानिति प्रथा वर्तते अस्य पञ्चमे वयसि पितुः मृत्युः इति कुत्रचित्, सप्तमे इति क्वचित् च दृश्यते। द्वैतीनां पक्षे शङ्करः यदा गर्भस्थशिशुरासीत् तदा एव अस्य पितोः मृत्युरभवत् इति। ततः परम् अस्य शङ्करस्य असामान्यधिषणाशक्तिः अन्यं वैशिष्ट्यमिति ज्ञातुं शक्यते। गुरुकुलप्रवेशनात् पूर्वमेव सः विविधाः विषयाः कण्ठस्थीकृताः आसीत्। अस्य ज्ञानवैभवमधिकृत्य प्रथा एवमस्ति -

अष्टवर्षे चतुर्वेदान् द्वादशे सर्वशास्त्रविद्

षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यागाल् [१२]।

शङ्करस्य सन्यासाश्रमप्रस्थानमधिकृत्य ऐतिह्यविषये प्रायेण समानाभिप्रायाः दृश्यन्ते। तदनुगुरोः अन्वेषणं गोविन्दभगवद्पादर्शनम् एवमन्याः विषयाः भारते सर्वत्र सुप्रसिद्धाः वर्तन्ते। ततः [१३] परं शङ्करः काश्यामागतवान्, तथा तत्र बहवः ग्रन्थाः तेन रचिताः। तेषु स्तोत्रग्रन्थाः,प्रस्थानत्रयभाष्यं च वर्तन्ते। अस्मिन्नेव काले पत्मपादादीनां शिष्याणां प्राप्तिरभवत्। काश्यामेव मनीषापञ्चकस्य रचना अकरोत्। अस्य ग्रन्थ विषये च प्रभा दृश्यते। यथा शिवः चण्डालवेषं धृत्वा शङ्कराचार्यस्य परीक्षणाय वादमकरोत् इति[१४]।

अस्य कालस्य रचनायां श्रद्धेयाः ग्रन्थाः यथा *ब्रह्मसूत्रभाष्यं, भगवद्गीताभाष्यं* च। यतः शङ्करात् पूर्वं बहूनाम् आचार्याणां भाष्याणि आसन्, परन्तु तेषाम् आचार्याणां वादानां खण्डनेन कृतमनेन शङ्करेण ब्रह्मसूत्रभाष्यम्। एवमेव शैली च भगवद्गीताभाष्ये च दृश्यते।

काश्यां मणिकर्णिकाघट्टे मुक्तिमण्डपमेव ब्रह्मसूत्रभाष्यं कृतमिति परम्परायाः विश्वासः[१५]। अनन्तरं श्रीशङ्करः हिमालय प्रस्थानम् आरब्धवान्। मार्गे बदर्यां गुरोः निर्देशानुसारं बदरीमन्दिरसमीपं मठं संस्थाप्य तत्र दशोपनिषदां भाष्यम् अकरोत् च। अनन्तरं कुमारिल्लभट्टेन साकम् अस्य मेलनं तदा भट्टस्य तस्य आत्मपिपासायाः शमनं स्वज्ञानाकारेण कृतवान् च। भट्टस्योपदेशानुसारं मण्डनमिश्रं मिलित्वा तेन साकं संवादं कृत्वा वादे तं खण्डयति च। वादानन्तरं सुरेश्वरः इति नाम्ना मण्डनमिश्रः शङ्करशिष्यत्वं स्वीकृतवान्। ततः परमेव हस्तामलकं तोटकं च स्वीकृतवान् अयमाचार्यः शिष्यरूपेण[१६]।

भारतवर्षस्य चतर्षु कोणेषु चतुर्मठान् अस्थापयत् आचार्यः। मठाः यथा बदर्यां श्रृग्ङगिरौ पुर्यां, द्वारकायां चासन्। तत्र स्वस्य चत्वारः शिष्याः आचार्योण अवरोधिताः। अस्यां जीवितयात्रायाम् सम्पूर्णभारतं पद्भ्यां बहुवारम् अटित्वा अन्यान् धर्मान् तर्के खण्डनं कृत्वा अद्वैतधर्मस्य पदम् ऊर्ध्वं स्थापयितुं तस्य प्रयत्नं सफलं चकार। मातुः मृत्युकाले अम्बायाः समीपं आगत्य अन्त्येष्ट्यादि शिष्टकार्याणि कृत्वा पुनरपि यात्रा आरब्धवान्। अस्मिन्नेव काले भारते प्रधानेषु तीर्थेषु, मन्दिरेषु च अटित्वा तत्रत्यानां देवतानां स्तुत्वा स्तोत्राणि अरचयन् च। अनन्तरं श्रीशङ्करः काश्मीरि देशस्य सर्वज्ञपीठम् अवरोह। स्वस्य (द्वात्रिंशत्) ३२ तमे वयसि नन्तनवर्षे अथवा रक्ताक्षीवर्षे वैशाघपञ्चम्यां समाधिमुपगताः। किन्तु समाधिस्थानविषये मतभेदाः वर्तन्ते। यदा केदारः, बदरी तृश्शिवपुरं, काञ्चीपुरम् इत्यादयः वदन्ति विचक्षणाः। (एतेषु अभिप्रायेषु भूरिपक्षमतानुसारं तमिष्नाटु राज्ये काञ्चीपुरे आसीत् अस्य समाधिः, १३९२ तमे भारतीय भाषायाः सर्वविज्ञानकोशे काञ्चीपुरमधिकृत्यैव सूचयति)

### २.१.२ अद्वैतदर्शनम्

द्विधा इतं द्वीतं तस्य भावः द्वैतं, द्विधा विभक्तं द्वीतं द्वितयोः भावः द्वैतं न द्वैतम् अद्वैतम् एवमेव द्विधा इतं द्वीतं, तस्य भावः युवादित्वात् अण् प्रत्यये। स्वार्थे अण् वा। एवं

दृश्यते, अद्वैतशब्दस्य निरुक्तिः, अस्य दर्शनस्य प्रवक्ताऽसीत् श्रीशङ्करः । शांङ्करभाषया अद्वैतस्य लक्षणं यथा –

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः[१७]।

पुरुषार्थ चतुर्थेषु परमपुरुषार्थास्य मोक्षस्य साधनामार्गाः भवति ब्रह्मसाक्षात्कारानन्तानुभूतिः विशिष्टाः। जीवात्मपरमात्माभेदानुभूतिः अथवा ज्ञानमेव अद्वैतदर्शनस्य परं तत्वम्। अद्वैतदर्शने तु प्रथम पुरुषार्थः धर्मः द्विता विभक्ता इति दृश्यते यथा प्रवृत्तिः-निवृत्तिश्च। किन्तु अस्य दर्शनस्य सामान्यतत्वम् आत्मैक्यमेव। सत्ता त्रयेषु अथवा प्रातिभासिक-व्यावहारिक-पारमार्थिकेषु, ब्रह्मैव सत्यम् अथवा पारमार्थिकसत्यम्। इदं जगत् तु व्यावहारिकी च। रज्जुसर्प-शुक्तिरजतादिभिः न्यायैः मण्डयति। स्थापयति स्वमतम् अद्वैते। अनेनैव न्यायेन ब्रह्मसाक्षात्कारस्य युक्तिश्च स्थापयति मतमिदम्। व्यावहारिक सत्यम् इत्यवस्था जगदः अस्मिन् मते दृश्यते। अस्य कारणं तु जगत् न सत्यं न असत्यम् इत्यस्मात्। सत्यस्य ब्रह्मणः ज्ञानोपायः यदा जायते तावत् इदं जगत् सत्यवत् भाति अथवा मिथ्या एव। ब्रह्मभावस्तु सगुण–निर्गुणभेदेन दृश्यते। शंङ्करोऽपि सगुणनिर्गुणभेदेन कथ्यते । किन्तु द्वैत-विशिष्टाद्वैतदर्शनेषु ब्रह्मणः सगुणभावेनैव सङ्कल्पयति। आस्तिक दर्शनेषु सांख्यानां निर्गुण ब्रह्मावस्था योगन्यायवैशेषिकाणां निर्गुण-सगुण भावश्च विद्यते। किन्तु अद्वैतदर्शने ब्रह्म निर्गुणं निष्क्रियं, निर्विकारतत्वश्च एतदेव स्पष्टयति *बृहदारण्यकोपनिषदि* नेति, नेति[१८] इत्यादि वाक्यबलेन। ईश्वरादि विषयेषु सद्गुणतत्वं जगत्कतृत्वादिषु गुणेषु आरोपयति अद्वैते अथवा ईश्वरैव सगुण ब्रह्म। अध्यासस्य एवमविद्यायाः कारणात् अस्य जगतः अनुभवमिति शङ्करपक्षः। यथा ब्रह्मसूत्रे अतस्मिन् तत्बुद्धिः अध्यासः इति लक्षणं च दृश्यते[१९]। एतदेव विवर्तवादेन प्रसिद्धमस्ति। अतः मायावादिनः इति अन्ये दार्शनिकाः अद्वैतवादीनां कथ्यन्ते। व्याप्तस्याऽस्य विषयस्य व्याख्या एस् राधाकृष्णवर्येण भारतीयदर्शने कृता दृश्यते[२०]।

उपनिषदां दुर्ग्राह्यं गूढश्च *ब्रह्मसूत्रं* (बादरायणसूत्रं) तस्मात् मूलविषयेऽपि वैज्ञानिकौन्नत्यम् अस्मिन् ग्रन्थे दृश्यते इति एम् हिरियण्णा वर्यस्य मतम् [२१]। उपनिषदां निर्गुण-सगुण भावः एव शङ्करमते परा-ऽपरा इति विद्या द्वयेन भेदबुद्धिं द्योतयति। किन्तु सदऽसद् इत्येतेषां व्याख्यायां यद्विषया बुद्धिः न व्यभिचरति तत् सत्, यद् विषयता व्यभिचरति तत् असत् इति च दृश्यते[२२]। बाह्यविषये ब्रह्मणः आत्मनश्च समानत्वं दृश्यते। एतेषु ब्रह्म इति अद्वैतं तत्वम् एतद् निर्गुण, निष्क्रिय, निर्विकारश्चास्ति इति सिद्धान्तयति। अतः नेति नेति इत्यादि वाक्येन ब्रह्मं भावयति। किन्तु ईश्वरसङ्कल्पे ब्रह्मात्मैक्यसाक्षात्कारे उपाधिरेव एतद्। अस्य सङ्कल्पस्य अनुयुक्तं भवति सद्गुणतत्वं जगद्कर्तृत्वम् इत्यादि गुणयुक्तं सगुण ब्रह्म ईश्वरः। एतद् तत्वमेव ब्रह्मसूत्रे अविद्या कल्पितेन, अविद्या प्रत्युपस्थापितेन च विशदयति। मुक्तिभेदः च आचार्यमते दृश्यतेऽस्मिन् विषये। अतः अत्र अद्वैते मुक्तिद्वयं यथा जीवन्मुक्तिः, विदेहमुक्तिश्च [२३] । तत्र जीवन्मुक्तस्य जीवन्मुक्तिं, क्रममुक्तिश्च, सद्योमुक्किः इति भेदत्रयेण परिकल्पयति द्वैतम्। शाङ्करदिशा जीवः मुक्तः बद्धः इति ज्ञानम् अविद्यायाः हेतुत्वात् सञ्जायते । अस्य निवारणेन जीवब्रह्मणोः ऐक्यज्ञानम् अथवा मोक्षप्राप्तिश्च जायते।

### २.१.३ शङ्करपरम्परायाः दार्शनिकसविशेषताः

अद्वैतदर्शने सविशिष्टाशयः अस्ति मायावादः। अतः एव वेदान्तचिन्तायाम् अस्य वादस्य प्राधान्यं बहुधा दृश्यते। अद्वैतसङ्कल्पे ब्रह्मविषये पारमार्थिकस्य अस्य प्राप्तिः ज्ञानादेव सिद्ध्यति। अथवा ज्ञानादेवमोक्षप्राप्तिः। तथाच सगुण ब्रह्मविषये ब्रह्मसूत्रे कुत्रचित् प्रतिपादयति[२४]। तत्र ईश्वरवत् स्वीक्रियते ब्रह्म। अस्मिन् विषये विशिष्टाद्वैतवादिनः सगुणब्रह्म अथवा ईश्वरः एव पारमार्थिकः इति सङ्कल्पयन्ति। प्रत्युथा निर्गुणब्रह्मविषये रामानुजः तूष्णीभावमाचरति। मुक्तिविषयेऽयं क्रममुक्तिरेव स्वीकरोति। भक्तिः प्रपत्तिश्च अत्र मार्गाः ईश्वरात् भिन्नस्य निर्गुणब्रह्मावस्थायाः स्वीकारः नाङ्गीकरोति रामानुजः। जीवात्मानां बद्धः,

मुक्तः, नित्यः इत्यादि भेदः सङ्कल्पयति विशिष्टाद्वैते[२५]। किन्तु शङ्करदर्शने मोक्षमिति न तु जीवस्य प्राप्तिविषयः अन्यथा सदा मुक्तः, जीवः बद्धः इति अविद्यायाः हेतुत्वात् अनुभावयति च[२६]। ज्ञानेन अविद्यायाः नाशेन, ब्रह्मज्ञानं जायते। ब्रह्मजीवयोः अभेदत्वमेव इदं ज्ञानम्। इदमेवज्ञानमत्र मोक्षम्। परन्तु कणादपक्षे मुक्तिः इति आकारवत् अवस्था वर्तते। वैशेषिकाणां मुक्तिस्तु गुणसम्बन्धानां विनाशे सञ्जायते, आनन्तबोधयुक्तं च। किन्तु पक्षद्वये च ईश्वरः जगद् विधाता एव।

मूलप्रकृतिरेव जगदः कारणमिति सांख्यवादस्य समाधानं शङ्कराचार्यैः उच्यते यथा मूलप्रकृतिः त्रिगुणात्मिका इति। एषा स्वातन्त्र्येण जगदः निदानस्य नाना विषयेण कारणं भावयति च। वेदान्तमते मूलप्रकृतिः परतन्त्रा भवति। आत्मनः विषये बौद्धानां विज्ञानमेव। किन्तु वेदान्ते विज्ञानं तु एकं नित्यं च भवति क्षणिकबौद्धानां विज्ञानं क्षणिकमिति, मतस्य निरासः विज्ञानं स्थिरमिति वादेन खण्डयति शङ्करः[२७]। पूर्वमीमांसादर्शने विधिनिषेधानाम् आश्रयेण प्राधान्यं कल्पयते। किन्तु परमार्थज्ञानमेव वेदान्तानाम् आश्रयः विधिनिषेधानां स्थानः अत्र नास्ति च। वर्णाश्रमादीनाम् अन्येषाम् अनुष्ठानानां सङ्कल्पः ब्रह्मानुभूतिः पूर्वचिन्ता वर्तते। अनुभूतेः परम् एतेषाम् आश्रयः नास्ति इति भावः अद्वैते। अविद्या इत्यनया संसारबन्धहेतु इति लक्ष्यते। अविद्यायाः त्यागेन एव अस्मात् संसारबन्धनात् मोचनं तत्तु ज्ञानेन च भवति। ब्रह्म जीवात्मनां भेदभावः अविद्यायाः उद्भावयति। तथा अविद्यायाः अनाच्छादनेन ज्ञानं भिद्यते। ब्रह्मजीवात्मयोः ऐक्य भावम् इति नित्यज्ञानम् अत्रत्य सङ्कल्पः। अतः अस्मिन् सङ्कल्पे ज्ञानानुभूतिरेव परं लक्ष्यम्। तत् तु न सिद्ध्यन्ते। अतः एतेषां जगदिति सङ्कल्पः मिथ्यया परिकल्प्यते। इयं मिथ्या तु लक्षणे न भावयति अतः अनिर्वचनीयसङ्कल्पः अस्मिन् विषये अद्वैतीनां मतम्। अतः ख्यातिविषये प्रमाणविषये च अनिर्वचनीयख्यातिवादिनः वेदान्तिनः। अन्ये तु स्वविशेषतया सत्यस्य अवस्थात्रयं – जीवात्मा, परमात्मासम्बन्धप्रमाणानि, श्रुतिवाक्यानि, मायायाः सयुक्तिकसङ्कल्पाः, तत्त्वमसि इति महावाक्यस्य व्याख्या, चतुर्णां मठानां लक्ष्यं शारीरकमीमांसाभाष्ये शङ्करस्य अन्येषां

मतानां खण्डनम् एवं शङ्करभाष्यव्याख्या च। तेषु व्याख्यानेषु भाष्यद्वयं—यथा विवरणप्रस्थानस्य, भामतीप्रस्थानस्य मैलिकग्रन्थम् इति सङ्कल्पश्च अस्य दर्शनस्य सविशेषचिन्तानां विचारणीयाः विषयाः।

भगवद्गीतायाः उपोद्घातभाष्ये आचार्यस्वामिना प्रवृत्ति-निवृत्तिमार्गानां विषये प्रतिपाद्यते। ज्ञान-कर्मसमुच्चयवादनिषेधः च लक्ष्यते। न केवलं गीतायाम् अस्याचार्यस्य अन्येषु कृतिषु तेषां विषये प्रबन्धे व्याख्यानशैल्यां च अन्येषामपि अनुकरणीयः मार्गः अस्य। तत्र विवर्त्तवादस्य प्राधान्ये बहुत्र दृश्यते अस्य कृतिषु। अतः अद्वैतवादीनां विवर्तवादिनः इति अपरा संज्ञा च परिदृश्यते। षट् प्रमाणानि भवन्ति एतेषाम्।

स्वधर्मस्य वेदधर्मस्य पुनःस्थापनाय, रक्षणाय आचार्यः भारते बहुत्र अटनं कृत्वा वादं कृत्वा च शिष्यान् संपाद्य प्रयत्नं कृतवान्। तथा भारतस्य चतुर्षु केणेषु चतुर्णां मठानां स्थापनं कृत्वा स्वशिष्यान् मठाधिपतिरूपेण तत्र अवरोहति च। कालान्तरे एते तु चतुर्मठाः इति प्रसिद्धाः च चतुर्मठात् अतिरिच्य अन्ये मठाः आचार्यैः स्थापिताः इति दृश्यन्ते। चतुर्मठाः यथा ओरिसा (उत्कल ) पुर्यां पत्मपादस्य परिकल्पनया गोवर्धनमठमिति परम्परा ऋग्वेदप्रमाणेन स्थापिता, कर्णाटकाराज्ये शृङ्गगिरौ यजुर्वेद परिकल्पनया सुरेश्वरेश्वराचार्यो मठाधिपतिरूपेण अवरुरोह च । सौराष्ट्रायां द्वारकायां शारदामठे सामवेदसङ्कल्पेन हस्तामलकं स्थापितवान् आचार्यः। भारतस्योत्तरदेशे बदर्याम् अथर्ववेद इति सङ्कलपे तोटकः आचार्यरूपेण स्थापितः शङ्करेण। एतद् अस्य वैदिकधर्मसंरक्षणस्य प्रवृत्तिरेव चित्रयति। काञ्ची, काशीमठाः शङ्करेणैव स्थापिताः इति प्रथा वर्तते। एवमेव केरलीयप्रान्ते तृशिवपेरूर् जनपदे ब्रह्मस्वंमठादीन् च एतेन भारतीयाध्यात्मिकतायाः सङ्कल्पः ऊर्ध्वं वर्धितः प्रबलीकृतश्च। किन्तु शाङ्करस्मृति इत्यादि ग्रन्थः आचारविषये कश्चित् निर्दिशति एषः ग्रन्थः शङ्करस्यास्ति वा नास्ति वा इति विषये इतोऽपि अनुसन्धानं करणीयः। किमिति चेत् एतादृशस्य दार्शनिकस्य मनसि अनाचारविषयाणां सङ्कल्पः नागच्छति इति दार्शनिकानां विश्वासः। ।

### २.१.४ श्रीशङ्करः प्रस्थानत्रयश्च

वेदान्तदर्शनस्य मौलिकग्रन्थाः भवन्ति दशोपनिषदः *ब्रह्मसूत्रं, भगवद् गीता* च। एते ग्रन्थाः प्रस्थानत्रयमिति नाम्ना भवन्ति च। एते तु श्रुतिप्रस्थानः, सूत्रप्रस्थानः, स्मृतिप्रस्थानमिति भागत्रयेण विभक्तं दृश्यते। वेदस्य अन्तिमभागः अथवा वेदसारः, वेदस्य ज्ञानकाण्डस्थाने भवति उपनिषद् । अतः एताः दशोपनिषदः श्रुतिप्रस्थानेऽन्तर्भवन्ति। बादरायणव्यासेन निर्मितानि पञ्चशताधिकपञ्चपञ्चाशत् (५५५) सूत्राणि समन्वय-अवविरोध-साधन-फलाध्यायैः चतुष्टयैः तत्र एकैकस्मिन् अध्याये पादचतुष्टयेन विभक्ता वर्तन्ते। इदं ब्रह्मसूत्रं सूत्रप्रस्थाने परियोजयति। *भगवदगीता महाभारता*न्तर्गता उपलभ्यते। महाभारतस्तु सामान्ये स्मृतिग्रन्थेषु विवक्ता दृश्यते। अतः स्मृतिप्रस्थाने एषा गीता। प्रस्थानत्रयेषु उपलभ्यमानेषु प्राचीनं भाष्यं वर्तते शाङ्करभाष्यम्।

*ब्रह्मसूत्रभाष्ये* समन्वयाध्याये समस्तवेदान्तवाक्यानां समन्वयः दृश्यते। अविरोधाध्याये स्वमतस्थापनाय अन्येषां मतानां खण्डनं पूर्वपक्षेण स्वीकृत्य युक्तियुक्तं मननं कृत्वा खण्डयति शङ्करः। अस्य ब्रह्मसूत्रस्य वाचस्पतिमिश्रस्य भामतीव्याख्या, प्रकाशात्मयतेः विवरणव्याख्या च वेदान्तदर्शने *भामती*—विवरणप्रस्थानानां मौलिक व्याख्याऽभवत्। भगवद्गीतायाः भाष्ये श्रीशङ्करः’ समस्तवेदार्थसारसंग्रहः’ भवति भगवद्गीता इति कथितवान्। एवं दुर्विज्ञेयम् इति नाम्ना प्रकीर्तितः अयमेव ग्रन्थः शङ्करेण।एतदस्य ग्रन्थस्य प्राधान्यं कियदस्ति इति ज्ञापयति । तथा अस्मिन्नेव भाष्ये कर्मकाण्डप्रधानस्य प्रवृत्तिधर्मस्य, ज्ञानकाण्डप्रधानस्य निवृत्तिधर्मस्य च विषयः कश्चित् लेशतया सूचयति आचार्यः एवं तृतीयाध्याये अस्य ज्ञानकर्मसमुच्चयवादस्य निरासः कुरुते शङ्करः।

अद्वैतदर्शनस्य व्याप्तिः स्वदेशे विदेशे च जाता इति पाश्चात्यानां शङ्कराध्ययनात् अवगम्यते। तत्र ज्ञानप्रधानस्य निवृत्तिमार्गस्य आश्रयभूतानां मीमांसकानां सिद्धान्तानां साम्यं कान्ट् वर्यस्य दर्शने विद्यते इति डां एस् राधाकृष्णन् महाभागः सिद्धान्तयति। किन्तु अन्येषु

बहुषु विषयेषु वैरुद्ध्यभावः एतेषु द्वयोः दार्शनिकयोः मध्ये वर्तते इति सत्यमेव। शङ्करस्य सिद्धान्ते बाह्यानाम् अनुभवानाम् अयथार्थत्वं कल्प्यते। किन्तु कान्ट्वर्यः अनुभवितेषु सर्वेषु विषयेषु प्रतीतिः इति सङ्कल्प्यते। ततु न तात्विकाः इति अस्य मतम्। मनोसङ्कल्पः अस्य विषये प्रवृत्तिश्च अभेदयुक्तः इति अनुकूलो इति च ब्राट्लीमहाशयस्य वादे न योजयति। इन्द्रियग्राह्यं ज्ञानं बुद्धिगम्यं नास्ति चत् विचाराणाम् इन्द्रियग्राह्यस्य जगतः अवगमनं न भवति इति अरिस्टोट्टिल् महाशयस्य सडकल्पे शङ्करः न पूर्णतया योजयति। अयं वादः प्लाट्टोमहाशयं प्रति विक्षेपति अरिस्टोट्टिल्ः। शङ्करः सङ्कल्पयति यत् इन्द्रियग्राह्यं बुद्धिग्राह्यात् अधो वर्तते इति तथा इन्द्रियग्राह्यावगमनाय बुद्धिः अवश्यः विषयः इति च। मनुष्येषु चेतनायाः वृद्धिविषये एम्पक्स् महाशयस्य दर्शनमेव आचार्यस्यापि। किन्तु अस्य अन्यः वादः यत् बुद्धिः जीविते बाध्यते इति चलनात्नकता बुद्धौ गतिहीना भवेदिति वादे न योजयति शङ्करः।

ब्राट्ली महाशयस्य चिन्ता काचित् शङ्करेण समाना दृश्यते। यथा ज्ञानम् अस्यापि प्रधानं तथा भ्रमः विनाशयुक्तः इति ब्राट्ली संङ्कल्पः शंङ्करः सदृशः दृश्यते। अतः सर्वेषां मथनेन संविचार्य एव स्वीकरोति शंङ्करः। प्रत्येकव्यक्तिजन्यानुभवसंवेदः नास्ति काल्पनिकविशेषवर्णनायुक्तः यथार्थभावः अन्यथा यथार्थ सत्ता एव शंङ्करदर्शनस्य विषयः। शंङ्करस्य अविद्या संकल्पे डोयिस्सण् महाशयस्याभिप्रायः यथा अस्माकं ज्ञानस्य आन्तरिकच्युतिः भवति अविद्या। किन्तु प्रायेण वेदान्तसिद्धान्तविषये एट्वेट् कर्यट् कथ्यते यत् ब्रह्ममतमेव अद्वैत सर्वदेवता वादे उत्कृष्टः इति। एतेषां सिद्धान्तानां परिचिन्तनेन शाङ्करदर्शनमधिकृत्य विश्वदार्शनिकाः कथम् अध्ययनं कृताः इति अवगम्यते। यथा भारते तत्कालीनसर्वदर्शनानां खण्डनेन स्वमतमण्टनम् आचार्येण यथा कृतं तदा शङ्करसिद्धान्तस्य औन्नत्यं यदा तत्र प्राप्तं तद्वत् एव विदेशेषु अस्याचार्यस्य मतं प्रबलीकृतमिति दृश्यते।

## २.२ मध्वः द्वैतपरम्पराश्च

दक्षिणकर्णाटकायाम् उडुप्पि श्रीकृष्णक्षेत्रस्य, दैतवेदान्तस्य च स्थापकः आसीत् मध्वाचार्यः। प्रस्थानत्रयस्य भाष्यवत् बहवः अन्ये च ग्रन्थाः मध्वाचार्येण कृताः दृश्यते। अन्य भाष्यकारवत् भिन्नशैल्या मध्वाचार्यः ऋग्वेदस्य ऋग्भाष्यमकरोत्। मध्वाचार्यविषये बहूनि ऐतिह्यानि वर्तन्ते। दार्शनिक दशायामस्य सङ्कल्पानां प्राधान्यमधिकमासीत् तथा च तस्मिन् काले कर्णाटकां परितः अष्ट मठाः तेन स्थापिताः वर्तन्ते। एतेन मार्गेण स्वस्य दर्शनस्य प्राधान्यं स्वाधीनं च समूहे वर्धितुं शक्तः अभवत् अयं तत्वमसि इति छान्दोग्योपनिषदः महावाक्यस्य अद्वैतव्याख्यानभिन्ना व्याख्याऽनेन कृता दृश्यते। तद् यथा त्वम् अतत् असि[२८]। प्रमाणविचारेषु अस्य दर्शने प्रमाण त्रयमेव वर्तते। तथा अस्य प्रपञ्चस्य सत्वं पञ्चभेदैः युक्तः इति सिद्धान्तिनः आचार्येण किन्तु एतेषां स्वतन्त्रं, परतन्त्रम्, इत्येवं रूपद्वयेन च स्वीकृतम्। एतयोः द्वयोः स्वतन्त्रः विष्णुरेवास्ति अन्ये सर्वे तु परतन्त्र्याः(अस्वतन्त्राः) इति अस्य वीक्षणम[२९]्। द्वैतदर्शनस्य ब्रह्मसम्ब्रदायविधिः, मध्वेनाविष्कृतः इत्यस्मात् माध्वदर्शनमिति च नामान्तराणि आविर्भूतानि। अस्य दर्शने जीवात्मनः परमात्मनश्च भिन्नास्तित्वं कल्पयति[३०]। परमात्मा तु सर्वज्ञः, सर्वद्रष्टा, सर्वस्रष्टा च अस्ति। विष्णुपत्नी लक्ष्मी तु परमात्मनः पत्नी ब्रह्मादि देवगणाः परमात्मनः पुत्राः सन्ति। श्रीदुर्गा, रुग्मिणी, सीता इत्यादयाः लक्ष्म्याः मूर्तिभेदाः अस्मिन् दर्शने[३१]। ब्रह्मादीनां जीवानां शरीरं पाञ्चबौद्धिकमस्ति। जीवः तु रूपत्रयेण वर्तते। एतानि भवन्ति सामान्यतन्वानि मध्वाचार्यस्य दर्शने।

स्वसिद्धान्तः आचार्यः स्वग्रन्थैः आविष्कृतप्रस्थानत्रयभाष्येषु गीताभाष्यस्यैव भाष्यद्वयमस्य वर्तते। एकं गीताभाष्यम् अन्यत् गीतातात्पर्यं च। एवम् आचारानुष्ठानानां विषये तथा अन्य विषये च (सप्तत्रिंशत्) ३७ कृतयः माध्वरचिताः इति सङ्कल्पः वर्तते। मध्वाचार्यविषये अस्य दर्शनस्य प्राधान्यञ्च इदानीं विचार्यते।

### २.२.१ मध्वाचार्यः

जगतः नित्यत्वे सत्यत्वे च विश्वासः आसीत् मध्वाचार्यस्य । मध्वाचार्यः स्वपूर्वसङ्कल्पानां जगन्मिथ्यात्वसङ्कल्पानां च वीक्षणे न योजयति। सर्वेश्वरः पूर्णः चेत् मनुष्यस्य कथं पूर्णत्वं साधयितुं शक्यते इति मतम्। दक्षिणभारते कर्णाटकायाम् उडुप्पी परितः दक्षिणदेशे पाङ्कजक्षेत्रमिति अथवा बेरल्ला वा, मृदुबल्ला वा, पाण्डुबल्ले वा इत्यादि नाम विशिष्टदेशे [३२] कलिवर्षे अष्टत्रिंशत्युत्तरत्रिशताधिकचतुःसहस्रतमे (४३३८) अथवा क्रिस्तुवर्षे अष्टत्रिंशत्युत्तरद्विशताधिकएकसहस्र (१२३८) तमे वर्षे आसीत् तस्य जन्म। केचन क्रिस्तुवर्षे एकोनशतोत्तरशताधिकसहस्र (११९९) तमे वर्षे इति च सङ्कल्पयति। भण्डार्कर् महोदयस्य मतानुसारेण जन्म कालं (चतुस्सहस्राधिकत्रिशतं) ४३०० कलिवर्षे अभवत् इति[३३]। मञ्जेश्वरीयवासिनः गोविन्द पै इत्यस्य अभिप्राये अस्य जन्म कलिवर्षे नवत्रिंशत्युत्तरत्रिशताधिकचतुःस्सहस्र (४३३९) तमे अभवत् इति च दृश्यते। विलम्बी इति संवत्सरे आश्वजमासे विजयदशम्याम् आसीत् तद्दिनम्। किन्तु अन्ये केचनाः माघमासस्य शुद्धसप्तमि इति च केचन सिद्धान्तयति। मध्वाचार्यः एव पूर्णप्रज्ञ, आनन्दतीर्थ, नन्दितीर्थ, वासुदेव इत्यादि अपरनाम्नेषु च आहूयते[३४]।

मध्वाचार्यस्य कृतौ अणुमध्वचरिते विजयदशम्याम् आसीत् तस्य जन्म इति दृश्यते। किन्तु अस्यैव कृतौ तिथि निर्णये कटपयादि संख्यनुसारं ४४०९ अस्याः रचनायाः पूर्वः अभवत् इति च ज्ञायते। मध्वस्य अन्यकृतौ महाभारततात्पर्यनिर्णये कलिसंवत्सरे ४३०० तमे भवति इति अवगच्छति।

अस्य पिता नारायणभट्टः माता वेदवती च। किन्तु अन्यत्र कुत्रचित् मध्वगेहभट्टः अस्य पिता, देववल्लीऽस्य माता च दृश्यते। जन्मकाले पुत्राय वासुदेवः इति नामकरणं च दत्तं पितृभ्याम् । अस्य जन्म विषये बहूनि ऐतिह्यानि सन्ति। अस्य तृतीये वयसि अक्षराभ्यां सादि कृत्वा पञ्चमे पुराणप्रवचनं कर्तारं वादे परिष्कृतमिति कथाः प्रचरन्ति। उपनयनात् परं

पठनारंम्भतः पठनेन साकं शरीरारोग्याय च प्राधान्यं दातव्यम् इति स्वसतीर्थ्यान् उद्बोधयति मध्वाचार्यः[35]। सोदराणां मरणानन्तरम् एकपुत्रं वासुदेवं परिपालितवन्तौ स्वपितरौ। अस्मिन्नेव काले सन्यासचिन्ता अस्य मनसि आगता १२४९ तमे वर्षे एकादशतमे वयसि अच्च्युतप्रज्ञात् सन्यासदीक्षां स्वीकृतवानऽयं ततः वासुदेवः पूर्णप्रज्ञः इति प्रख्यातः ततः परमेवऽयम् आनन्ततीर्थः, मध्वः इति च कीर्तितः। सन्यासकालेऽयं दक्षिभारतेषु बहुषु स्थलेषु पर्यटनमकरोत्। पर्यटनं कृत्वा अन्यान् सैद्धान्तिकान् वादे खण्टनं कृत्वा स्वाशयम् उद्बोधितं च। पर्यटनानन्तरम् उटुप्यां प्रत्यागतवानयं भगवद्गीतायाः भाष्यं लिखितुं निश्चितवान्। किन्तु अन्यमेकमैतिह्यम् अयम् उत्तरभारते पर्यटनवेलायां गंगा स्नानात् परं ४१ दिनानि यावत् मौनव्रतानन्तरं व्यासबदर्यां प्राप्य तत्रैव भाष्यम् आरब्धवानिति च दृश्यते। गीताभाष्यानन्तरमेव ब्रह्मसूत्रभाष्यस्य सर्वशास्त्रार्थासंग्रहस्य रचनाऽनेन कृता वर्तते। ततः पश्चात् एकैकस्यापि उपनिषदः भाष्यमकरोत्। उपनिषद्भाष्यानन्तरमेव ऋग्वेदभाष्यम् अनेन कृतं, ऋग्वेदस्य ४० सूक्तानाम् आद्ध्यात्मिकतत्व प्रबोधनेन *ऋग्भाष्यं* तेन कृतः[36]। ऋग्भाष्यानन्तरमेव अस्य प्रकरणग्रन्थानां रचना कृताऽनेन। *तत्वसंख्यानं, यतिप्रणवकल्पं तिथिनिर्णयम्*, इत्यादयः ग्रन्थाः अनेन कृताः शकवर्षे षष्ठ्युत्तरशताधिकसहस्र (११६०) तमे उटुप्पि श्रीकृष्णक्षेत्रप्रतिष्ठा कारिताऽनेन[37]। अस्मिन्नेव काले द्वादशस्तोत्ररचनाऽभवत् अत्रैव अयं बालकानां ब्रह्मचारीणां कृते संन्यासम् अदतत् ततः अष्टमठानां स्थापनं कृतमनेन। विष्णोः अष्टावताराणां प्रतिष्ठा एतेषु मठेषु दृश्यते। तत्र अष्ट शिष्याः मठाधिपतिरुपेण स्थापिताः अनेन। उत्तरभारते च मध्वदर्शनानुसारिणः जनाः मठाः च सङ्घाः च अतिविशालरीत्या वर्तिता दृश्यते। वङ्गदेशे माध्वगौडीयमठः, हरेकृष्ण प्रस्थानश्च एतेषु अन्तर्भवति। ततः पश्चात् किञ्चित् कालं यावत् सः द्वैतवेदान्तप्रचारणाय भारतवर्षं सम्पूरणम् अटित्वा वादप्रतिवादान् अकरोत् च।

समूहे तस्मिन् काले प्रचरितानाम् अनाचाराणां परिवर्तनं च अनेन कृतम्। कन्नडभाषायां बहूनि स्तोत्रानि कीर्तनानि च तेन रचितानि ततः परं सः स्वस्य सोदरं विष्णुतीर्थं सोदै मठस्य, सुब्रह्मण्यमठस्य च प्रथमाधिपतिरुपेण निश्चितः। अस्य अन्तिम काले

रचिता कृतिः कृष्णामृतमहार्णवं ततः तस्य भाषणपरम्पराणां कर्मनिर्णयस्य च कर्म कृतमनेन। अन्त्यवेलायां सः बदरीयात्रा कृता कलिवर्षे अष्टादशोत्तरचतुःशताधिकचतुःसहस्र(४४१८) तमे क्रिस्तुवर्षे सप्तदशोत्तरत्रिशताधिकसहस्र १३१७ तमे माघमासे शुक्लनवम्यां तिथौ समाधिपदं प्राप इति माध्वानां विश्वासः। अस्य ७९ वयसि समाधिं प्राप्तवानिति मतम् [३८]। तत्रापि अभिप्रायभेदाः दृश्यन्ते।

### २.२.२ द्वैतदर्शनम्

तत्त्वमसि इति सामवेदीय छान्दोग्योपनिषदः महावाक्यस्य तत् त्वम् असि इति पदच्छेदेन तस्य परमचैतन्यस्य त्वयि वर्तमानस्य चैतन्यस्य च ऐक्यभावं मण्डयति अद्वैतसिद्धान्ते। अस्य विरुद्धं व्याख्यानं वर्तते द्वैतदर्शने यथा -अतत् त्वम् असि इति अत्रत्या व्याख्या त्वं तद्भिन्नः इति अतः अत्रत्य सङ्कल्पः इति। त्वं ब्रह्मभिन्नः जीवः इति मध्वव्याख्या। अतः जीवः ब्रह्मत्वकल्पनं माध्वानाम् अस्वीकारः विषयः। अनेन दर्शनेन पदार्थाः दश सन्ति यथा द्रव्य, गुण, कर्म, सामान्य, विशेष, अभावं, विशिष्टम्, अंशि, शक्ति, सादृश्यम्, एवमेव [३९] द्रव्यस्य भेदद्वयं कल्पयति मध्वः। प्रपञ्चे पदार्थानां स्वरुपः स्वतन्त्रं, परतन्त्रम् इति भेदयति। एतयोः भेदयोः विष्णु विना अन्ये सर्वे परतन्त्राः इति एतेषां सिद्धान्तः। अभावस्य भागत्रयं वर्तते यथा प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, किन्तु अन्येषु दर्शनेषु अन्योन्याभावः इति भेदः दृश्यते। चेतनं तु द्विविधं— यथा दुखस्पृष्टं, दुखास्पृष्टम्। एतयोः रमायेव दुखास्पृष्टः अन्यास्तु दुखस्पृष्टाश्च,दुखस्पृष्टानां विमुक्ताः इति दुखसंस्थानाः इति च भेदयति। दुखसंस्थानेषु मुक्तियोग्याः, मुक्तिअयोग्याः चास्ति। मुक्तियोग्याः तु देवाः, पितरः, ऋषयः, राजानः, मनुष्याः इति पञ्चविधाः। मुक्ति अयोग्याः तु राक्षसाः। एताः नित्याः पुराणं, प्रकृति कालं च अनित्यानि तत्वानि। अनित्याः तु संस्पृष्टः असंस्पृष्टश्च। ब्रह्माण्डः तस्योपरि वर्तमाना ब्रह्माण्डान्तर्भूताः च समस्ताः संस्पृष्टाः असंस्पृष्टाः यथा महत्तत्वम् अहङ्कारं, बुद्धिः, मनः, दशेन्द्रियाणि, पञ्चतन्मात्राणि पञ्चभूताः च।

सर्वज्ञः, सर्वद्रष्टा, सर्वस्रष्टा, च परमात्मा। परमात्मनः पत्नी लक्ष्मी। ब्रह्मादि देवाः तु पुत्राः। श्रीदुर्गा, रुग्मिणी, सीता इत्यादयाः लक्ष्म्याः मूर्तीभेदाः च सन्ति। इदं शरीरं पञ्चभूतात्मकं वर्तते। जीवः तु मुक्तियोगः, तमोमयः, नित्यसंसारि इत्यनेन भेदत्रयेण विद्यते। नित्याति तु ईश्वरकर्माणि यथा सृष्टिः संहारश्च, मनुष्य कर्माणि तु अनित्यानि।

*प्रमाणलक्षण*मिति ग्रन्थे प्रमाणशब्दस्य प्रमा इति प्रमा साधनमिति च प्रयुज्यते। यथार्थज्ञानं प्रमा तु केवलप्रमाणम्। ज्ञानस्य साधनं तु अनुप्रमाणञ्च इति मध्वः विशदयति। प्रत्यक्षम्, अनुमानम्, आगममिति अनुप्रमाणाः ईशलक्ष्मी, योगलक्ष्मी एव प्रमाणानि एतद् भिन्नं स्मृतिप्रमायाम्, ऐतिह्यम्, आगमे, उपमानम्, अनुमाने, अभावज्ञानं प्रत्यक्षानुमाने च अन्तर्भवति। वादं, जल्पं, वितण्डम् इत्येतेषां भिन्नशैल्यामेव द्वैतदर्शने प्रतिपादयति। प्रपञ्चं यथार्थे सत्यमेव, जीवात्मानाः परस्परभिन्नाः उत्तमाधमादि अवस्था भेदेन साकं हरेः अनुचराः इव वर्तन्ते। निर्मलभक्त्या स्वायत्तः सुखानुभवः एव अत्रत्य मोक्षं, प्रमाणविचारे प्रत्यक्ष, अनुमान, आगमाः इति प्रमाणाः स्वीकृताः दृश्यन्ते । सम्पूर्णेन श्रुतिवाक्येन ज्ञातव्यः विषयः परमतात्पर्यः हरिरेव। द्वैतदर्शनस्य प्रचारेण क्षयागताः वैदिकधर्मान् बलिष्ठः भावयति। भक्तिः, उपासना, मरणानन्तरजीवितं, मोक्षम् इत्यादीनां दार्शनिकव्याख्यानेषु सामान्यजनानां प्राधान्यमावहति दर्शनमिदम् । किन्तु सैद्धान्तिकतया विचिन्तयति चेत् युक्तिमतिक्रम्य विषय व्याख्या कृता इत्यत्र दृश्यते।

### २.२.३ मध्वपरम्पराः दार्शनिकसविशेषताः

द्वैतवेदान्तसिद्धान्तस्थापकः अस्ति श्रीमध्वाचार्यः जीवात्म-परमात्मनोः भेदत्वं कल्पयति अनेन दर्शनेन द्वैविध्यं द्वीतं, तस्य भावः द्वैतम्। अद्वैतसिद्धान्ते ब्रह्मैव सत्यम् अन्यानि सर्वाणि असत्यानि यदा संसारः, जीवः, गुरुः सर्वे प्रतीतिमात्राः। किन्तु द्वैतदर्शनेन प्रपञ्चमिति न तु प्रतिभासः प्रत्युत सत्यमेव। अस्य सिद्धान्तस्य साधूकरणाय प्रमेयस्य स्वातन्त्र्यम् एवं परतन्त्रम् इति भेदः स्वीकृतः अनेन सिद्धान्तेन। वस्तु सत्यमिति युक्त्या

अग्ङीकरोति मध्वः। प्रपञ्चानुभवः साक्षिसिद्धः स्वतन्त्रस्तु विष्णुरेव अन्ये परतन्त्रात्मकाः प्रपञ्चस्य सृष्टिस्थितिकारणं भगवान् अनन्तशक्तिसम्पन्नश्च। स्वतन्त्र परतन्त्रयोः सैद्धान्तिक मण्डनाय मध्वः *छान्दोग्योपनिषदः* एकविज्ञानेन सर्वविज्ञानमिति इत्यनेन श्रुतिवाक्यं स्वीकरोति। एकं वस्तु तद् भिन्नं सर्वं च सत्यमेव इति अस्य वादः। यथार्थस्य एकस्य अन्येषां च सम्बन्धस्य सूचनीयाः अत्र एकं स्वतन्त्रम् अन्यानि परतन्त्राणि इत्येवं वादयति। अतः एक एव सत्यम् अन्यानि मिथ्या इति दर्शनं युक्तिरहितं भवेत्। एतदेव द्वैतपरम्परायाः वैशिष्ट्यम्। अद्वैतदर्शनस्य परमात्मसङ्कल्पस्य भिन्नः सङ्कल्पः अत्र दृश्यते। द्वैते ब्रह्मैव कर्ता न तु उपादानकारणम्। किन्तु अद्वैते विशिष्टाद्वैते च ब्रह्मैव निमित्तोपादानकारममिति सिद्धान्तः दृश्यत[४७]। ब्रह्म पूर्णत्वेन स्वीकरोति च। चैतन्येन्द्रियं साक्षी अनेन अभिव्यञ्चितं ज्ञानं चात्र साक्षी। प्रपञ्चानुभवः साक्षिसिद्धमित्यस्मात् प्रमाणमिति मध्वसिद्धान्तः। अनेन प्रपञ्चानुभवं मिथ्या इति अद्वैतसिद्धान्तस्य खण्डनं जातमत्र। *छान्दोग्योपनिषदीय* तत्वमसि इति महावाक्यस्य- अतत् त्वम् असि इति पदच्छेदेन त्वं तस्मात् भिन्नः इति अर्थं सिद्ध्यति। जीवात्म परमात्मनोः भेदः सत्यमेव, जगदपि सत्यमेव, प्रपञ्चश्च सत्यमेव इति अत्र युक्तिः संङ्गतः वादः जीवस्य द्वैतसङ्कल्पे जीवः सुखी दुखी च भवति। सः तु बन्धमोक्षयोः योग्यश्च अयमेव विषयः श्रीमध्वाचार्यः स्वस्य *विष्णुतत्वनिर्णये* ग्रन्थे विशदयति।

बिम्बप्रतिबिम्बवादेन मायावादिनां जीवानां भेदसङ्कल्पं मध्वः खण्डयति, यथा जीवभेदः उपाधिसहितः एकजीववादः सङ्गतः इति वादः अनुभवस्य प्रमाणस्य च विरुद्धः इति विशदयति अत्राचार्यः स्वस्य गीताभाष्ये ( ७:१४) जीवात्मनां बन्धहेतु ईश्वरेण नियन्त्रितस्य प्रकृतेः शक्तिरिति कथयति । १५ तमे अध्याये क्षरभूतानाम् अति क्रमत्वात् अक्षरेषु उत्तमत्वात् च लोके, वेदे च अहं पुरुषोत्तमः इत्यनेन गीता व्याख्यानेन पुरुषोत्तमत्वम् अत्र भगवति साधयति मध्वः।

## २.२.४. मध्वः प्रस्थानत्रयश्च

अद्वैतदर्शनस्य स्थापकः श्रीशङ्करवत् मध्वाचार्यस्य प्रस्थानत्रयस्य व्याख्यानेन प्रसिद्धः अभवत्। *सर्वशास्त्रार्थसंग्रहः* अथवा अणुभाष्यमिति नाम्ना च प्रसिद्धस्य अस्य *ब्रह्मसूत्रभाष्यस्य* अस्यैव *ब्रह्मसूत्रानुव्याख्यानं*, ब्रह्मसूत्रानुव्याख्यानस्य *ब्रहसूत्रानुव्याख्यानविवरणम्* इत्यादयः अस्य ब्रह्मसूत्रव्याख्याः प्रसिद्धाः। *भगवद्गीतायाः भगवद्गीताभाष्यं, भगवद्गीतातात्पर्यनिर्णयः* च अनेन रचिताः। उपनिषद्भाष्येषु *महाऐतरेयोपनिषद्, बृहदारण्यकोपनिषद्, छान्दोग्यं, तैत्तिरीयं, तलवकारं, केनं, कठं, मुण्डकं, प्रश्नम्, ईशावास्यं, माण्डूक्य, विज्ञानीयमन्त्र* उपनिषदां भाष्यमनेन कृतम्। गीताव्याख्याने अयं गीतायाः सर्वेषां श्लोकानां व्याख्यानं न कृतं दृश्यते। अनेन भगवतः सर्वोत्तमस्य प्रतिपादनमेव परं लक्ष्यमस्य। उपनिषदः अस्य चिन्तायां परमात्मविद्या एव अनेन सङ्कल्पेन जीवात्मा परमात्मनि संस्थापनेन जन्मजरादीनाम् उपद्रवानाम् नाशः संसारबीजभूत अविद्यायाः, तस्याः संस्कारस्य च क्षयं लक्ष्यते। उपनिषद्भाष्येषु द्वैतसिद्धान्तस्य बृहत्विवरणं स्वीकृतमनेन। एवम् अस्याचार्यस्य अन्याः कृतयश्च प्राधान्यतमाः सन्ति। *ऐतरेयब्राह्मणं, महानाम्नीखण्डनम्, ऋग्भाष्यं, खण्डार्थनिर्णयम्* इत्यादयः इतराः कृतयः। इतिहासग्रन्थस्य *महाभारतस्य* उद्बोधनानि संयोज्य विरचितं *महाभारततात्पर्यनिर्णयं*, भागवतस्य *भागवततात्पर्यनिर्णयं* च मध्वस्य रचनालोके दृश्यन्ते। एवमेव यमकभारतं,महाभारततात्पर्यं च मध्वस्य रचना एव। अस्य वीक्षणे इतिहासपुराणादयः वेदार्थपोषणात्मकाः ग्रन्थाः। वेदस्तु प्रभुसंमितः, पुराणस्तु सुहृत्सम्मितश्च। एतयोः द्वयोः ग्रन्थयोः लक्ष्यन्तु मनुष्याणां कर्तव्याकर्तव्यविवेकेन कर्तव्योन्मुखत्वमिति। मध्वाचार्यस्यैव नवाधिकाः लघुप्रबन्धाः च दृश्यन्ते। एतेषु बृहत्तमः प्रधानश्च भवति *विष्णुतत्वनिर्णयः*। एतस्मिन् ग्रन्थे त्रय अध्यायाः दृश्यन्ते। अणुव्याख्याने आचार्येण प्रतिपादिताः विषयाः अत्र संगृहिताः भवन्ति। अद्वैतदर्शनस्य मूलात्मकानि तत्वानि अत्र खण्डयति। एवमन्येषु कृतिषु च अद्वैतदर्शनस्य खण्डनं दृश्यते। यथा प्रपञ्चमिथ्यात्वं, मायावादं, मिथ्यात्वानुमानम् इत्यादीनां सिद्धान्तानां खण्डनं क्रियते *तत्वद्योतेन*,

मायावादखण्डनेन मिथ्यानुमानभूषणेन च ग्रन्थेन। जीवेश्वरजीवजगत्भेदानां निरासः *उपाधिखण्डनम्* इत्यनेन प्रबन्धेन कृतः। *तत्वसंख्यानं, प्रमाणलक्षणं, कथालाक्षणं*, तथा *कृष्णामृतमहार्णवं, तन्त्रसारसंग्रहः, सदाचारस्मृतिः, जयन्तिनिर्णयः, तिथिनिर्णयः, प्रणवकल्पः, न्यासपद्धतिः* इत्यादिभिः ग्रन्थैः श्रुतिस्मृतिपुराणादीनाम् आचाराणाम् अनुष्ठानादिविषयाणां च स्वसङ्कल्पम् अभिव्यञ्चयति मध्वः। स्तोत्रकृतिषु वर्तन्ते *नरसिंहनघस्तुतिः, द्वादशस्तोत्राणि* च। वैष्णवसम्ब्रदायः अस्य उपासना चेदपि सः आध्यात्मिकतायाः भक्त्या च सङ्कल्पेन शैवोपासना च स्वीकृत्य इति दृश्यते। एतद् याथास्थिकानां याथास्थितिकात् वैष्णवात् अस्य विलक्षणभावं प्रदर्शयति[४१] ।वेदान्तः अपौरुषेयाः इति अस्य सङ्कल्पः। अतः एते तु स्वतःप्रमाणयुक्ताः सः सर्वेषु वेदेषु प्रावीण्यं आर्जनीयाः इति सङ्कल्पयति। ईश्वरप्राप्तिः साक्षात् न शक्यः, वायुरेव मध्यस्थः इति च अस्य विश्वासः, मध्वस्य कारुण्य सिद्धान्तः अगस्टिन् वर्यस्य वीक्षणस्य समानः इति एस् राधाकृष्णन्वर्यस्याभिप्रायः[४२]। अस्य परमात्मनः वीक्षणं युक्तिरहितं च। जीवात्मानां भेदः अन्ये च सिद्धान्तः चात्रान्तर्भवति। अस्य समानं विवरणं दृश्यते अवताराणां प्रलयानां चाधिकृत्य सिद्धान्तेषु।

### २.३ श्रीरामानुजः विशिष्टाद्वैतश्च

उभयवेदान्ति इति प्रकीर्तितस्य रामानुजदर्शनस्य रामानुजवेदान्तं, श्रीसम्प्रदायः इत्यादि नाम्ना च विख्यातं भवति विशिष्टाद्वैतदर्शनम्। रामानुजेन आविष्कृतः अद्वैतसिद्धान्तः इति च प्रख्यातः अयं सिद्धान्तः। वेदान्तीनां प्रामाणिकग्रन्थस्य, *ब्रह्मसूत्रस्य* रामानुजभाष्यमस्ति *श्रीभाष्यम्*। चित्त्, अचित्त्, ईश्वरः च अस्य दर्शनस्य मूल्यतत्वानि। चिति, अचिति, च ईश्वरांशः अन्तर्भवति इत्यस्मात् कारणात् ईश्वरः एकः एव अतः इदं दर्शनमपि अद्वैतमेवेति वादः दृश्यते। चिद्विशिष्टः अस्मिन् सिद्धान्ते ईश्वरः, अतः विशिष्टाद्वैतमिति नाम्ना सिद्धान्तोऽयं प्रख्यातः। अस्मिन् दर्शने ईश्वरः जीवात्मनां स्रष्टा नास्ति नियामकः च। आत्मा त्रयः वर्तन्ते। चित् तत्वं जीवात्मा, अचित् तत्वस्य च त्रैविद्ध्यं वर्तते। जडः परिणामश्च

तत्वमिदम्। ईश्वरस्वरुपस्तु पञ्चविधानसिद्धान्तयति दर्शनेऽस्मिन्। प्रत्यक्ष, अनुमान, शब्दाः प्रमाणत्रयाः एतेषाम्। एते सद्वादिनः तथा वेदस्तु एतेषाम् औपौरुषेयश्च। मोक्षस्तु एतेषां सिद्धान्ते ज्ञान-कर्मयोगानां भक्तियोगेन सह सम्मिलितेन चेत् साधयति। रामानुजानन्तरं सारयोगि, भूतयोगि कुलशेघरः इत्यादयः द्वादशयोगिनः आचार्याः एतेषां वर्तन्ते। एतेषामाचार्याणामनन्तरं यमुनाचार्यः, नाथमुनिः, वेदान्तदेशिकः, श्रीरामान्तस्वामि इत्यादयः अस्य दर्शनस्य प्रधानाचार्याः आसन्। अत्र च माध्व दर्शनस्य समानयुक्तः विष्णुः पुरुषोत्तमः, नाारायणः, वासुदेवः, कृष्ण इत्यादिभिः विविधैः भावैः स्वीक्रियन्ते। वैष्णवसम्प्रदायः चत्वारः सन्ति। रामानुजस्य श्रीसम्ब्रदायः, मध्वस्य ब्रह्मसब्रदायः, विष्णुस्वामिनः रुद्रसम्ब्रदायः, निम्बार्कस्य सनकादि सम्ब्रदायश्च वैष्णवीयाः। रामानुजाचार्यास्य कृतीनामनुसन्धानात् कार्यमेकमवगमयते यत् अस्य स्वाधीनेषु ग्रन्थेषु प्रधानः भवति भागवतपुराणं तथा विष्णुपुराणञ्च। अस्य श्रीभाष्यस्य लेखनात् परं स्वस्य शिष्यस्य कुरत्ताल् वारस्य साहाय्येन सः *वेदान्तसारः, वेदार्थसंग्रहः, वेदान्तदीपश्च* ग्रन्थाः च कृतवान्। ग्रन्थरचनानन्तरम् असौ दक्षिणभारतेषु सर्वेषु देशेषु अटित्वा स्वस्य दर्शनस्य प्रचरणम् अधिकेषु जनेषु संपाठितवान्। एतेन साकं वैष्णवसङ्केताः क्षेत्राणि च समुद्धारणाय च प्रयत्नमकरोत्।

### २.३.१ श्रीरामानुजाचार्यः

*श्रीभाष्य*मिति ब्रह्मसूत्रव्याख्यानेन अतिप्रसिद्धः आचार्यः रामानुजाचार्यवत् नास्तिऽस्मिन् लोकेऽन्यः। श्रीभाष्येण साकं सप्ताधिकाः कृतयः अस्यैव वर्तन्ते। दक्षिणभारते द्रविडदेशे मद्रापुर्यां दक्षिणभागे श्रीपेरुम्पत्तूरस्ति अस्यः जन्मस्थानम् । क्रिस्तुवर्षे सप्तदशाधिकसहस्र(१०१७) तमे वर्षे वैदिकब्राह्मणस्य आसुरिककेशव दीक्षितस्य, कान्तिमत्याः च पुत्रत्वेन जातः अयम्। क्रिस्तु वर्षे सप्तत्रिंशत्युत्तरशताधिकसहस्र (११३७) तमे वर्षपर्यन्तं विंशत्यधिकशत(१२०) वर्षाणि यावत् अस्य कालः इति निश्चितः किन्तु एतदतिरिच्य अन्यः अभिप्रायश्च यथा [४३] क्रिस्तुवर्षे सप्तसप्तत्यधिकसहस्र(१०७७) तमः

सप्तपञ्चाशतोत्तरशताधिकसहस्रं (११५७) पर्यन्ताः वर्षाः अशीति वर्षाणि रामानुजाचार्यस्य कालमिति अन्यः वादः वर्तते[४४]। बाल्ये एव अस्य पितुः मरणमभवत्। तथा च अस्य तत्कालस्य सामान्यशिक्षणं प्राप्तमासीत्। ततः परं सः काञ्चीपुरे पण्डिस्य यादवप्रकाशात् वेदान्तविषयान् अधीतवान्[४५]। तस्मिन् शिक्षणकाले एव तेन पठितान् विषयान् सर्वान् सम्पूर्णतया स्वीकर्तुं न शक्तवान् तथाऽपि विषये प्रावीणः अस्ति अयम्। एतद् ज्ञात्वा श्रीरंङ्गमठस्य कूलपतिः आल्वन्तारः रामानुजं स्वस्थाने अवरोढुं सन्नद्धः अभवत्। अथ कुलपतेः समाधिवेलायां सः स्वशिष्यान् रामानुजम् आह्वयितुम् आज्ञापितवान्। किन्तु रामानुजागमनात् पूर्वमेव अस्य समाधिरभवत्। समाधिवेलायां गुरोः अग्ङुलीत्रयाणां बन्धनम् आग्रहत्रयाणां प्रतिफलनमिति शिष्याः व्याख्यातितवन्तः। एतेषु मुख्यः आग्रहः *ब्रह्मसूत्रस्य* सरलभाष्यमिति तैः निश्चितम्। रामानुजाचार्यः काञ्चीपुरं प्रतिगतवान् च। ततः पश्चात् सः मधुरान्तकस्य पेरियनम्पि आचार्यात् वेदान्तविषयान् अधीतवान् अनन्तरमेव अस्य सन्यासम्। सन्यासात् परं जनाः तं यतिराजः इति कीर्तितः। अस्य श्रीरंग्ङवासकाले तिरुवाय्मोषि इति ग्रन्थं च पठितवान्। एतद् परमेव कुरुत्ताल् वार्यरस्य साहाय्येन *वेदान्तसारं, वेदान्तदीपं, वेदान्तसंग्रहः* इत्यादिग्रन्थाणां रचना कृताचार्येण। ततः परं *ब्रह्मसूत्रस्य* भाष्यं *श्रीभाष्यं भगवद् गीतायाः* भाष्यञ्च रचितवान् सः। शंङ्कराचार्यः द्वितीयाद्यायस्य दशमश्लोकात् आरभ्य भाष्यमकरोत् तर्हि रामानुजाचार्यः प्रथमाध्यायात् आरभ्यैव भाष्यमकरोत्। किन्तु शङ्करस्य उपोद्घातभाष्यञ्च वर्तते। श्रीभाष्यस्य अङ्गीकारः वैष्णवपण्डितैः कृतः इत्यस्मात् कारणात् वैष्णवानां प्रामाणिकः ग्रन्थः वर्तते अधुनाऽपि *श्रीभाष्यम्*। दक्षिण भारते मन्दिरादीनां समुद्धारणं कृत्वा तत्रत्यानां जनानाम् उद्बोदनमपि रामानुजाचार्येण कृतमासीत्। अनेन बहवः वैष्णवीय धर्मेषु आकृष्टाः अभवन्। पश्चात् सः उत्तरभारतस्य विविधान् देशान् सन्दर्शितवान्। अन्ते सः काश्मीरस्य शारदापीठमपि प्राप्तमिति प्रथा। ततः परं च दक्षिणभारते च सुप्रधानान् देशान् च सन्दर्शितवान् च अयम्। द्रविडजन्मः अयं चेदपि तमिष् भाषायां न कृताः अथवा प्राप्ताः अस्य ग्रन्थाः वा प्रबन्धाः। नम्माल् वारस्य तिरुवाय्

मेषि इति तमिष् भाषा ग्रन्थस्य संस्कृतानुवादः अनेन कृतः इति च दृश्यते। क्रिस्तु वर्षे ११३७ तमेऽयं समाधिमधिगतवान्।

### २.३.२. विशिष्टाद्वैतदर्शनम्

वेदान्तदर्शनस्य अतिशक्तियुक्ता परम्परा वर्तते रामाननुजाचार्यस्य विशिष्टाद्वैतम्। अद्वैतात् विशिष्टाकाचित् पद्धतिः अत्र वर्तते इति अनेन नाम्ना प्रतीयते। अस्मिन् विषये *भारतीयदर्शनस्य* कर्ता एस् राधाकृष्णन् महाभागः कथयति –यथा परमात्मा अन्यानि आत्मनश्च जडप्रकृतिना साकं नामरुपात्मकाना[४६] बहुत्वे तिष्ठति। अतः एव रामानुजस्य सिद्धान्तस्य विशिष्टाद्वैतमिति नाम। वेदान्ते सनकादि सम्प्रदायः, रुद्र सम्प्रदायः, ब्रह्म सम्प्रदायः, श्रीसम्ब्रदायः इत्येवं वैष्णवीयदर्शनानि चत्वारि सन्ति। एतेषु प्रथम गणनीयः भवति श्री सम्प्रदायः, किन्तु एषः सम्प्रदायः ब्रह्मविवर्तवादात् उपरि प्राधान्यं ब्रह्मपरिणामवादस्य प्रदास्यतीति दृश्यत[४७]। अनेन ईश्वरवाद-ब्रह्मवादयोः मेलनम् अत्र विचिन्त्यते। अस्य सम्प्रदायस्य सादृश्यवादः गीतायामपि दृश्यते च[४८]। एम् हिरियण्णा महाभागस्याभिप्राये जीवस्य ब्रह्मणश्च ऐक्यविषयात् अद्वैतविषयात् भिन्नं आत्मनः विशिष्टाद्वैते प्राधान्यं वर्तते इति। एतस्य मूलं द्विमुखम् इत्यस्मात् यथा वेदः, पुराणं द्रमिड /द्रमिल् भाषा ग्रन्थाः अस्य दर्शनस्य उभयवेदान्तम् इति नाम च वर्तते। नाथमुनिः, अस्य पौत्रः यमुनाचार्यश्च, रामानुजाचार्यात् प्राग्कतनाः आचार्याः वर्तन्ते। ( *आगमप्रमाणाः महापुरुषनिर्णयः, गीतार्थसंग्रहः, सिद्धित्रयं, श्रीस्तुतिः, विष्णुस्तुतिः* इत्येतेषां ग्रन्थानां कर्तुः ) यमुनाचार्यस्य[४९] प्रशिष्यः भवति रामानुजाचार्यः। आचार्यस्तु स्वग्रन्थैः ईस्वरस्य जगदश्च सम्बन्धेषु अधिकश्रद्धामाविष्कृतवान्। एतेन सप्तस्वरुपः स्वतन्त्रश्च ईश्वरः इति सः सिद्धान्तितवान्। लोके सर्वाण्यात्मानः यथार्थाः एतेषां यथार्थत्वम् ईश्वरयाथार्थ्यत्वे आश्रिताः इति च अस्य सिद्धान्तः। मुक्तात्मनां वैय्यक्तिकजीवितम् अनुवर्ततेऽपि बौद्धिकप्रपञ्चस्य जीवात्मनः च स्वतन्त्र-याथार्थ्य-जीवितम[५०] अस्ति चेदपि ते तात्विकतया ब्रह्मतुल्यः न भवेत् इतिऽस्य

सङ्कल्पः। ब्रह्म तु अपूर्णत्वात् नित्यमुक्तं, भूतप्रकृतिशून्यं च। जीवात्मा अज्ञानदुखविधेयञ्च। ब्रह्म आत्मनः आत्मा, नियामकशक्तिश्च। तस्मात् कारणात् आत्मनः अस्तित्वं तेषां रुपञ्च साध्यते। विशिष्टाद्वैतस्य पूर्वग्रन्थत्वेन ईश्वरवादयुक्ताः उपनिदः वैष्णवीयादर्शयुक्ताः महाभारतीयभागाः, *विष्णुपुराणं, वैष्णवागमाः, भगवद्गीता,* आल्वार्जनानाम् आचार्याणां कृतयश्च स्वीक्रियन्ते विशिष्टाद्वैतवादिभिः। एतेषु वर्तमानानि तत्वानां वैष्णवभक्तानां विश्वासेन भक्त्या च साकं समन्वयति, रामानुजाचार्यः। भक्त्या मोक्षप्राप्तिरिति सिद्धान्तः रामानुजाचार्यस्य भक्तिं उपनिषदां गीतायाः ब्रह्मसूत्रस्य च मुख्यतत्वत्वेन परिगण्यते आचार्यैः। अस्याचार्यस्य प्रभावः अनन्तरकालीये भारते मध्वाचार्यः, वल्लभाचार्यः, रामानन्ताचार्यः, चैतन्यमहाप्रभुः, कबरीदासः, गुरुनानाक्, राजारां मोहन् राई, इत्येतेषां दर्शने स्वाधीनमाविष्कृतमिति राधाकृष्णन् महाभागस्य अभिप्रायः[५१]।

प्रमाणचिन्तायां सः प्रत्यक्षम्, अनुमानं, शब्दश्च (वेदश्च ) ज्ञानसाधनत्वेन अङ्गीकरोति। सविकल्पक-निर्विकल्पकप्रत्यक्षाः एतैः स्वीक्रियन्ते। सत्कार्यवादश्च अङ्गीक्रियतेऽनेन आचार्येण सर्वेषां कार्याणां किञ्चित् पूर्ववर्तिकारणं वर्तते, अवस्थान्तरस्तु कार्यकारणभावस्य अर्थः इति तन्तुः पटस्य कारणत्वेन सः सिद्धान्तयति। विषयविषयीभेदः आपेक्षिकः इति शङ्करदर्शनम् आचार्यः खण्डयति[५२]। एवमेव शङ्करस्य मायावादस्य प्रपञ्चस्य प्रतिभासस्वभावस्य च विप्रतिपत्तिं स्वीकरोति रामानुजाचार्यः। कर्मणा, अविद्यया च आत्मनः पतनं भविष्यतीति अस्य सिद्धान्तः[५३]। जीवात्मनां स्वेच्छया वर्तितुम् अवसरः वर्तते इति आचार्यमतं जीवात्मनः ईश्वरात् भिन्नाः। भक्ति इति ईश्वरस्य पूर्णतायां मौननिष्ठया, ध्याननिष्ठया च मनुष्याणां प्राप्तिः। मोक्षस्तु आत्मनः अस्तित्वभावः नास्ति अन्यथा तस्य परिमितप्रक्रुतेः मुक्तिः भवति। आत्मा-प्रकृतियुक्तस्य जगदः उपादानकारणं, निमित्तकारणञ्च ब्रह्मैव। ईश्वरशरीरम् उपादानकारणम् आत्मा निममित्तकारणञ्च वर्तते। आत्मा चैतन्येन पूर्णः चैतन्यमेव तस्य गुणाः। पृथिव्याः गुणः गन्धं पृथिव्याः भिन्नः इव ज्ञातुः गुणः ज्ञानं ज्ञातविषयात् भिन्नः[५४]। जीवविषये उक्तं यथा पूर्णयाथार्त्यस्य प्रतिबिम्बमिति। सम्पूर्णसत्तायाः

प्रकाशमानः तेजः अन्तर्यामि च ब्रह्म ज्ञानार्जितस्य कर्तुः आत्मा च एकैकस्य जीवस्य प्रवर्तनोपायवत् अचेतनोपकरणानि वर्तन्ते। अद्वैतसिद्धान्तस्य सगुणब्रह्म सङ्कल्पः ब्रह्मलोकश्च। रामानुजाचार्यस्य विष्णुविषये, वैकुण्ठविषये च समानः सिद्धान्तः। प्रत्यक्ष दशायां एतौ द्वौ सिद्धान्तौ उन्नतोचेदपि शंङ्करः अङ्गीकरोति।

### २.३.३ . रामानुजपरम्परायाः दार्शनिकवैशिष्ट्यम्

विशिषष्टाद्वैतदर्शनस्य प्रथमाचार्यः भवति रामानुजाचार्यः इति प्रथा वर्तते प्रथा। किन्तु अस्य दर्शनस्य पूर्ववर्तीनां दार्शनिकानां विषये *भारतीयदर्शने* राधाकृष्णन् महाभागः विवृणोति। रामानुजात् परम् अस्य शिष्टाः अनुयायिनश्च बहवः वैष्णवभक्ताश्च परम्परायामस्याम् आकृष्टाः अभवन् । तस्मात् इयं पद्धतिः प्रभक्ता अभवत् लोके। दार्शनिकतया विचिन्तयति चेत् विशिष्टाद्वैतदर्शनस्य अन्य दर्शनात् भिन्नम् औन्नत्यं नीचत्वं च दृश्यते। तस्मिन् काले प्रबलं दर्शनं तु मायावादमित्यस्मात् कारणात् तुलनं एतेन वादेन साकं बहुधा दृश्यते। सांख्यदर्शने प्रकृतिस्तु सत्वरजस्तमोगुणसंयुक्ता अनन्ताश्च। विशिष्टाद्वैते आत्मनः स्थानमेव प्रकृतिः आत्मना ईश्वरप्राप्तिश्च। प्रकृतिः ईश्वरश्च सक्रियात्मकं प्रकृतिः पुरुषादि स्वतन्त्रः सांख्यदर्शने। परन्तु रामानुजपक्षे प्रकृति ईश्वरस्य नियन्त्रणे वर्तते। रामानुजसङ्कल्पः अस्मिन् विषये सांख्यादुपरि वर्तते। किन्तु प्रकृतेः आविष्कृते परिणामक्रमे च द्वौ सिद्धान्तौ समानमेव। जीवस्तु वैय्यक्तिकैक्यमेव अद्वैतदर्शने। किन्तु रामानुजदर्शने जीवः न केवलं चैतन्यं अपि तु परमानन्दस्य सत्ता च[५५]। अत्र वैकुण्ठे वर्तते। अत्र वैकुण्ठविषये नित्यविभूतिमण्डलस्य कोणः इति उक्तम् । अत्र प्रधानस्तु चतुर्मुखव्यूहः वासुदेवः परयाः अन्ते व्यतिरिक्तः, अन्ये तु संकर्षणः, प्रद्युम्नः, अनिरुद्धश्च। एते अपूर्णाश्च शंङ्कर-रामानुजयोः अस्मिन् विषये सङ्कल्पः कर्मयोगेन प्रारभ्यते। अनेन योगेन हृदय शुद्धीकरणं कृत्वा सत्वज्ञानाय प्रापयति पुरुषम्। ईश्वरज्ञानात् पूर्वं स्वयं ज्ञातुं मनुष्यः अशक्तः। अस्य मार्गस्तु भक्तियोगः परन्तु एषः मार्गस्तु अभ्यासपद्धतेः उन्नतश्रेण्यां ज्ञानयोगप्राप्तिः सम्यग्

पूर्तीकरोति चेत् एव भक्तियोगप्रवेशः साधयति मनुष्याणाम्। अत्र भक्तिः ध्यानसमाना भक्तियोगस्य विजयं दिव्यदर्शनार्जने वर्तते शरीरस्य नियन्त्रणात् आत्मनः विमोचनम् अस्य लक्ष्यम्। किन्तु अद्वैतदर्शनस्य जीवस्य मुक्तावस्था रामानुजाचार्यः न स्वीकरोति। मोक्षाभ्यासे ज्ञानं कर्म च अन्तर्भवति। ध्यानन्तु मोक्षस्य साक्षात् कारणं च। कर्म तत्र अनुबन्धमेवास्ति अतः संपूर्णजीविते कर्मनिर्वहणं पालनीयः विषयः चेदपि ज्ञान-कर्मसमुच्चयवादं विशिष्टाद्वैतिनः [५६] न स्वीकुर्वन्ति। मोक्षसङ्कल्पे इहलोकजीवितात् मोचनं परिरक्ष्यते। ईश्वरास्सान्निध्ये परमानन्दः अनुभूयते जीवाः। परमपदविषये अस्य दर्शनस्य वीक्षणं सरसं वर्तते। यथा शुभ्रयुक्ते सिंहासने उपविशति ईश्वरः, स तु पत्न्या लक्ष्म्या सेवितः तत्र मनुष्याणां कृते मध्यस्था इयं लक्ष्मी। जीवाः परिचारकाः अत्रैव परिपूर्णतायाः शान्त्याश्च स्थानम्। परमशक्तस्य इच्छानुसारं वर्तते अत्रत्यानां सर्वेषाम् आनन्दम् एतस्मै परमपदाय योग्याः त्रैवर्णिकाः एव किमर्थमिति चेते वेदानाम् अन्येषां ग्रन्थानां च योग्यानुसारं निश्चितम् इत्यस्मात् कारणात्। अतः अस्याः अभ्यासपद्धतेः योग्यता तु सङ्कुचिता एव किन्तु सर्वेषां वर्णिकानां मोक्षप्राप्तिः कारुण्यात् निर्दिशति दर्शनमिदं। परिपूर्णात्मदर्शनम् ईश्वरेच्छासहितं जीवितम्, अस्य अभंङ्गकर्म, आपति ईश्वरे एव रक्षा इति विश्वासः कृपाप्राप्तिः इत्यादयः कारुण्य मोक्षस्य मार्गाः। प्रवृत्तिः ज्ञानरूपत्वात् मोक्षमार्गः ज्ञानमिति उपनिषदः चिन्ता प्रवृत्तिः समाना। वेदान्तचिन्तायाः उपरि वर्तते प्रवृत्तिः एषा रामानुज दर्शनस्य अन्या सविशेषता[५७]।

### २.३.४. रामानुजाचार्यः प्रस्थानत्रयश्च

प्रस्थानत्रयेषु द्वयोः एव रामानुजभाष्यं वर्तते। ब्रह्मसूत्रस्य भाष्यं *श्रीभाष्यं, भगवद्गीतायाः गीताभाष्यं* च अस्य भाष्यग्रन्थाः। उपनिषदः भाष्यम् अस्य ग्रन्थेषु न विद्यते इति ग्रन्थानां अनुसन्धानेन ज्ञायते। तथा च लिखितयोः भाष्ययोः प्रौढगम्भीर्यं भाषा दर्शनादिविषयेषु दृश्यते। गीताभाष्ये प्रथमात् श्लोकात् पूर्वं उपोद्घातभाष्ये तु द्वितीयाध्यायस्य दशमश्लोकात् परमेव दृश्यते। गीताभाष्ये रामानुजाचार्येण उपनिषदः परमप्रमाणत्वेन

स्वीक्रियन्ते। तथा च ब्रह्मसूत्रं गीता च कुत्रचित् स्वीक्रियन्ते। किन्तु मध्वदर्शने अधिकतया पुराणानि उपयुज्यन्ते प्रमाणत्वेन। रामानुजाचार्यः सर्वेषां श्लोकानां भाष्यं विरराचि श्रीशङ्करः द्वितीयाध्याये एव भाष्यम् आरभ्यते मध्वाचार्यश्च एवमेव शौलीं स्वीकरोति। तथा च मध्वाचार्यः बहूनां श्लोकानां विषये भाष्यं वा तात्पर्यटीका वा न स्वीकृतम् इति दृश्यते।

ब्रह्मसूत्रस्य व्याख्याने *श्रीभाष्ये* रामानुजाचार्यः सर्वेषां सूत्राणां भाष्यं विरचितमिति दृश्यते। सरल भाषया सः उपनिषदाादि ग्रन्थानां साहाय्यं स्वीकृतम् इति च दृश्यते। रामानुजाचार्यस्य अन्याः अष्टकृतयः उपलभ्यन्ते। तथा *वेदान्तसंग्रहः, वेदान्तसारः, वेदान्तदीपः, गीताभाष्यं, नित्यग्रन्थाः शरणागतिगद्यं श्रीरंङ्गगद्यं वैकुण्डगद्यम्* इत्यादयः। अस्याचार्यस्य मतेन उन्नतयाथार्त्यम् उपलभ्यते इति न चिन्तयामः इति अस्याचार्यस्याभिप्रायः ब्राट्ली महाशयस्य वीक्षणञ्च प्रायेण समानमिति मन्यते। मतबोधात् घनीभूतानां याथात्यानां प्राधान्ये इष्टः मनुष्यः स्वविषये अन्येषणं कर्तुमशक्तः इति ब्राट्लीमहाशयस्याभिप्रायः आस्तिक्यवादे रामानुजस्य अभिप्रायसमानता वर्तते हेग्ङल् महाशयस्य। मनुष्यस्य सामान्यजीवितवीक्षणे ब्राट्लीमहाभागः एवम् अभिप्रायति। यथा व्यक्तिभावाः, मनुष्याः, यूयम्, अहं च एकैकः सत्वाधिकारे यथार्थाः मतविषयबोधे यथार्थसत्तायुक्तः इति वीक्षणे ईश्वरवविषये चिन्तनम् अर्थशून्यं भवेत्। रामानुजाचार्यः ब्रह्म इत्यस्यान्ते यथार्थसत्तायाः ईश्वरः जीवः जडप्रकृतिः इति प्रभेदकल्पनं राष् डाल् महाशयस्य अभिप्रायः समानः वादः स्वयमेव विषयीभूतस्य अनुभेषु अन्तर्भूतेषु अनेक सान्तविषयेषु एकत्वेन परिकल्पितः एकः विषयः अस्ति। अयं विचारः जन्टैल् महाशयस्य अभिप्रायेण ऐक्यं प्राप्यत[५८]।

एकस्य दर्शनस्य सिद्धान्ते दृश्यमानानि अन्येषां दर्शनेषु गुणदोषसम्मिश्रेण परिवर्तयति इति सम्दृश्यते। शङ्कराचार्यस्य शुष्कतर्कवादं, तस्य मतशैल्या अनाकर्षत्वं प्रदर्शयति। किन्तु जगतः व्युत्पत्तिविषये रामानुजस्य सङ्कल्पं विश्वासः योग्यः न सन्ति। सर्वेषां कारणं परमचेतना इति शङ्करस्य वादं रामानुजादीन् निष्प्रभां कारयति[५९] । उपनिषद् व्याख्यानेन

विनायेव रामानुजाचार्यः प्रस्थानत्रयभाष्य कर्तारं शङ्करं, मध्वं च प्रतिसैद्धान्तिकरीत्या तर्कितवान् इति महान् विषयः। ज्ञानसिद्धान्तप्रमाणाय त्रयः च उपनिषदेव स्वीकुर्वन्ति। भाष्यकर्तारः तु स्वशैल्या अस्याः व्याख्यानं कृता स्वस्य वादान् दृढीकरोति। एतेन विना रामानुजाचार्यः एतावत् कृतमिति अस्य महत्वं इतोऽपि वर्धति।

## २.४ **उपसंहारः**

आस्तिकदर्शनेषु वेदान्तदर्शनं प्रथमगणनीयं भवति । यतः अन्येषां दर्शनानां आविर्भावात् परमेवास्य उत्पत्तिः एवमेव अन्येषां दर्शनानां खण्डनेन स्वमतमण्डनं दर्शनमिदं साधयति च वेदान्तदर्शने मूलग्रन्थः बादरायण विरचितानि *ब्रह्मसूत्रम्* । ग्रन्थमिमम् आधारीकृत्य द्वैताद्वैतविशिष्टाद्वैतादीनि तत्वानि आविर्भूतानि । एवञ्च एतेषु दर्शनत्रयं, द्वैताद्वैतविशिष्टाद्वैत दर्शनानि ब्रह्मसूत्रेण साकं *दशोपनिषदः , भगवद्गीता* च आचार्य प्रस्थानत्रयात्मकानि स्वस्वदर्शने प्रमाणयन्ति । तत्र आचार्याणां जीवनचरितं तथा प्रधान ग्रन्थाः एतेषां सङ्कल्पः च अस्मिन्नध्याये तुलनात्मकतया विचारिताः । तत्र मूलप्रमाणतत्वानि एवात्र विजिन्तितानि अनेन चिन्तनेन गीतायाः एतेषां सङ्कल्पः सुव्यक्ततया ज्ञातुं सेतुवत् साहाय्यं प्रयच्छति ।

लोकेषु विविधसंस्कारेषु विविधदर्शनेषु च भारतीयदर्शनस्य प्राधान्यं वैशिष्ट्यं च वर्तते। तत्र श्रीशङ्करः जन्मनः केरलीयः चेदपि भारतीयतत्वचिन्तायाः नवीना दिशा अस्मिन्नेव काले आविष्कृता वर्तते। शंङ्करस्य मायावादः, ब्रह्मसङ्कल्पः, जगन्मिथ्यावादः, जीवात्मा मोक्षसंङ्कल्पः, अविद्या, बिम्बप्रतिबिम्बवादः, अवच्छेदवादः, कर्म, ज्ञानम् एतयोः ज्ञानस्य श्रेष्ठत्वम् इत्यादयः सङ्कल्पः अस्य दिशाबोधस्य कानिचन कारणानि। अतः शङ्करस्य अद्वैतदर्शनस्य विषये लोके सर्वे पण्डिताः शंङ्करदर्शनं स्वपठनविषयेन स्वीकृतवन्तः। भारतीयदार्शनिकाः प्रौढविषयाणां ग्रहणाय सामान्यजीविते दृश्यमानेन उदाहरणेन विषयाः प्रयुज्यन्ते इति श्रद्धेयः विषयः। एते बहवः भाष्यग्रन्थाः अन्ये ग्रन्थाश्च विलिख्य लोकस्य धैषणिकमण्डले स्वस्थानं स्थापितवन्तः। दर्शनाध्ययनाय बहवः मठाः एतैः स्थापिताः वर्तन्ते। एवमेव जनसामान्यानां प्राप्त्यर्थं शिष्यपरम्परायाः सृष्चिश्च कृताः।

मध्वाचार्यस्य द्वैतदर्शनं भारतीयतत्वचिन्तायाः इतोऽपि प्रशोभयति। सामान्यजनानां कृते जगत् मिथ्या नास्ति, यथार्थमिति च सिद्धान्तयति। जीवात्म-परमात्मनोः भेदः एतयोः द्वैतसङ्कल्पं च वैष्णवीय पन्था सिद्धान्तयति। मध्वाचार्यस्तु प्रमाणत्रयमेव स्वीकृतवान्। उपनिषद्महावाक्यं तत्त्वमसि इति अन्यथा व्याख्यानमकरोत् मध्वाचार्यः। वैष्णवदर्शने चतुर्भेदेषु एकमभवत् द्वैतदर्शनम। मुक्ति विषये योग्याः, अयोग्याश्च, प्रपञ्चविषये स्वतन्त्रं, परतन्त्रं च मन्यते अयं स्वसिद्धान्ते। परमात्मविषये परमात्मनः पत्निविषयप्रतिपादनं, विवरणं च विचिन्तनीयः विषयः द्वैतदर्शने। जीवाः तु भिन्नाः भेदयुक्ताः हरेः अनुचराः इति चाऽस्य सङ्कल्पः तत्वचिन्तायां मध्वसिद्धान्तानां परिगणनीयः स्थानमुपलब्धमिति अस्य सिद्धान्तस्य महत्वं प्रदर्शयति।

रामानुजाचार्यस्य विशिष्टाद्वैतसिद्धान्तानां प्रचारः दक्षिणभारतेषु सर्वत्र प्राप्तः। ब्रह्मसूत्रस्य रामानुजभाष्यं श्रीभाष्यम् प्रसिद्धिं समार्जितम्। अत्र जीवात्म-परमात्मनोः द्वैतचिन्तायाः भिन्नः वैशिष्ट्यं प्रदाति आत्मविषये। अद्वैतस्य एवम् अन्येषां दर्शनानां च प्रबलप्रभावकाले रामानुजाचार्यः स्वसम्प्रदायस्य सङ्कल्पम् आविष्कृतवान्। एवमस्य प्रचारञ्च कृतवान् तथा बहवः जनाः अस्मिन् प्रस्थाने आकृष्टाः अभवन्निति। अस्य प्रस्थानस्य आचार्यस्य चिन्तायाः प्राधान्येन भक्तिप्रस्थानस्य प्राधान्यं जनेषु आविष्कृतवान् अयमाचार्यः। अनेनैव मार्गेण अनन्तरकालीनाः बहवः अस्मिन् प्रस्थाने आकृष्टाः आचरिताः अभवन्।

भारतीयदर्शनानां परिपोषणाय त्रयाणाम् आचार्याणां प्रवृत्तिः निर्णायिका जाता। एतेषां दर्शनानां प्रचारः पाश्चात्यादिषु बहुषु लोकेषु बहवः जनाः अध्ययन विषयत्वेन स्वीकृताः, स्वीकुर्वन्ति च। एतेषाम् आचार्याणां प्राधान्यम् इतोऽपि महत्वेन प्रतिभाति प्रकाशयति।

## अध्यायटिप्पणि

1. A study of the Vedanta in the light of Brahmasutras,Shailja bapat, p 3,new bharatiya book corporation delhi y 2004
2. ब्रह्मसूत्रशाङ्करभाष्यम् सटिप्पनं, वासुदेवशर्मणा, चौखाम्बा विद्याभवन्, वारणासि, (४.३.७)४९५,(४.४.१०,११,१२) ५०८, ५०९ पुटेषु
3. केरलसंस्कृतसाहित्यचरित्रं १, वटक्कुंकूर्राजराजवर्म, श्रीशंङ्कराचार्य संस्कृतसर्वकलाशाला, कालटि १८२, १८३ पुटेषु
4. Sankaracaryar ( mal), Mahadevan T M P , National books ,p 8
5. Srisankaracharyar (mal), Kunjunni Raja K , Department of cultural Publications, Govt of Kerala, p 115
6. *Ibid* .,, ११पुटे
7. *Op. cit,* Sankaracaryar ( mal), १९ पुटे
8. *Op. cit,* केरलसंस्कृतसाहित्यचरित्रं १, १८२,८३पुटे
9. आरुङ्योक्षाणमग्र्यं प्रकटितसुजटाजूटचनाद्रावतं सः। शृण्वन्नामलोकशब्दं समुदितमृषिभिर्धामनैजं प्रतस्थले।।
10. *Op. cit,* Sankaracaryar ( mal), Mahadevan T M P p12
11. *Ibid* ., ९ पुटे
12. *Op. cit,* केरलसंस्कृतसाहित्यचरित्रं १, १८४-१८७
13. श्रीशङ्कराचार्यर् डां के कुञ्चुण्णिराजा 47 पुटे
14. *Ibid* ., 46 पुटे
15. *Op. cit,* केरलसंस्कृतसाहित्यचरित्रं १ , १९० पुटे
16. *Ibid* ., 191
17. Complete Works of Sri Sankaracharya Vol-4 , Board of Editorieales , S S U S Kalady ,281
18. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (बृहदारण्यकोपनिषद् २.३ ६)२०५ पुटे
19. ब्रह्मसूत्रशाङ्करभाष्यम् सटिप्पनं ,मूलमात्रम्, वासुदेवशर्मणा, चौखाम्बा विद्याभवन्, वारणासि, २ पुटे
20. Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-1, Radhakrishnan S , Narayanan nambissanT ,४३६ पुटे
21. Bharatheeya darsana sangraham(mal),(Outlines of Indian Philosophy) Hiriyanna.M , parvathidevi R,( Transalator ) ,३४० पुटे
22. श्रीभगवद्गीता शांङ्करभाष्यम्,हिन्दी अनुवादसहितं, २/१६, ३५ पुटे
23. वेदान्दसारः, सदानन्दः श्री , भावबोधिनी संस्कृत व्याख्यानसहिता, चौखाम्बा सुरभारती विद्याभवन् वारणासि ८७ पुटे

24. ब्रह्मसूत्रशंङ्करभाष्यम् चैखाम्बा सुरभारति,७, ८ पुटे
25. यतीन्द्रमतदीपिका, श्रीनिवासदास, श्रीरामकृष्ण मठं मैलापूर् मद्रास् पुटे ३,
26. Advaitadharmam, (mal), Nilakandan Elyath K N , State Institute of Languages kerala, Thiruvananthapuram पुटे ५३
27. सर्वदर्शनसंग्रहः माधवाचार्यकृतः ,डा उमा शंङ्कर शर्म ऋषि , चौखाम्बा विद्याभवन् वारणासि पुटे ६३३
28. Sri Madvacaryar; jivitavumDarsanavum (mal) Sukrtindra Oriental Institute,kuthapady,Thammanam, 44,45
29. *Ibid* ., ४७ page
30. *Op. cit,* सर्वदर्शनसंग्रहः २३१ पुटे
31. Dars anika Nighandu ,( Mal) Prasad C , Sky Book Publishers Mavelikkara p 173
32. *Op. cit,s* Sri Madvacaryar; jivitavumDarsanavum , P ३
33. A history of Indian philosophy vol- 2, p 51
34. *Ibid* ., vol- 2, p 54
35. *Op. cit,s* Sri Madvacaryar; jivitavumDarsanavum , P 13
36. Dvaitha Vedanta darsana of Sri Madhvacharya, P 2
37. षष्ठ्युत्तरशताधिकसहस्र (११६०) तमे उटुप्पि श्रीकृष्णक्षेत्रप्रतिष्ठा कारिताऽनेन
38. *Loc. Cit,* vol- 2, p 51
39. *Op. cit,* Darsanika Nighandu p 173
40. *Op. cit,* Dvaitha Vedanta darsana of Sri Madhvacharya P 24
41. *Op. cit,* Bharatheeya darsanam (mal) ,735 P
42. *Ibid* ., p 745
43. Sri Ramanuja His life Religion Ɛ Philosophy , Swami Tapasyananda Sri Ramakrshna math , mylapore p 1
44. *Op. cit,* Bharatheeya darsanam (mal), p 661
45. *Ibid* ., ४७७पुटे
46. *Ibid* .,४३६ पुटे
47. *Op. cit,* Bharatheeya darsana sangraham(mal) 389 p
48. *Ibid* ., पुटे ३९०
49. *Ibid* ., पुटे ३९१
50. *Op. cit,* Bharatheeya darsanam (mal), p 657
51. *Ibid* .,६६७ पुटे
52. *Ibid* .,६९८ पुटे

53. *Ibid* .,७०० पुटे

54. श्रीभाष्यम् ,श्रीरामानुजाचार्यकृतं,(द्वितीयखण्ड), निम्बार्काचार्य श्री ललितकृष्ण गोस्वामि ,श्री निम्बार्काचार्य पीठ २.३.४७

55. *Ibid* .,१३२ पुटे

56. *Ibid* .,२.१.१५ पुटे

57. *Op. cit*, Bharatheeya darsanam (mal), p 657

58. *Ibid* .,७१४पुटे

59. *Ibid* ., ७१७पुटे

Subrahmanian M. " Śaṅkara-madhva-rāmānujācāryāṇāṃ Śrīmad Bhagavadgītā Vyākhyānāni - Ekaṃ tulanātmaka pathanam". Thesis.Department of Sanskrit, University of Calicut, 2020

# तृतीयोऽध्यायः
# **कर्मयोगः**


३.० आमुखम्

३.०.१ कर्मयोगमधिकृत्य प्रवृत्तानि इतरगीताव्याख्यानानि

३.० २ आचार्यत्रयः कर्मयोगश्च

३.१ कर्मयोगः

३.१.१ मनुस्मृतौ कर्म

३.१.२ गीताशास्त्रे कर्म विजिन्तनम्

३.२. शांकरसिद्धान्ते कर्म

३.२.१. ब्रह्मसूत्रे कर्मसङ्कल्पः

३.२.२. उपनिषद् भाष्येषु कर्म

३.३ कर्मव्याख्यानानि भगवद्गीतायाम्

३.४ शङ्करमते कर्मसङ्कल्पः

३.४.१ मध्वमते कर्मसङ्कल्पः

३.४.२ रामानुजमते कर्मसङ्कल्पः

३.५ कर्मयोगः ज्ञानयोगश्च

३.६ कर्मयोगः भक्तियोगश्च

३.७ कर्मयोगः सन्यासयोगश्च

३.८ उपसंहारः

## ३.० आमुखम्

महाभारते धर्माधर्मनिरूपणार्थं प्रतिपादितभागो भवति भगवद्गीता। महाभारते अष्टादशपर्वाणि द्विसहस्राध्यायाः, एकलक्षं श्लोकाः च अन्तर्भवन्ति। एषु षष्ठे भीष्मपर्वणि अन्तर्भवति अष्टादशाध्यायात्मिका भगवद्गीता[1]। भारतयुद्धानन्तरम् आगामिकं कुलक्षयनाशं वर्गनाशं इत्यादीन् मनसि उद्भाव्य अर्जुनः युद्धविरक्तो स्वधर्मविरक्तश्च अभवत्। कर्णपर्वणि अर्जुनं युद्धिष्ठिरवधात् प्रत्यानेतुं प्रवृत्तः श्रीकृष्णः गीतोपदेशस्य प्रसक्तिं सूचयति[2]। प्रथमाध्याये अर्जुनविषादयोगे अर्जुनः स्वकीयं विषादपरम्पराम् अवतरति स्म। द्वितीयेऽध्याये अज्ञानजन्यशोकमोहादिकं निवारयितुं भगवता आत्मज्ञानबोधकं सांख्यबुद्धिः एवं कर्मयोगबुद्धिः च उपदिशति। तस्यानन्तरम् अर्जुनस्य मनसि एषु द्वयेषु किं स्वीकरणीयम् इति चिन्ता जातम् । तदनन्तरं अर्जुनस्य संशयनिवारणार्थं कर्मफलत्यागरूपकर्मयोगस्य, ज्ञानकर्मसन्यासस्य केवलं ज्ञानसन्यासस्य च आवश्यकताम् अर्जुनप्रश्नानुसारं विशदीकरोति। ततः आत्मज्ञानसिद्ध्यर्थं ध्यानयोगस्य विज्ञानयोगस्य सोपाधिक निरुपाधिकब्रह्मज्ञानाय तारकब्रह्मयोगम् अन्ते च विद्यानां राजभूतस्य ब्रह्मविद्यायाः माहात्म्यम् राजगुह्ययोगेन प्रतिपादयति। ततः भगवद्विभूतेः जगद्व्यापित्वं दर्शयति। तत्प्रदर्शनाय भगवतः विश्वरूपं च अवतरति ततो केवलं भक्तियोगस्य माहात्म्यं सूचयति। तत्परं प्रकृतिपुरुषविवेकज्ञानस्य आवश्यकता प्रतिपाद्य गुणत्रयविभागस्य प्राधान्यं च सूचयति। ततः पुरुषोत्तमयोगेन उत्तमपुरुषभावना भगवति इति दृढयति। अनन्तरं देवासुरसम्पद्विभागेन मनुष्ये अन्तर्भूतानां अनेकतरभावानां पठनं च कृतम्। अतः श्रद्धात्रयविभागयोगेन गुणादीनां त्रैविद्यं प्रदर्शयति। अन्ते मोक्षसन्यासयोगेन सकलाध्यायसंग्रहरूपेण सन्यासशब्दस्य च त्यागशब्दस्य च व्यत्यस्ततां निरूप्य सर्वसन्यासयोगस्य माहात्म्यं च निरूप्य उद्घुष्यति। आध्यात्मिक-प्रापञ्चिकतत्वानि च विवर्ण्य अर्जुनं कर्मधीरं भावयितुं दत्तम् उपदेशमेव गीता।तद् यथा कर्मकाण्डम्, ज्ञानकाण्डम्, भक्तिकाण्डम्(उपासनाकाण्डम् ) इति गीतायाः विषयाणि त्रीणि भागदेयान् विभक्तुं शक्यते मधुसूदनसरस्वत्यादीनाम् मतम् ।

अत्र अस्माकं भारतीय दार्शनिकानां कृते मोक्षप्राप्तिरेव आत्यन्तिकलक्ष्यम्। तदर्थं बहवः दार्शनिकाचार्यः विविधरीत्या प्रतिपादयति। एवं चेदपि नास्तिकाः केवलं शरीरमेव, अन्यत् किमपि नास्ति अतः लोकायतिकाः मरणमेव मोक्षप्राप्तिरिति इत्यवादीत्। प्रकृति पुरुषसंयोगेन परमपदप्राप्तिरिति सांख्यानां मतम्। यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाध्यवस्थादिषु परमपदप्राप्तिरिति यौगिकाः। अत्र पूर्वमीमांसाशास्त्रेषु कर्मानुष्ठानेन एव मोक्षसिद्धिः इति ते सिद्धान्तयन्ति। उत्तरमीमांसकाः वेदान्तिषु ज्ञानेनैव कैवल्यम् इति तेषां वादम्। वैष्णवीयाः, शाक्तेयाः, शैवाश्च, स्वीयरीत्या च मोक्षप्राप्तिः तादृशाः तेषां दार्शनिकानुसारेण विवृणोति अत्र पूर्वाध्यायेषु भगवता अर्जुनेन कर्मयोगमधिकृत्य विस्तरति। कर्मयोगेन अर्जुनम् युद्योत्सक्तुं कर्तुं भगवान् इच्छति। तस्यानुसारेण भगवद्गीतया बहुषुसन्दर्भेषु अर्जुनं युद्धकर्मप्रवक्तनाय नियोगुं च दर्शयितुं शक्यते। अस्य प्राधान्यं विवृणोति च यथा - तस्मात् युद्ध्यस्व भारत (२.१८)[३], तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय[४] ( २.३७) तस्मादसक्तः सततं कार्यं कर्मसमाचर[५] ( ३.१९) कुरु कर्मैव तस्मात् त्वम्[६] ( ४.१५) मामनुस्मरयुद्ध्य च[७] ( ८.७)। इत्यादिना श्लोकांशेन अर्जुनं स्वधर्मानुष्ठाने व्यापृतोऽभवत्।

### ३.०.१ कर्मयोगमधिकृत्य प्रवृत्तानि इतरगीताव्याख्यानानि

महाभरतान्तर्गत भगवद्गीतायाः लभ्यमानेषु भाष्येषु प्राचीनं भवति शंङ्करभाष्यम्[८]। इदं भाष्यंन्तु क्रिस्तोः पूर्वम् अष्टम शताब्दौ वा नवम शताब्दौ वा इति प्रायेण अस्य रचनाकालः इत्यग्डीक्रियते[९]। अस्यानन्तरं श्रीरामानुजाचार्यः, मध्वाचार्यः, श्रीवल्लभाचार्यः, केशवकाश्मीरभट्टः, अभिनवगुप्तः, आनन्दगिरिः, श्रीधरस्वामिः, मधुसूदनसरस्वत्यादयः भाष्यकाराः च सन्ति। एवं चेदपि एकोनविंशति शताब्दे (१९१०-११) मराठीभाषायां बालगंगाधरतिलकमहोदयस्य गीतारहस्यं नाम व्याख्यानम अतीवप्राधान्यमर्हति[१०]। तदानीन्तनकालस्तु भरतस्य स्वातन्त्र्यसमरकालश्चासीत्। गीतारहस्य जन्मन्तु ‘मण्डाले ‘नाम

कारागृहवासकाले अभवत्[११]। ग्रन्थोऽयं तत्कालीनानां स्वातन्त्र्यसमरनायकानां योद्धानां च प्रेरकग्रन्थं च आसीतऽयम्। एवमेव अरविन्दघोष् महोदयः अपि तत्कालीनः आसीत्। गीताशास्त्रे ( ८.७) प्रतिपादितं " मामनुस्वरयुद्ध्य च " इति श्लोकपादं च अरविन्दघोषाय स्वातन्त्र्यसमरभागधेयार्थम् उत्साहयितुं सर्वधा प्रयोजकमेव भवति। अतः महोदयोऽपि गीतायाः प्रतिपाद्यविषयस्तु कर्मैव इति निश्चयमकरोत्[१२]। गीतायाः कर्मयोगं स्वातन्त्र्यसमरे यदि उत्तेजकं भवति चेत् प्राक्काले समहाशयः गीतायाः ज्ञानयोगमधिकृत्य ध्यानयोगादि मार्गेषु सञ्चरन् आध्यात्मज्ञानस्य प्रचारकश्चासीत्। अरविन्द-तिलकादौ भगवद्गीतायाः व्याख्यानं विलिख्यैव स्वीयः दर्शनानि स्पष्टीकृतवन्तः। अरविन्दस्य दर्शने अद्वैत तत्वस्य आवश्यकता विस्तरति। ते तु कर्मयोगेन आकृष्टौ गीताशास्त्रे प्रवेशनं कृतवन्तौ। एवमेव १८६३ तमे वर्षे बंङ्गाले जनीं लब्धोऽयं श्रीनरेन्द्रः अनन्दरस्थकाले एषोऽयं स्वामि विवेकानन्दः इति नाम्ना प्रसिद्धश्च अभवत्। एषः एव १८८३ तमे वर्षे विश्वमतमहासम्मेलने भागं गृहीतवान्[१३]। सनरेन्द्रोऽपि गीताशास्त्रस्य कर्मयोगे आकृष्य स्वयं भारतनवीकरणाय उल्प्लुतः।विवेकानन्दस्य वाक्ये एतानि गीताश्लोकपादानि आकृष्य उपयुज्यति ।

द्वितीयाध्याये–

"क्लैब्यं मा स्म गम पार्थ नैतत्वमुपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप "।।

इति गीतावचनेन/वाक्येन एषः सहस्रशः जनान् कर्मयोगे प्रवेष्टुं प्रेरणा च दत्तवान्। विवेकानन्दः *भगवद्गीतायाः* व्याख्यानं न अकरोत्। किन्तु गीता, *उपनिषदादीनां* वाक्यानि स्वीकृत्यैव प्रबषणादिकं कृतवान् च। अतः एवं वक्तुं शक्यते गीताश्स्त्रे न केवलं ज्ञान-भक्त्यादिकम् । कर्मशास्त्रस्यापि प्राधान्यं वर्तत[१४]। ब्रह्मणः प्रथमजाता पुत्रः सनकादयस्तु ज्ञानयोगमाश्रित्य तपसि गतवन्तम् (ज्ञानयोगं ) अनन्तरजाताः सप्तर्षयः, दक्षः, मनुश्च सृष्टिकर्मणि प्रवर्तितवन्तः। ते तु पितुः कर्मपद्धतिमनुसृत्यैव सदा सृष्टि कर्मणि जागरूकाः

भवन्ति । अन्तिमः मानसपुत्रः नारदस्तु भक्तियोगमाश्रित्य भक्तिप्रचरणार्थं लोकेषु सञ्चरितवान् । अतः भगवता गीताशास्त्रे एवं विस्तरति –

" लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।

ज्ञानयोगेन सांङ्ख्यानां कर्मयोगेन योगिनाम्। ३/३।[१५]"

### ३.० २ आचार्यत्रयः कर्मयोगश्च

कर्मविषये पूर्वम् अरविन्द-तिलकादि महोदयानां मतानि उक्तानि। अत्रस्तु शङ्कर-मध्व-रामानुजाचार्याणां कर्मविषये तेषां समीपनादीनां समान्य परिचयमेवात्र उद्दिश्यते। अस्य कारणस्तु वेदान्तचिन्तायां प्राधान्ययुक्तदर्शनानि एव शङ्करादीनां त्रयाणां मतानि। एवमेव लभ्यमानेषु गीताव्याख्यानेषु प्राचीनश्चायम्। एतेषु अतिप्राचीनं शाङ्करभाष्यमेव। शङ्करस्य अद्वैतदर्शने कर्मस्य प्राधान्यं विरलमेव। अतः एव कर्मसम्बन्ध श्लोकेषु केवलं पदार्थानि एवावलम्ब्यते तर्हि ज्ञानविषय प्रतिपादकेषु व्याख्यान पटुत्वमधिकं द्रष्टुं शक्यते । अस्यकारणमस्तु उपनिषदादिषु कर्मस्य अप्राधान्यात् एव। गीताशास्त्रे च उक्तम्–ज्ञानादेव तु कैवल्यम्[१६]। शंङ्करेण स्वीयभाष्ये कर्मैव योगः कर्मयोगः तेन कर्मयोगेन योगिनां कर्मिणां निष्ठा प्रोक्ता[१७]। अस्य दर्शनानुसारेण अज्ञानस्य निवृत्तिः यदा भविष्यति एवमेव ज्ञानार्जनं यदा भवति तदा एव परमपदप्राप्तिः भविष्यति। अद्वैतचिन्तायाः विषयस्तु जीवब्रह्मैक्यं शुद्धचैतन्यम् । अधिकारि–विषय-सम्बन्ध-प्रयोजनेषु विषयमेव पूर्वोक्तम् [१८] । अत्र एतेषु कुत्रापि कर्मणः आवश्यकता प्राधान्येन न प्रतिपादयति। अस्य वेदान्त शास्त्रस्य पठनार्थं केवलं श्रवण-मनन–निदिध्यासनादिकमेव अवश्यम् अत्र कर्म नावश्यकम्। वेदान्तवाक्यानां श्रवणेनैव अज्ञाननिवृत्तिः तद्वारा ज्ञानाजनेर्न मोक्षपदं प्राप्तुं च शक्यते[१९]। अद्वैतपद्धत्यां कर्मस्य प्रत्यक्षपरिगणना नास्ति च।

अद्वैतिनां शङ्करभाष्यानन्तरं विशिष्टाद्वैतस्य श्रीरामानुजभाष्यम् अनन्तरं द्वैतिनां श्रीमध्वभाष्यं च एतौ द्वावपि तयोः दर्शने ज्ञानस्य अधिक प्राधान्यं नास्ति। किन्तु भक्तिरेवात्र मोक्षोपायम्[२०]। कर्म विषये ईश्वरप्रसादेनैव कर्मफलं प्राप्तुं शक्यते इति। अद्वैते कर्माणि फलापेक्षारहितेनकरोति चेत् चित्तशुद्धिरेव प्रयोजनम्[२१]। एवमेव लौकिकगृहस्थानां कृते कर्माणि अभ्युदयः एवं देवादिस्थान प्राप्तिरेवास्य प्रयोजनम्। द्वैतीनां मतानुसारेण ज्ञानिनां कर्मापि अनुष्ठेयम् न हि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति[२२]। "भगवत् भक्ति ज्ञानपूर्वकं कर्म कर्त्तव्यम् "[२३]। अतः कर्मापि आवश्यकम् एवं ज्ञानस्य च। अस्य कारणन्तु ब्रह्मवैवर्तपुराणे –"न च ज्ञानं विना कर्म पुरुषार्थकरं भवेत् " अन्यत् विषयमपि जन्तूनां जन्मान्तरप्राप्तिः कर्मफलानुसारेणैव इति ग्रन्थेषु विस्तरति। एषां मतानुसारेण मोक्षप्राप्तिस्तु भगवद् सेवादि कर्मणासिद्ध्यति, एवमेव विष्णोः चतुर्विध भक्ताननुसृत्य च विशदयति।

विशिष्टाद्वैतपक्षिणां मते कर्मसङ्कल्पस्तु कर्ममेव दुखस्य कारणमिति विस्तरति[२४]। अत्र श्रीभाष्ये दुखस्य कारणं कर्ममेव इति विशदयति च[२५]। अत्र प्रधानरुपेण श्रीनारायणस्य सर्वोत्तमत्वमेव अनेन दर्शनेन *भारतीयदर्शने* डां एस् राधाकृष्णमहोदयः विशदयति। श्रीभाष्ये कर्माणि कर्तुं जीवात्मनः प्रयत्नैव न शक्यते। तदर्थं परमात्मनोऽपि साहाय्यम् आवश्यकं वर्तते। आस्तिकः इति कारणेन ज्ञानमार्गेण वा कर्ममार्गेण वा परमपदं प्राप्तुं न शक्यते। तदर्थं भक्त्या एवं ईश्वरप्रसादेन च परमपदं प्राप्तुं शक्यते इति विवृणोति[२६]। स्थूलशरीरस्य नाशानन्तरमेव आत्मा ईश्वरेण सह लीयते[२७]। अर्थात् अद्वैतिनां जीवन्मुक्त्यादिकं नस्ति इति। कर्मविषये ईश्वरेव आदिकारणं तत्र कर्मस्तु गौणकारणरुपेणैव वर्तते[२८]। जीवस्तु नित्याः मुक्ताः बद्धाः इति त्रैविद्ध्यत्वम्। एषु नित्याः कर्मणा प्रकृत्या च स्वतन्त्रो भूत्वा आनन्तानुभूतिं भूत्वा वैकुण्ठे वसति[२९]। कर्मफलविषये अद्वैतिनां समानरीत्या तानि भोक्तुं आत्मा पुनः पुनः जीवानि स्वीकरणीयं भवेत्। ईश्वरः स्वीय शक्त्या कर्माध्यक्षः एव, तद् ईश्वरः एवं पुण्यपुरुषाणां पुरस्कारः, दुष्चिन्तकानां दण्डाकारी च भवति[३०]।

इदः परं कर्मविषये द्वैतीनां सिद्धान्तान् विचारयाम। ज्ञानिनां कर्मापि अनुष्ठेयम् न हि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति। अतः द्वावपि परस्पराश्रयसम्बद्धा एव। एतेषां मतानुसारेंण कर्मयोगस्तु फलकामनात्यागेन ईश्वरार्पणबुद्ध्या वर्णाश्रमविहितानुष्ठानमेव[३१]। ईश्वरेच्छयायैव कर्मकृतः प्रियव्रतादयो ज्ञानिनश्च। “ न च ज्ञानं विना कर्म पुरुषार्थकरं भवेत् :” [३२]। जन्मान्तर विषये कर्मसम्बन्धः एव तत्र मुख्य हेतुः प्रति जन्म कृतानामनन्त कर्मणां भावात् इति। मोक्षविषये च यथा भाष्ये एव विशदयति अकाम कर्मणामन्तःकरण शुद्ध्या ज्ञानान्मोक्षो भवति। अर्थात् पूर्वोक्त *ब्रह्मवैवर्तपुराणे* उक्तं भवति। अतः ज्ञान-कर्मौ परस्पराश्रय सम्बन्धौ एव। परमानन्द पदप्राप्त्यर्थं भक्तिरेव इत्यपि वदति। मोक्षप्राप्तिः नाम स्वस्य स्वीयानुभवेन एवमेव अन्तर्दर्शनश्च [३३] ।( मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ) भागवतादिषु प्रतिपादित भक्त्यायैव परमपदं प्राप्तुं शक्यते इति मध्ववादः।

### ३.१ कर्मयोगः

डुकृञ् करणे इति धातोः मनिन् प्रत्यययोगात् निष्पन्नोऽयं शब्दः। (कृ अ मनिन् )कर्त्तुः क्रियया यद्व्याप्यते तद्वा क्रियाव्याप्यं कर्म्मेति केचित्, यत् क्रियते तत् इति पदार्थः [३४]। कर्म शब्दस्य प्रयोगाः वेदे संहितायां ब्राह्मणादिषु द्रष्टुं शक्यते। “ कर्म कुरु “ इति प्रयोगः *शतपथब्राह्मणे* ११.५.४.५[३५], *आश्वलायनगृह्यसूत्रे* १.२२.२, २.४.५., *कौशिकसूत्रे* ५६.१२ *साममन्त्रब्राह्मणे* १.६.२६., *गोभिल गृड्यसूत्रं* .२ १०.३४., *पारस्कर गृह्यसूत्र* २.३.२, *आपस्तम्बमन्त्रपाथ* २.६.१४., हिरण्यकेशिन् *गृह्यसूत्रं* १.५.१० अन्यत् प्रयोगाणि यथा - “कर्म कृण्वन्ति वेधसः “ *तैत्तिरीय संहितायां* १.१.९.३[३६]., *तैत्तिरीय ब्राह्मणे* ३.२.९.८[३७].,” कर्म कृण्वन्तु मानुषाः “, *अथर्ववेदसंहिता, शौनकमन्त्र* ६.२३.३/२[३८], *मानवश्रौतसूत्र* १.२.४.१८/२, “ कर्म कृताः सुकृतो वीर्यावतीः “ *तैत्तिरीय ब्राह्मण* ३.१ .२,४/२ [३९], “ कर्म च मे शक्तिश्च मे “ *वाजसनेयी संहित* १८.१५, *तैत्तिरीय संहित* ४.७.५.२[४०], *मैत्रायणी संहिता* २.११.५.,

*काठकसंहिता* १८.१०," कर्मणा त्वा " *कौशिकसूत्र* ९०.४, " कर्मणा वा दुष्कृतं कृतं " *तैत्तिरीयआरण्यकम्*[४१] १०.१.१२/२, *महानारायण उपनिषद्* ४.१२/२,१९.१/२, *बौधायन धर्मसूत्रं* २.५.८ .३/२, " कर्मणा सुहस्ताः " *शांखायन श्रौतसूत्र* . ८.२०.१.," कर्माणि - कर्मणि स्वाह " *पारस्कर गृह्यसूत्र* २.१७ ९/५ ., " कर्मणे ज्याकारम् " *वाजसनेयी संहित* ३०.७, *तैत्तिरीय ब्राह्मण* ३.४.१.३[४२] " कर्मणे त्वा "., *काठकसंहिता* ३९.५., *आपस्तम्ब श्रौत सूत्र* १६.२९.२[४३] ., " कर्मणे वाम् " *वाजसनेयी संहित* १.६ ., *तैत्तिरीय संहित* १.१.४.१[४४].,, *मैत्रायणी संहिता* १.१.४.,२.१.२ ., *काठकसंहिता* १.४., ३१,३ ., *शतपथब्राह्मणे* १.१.२.१[४५] ., *तैततिरीय ब्राह्मण* ३.२.४.१[४६] ., *कात्यायन श्रौत सूत्रं* २.३.१०[४७]., *आपस्तम्ब श्रौत सूत्रं* १.१५.४[४८] ., *कौशिक सूत्रं* १.३६., ५८.५ .," कर्मणे हस्तौ विसृष्टौ " *काठक संहित* ३४.१५., " कर्मन् –कर्मञ् छतमूतिः खजंकरः " *ऋग्वेद संहिता* १.१०२.६/२[४९] ., " कर्मन् –कर्मन्नाभगमग्निमीडे " *अथर्व वेद संहिता शौनकमन्त्र* ४.२३.३/२[५०] ., " कर्मन् –कर्मन् वृषणमिन्द्र देवाः " *ऋग्वेद संहित* १०.२८ ७/२[५१] ., " कर्मन् यज्ञापतिं दधन् " *तौत्तिरीय ब्राह्मण* २.५.१ २/४[५२] ., " कर्म स्त्रिया अप्रतिषिद्धमाहुः " *कौशिक सूत्रं* ७३,१९/४ ., " कर्माच्च येनानङ्गिरसोऽपियासीत् " *गोपथ ब्राह्मण*[५३] १.५ २४/४ .," कर्माणि चक्रुः पवमानधीराः " *ऋग्वेद संहिता* ९.९३.११/२[५४] ., *वाजसनेयी संहिता* १९.५३/२ ., *तैत्तिरीय संहित* २.६.१२.१/२[५५] ., *मौत्रायणी संहिता* ४.१०.६/२ ; १५६.८ ., *काठक संहित* २१.१४/२ .," कर्माणि तनुतेऽपि च " *तैत्तिरीय आरण्यकं*[५६] ८.५.१/२., *तैत्तिरीय उपनिषद्* २.५ १/२ ., " कर्माणि ते मयि दधे " *कौषीतकी ब्राह्मणोपनिषद्* २.१५ ., " कर्माणि धियस्तदु ते ब्रवीमि " *गोपथ ब्राह्मण*[५७] १.१.३२/३ ., "कर्माणि ते त्वयि दधानि " *कौषीतकी ब्राह्मणोपनिषद्* २.१५., " कर्माणि लोके परि मोहयन्ति " *कौशिक सूत्रं* १ ३५ ९/६ .," कर्माध्यक्षः सर्वभूताधिवासः " *श्वेताश्वतर उपनिषद्*[५८] ६.११/३., *गोपाल तापनी उपनिषद्*

२/३ ., *ब्राह्मण उपनिषद्* ४ १/३ ., " कर्मरा ये मनीषिणः " *अथर्ववेदसंहिता शौनकमन्त्र* ३.५ ६/२[५९] ., " कर्मार्थाः पुरुषसंमितः "*कौशिकसूत्रं* ११९.४/२। कर्म शब्दस्य प्रयोगाणि उपनिषत्स्वपि सन्ति । बृहदारण्यकोपनिषदि, ईशावास्योपनिषदि, तैत्तिरीयोपनिषद्, श्वेताश्वतरेयोपनिषदि, मैत्रेयोपनिषदि, माण्डूक्योपनिषदि, प्रश्नोपनिषदि, मुक्तिकोपनिषदि, च कर्मशब्दस्य प्रयोगाणि द्रष्टुं शक्यते। वेदाङ्गेषु व्याकरणे कर्म शब्दस्तु द्वितीया विभक्तौ भवति।(परसमवेतधात्वर्थजन्यफलशालित्वं कर्मत्वम् )अष्टाध्याय्यां[६०] कर्मसम्बन्धीनि बहूनि सूत्राणि सन्ति। कर्मणा यमभिप्रैति स सम्प्रदानम् [६१](१.४.३२), कर्मप्रवचनीयाः[६२] ( १.४.८३), कर्मणि च[६३] ( २.२.१४), कर्मणि द्वितीया (२.३.२), कर्मणो रोमन्थतपोभ्यां वर्ति चारोः[६४] (३.१.१५), कर्मण्यण् [६५] (३.२.१), कर्मवत्कर्मणा तुल्यक्रियः [६६] (३.१.८७), कर्मणि भृता[६७](३.२.२२), कर्मणि हनः[६८]( ३.२.८६), कर्मण्यग्न्याख्यायाम्[६९] ( ३.२.९२), कर्मणीनि विक्रियः[७०] (३.२.९३),कर्मव्यतिहारे णच्स्त्रियाम्[७१] (३.३.४३), कर्मण्यधिकरणे च[७२] (३.३.९३), कर्मणि च येन संस्पृर्शात्कर्तुः शरीरसुखम् [७३] (३.३.११६), कर्मण्याक्रोशे कृञः खमुञ् [७४] (३.४.२५), कर्मणि दृशि-विदोः साकल्ये[७५] (३.४.२९), कर्मन्द—कशाश्वादिनिः[७६] (४.३.१११), कर्माध्ययने वृत्तम्[७७] (४.४.६३), कर्मवेषाद्यत्[७८] (५.१.१००), कर्मण उकञ्[७९] (५.१.१०३), कर्मणि घटोऽठच्[८०](५.२.३५), कर्मधारयेऽनिष्ठा[८१](६.२.४६), कर्मधारयवदुत्तरेषु[८२](८.१.११)। कर्मणि द्वितीया(२.३.२ ) इति सूत्रेण कर्मसंज्ञा विधीयते[८३]। वार्तिकादिकं च "कर्मसम्बन्धीनि सन्ति परसमवेतधात्वर्थजन्यफलशालित्वं कर्म्मत्वम्। इति सारमञ्जरी क्रियाव्याप्यं " दशम लग्नं कर्मसम्बन्धम् इति चिन्त्यते। निरुक्ते तृतीयाध्याये प्रथमपादे अथ कर्म नाम निर्वचनम् अस्य अनन्तरं कर्मनामान्युत्तराणि षट्विंशतिः अस्य अर्थस्तु क्रियत इति कर्म ।(निरुक्ते निघण्डु काण्डम् )

दर्शनानि प्राधान्येन द्विधा विभक्तुं शक्यते, आस्तिकदर्शनं, नास्तिक दर्शनञ्च। आस्तिक दर्शनेषु सांख्यदर्शने अष्टादशाधिकसूत्रेषु कर्मविषयं विस्तरति [८४] । न

कर्मणाप्यतद्धर्मत्वात् १/३३, अकर्तुरपि फलोपभोगोऽन्नाद्यवत् १/७०, तत्कर्मार्जितत्वात् तदर्थमभिचेष्टा लोकवत् २/ ४७, समानकर्मयोगे बुद्धेः प्राधान्य लोकवत् २ /४७, व्यक्तिभेदः कर्मविशेषात् ३/ १०, धारणासनस्वकर्मणा तत्सिद्धिः ३/ ३२, स्वकर्म स्वाश्रमविहितकर्मानुष्ठानम् ३/ ३५, कर्मवैचित्र्यात् प्रधानचेष्टा गर्भदासवत् ३ /५१, कर्माकृष्टेर्वनादितः ३/ ६२, कर्म निमित्तयोगाच्च ३/ ६७, न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ५ /७३, त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः ५ /७४, चिदवसाना भुक्तिस्तत्कर्मार्जितत्वात् ६/ ५५ ए, सूत्रेषु कर्मविषयं प्रधानतया विचारयति ।

योगदर्शने कर्मशब्दस्य केवलप्रवृत्तिरित्यर्थः "फलेच्छा रहितं कर्म " एवमेव ज्ञान-ज्ञेय –ज्ञाता त्रयोः सम्मेलनेन एव कर्म प्रेरणा च लभ्यते इति यौगिकमतम्[८५]। सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपारान्तज्ञानमरिष्टभ्यो वा ३/२१, कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ४/७ । न्यायदर्शने कर्मसम्बन्धसूत्राणि प्राधान्येन– कर्मकशारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः (३.१.५६) [८६] , कर्माकारासाधर्म्यात् (३.२.१) [८७] , कर्मानवस्थायिग्रहणात्( ३.२.४३)[८८] शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म (३/२ /६८),उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ( ३/ २/ ७०),नाकृताभ्यागमप्रसंगात् ( ३/ २/ ७५), ईश्वरः कारणं पुरुष कर्मफलाय दर्शनात् ( ४/ १/ १६)। तत्र कर्मत्वं नाम नित्यसमवेतत्वसहितसत्तासाक्षाद्व्याप्यजाति[८९]। वैशेषिक दर्शने पदार्थेषु एक पदार्थ इति रुपेण कर्मग्रहणं तेषां कृते बहूनि सूत्राणि कर्म सम्बन्धीनि[९०] ा उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि १/ १ /७,कर्म कर्मसाध्यं न विद्यते १/ १/ ११,कार्यविरोधि कर्म १/ १ /१४, एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणं १/ १/ १७, न द्रव्याणां कर्म १/ १ /२१, गुणवैधर्म्यान्न कर्मणां कर्म १/ २/ २४, संयोगविभागाश्च कर्मनाम् १/ १/ ३०, गुणकर्मसु च भावान्न कर्म न गुणः १/ २/ ६, प्रत्यक्षप्रवृत्तत्वात् संज्ञा कर्मणः २/ १/ १६, गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् २/ २/ २५, आत्मसंयोगनेयत्नाभ्यां हस्ते कर्म

५/ १/ १, अग्नेरूर्ध्वज्वलनं वायोस्तियर्क्पवनमणूनां मनसश्चाद्यं कर्मदृष्टकारितम् ५/ २ /१३, हस्तकर्मणा मनसः कर्म व्याख्यातम् ५ /२ /१४, तदभावे संयोभावे प्रादुर्भावश्च मोक्षः ५ /२/ १८, तत्समवायात् कर्मगुणेषु ६/ १/ १४, कारणे समवायात् कर्माणि १०/ २/ ३। मीमांसा शास्त्रे कर्मस्यैव प्राधान्यम्। कृते वा विनियोगस्स्यात् कर्मणस्सम्बन्धात् १/ १/ ३२, फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् २/ २ /२५, यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् २/ ३/ १३, कर्माण्यपि जैमिनिः फलार्थत्वात् ३/ १/ ४, पुरुषश्च कर्मार्थत्वात् ३/ १/ ६, तदकर्मणि च दोषस्तस्मात्ततो विशेषः स्यात् प्रधानेनऽभिसम्बन्धात् ६/ ३/ ३, अकर्म वा कृतदूषा स्यात् १२/ १/ ६, मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसन्निपातः स्यात्सर्वस्य वचनार्थत्वात् १२/ ३/ २५, न कर्मणः परार्थत्वात् १२/ ४/ १३, वचनादसंस्कृतेषु कर्म स्यात् १२/ ४ /२१।

वेदान्तिनां मतानुसारेण कर्मफलानाम् ईश्वरस्यैव दातृत्वमिति, मीमांसकमते धर्मादेव फलमिति भेदः[९१]।'' कर्माणि विहितप्रतिषिद्धरूपाणि ज्योतिष्टोमब्रह्महत्यादीनि। विपाकाः कर्मफलानि जात्यायुर्भागाः[९२]।'' वेदान्तिनां मते पञ्चकर्माणि तानि –नित्य-नैमित्तिक –काम्य प्रायश्चित्त-निषिद्धभेदात्[९३]। अद्वैतवेदान्तिनां मतानुसारेण कर्माणि त्यक्त्वा निष्कामकर्माणि करणीयानि। मध्वस्तु कर्माणि सर्वाण्यपि न कर्मकर्तुः, ईश्वरार्थमिति विचिन्त्य च करोति [९४]। रामानुज दर्शनानुसारेण कर्मणः प्राधान्यम् वर्तते। समानरीत्यायेव ज्ञानस्य अपि प्राधान्यं वर्तते।

प्रस्थानत्रये उपनिषद्सु कर्म प्राधान्यं विस्तरेण उपन्यस्यति। *बृहदारण्यके, छान्दोग्ये* ईशादीनां अत्र लेखनीय तादृशोपनिषत्सु कर्म प्राधान्यं विस्तरति च। *बृहदारण्यके* ‘‘पुण्यो वै पुण्येन कर्मणा भवन्ति (१२.९.११, १२.२.१३ ) ‘‘ इत्यत्रापि विषयस्य प्राधान्यं विवृणोति। छान्दोग्ये (५.११.२४ ) केकयराज्ञः उद्दालकसंवादे,बृहदारण्यके (२.१ ) अजातशत्रुः गार्गीच विषयोऽयं वर्ण्यते। एवमेव ब्रह्मसूत्रे च तादृश सूत्राणि वर्तन्ते । न च कर्तृकरणम् २/ २/

४३, कर्त्ता शास्त्रार्थवत्वात् २/ ३/ ३३, आचारदर्शनात् ३/ ४/ ३, तत् श्रुतेः ३/ ४/ ४, समन्वारम्भणात् ३/ ४/ ५, तद्वतो विधानात् ३/ ४/ ६, नियमाच्च, ३/ ४/ ७ विहितत्वाच्चाश्रमकर्मोऽपि ३/ ४/ ३२, सहकारित्वेन च ३/ ४/ ३३, यदेव विद्ययेति ४/ १/ १७। (कर्मकर्तृव्यपदेशाच्च[९५] १.२.४, २.३.१३, उभयथापि न कर्मातस्तद्भावः[९६] २.२.१२, न कर्माविभागादितिचेन्नानादित्वात् २.१.३५, ३.२.१७ )[९७] अत्र तृतीयाध्याये फलाधिकरणे ३८ तमे (फलमतोपपत्तेः ) इति सूत्रेण कर्मफलस्यानुसारेण कर्म त्रैविद्ध्यम् इष्टम्, अनिष्टम् मिश्रम् इति त्रिधा विभज्य विस्तरति[९८]। अत्र इष्टपदेन स्वर्गः इत्यर्थः एवं रीत्या अग्रे गच्छति। गीताशास्त्रे च विषयस्यऽस्य प्राधान्यं द्योतयितुं बहूनि श्लोकानि सन्ति। द्वितीयाध्यायात् आरभ्य अन्तिमाध्यायपर्यन्तं बहुत्र विषयोऽयम् उपवर्णितः।

इतिहासौ च कर्मस्य प्राधान्यादिकं दातुं बहूनि तत्वान्तर्गतानि कथाः सन्ति। रामायणे धर्म प्रधान्यं सर्वदा सर्वत्र विशदयति समान प्राधान्यतया एव कर्मतत्वम् च। रामायणस्य उत्पत्तिरपि कर्मसम्बन्धविषयमिति वक्तुं शक्यते। निषाधस्य कर्म दृष्ट्वा मुनौ जायमान दुखमेव आदिकाव्यस्य मूलकारणमिति वक्तुं शक्यते[९९]। वाल्मीकेः पूर्वानुभवानि / कथा अस्य उत्तम उदाहरणमेव । अस्य आशयस्तु स्वेनैव कृतानां कर्मणां फलं स्वेनैव भोक्तव्यम्। एवमेव अयोध्याकाण्डे नारद-राघवसंवादे नारदः आगत्य स्वीय अवतरोद्देशान् श्रीरामं पुनःस्मरणं दत्वा प्रत्यागतवान् । एवं किष्किन्धाकाण्डे बालिवधानन्तरं सुग्रीवः स्वीयकृत्यनिर्वहणे विस्मृतो अभवत् तदा श्रीरामसोदरः लक्ष्मणः तम् द्रष्टुं गतवान्[१००]। सीतान्वेषषोद्योगार्थं हनुमतः लङ्का पर्यन्तं गमनसमये श्रीरामदूताय आथित्यं दातुं देवाः पर्वताः च आगताः तर्समिन् सन्दर्भे च स्वीय दायित्वं हनुमता तत्र उद्घोषयति[१०१]। अनेन ज्ञातुं शक्यते कर्मनिर्वहणे हनुमतः पटुत्वं विशेषरूपेण तत्र वर्तते। श्रीरामः स्वीय कर्म निवर्तयितुं सर्वथा पुरस्थितः । इत्यादिषु स्थलेषु च प्रत्यक्षतया कर्मस्य प्राधान्यम्, अन्य सन्दर्भेषु परोक्षरूपेण च वर्तते। एवं कर्मस्य प्राधान्यं तस्य निर्वहणस्य च प्राधान्यं च अस्मान् बोधयति रामायणे।

*महाभारते* विषयोऽयं गीतायाः बहिरपि चर्चयति। शान्तिपर्वणि (३२०/२६) यथा – " कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ", एवमेव जनक-सुलभासंवादे, शौनक-युधिष्ठिराय च विस्तृतं च। एवमेव *महाभारते* शान्तपर्वे (२४०/६ ) -

"द्वाविमावथ पन्थानौ यस्मिन्वेदाः प्रतिष्ठिताः।
प्रवृत्ति लक्षणो धर्मः निवृत्तिश्‌च विभाषितः।।"

*महाभारते* न केवलं गीताशास्त्रे अन्यस्मिन् पर्वणि अपि कर्मविषयमधिकृत्य श्रीशुक-जनकमहाराज्ञयोर्मिथः संवादस्य च कारण रूपेण अस्य विषयमेव। *महाभारतोक्त* नारायणीय धर्मस्य चित्रं एवं विस्तरति। ब्रह्मणः मरीच्यादयः सप्त मानसपुत्राः कर्मयोगेन (प्रवृत्तिमार्गेण )मोक्षपदं प्राप्तवन्ताराः[१०२]। एवमेव कपिल-सनत्कुमारादयः सांख्यमार्गेण (निवृत्तिमार्गेण ) च परमपदं प्राप्तवन्ताराः [१०३]। पुराणादिषु च विषयस्याऽयं विस्तृतेन वर्णनं वर्तते।श्रीमद् भागवदमहापुराणे कर्मयोगस्य प्राधान्यादिकं सविस्तरं विशदयति। मोक्षप्राप्त्यर्थं कर्ममार्गः, ज्ञानमार्गः, भक्तिमार्गश्च उपदिशति। *श्रीमद् भागवते* वासनामनुसृत्य तेषु एकैकतममपि स्वीकरणीयम्। कर्मानुष्ठानेन मोक्षपदं प्राप्तवन्ताराः मनुवंशराजानाः निमि, जनकः, प्रियव्रतः, नाभि, ऋषभः इत्यादयः स्वधर्मानुष्ठानेन मोक्षसाक्षात्कारं प्राप्तवन्ताः। तेषु जनकस्तु कैवल्यप्राप्तेरनन्तरं लोकसंग्रहार्थं कर्मानुष्ठानमपि अकरोत्। कर्मानुष्ठानविषये अणुमात्रमपि न व्यतिचलति आदित्यः (सूर्यः )। न केवलं ब्रह्मा-विष्णु-महेश्वरादि त्रिमूर्तयोऽपि कर्म तन्त्रे निपतति यथा -

"ब्रह्मा येन कुलालवन्न् नियमितो ब्रह्माण्डभाण्डोदरे।
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे।।

शम्भुर्येन पिनाकपाणि पुटको भिक्षाटनं कुर्वते।
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे।।[१०४]"

### ३.१.१ मनुस्मृतौ कर्म

मनुष्य जीवितस्य धर्म—कर्म व्यवस्था क्रियन्ते स्मृतयः। बहूनि स्मृतयः सन्ति, किन्तु तेषां प्राधान्येन मनस्मृतिरेव अत्र उदाहरति। एवमेव सदाचारशाश्त्र विषयाः सविस्तरं विशदयति। श्रुत्यनुसारेण आचाराणां महत्वमुद्घोषयति मनुस्मृति। अत्र अस्यां ग्रन्थे कर्म इत्यस्य विषये कथं प्रतिपादयति इति विचारः अत्र क्रियते यथा -

" शुभाशुभफलं कर्म मनोवाङ्देहसंभवम्।
कर्मजा गतयो नृणा मुत्तमाधममध्यमाः।" मनु १२/३।[१०५]

अत्र कर्म विभागं नाम उत्तम, मध्यम, अधम भेदेन वर्तन्ते। अत्र कर्मशब्देन धर्मः अथवा क्रियमाणानि कार्याणि इत्येवं रुपेण चिन्त्यते। यथा शारीरिककर्म, वाचिककर्म, मानसिककर्म इति त्रिविधरीत्या विस्तरति। अस्यानन्तरम् एकैकानां कर्मणां विभागीकरणं च दृश्यते।

"परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम्।" मनु १२/५।[१०६]

अनेन श्लोकेन मानस कर्माः त्रिविधमिति विशदयति। एवमेव अग्रिम श्लोकेन —

"पारुष्य मनृतं चैव पैशुन्यं चापि सर्वशः।
अस्मबन्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्।" मनु १२/६।

अनेन श्लोकेन वाचिक कर्माणि चतुर्विधम् इति विस्तरति। अग्रिम श्लोकेन शारीरिक कर्माणि

"अदत्तानामुपादानं हिंसा चैवाविधानतः।

परदारोपसेवा च शारीरं त्रिविधं स्मृतम्।" मनु १२/७।

अस्य श्लोकस्याशयस्तु शारीरिक कर्माणि त्रिविधमिति विशदयति। कर्मफलस्य विषये मनुस्मृतौ एवं वर्ण्यते।

" यादृशेन तु भावेन यत् यद् कर्म निषेव्यते।

तादृशेन शरीरेण तत् तत् फलमुपाश्नुते"।मनु १२/८१

कर्म योग विषये च यथा

"आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।

आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम"। मनु १२/११९।

मनुस्मृत्यनुसारं प्रधानतया गृहस्थाः पञ्चमहायज्ञानि करणीयानि। तानि ब्रह्मयज्ञः, देवयज्ञः, भूतयज्ञः, पितृयज्ञः, अतिथियज्ञः(नृयज्ञः ) इत्येतानि। पञ्चमहायज्ञानि गृहस्थानां पञ्चपापात् संरक्षणार्थम् इति च विस्तरति। तद् यथा –

"कष्टनी पेषणी चुल्ली चोदकुंभी च मार्ज्जनी।

पञ्चसूना गृहस्थस्य पञ्चयज्ञात् प्रणश्यति।।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।

होमो दैवो बलिर्भौतो नृ यज्ञोऽतिथि पूजनम्।।

पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।

स गृहेऽपि वसन् नित्यम् सूनादोर्षान्न लिप्यते" [१०७]।।

अनेनास्य प्राधान्यं ज्ञातुं शक्यते। तद्वत् एव ब्रह्मचर्यं, गार्हस्थं, वानप्रस्थं, सन्यासादिषु आश्रमेषु विधित कर्मणाम् अनुष्ठानादिकं च तत्र विस्तरति। अत्र कर्मणाम् उद्देश्यादिकं, फलादिकं चोद्दिश्य एवात्र कर्म विभागीकरणम् भविष्यति। गीताशास्त्रम् एवं नास्ति इत्येवास्य भेदाः।

### ३ .१ .२ गीताशास्त्रे कर्म विचिन्तनम्

गीताशास्त्रस्य सन्दर्भस्तु युद्धभूमौ आसीत्। तत्र भगवता इदं गीताशास्त्रं स्वधर्मानुष्ठान रूपेणैव उपदेशयत्। तत्रस्थ सान्दर्भिकोद्देशानि ‘‘न योत्स्य इति गोविन्द ‘‘ इत्याद्युक्तम्। अस्मिन्नवसरे स्वधर्मानुष्ठानार्थं भगवता कर्मयोगः उपदिष्टम्। विषयोऽयं गीताशास्त्रे तृतीयाध्याये च सुललितया रीत्या व्याख्याता। अत्र अस्मिन्नवसरे भगवता कर्मविभागीकरणमपि अकरोत्। कर्मयोग, कर्मसन्यासौ, उपदिश्य अस्मिन्नवसरे अर्जुनः अपृच्छत्। अस्योत्तररूपेण ‘‘ कर्मयोगेन योगिणां(३.३), कर्मण्येवाधिकारस्ते मा फलेषु कदाचन(२.४७), कुरु कर्मत्वं, न हि कश्चित् क्षणमपि जातुतिष्ठत्यकर्म कृत् (३.५)‘‘, एवमेव सात्विक-राजस-तामस कर्मणां वर्गीकरणमपि अकरोत्। कर्म-कर्मयोगश्च, कर्मफलं कर्मभेदाः अकर्म विकर्मादिकं च विस्तरति। गीताशास्त्रे कर्मयोगः, कर्मसन्यासः इति पदद्वयेन सिद्धान्तद्वयौ उक्तम्। तृतीयाध्याये कर्मयोगः नामाध्याये तृतीयश्लोकेन –

‘‘लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघा।
ज्ञानयोगेन सांङ्ख्यानां कर्मयोगेन योगिनाम्।।’’ ३.३।

अत्र भगवता निष्ठा द्वयानां नाम उक्त्वा अनन्तरं प्रथमस्तावत् कर्मयोगस्य प्राधान्यं विस्तरति। अर्जुनेन युद्धभूमौ युद्धम् कर्तुमेवागतवान् न सन्यासस्वीकरणार्थं। अत एव अत्र कर्मयोगस्यैव प्राधान्यमधिकतया वर्तते। अतः एव भगवता –‘‘कर्म ब्रह्मोद्भवं विद्धि, अनादिमत्परं कर्म, कर्मणैव हि संसिद्धिमास्थिता जनकादयः, न हि कश्चित् क्षणमपि

जातुतिष्ठत्यकर्मकृत् " इत्यादीनां वाक्यानां समर्थनेन अस्य प्राधान्यं स्थापयति। इतोऽपि अत्र -

" सन्यासः कर्मयोगश्च निश्रेयसकरावुभौ।

तयोस्तु कर्मसन्नयासात्कर्मयोगो विशिष्यते।।" ५.२।

विषयस्योपरि गीताशास्त्रे सात्विक-राजस-तामसादि भेदेन त्रिधा सन्ति। अत्र सात्विक कर्मणः स्वरूपं भगवता विस्तरति। -

"कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम्।

रजसस्तु फलं दुखमज्ञानं तमसः फलम्।।१४.१६

एवमेव नियतं सङ्गरहितमरागद्वेषतः कृतम्।

अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते।।"१८.२३।

अत्र प्रथमतया सात्विककर्म सुकृतकर्मेण सात्विककर्म प्राप्तुं शक्यते, एवमेव श्रुत्यादिषु निश्चितं यत् कर्म तानि अफलप्रेप्सुना च यत् करोति तत् कर्म सात्विकम्।

"यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।

क्रियते बहुलायासं तद्राजसमुदाहृतम्।।"१८.२४।

यत् कर्म फलमुद्दिश्य क्रियते वा, साहङ्कारेण युक्तो वा क्रियते, कर्तुनाऽपि बहुलायासं च क्रियते तत् कर्म राजसकर्म इति चाहूयते। अस्यानन्तरं तामसकर्म किमिति विवृणोति -

"अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।

मोहादारभ्यते कर्म यत्तत्तामसमुच्यते।।"१८.२५।

अज्ञान कारणेन मोहाद् अविवेक कारणेन यत् कर्म आरभ्यते तादृशं कर्म तामस कर्ममिति आहूयते। इतः परं कर्मविभागीकरणम् एवमेव तस्य लक्षणानि च उक्तम्। अत्र गीताशास्त्रे कर्मकरोति चेदपि तस्य फलविचारे अपि सुव्यक्ततया विचारितं वर्तते। यथा द्वितीयाध्याये ४७ तम श्लोकेन विचिन्त्यते। यथा एकः मानवः अग्नौ सुगन्धद्रव्यादि वस्तूनि जुहोति चेत् सर्वेषां कृते सुगन्धः अनुभूयते एवं सुखमनुभवति। अन्यत्र तीक्ष्ण वस्तूनां प्रयोगः अग्नो क्रियते चेत् सर्वेषां कृते क्लेशः च जायते। अनन्तरमत्र गीताशास्त्रे कर्मफलस्य विषये त्रैविध्यत्वम् अनेन श्लोकेन विस्तरति –

"अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्।।"१८.२२।

अनिष्टम्, इष्टं, मिश्रम् इति त्रिधा भवति कर्मणः फलम्। एवमेव कर्मनिर्वहणार्थं पञ्चकारणानि सन्ति इति गीताशास्त्रे विचारयति तद् यथा –

"शरीरवाङ्मनोभिर्यत्कर्म प्रारभ्यते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः।।१८.२५।

तत्रैतं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वात्न्न स पश्यति दुर्मतिः।।" १८.२६।

एवमेव कर्मफलविषये गीताशास्त्रे नवमे अध्याये -२१ तमे श्लोके "क्षीणे पुण्ये मर्त्यलोकं विशन्ति " श्लोकोऽयं कठोपनिषदि च समानरीत्या अनुवर्तते। कर्मफलेन साकं अस्य सम्बन्धविषयो भवति कर्मयोगः, कर्मफलं लभ्यते वा न वा इत्यादि त्यक्त्वा कर्तृत्वं कर्मानुष्ठानमेव इति विचारः एव कर्मयोगं तद् गीताशास्त्रे एवं विस्तरति। वेदान्तदर्शनः एवं कर्मयोगः इत्युभयोर्मध्ये महान् भेदो वर्तते।

"अत्र वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारकाणि शारीरकसूत्रादीनि " इति सदानन्दः स्वीय *वेदान्तसारे* च उक्तम्। अत एव अस्य प्रतिपाद्यस्तु ब्रह्म साक्षात्कारपर्यन्ता मार्गाः एव। अत्रस्तु कर्मसङ्कल्पः तु एवं तस्य फलस्य च विषये न प्रतिपादयति वेदान्तशास्त्रे। वेदान्तदर्शने अग्रे श्रीशङ्करस्य अद्वैतदर्शनं अस्याचार्यस्य गीताभाष्यमेव लब्धेषु प्राचीन इति प्रथिता। अतः एवः अस्यां गीताभाष्ये कर्म विषयेषु अद्वैत चिन्ता कीदृशम् इत्येवं विचारः अत्र भविष्यति। एवं वेदान्त दर्शने श्रीमध्वाचार्यानुयायिनः द्वैतदर्शनं तेषां मतानुसारेण कथं कर्म एवं कर्मयोगः इत्यादीन् स्वीय दर्शनानुसारेण व्याख्यातः इत्यादिकमपि विजिन्तनीयम्। शङ्करस्तु " ज्ञानादेव तु कैवल्यम् " इति विजिन्त्य एतदर्थं क्रियमाणानि श्रवण-मननादिना अग्रे गच्छति। एवं द्वैतिनस्तु भक्तिमार्गेण विष्णुः स्वीयपुत्रः वायूनां भक्तानां यद्यत् आवश्यकं तत्सर्वं ददाति इत्यपि चिन्तयन्ति। विशिष्टाद्वैतिनस्तु स्व सिद्धान्तानुसारेण गीताभाष्यमकरोत्। तत्र ईश्वरस्तु स्वीय क्षमागुणेन सर्वमपि स्वीकरोति। एवम् एषस्तु स्वीय भक्तानां पालनं मार्जारन्यायवत्, एवं मर्क्कटन्यायवत् करोति एतयोः त्रयोः अपि गीताभाष्यमपि अकुर्वन्। कर्मविषये एतानां त्रयाणां सिद्धान्ताः, मताः इत्यादिकमेवात्र विचारः करोति। अविद्यानाशनेन अमृतत्वप्राप्तिरेव अद्वैतिनां आत्यन्तिकलक्ष्यम्। "ज्ञानाग्निः भस्मसात्कुरुते, सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते " इत्यादि गीताश्लोकानां सविस्तरव्याख्यानानि शङ्करभाष्ये प्राधान्येनद्रष्टुं शक्यते।

### ३.२.शंकरसिद्धान्ते कर्म

पुरुषार्थ चतुष्टयेषु परमपुरुषार्थः मोक्षः एव। तदर्थम् अनेकानि मार्गाणि सन्ति। एतेषु प्रधान रूपेण वर्तते कर्ममार्गः, ज्ञानमार्गः च। अत्र वेदान्तदर्शने कर्मणः अपेक्षा अस्ति वा न वा, अस्य प्राधान्यम् इत्यादीनां कार्याणां विजिन्तनमवश्यमेव। वेदान्तशास्त्रस्य अधिकारि कः ? अस्योत्तररूपेण नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिषट्कसम्पत्तिः, मुमुक्षुत्वम् साधनाचतुष्टयानि इत्यादीनि सन्ति। अत्र

कर्मविषयमधिकृत्य वा कर्ममहत्वं वा इत्यादीनि अङ्गरूपेण प्रतिपादयति। वेदान्त पठनाय श्रवणं, मननं, निदिध्यासनादीनाम् आचरणम् अवश्यमेव। अतः अद्वैतवेदान्तदर्शनं फलापेक्षारहित कर्मणा मनःशुद्धि सम्पादनीयम् इत्येव प्रतिपादयति। अद्वैते कर्मणः फलापेक्षा रहितेन करोति चेत् लौकिकगृहस्थानां कृते कमणां अभ्युदयः अङ्गीकरोति। कर्माणि फलाभिसन्धिरहितो भूत्वा ईश्वरार्पण बुद्ध्या च क्रियते चेत् चित्तशुद्धिः प्राप्तुं शक्यते। एवं च ज्ञानिनामपि कर्माणि परोक्षकारणं भवति। मोक्षकार्ये कर्माणि प्रत्यक्षहेतुत्वे न भविष्यति। एवमेव कर्मस्तु कदापि ज्ञानेन मिलित्वा मोक्षप्राप्तिः न भविष्यति। श्रीशङ्करस्य गीताभाष्ये ज्ञानकर्मसमुच्चयवादस्य खण्डनमेव अत्र भवति। सर्वकर्मणां मूलकारणस्तु अविद्या कार्य अग्राहाण्येव। यथा धूमेन आव्रियते अग्निः इव एवमेव सर्वाणि अपि कर्माणि दोषदूषितश्च। कर्मणः दोषस्तु अहं ममाभिमानस्तु चिन्ता इत्येव। कतृत्व भोक्तृत्वादिना जाताभिमानं त्यक्त्वा, कर्मफलं त्यक्त्वा निष्कामो च भूत्वा कर्मानुष्ठानं करणीयमिति गीतात्पर्यम्। कर्म, भक्ति, इति मार्गद्वयं ज्ञानोपलब्धेः उपकारकं भवति। एतद् विषयमधिकृत्य स्वामि विवेकानन्दः एवम् उक्तम् –" कर्म,ज्ञानं भक्तिः इति मार्गत्रयमपि वेदान्तशास्त्रेषु अत्यतीव महत्वम् उद्बोधयति "।

### ३.२.१.ब्रह्मसूत्रे कर्मसङ्कल्पः

वेदान्त दर्शने कर्मणः प्राधान्यादिकम् एवं प्रस्थानत्रये तस्य आवश्यकता च विचारयति। अत्र बादरायण व्यासविरचित ब्रह्मसूत्रदिशा कर्मविषयमधिकृत्य कथम् अस्य विषयस्योपरि विचारः क्रियते इति विचारयति। अत्र चतुरध्यायि शारीरकमीमांसा जीवब्रह्मैकत्वञ्च साक्षात्कारहेतुः। अत्र प्रथमे समन्वयाध्याये सर्वेषामपि वेदान्तवाक्यानां साक्षात्परम्परया प्रत्यगभिन्नाद्धितीये ब्रह्मणि तात्पर्यमिति समन्वयः अत्र दृश्यते। द्वितीयाध्याये अविरोधाध्याये समन्वयेन तत्र संभावित स्मृतितर्कादि विरोधमाशङ्क्य तत् परिहार करणपूर्वमविरोधो दर्शितः। तृतीये साधनाध्याये सर्वसाधनानां निरूपणं क्रियते। चतुर्थे

फलाध्याये सगुणनिर्गुणविद्ययोः फलविशेषनिर्णयः च कृतम्। तृतीयाध्याये द्वितीयपादे सप्तमे अधिकरणे फलाधिकरणे ( फलमतोपपत्तेः) अत्र कर्म अनुक्षण विनाशि कालान्तरभाविफलं भवति इत्युपपन्नम्। कर्मानन्तरमेव फलोत्पादः च। फलस्य इष्टम्, अनिष्टम्, मिश्रम् इति त्रैविद्यमस्ति अनेन स्वर्ग अवीच्यादि मनुष्य लोकप्राप्तिः एवमेव संसारस्तु जन्ममृति प्रवाहगोचराश्रयः इति।

कर्मविषयमधिकृत्य तृतीयाध्याये एव विचार्यते। एवं चेदपि ततः पूर्वं " कर्मकर्तृव्यपदेशाच्च [१०८](१.२.४)" ईक्षतिकर्मव्यपदेशात् सः ( १.३.१३), उभयथापि न कर्मा तत्सदभावः(२.२.१२), न कर्म विभागादिति चेन्नादित्वात् ( २.१.३५), विद्याकर्मणोरिति तु प्रकृतत्वात् (३.१.१७)। अत्र वेदान्तसूत्रेषु तृतीयाध्याये विषयस्य अस्य विचारणार्थं कारणस्तु तत्र जन्मन्तरप्राप्त्यादि विषयं तत्र विचार्यते। अत्र एवं सिद्धान्तयति यथा कृतानां कर्मणामनुसृत्य एवं पुनः जन्म लभ्यते। तदर्थं देवयान पितृयानादि मार्गद्वयं च वर्तते। छान्दोग्योपनिषदि ( ५.१०.७) एवं ( ५.१०.६) (अथ य इमे ग्रामे इष्टा पूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति। बृहदारण्यके अन्यत् एकं (४.३.३३) अथ ये शतं पितृणां जितलोकानामानन्दाः सः एकः कर्मदेवनामानन्दो ये कर्मणा देवत्वमभिसंपद्यते। ब्रह्मसूत्रे कृतात्ययाधिकरणे ( ३.१.२) " ततः कृतात्यये कृतस्येष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवमेवावरोहति "। छान्दोग्ये (५.१०.७) " तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते निं कपूयां योनिमापद्येरन्श्वयोनि वा सूकरयोनिं वा चण्डालयोनिं वा" छानेदोग्ये ( ५.१०.८) "अथैतयोः पथोर्न कतरेणचन तानिमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति। जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोके न सम्पूर्यते"। अत्र भाष्ये तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत्। अनन्तरभागे जरायुजाण्डजादीनाम् उत्पत्यादि विषयाणि भाष्यते। अत्र पञ्चाग्निविद्यादिकमेवात्र विषयम्

अनन्तरं तत् वर्णयति च। तृतीयाध्याये द्वितीयपादे सप्तमे फलाधिकरणे फलमत उपपत्तेः अत्र भाष्ये यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत्कर्मणो भवत्याहोस्वीदीश्वरादिति भवति विचारणा। कर्मणस्त्वनुक्षणविनाशिनः कालान्तरभाविफलं भवतीत्यनुपपन्न्। अत्र कर्मणः त्रैविद्यादिकं विशदयति कर्मांगवीर्यजनकत्वनिबन्धम् ( ४.१.५)। अनेन पठनेन एवं वक्तुं शक्यते। गीताशास्त्रे कर्मणां तत्तद् कालीनफलादिकमेवात्र विस्तरति। पर वेदान्तसूत्रेषु कर्मणां फलादि विषयेण पुर्जन्मादिकम् इत्यादि विषयाण्येवात्र विस्तरति।

**३.२.२.उपनिषद्भाष्येषु कर्म**

दशोपनिषद् इति नाममपि शङ्करभाष्येंण एव प्रचुर प्रचारं लब्धम्। उपनिषदस्तु वेदस्य ज्ञानकाण्डावलम्बिनः अपि कर्मस्य प्राधान्यं सूचयति। शङ्करदर्शने ‘‘ज्ञानादेव ब्रह्मप्राप्तिः ‘‘ इति उद्घोषयति। एवं चेदपि शंङ्करस्य दशोपनिषद् भाष्येषु कर्म कथं व्याख्यातं इति विजिन्तयाम। ईशास्योपनिषदि द्वितीये श्लोके - ‘कुर्वन्नेवेह कर्माणि जिजीवीषेत् शतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ‘। २। अत्र भाष्ये शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेवेह जिजीवीषेत्। अत्र एवमेव कर्मफलस्तु शोकमोहादीनां कारणभूता अविद्यानाशमेव कर्मफलस्तु संसारमण्डलात् बहिर्गत्वा अन्य पथेन हिरण्यगर्भादि पदप्राप्तिः अत्र प्रयोजनम्।

मुण्डकोपनिषदि प्रथमे मुण्डके अष्टमश्लोकेन यथा– ‘‘तपसा चीयते ब्रह्म ततोऽमभिजायते। अन्नात् प्राणो मनः सत्यं लोकाः कर्मसुचामृतम् ’’[109] उत्पत्यादीनां क्रमविषयाः यथा–ज्ञानतपसा सर्वभूतानाम् उद्भवस्थानं यद् भवति तत् अक्षर ब्रह्म इत्यादीनां विशदयति। मुण्डकोपनिषदि प्रथमे मुण्डके द्वितीये खण्डे प्रथमे मन्त्रे एवं –‘‘ तदेतत्सत्यं

मन्त्रेषु कर्माणि कवयो यान्यपश्यांसि त्रेतायां बहुधा सन्ततानि तान्याचरथ नियतं सत्यकामा एषः एव पन्था सुकृतस्य लोके"[110]।

अत्र अनेन मत्रांशेन अग्निहोत्रादीनां कर्माणाम् अनुष्ठानादिकं विषयमेवात्र कर्म पदेनोद्दिश्यते। एवं वेदविहितानि कर्माणि नित्यंमाचरणीयम् अनेन सुकृतस्य लोके प्रयातुं शक्यते। अनन्तरस्थ सप्तम श्लोकेन षोडश ऋत्विजः, यजमानः, यजमानपत्नी एते अष्टादशाश्रयं भवति कर्म।" शास्त्रेषु येषु अष्टादशासु अवरं केवलं ज्ञानवर्जितं कर्म " अनेन कृत्वा मूढाः जरामृत्युं च किञ्चित्कालं स्वर्गे स्थित्वा पुनरेव भूयोऽपि गच्छन्ति। पुरुषं एवेदं विश्वं कर्मतपो ब्रह्म परामृतम्।

> "एतदयो वेद निहितं गुहायां सोऽविद्या ग्रन्थीं विकरतीह सोम्य।।" मुण्ड २.१.१०।

अनेन श्लोकेन इदं विश्वं सर्वमपि पुरुषः एव। कर्मः तपः च परामृतं ब्रह्मैव। अनन्तरस्थाध्याये नवम मन्त्रेण यथा –

> "भिद्यते हृदयग्रन्थिश्चिद्यन्ते सर्वसंशयाः।
> क्षीयन्ते चास्य कर्माणि तस्मिम्दृष्टे परावरे। मुण्ड" २.२.९।

अनेन श्लोकेन यदा आत्मसाक्षात्कारं भविष्यति तदा हृदयस्तु अविद्या वासनादिकं सर्वमपि भिद्यते। तादृशस्य कर्माणि क्षीयन्ते च। तृतीये मुण्डके प्रथमे पादे अष्टम श्लोकेन चक्षुरादिना ज्ञानेन्द्रियेण वा वागादिना वा कर्मेन्द्रियेन वा तपसा वा कर्मणा वा न गृह्यते। किं तु ज्ञानप्रसादेनैव विशुद्धसत्वः ध्यायमानः सः तु आत्मानं पश्यति -

> " गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु।
> कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वे एकी भवन्ति।" ७।

मुमुक्षुणा कृतानि कर्मण्यप्रवृत्तफलानि प्रवृत्तफलानां मुपभोगेनैव क्षीणत्वात् विज्ञानमयश्च आत्मा प्रापयति। विज्ञानमयेनात्मा एते कर्माणि विज्ञानमयश्च आत्मा उपाध्यपनये सति परे अव्यये अनन्ते अक्षये ब्रह्मणि एकत्वमापद्यते। मन्त्रेन विस्तरति। स्मृत्यादि आचार शास्त्रेषु विशेषेण प्रकीर्तितानि श्लोकानि एवात्र सन्ति। यथा -२ (मन्त्रं ) अत्र मन्त्रस्थ प्रसिद्धभागः - ' मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव " इत्येषां भागानामनन्तरमेवात्र कर्म विषयं विस्तरति। भाष्ये यथा – ' कर्मणां केवलं ब्रह्मविद्या आरम्भाच्च, पूर्वं कर्माण्युपन्यस्तानि ' इति। अस्य विषयस्य साधुत्वाय तैत्तिरीये यथा –" अभयं प्रतिष्ठा विन्दते, अविद्यया मृत्युं तीत्वा विद्यया अमृतमश्नुते " ( ईशावास्योपनिषद् ११) च साहाय्येनैव विषयोपस्थापनं क्रियते। अत्रस्तु श्रीशङ्करः कर्माणि तु ज्ञानोत्पत्तेः पूर्वमिति कारणात् अनुष्ठेयमिति च विधीयते।

तृतीयेन श्लोकेन द्वितीयेन श्लो्कस्यानन्तरस्थविषयाः एव अनुवर्तते। दानादि विषयेषु यथा "अश्रद्धया अदेयं श्रिया देयम् अनन्तरं कर्म विषये कर्म शब्देनात्र श्रौतस्मार्तादि यागादिरेवात्र अनेन पदेनोद्दिश्यते। उपनिषदि अत्र कर्मविषये कोऽपि सन्देहं वर्तते चेत् तत्र संमर्शिनः ब्राह्मणाः कथं विचारितमिति चिन्त्यमेव। तैत्तिरीयभाष्ये विद्या मोक्षं प्रति करणमेव, कर्मण्यपेक्षते नित्यानि तु स्वात्मलाभे। अविरोधः कर्मविधिश्रुतीनाम् अतः केवलया एव विद्यायाः परं श्रेयः इति। अत्र मोक्षप्राप्त्यर्थं केवलेन विद्यया वा, कर्मणा वा, कर्मयुक्तविद्यया वा इति इति अत्र सन्देहः। अत्र मोक्षस्तु नित्या एव कर्मकारिरुप चानित्यत्वं प्रसिद्धे लोके। छान्दोग्ये (८.१.६) यथा "तद्यथेह कर्मचितो लोकः क्षीयते "इति श्रुतिबलेन ज्ञातुं शक्यते। मोक्षस्तु न कर्मणा इति। कर्मणा लभ्यमानानि लोकानि अनित्यानि इति छान्दोग्य श्रुत्या अवन्तुं शक्यते। वेदवचनानि तु न कारकं, ज्ञापकमेव। विद्या कर्मणि मोक्षप्रतिबन्धहेतुनिवर्तके। इति चेत् कर्मणः फलस्तु उत्पत्तिः संस्कारः, विकारं, प्राप्तिः च। मोक्ष उत्पत्यादीनां फलानां विरोधयेवात्र कर्मफलानि। अतः विद्याकर्मणोः समुच्चयानुपपत्तिः

अनुपपन्नमेव। भाष्ये यथा –प्रतिबन्धक्षयादेव विद्योत्पद्यते। यजुर्वेदीय वाजसनेयी शाखान्तर्गतो वर्तते *बृहदारण्यकोपनिषद्*। तत् तु षट् अध्यायरुपेण विभक्ता एते पुनः ब्राह्मणरुपेण च विभक्ता ततौ काण्डत्रयेण च पुनर्विभक्ता।( १,२-मधुकाण्डं,३,४ -मुनिकाण्डं, ५,६ – खिलकाण्डम् ) अस्य उपनिषदः श्रीशङ्करभगवत्पादः भाष्यं कृतवान् अस्य भाष्यस्य सुरेश्वराचार्येण भाष्यवार्तिकानि कृतानि। एतयोः विद्यारण्यस्वामिना भाष्यसारं च कृतवान् एते अस्य माहात्म्यं द्योतयति। अत्र तृतीयाध्यायस्य द्वितीयब्राह्मणे त्रयोदश मन्त्रेण कर्मविषयं विस्तरति।(३.२.१३) अनेन श्लोकेन "याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्। मनश्चन्द्रं दिशः श्रोत्रं पृथ्वी शरीरमाकाशात्मा औषधीर्लोमानि वनस्पदीन्केश अप्सु लोहितं च रेतश्च निधीयते कायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्त भागावामेवैतस्य वेदिष्यावः न नावेतात्सजन इति तौ होत्क्रम्य मन्त्रयाञ्चक्राते तौ ह यदूचतुः कर्म हैव तदुचतुरथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ह जारत्कारव आर्तभाग उपरराम।।१३। [१११]

याज्ञवल्क्य आर्तभागं प्रति एवमुवाच मनः चन्द्रं, पृथ्वी शरीरं, दिशः श्रोत्रं, आकाशम् आत्मा, औषधीः लोमानि, वनस्पतीन् केशान् अप्सु लोहितं च रेतश्च निधीयते। शरीरस्थ ज्ञानेन्द्रियपञ्चकं महाभूतेषु लीयन्ते, एवमेव मनः चन्द्रं, शरीरं पृथ्वीम् आत्मा आकाशे, लोमानि औषधीः, केशाः वनस्पदीन्, लोहितं च रेतसि च अनन्तरं शरीरस्थ अयं पुरुषः कुत्र भवति इत्यस्य प्रश्नस्य उत्तररुपेण ते कर्म एव ऊचतुः अनन्तरं कर्मैव प्रशशंसतुः। पुण्येन कर्मणा पुण्यः भविष्यति पापेन पापः भवति इति। अनन्तरभागे (४/३ /२) अयं पुरुषः किं ज्योतिः इति जनकः अपृच्छत् ? अस्योत्तररुपेण याज्ञवल्क्यः आदित्यज्योतिषा एव अयं आस्ते पालयते कर्म कुरुते विपल्येति च। अनन्तरम् आनन्त विषयमधिकृत्य चर्चायां परमा गतिः ब्रह्मानन्दः एव। अनन्तरं ( ४.४.५) अनेन श्लोकेन काममय एवायं पुरुषः इति स यथाकामो भवति तत्कर्तुर्भवति यत्कर्तुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते।

अत्र अनेन श्लोकस्याशयम् एवं भवति यथा कामं, क्रतुः, कर्म, फलानुभवम इत्येवं रूपेण भवति। षष्ठश्लोकेन (४.४.६) कर्मणासक्तानां पुरुषाणां गतिः कथं भवति इति विस्तरति। एते अत्र किं कर्म करोति तत्रैव भविष्यति। अत्र कृतानां कर्मणां अन्तं प्राप्य तत् लोकात् कर्म कर्तुं प्रत्यागच्छति। कठोपनिषदि ( ) एवं गीतायां च ( ९.२१) " क्षीणे पुण्ये मर्त्यलोकं विशन्ति " इति वदति। "त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यु " (कठोपनिषद् [११२] १.१.१७)अनन्तरम् अकामयमानास्तु अथवा निष्कामिनः एते आत्मानमेव एतेषां प्राणाः इन्द्रियादीनि च न उत्क्रामन्ति। तेस्तु ब्रह्म एव सन् ब्रहेमैव अप्येति। अनन्तरं चतुर्थ ब्राह्मणे (२३) तम श्लोकेन ब्रह्मज्ञानीनां महिमादि विषयाणि विस्तरति। तत् नित्यो महिमा कर्मणा न वर्धते। परमपदप्राप्तौ कर्मादि विषयाणां तं न स्पृशति इति अस्य मन्त्रस्याशयः। (६.४.२४) तम श्लोकेन पुत्राणां जननानन्तरं क्रियमाणानि कार्याण्येवात्र उद्दिश्यते। अत्र यत्कर्मणाऽप्यरोरिचं यद्वा न्यूनमिहाकरम्। एवं रीत्या बृहदारण्यकोपनिषद् च उपसंहरति।

## ३.३ कर्मव्याख्यानानि भगवद्गीतायाम्

कर्मणि एव अधिकारो न ज्ञाननिष्ठायां तव, कर्मकुर्वतो मा फलेषु अधिकारः अस्तु इत्युद्दिश्यते। उपनिषत्सु, एवं ब्रह्मसूत्रे च कर्मविषये विषयोऽयं विशेषरूपेण वर्णितो वर्तते तादृशस्थलात् अधिकरूपेण। विशेषरूपेण अस्य विषयस्य ( २.४७)[११३] विचारः प्राधान्येन वर्तते। एवमेव कर्मविभागीकरणविषये च उपनिषतादिषु प्रतिपादित गीताशास्त्रे च एवं वदति–

"कर्मणोह्यपि बोधव्यं बोधव्यं च विकर्मणः।
अकमर्णश्च बोधव्यं गहना कर्मणो गतिः।। ४. १७।

कमर्ण्य यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत।।" ४.२८।

कर्मविभागीकरणावसरे उपनिषत्सु पुण्य-मिश्र-पाप इति रीत्या कर्मविभागीकरणं कृतम्। ब्रह्मसूत्रे इष्टं पूर्तं दत्तम् इत्यादिना विभज्यैव वर्तते[११४]। अत्र कर्म, विकर्म, अकर्म भेदाः (४.१७) श्लोकैः अकरोत्। एवं (१४.१६) श्लोकेन[११५] सात्विकं, राजसं, तामसम् इति भेदेन च पुनः विभज्य अस्यानन्तरं १८ तमे अध्याये कीदृशं कर्म राजस, सात्विक, तामस कर्मणां प्रत्येकता विशदयति। संस्कृत शास्त्रग्रन्थेषु फलमाश्रित्य कर्मत्रयं उत्तम-मध्यम-अधममिति भेदेन विस्तरति पुनः। जन्यकालभेदमाश्रित्य सञ्चितं, प्रारब्धम्, आगामिकम् इति विभागीकरणमपि वर्तते। गीताशास्त्रे च ज्ञानकर्मसंन्यासयोगे च यथा -

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्त्तारमव्ययम्"।। ४.१३।

अनन्तरम् १८ तमे अध्याये मोक्षसन्यासयोगे ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां कर्मणां विशदीकरणं च गीतायां वर्तते -

"शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।" १८/४२।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रकर्म स्वभावजम्।।१८/४३।

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।।"१८.४४।

अत्र कर्मणः प्रविभक्तकारणस्तु स्वभावप्रभवैः गुणैः, स्वभावस्तु ईश्वरस्य प्रकृतिः। तत्र ब्राह्मणस्वभावस्य सत्वगुणप्रभवः, क्षत्रियाणां सत्वोपसर्जनं रजः प्रभवः, वैश्यभावस्य तम उपसर्जन रजः प्रभवः[११६], एवं शूद्रस्वभावस्य रजोपसर्जन तमः प्रभवः च अनेन -- चातुर्वर्ण्यं

मया सृष्टं (४.१३) इति श्लोकेन उद्दिष्टं कर्मविषयमेवात्र विशदयति। अनन्तरं १८.४८ तम श्लोकेन

"सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।

सर्वारंम्भाहि दोषेण धूमेनाग्निरिवावृताः।।"१८.४८।

अनेन त्रिगुणात्मकत्व युक्तदोषेण चेदपि तस्मात् न त्यजेत्[११७]। शांङ्करभाष्ये च आद्यं यथा- "स भगवान् इदं जगत् सृष्ट्वा तस्य स्थितिं चिकीर्षुः मरीच्यादीन् प्रजापतीन् प्रवृत्तिलक्षणं धर्मग्राहयामास"[118]। एवं पञ्चमाध्याये दशम श्लोकेन विस्तरति यथा -

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।। ५.१०।

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।

योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये।।" ५.११। [११९]

कर्मणः निष्पत्यर्थं पञ्चकारणानि सन्ति, तद् कथमिति विशदयति यथा-

"अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं।

विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्।।"१८.१४।

अधिष्ठानम् इच्छाद्वेषसुखदुःखज्ञानादीनाम् अभिव्यक्तिः आश्रयः अधिष्ठानं शरीरं तथा कर्ता उपाधिलक्षणः भोक्ता, करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं तत् द्वादशसंख्यं, विविधाः च पृथक्चेष्टाः वायवीयाः प्राणापानाद्याः, दैवं च एव दैवं एव च अत्र एतेषु चतुर्षु पञ्चमं पञ्चानां पूरणम् आदित्यादि चक्षुराद्यनुग्राहकम[१२०]्। अनन्तरं तृतीयाध्याये पञ्चमश्लोकेन लोके कर्म प्राधान्यं कीदृशं भवति इति विशदयति तत् तु उपनिषदात् भिन्नरीत्या एव अकरोत् यथा –

"न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।"३.५।

प्रकृतिजैः जातैः सत्वरजस्तमोगुणैः सर्वे प्राणिनः कर्म करोति। अतः -

"नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।

शरीरयात्रादपि च ते न प्रसिद्ध्येदकर्मणः।।" ३.८।

यो यस्मिन् नित्यकर्मणि नियतम् अधिकृत्य फलाय च अश्रुतं तत् एव नियतं कर्म। अतः "तदर्थं कर्म्म कौन्तेय मुक्तसङ्गः समाचर " (३/९) अनेन कर्माणि कृत्वा अग्रे गन्तव्यम्[१२१] ।" असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः "।(३.१९) अग्रिमश्लोकेन जनकमहाराज्ञः, अश्वपत्यादयः च स्वीय कर्मानुष्ठानेनैव विद्वांसो भूत्वा मोक्षं गन्तुम् आस्थिताः च। अनन्तरं चतुर्थाध्याये एवं पञ्चमाध्याये च (ज्ञानकर्मसन्यासयोगं, सन्यासयोगं च) कर्मसम्बन्ध अनन्तर विषयाणि विस्तरति भगवता। अत्र चतुर्थाध्यायस्यारंम्भे भाष्यकारेण श्रीशङ्करेण यथा ' यः अयं योगः अध्यायद्धयेन (पूर्वाध्यायद्धयेन ) उक्तो ज्ञाननिष्ठा लक्षणः, स सन्यासः कर्मयोगोपायः यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणः च। कर्मसम्बन्ध अनन्तरस्थ विषयाः गुणत्रयविभागयोगे (१६) तम श्लोकेन त्रिविध कर्मणां किं फलम् इति विशदयति सात्विक कर्मणां फलं सुकृतम्, रजसस्तु फलं दुख्रं तमसः फलस्तु अज्ञानमेव। अनन्तरं मोक्षसन्यासयोगे सात्विकादीनां कर्मणां विषये विचारः चाकरोत्।

उपनिषत्सु यथा " कर्मणा पितृलोकः विद्यया देवलोकः " इति प्रसिद्ध श्रुतिश्च वर्तते। बृहदारण्यके कर्मसम्बन्ध श्रुतयः वर्तन्ते। "पुण्यो वै पुण्येन कर्मणा, न विद्याकर्मणी समन्वारभते "[१२२] इत्यादीनि बहूनि सन्ति। एवमेव ब्रह्मसूत्रे च गीताश्लोकांशाः उपयुज्यते। कर्मसम्बन्धविषयाणां ब्रह्मसूत्राणां व्याख्यानावसरे गीताश्लोकाः उपनिषद् श्लोकैः

साकमुपयुज्यते। एवं चेदपि उपनिषद् -ब्रह्मसूत्रात् च प्रत्येक रुपेण वर्तते गीतायः कर्मयोगसङ्कल्पः।

### ३.४ आचार्यत्रयाणां भाष्ये कर्म

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।२.४७।

अद्वैतभाष्ये कर्मण्येवाधिकारो न ज्ञाननिष्ठायां ते तव। तत्र च कर्म कुर्वतो मा फलेष्वधिकारोऽस्तु कर्मफलतृष्णा मा भुक्तदाचन कस्यांचिदप्यवस्थायामित्यर्थः। यदा कर्मफले तृष्णा ते स्यात्तदा कर्मफलप्राप्तेर्हेतुः स्याः एवं मा कर्मफलहेतूर्भूः। यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत्। यदि कर्मफलं नेष्यते किं कर्मणा दुखरुपेणेति मा ते तव संगोऽस्त्वकर्मणि प्रीतिर्मा भूत्[१२३]।

अस्य मध्वभाष्ये कर्मफलानि ह्यस्वातन्त्र्येण भवन्ति। नहि कर्म फलानि कर्मभावे यत्नतोऽपि भवन्ति। भवन्ति च काम्य कर्मिणो विपरीतकरण एव प्रत्यवायः। न तु ज्ञानादिनाऽकामनया वा फलप्राप्तौ। अतः कर्मण्येवाधिकारः। अतस्तदेव कार्यम्। कर्मफलं तत्कृतौ हेतुर्यस्य स कर्मफलहेतुः। अस्य तात्पर्ये कर्माधिकारिण एव त्वदादयो जीवाः। फलं तु मदायत्तमिति भावः। मा कर्मफलहेतुर्भूः नेश्वरो अहमिति भावं कुरु। एष उ एव शुभाशुभैः कर्मफलैरेनं संयोजयति न स्वयं संयुक्तो भवति यदेनं कर्मफलैः संयोजयति न स्वयं संयुक्तो भवति तस्मादन्य एवासौ भगवान्वेदितव्य इति[१२४]।

रामानुजभाष्ये नित्ये नैमित्तिके काम्ये च केनचित् फलविशेषेण सम्बन्धितया श्रूयमाणे नित्यसत्वस्थस्य मुमुक्षोः ते कर्ममात्रे अधिकारः। तत्सम्बन्धितया अवगतेषु न कदाचित् अपि अधिकारः। स फलस्य बन्धरुपत्वात् फलरहितस्य केवलस्य मदाराधनरुपस्य मोक्षहेतुत्वाच्च। मा च कर्मफलयोः हेतुः भूः। त्वया अनुष्ठीयमाने अपि कर्माणि नित्यसत्वस्थस्य मुमुक्षोः

तवकर्तृत्वम् अपि अनुसन्धेयम्। फलस्य अपि क्षुन्निवृत्यादेः न त्वं हेतुः इति अनुसन्धेयम्। तद् उभयं गुणेषु वा सर्वेश्वरे मयि वा अनुसन्धेयम् इति उत्तरत्र वक्ष्यते। एनम् अनुसन्धेयम् इति उत्तरत्र वक्ष्यते। एवम् अनुसन्धाय कर्म कुरु। अकर्मणि अननुष्ठाने न योत्स्यामि इति यत् त्वया अभिहितं न तत्र ते सङ्गः अस्तु। उक्तेन प्रकारेण युद्धादि कर्माणि एव सङ्गः अस्तु इत्यर्थः[१२५]।

'न हि कश्चिच्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणः।।'३.५।

अद्वैतभाष्ये न हि यस्मात्क्षणमपि कालं जातु कदाचित्कश्चित्तिष्ठत्यकर्मकृत्सन्। कस्मात् कार्यते हि यस्मादवकाश एव कर्म सर्व प्राणि प्रकृतिजैः प्रकृतितोजातैः सत्वरजस्तमोभिर्गुणैः। अज्ञ इति वाक्यशेषो यतो वक्ष्यति गुणैर्या न विचाल्यते। सांख्यानां पृथक्करणादज्ञानामेव हि कर्मयोगो न ज्ञानिनाम्। ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात्कर्मयोगो नोपपद्यते[१२६]। न तु कर्माणि सर्वात्मना त्यक्तुं शक्यानीत्याह नहीति। कार्यते ह्यवश इत्यत्रावशो विष्णुवशः अः इति ब्रह्मेत्यादि श्रुतेः[१२७]। रामानुजमते न हि अस्मिन् लोके वर्तमानः पुरुषः कदाचित् अपि कर्म अकुर्वाणः तिष्ठति। न कश्चित्करोति इति व्यवसितः अपि सर्वः पुरुषः प्रकृतिसमुद्भवैः सत्वरजस्तमोभिः प्राक्तनकर्मानुगुणां प्रवृद्धैः गुणैः स्वोचितं कर्म प्रति अवशः कार्यते प्रवर्त्यते। अत उक्तलक्षणेन कर्मयोगेन प्राचीनं पापसञ्चयं नाशयित्वा गुणांश्च सत्वादीन् वशे कृत्वा निर्मलान्तकरणेन सम्पाद्यो ज्ञानयोगः[१२८]।

'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।'३.८।

अद्वैतभाष्ये नियतं नित्यं शास्त्रोपदिष्टं यो यस्मिन्कर्मण्यधिकृतः फलाय चाश्रुतं तन्नियतं कर्म तत्कुरु त्वं हे अर्जुन। यतः कर्म ज्यायोऽधिकतरं फलतो हि

यस्मादकर्मणोऽकरणादनारंभात्। कथं शरीरयात्रा शरीर स्थितिरपि च ते तव न प्रसिध्येत्प्रसिद्धिं न गच्छेदकर्मणोऽकरणात्। अतो दृष्टः कर्माकर्मणोर्विशेषो लोके[१२९]। अस्य श्लोकस्य मध्वभाष्ये अतो नियतं वर्णाश्रमोचितं कर्म कुरु इति च।

रामानुजमतानुसारेण नियतं व्याप्तं प्रकृतिसंसृष्टेन हि व्याप्तं कर्म, प्रकृति संसृष्टत्वम् अनादिवासनया। नियतत्वेन सशुकत्वात् असम्भावितप्रमादत्वाच्च कर्मणः कर्म एव कुरु, अकर्मणः ज्ञाननिष्ठाया अपि कर्म एव ज्यायः। इति प्रक्रमात् अकर्मशब्देन ज्ञाननिष्ठा। ज्ञाननिष्ठाधिकारिणः अपि अनम्भस्तपूर्वतया हि अनियतत्वेन दुःशकत्वात् सप्रमादत्वाच्च ज्ञाननिष्ठायाः कर्मनिष्ठा एव ज्यायसी। कर्मणि क्रियमाणे च आत्मयाथात्म्यज्ञानेन आत्मनः अकर्तृत्वानुसन्धानम् अनन्तरमेव वक्ष्यते अत आत्मज्ञानस्य अपि कर्मयोगान्तर्गतत्वात् स एव ज्यायान्। कर्मणो ज्ञाननिष्ठाया ज्यायस्त्ववचनं ज्ञाननिष्ठायाम् अधिकारे सति एव उपपद्यते। यदि सर्वं कर्म परित्यज्य केवलं ज्ञाननिष्ठायाम् अधिकरोषि तर्हि अकर्मणः ते ज्ञाननिष्ठस्य ज्ञाननिष्ठोपकारिणी सेत्स्यति। यावत् साधनसमाप्ति शरीरधारणं च अवश्यं कार्यं, न्यायार्जितधनेन महायज्ञादिकं कृत्वा तच्छिष्टाशनेन एव शरीरधारणं कार्यम्। अतो ज्ञाननिष्ठस्य अपि कर्म अकुर्वतो देहयात्रा न सेत्स्यति। यतो ज्ञाननिष्ठस्य अपि ध्रियमाणशरीरस्य यावत्साधनसमाप्ति महयज्ञादि नित्यनैमित्तिकं कर्म अवश्यं कार्यम्। यतश्च कर्मयोगोऽपि आत्मनः अकर्तृत्वभावनया आत्मयाथात्म्यानुसन्धानम् अन्तर्भूतम्, यतश्च प्रकृतिसंसृष्टस्य कर्मयोगः सुशकः अप्रमादश्च, अतो ज्ञाननिष्ठायोग्यस्य अपि ज्ञानयोगात् कर्मयोगो ज्यायान्। तस्मात् त्वं कर्मयोगम् एव कुरु इत्यभिप्रायः[१३०]।

‘यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।

तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।।’३.९।

अद्वैतभाष्ये यज्ञार्थादिति। यज्ञो वै विष्णुः (तैत्तिरीय संहिता- १.७.४) इति श्रुतेर्यज्ञ ईश्वरस्तदर्थं यत्क्रियते तद्यज्ञार्थं कर्म, तस्मात्कर्मणोऽन्यत्रान्येन कर्मणा लोकोऽयमधिकृतः

कर्मकृत्कर्मबंन्धनः लोको न तु यज्ञार्थात्। अतस्तदर्थं यज्ञार्थं कर्म कौन्तेय मुक्तसंङ्गः कर्मफलसंगवर्जितः सन्समाचर निवर्तय[१३१]।

मध्वभाष्यानुसारेण कर्मणा बध्यते जन्तु इति कर्म बन्धकं स्मृतमित्यत आह – यज्ञार्थादिति। कर्म बन्धनं यस्य लोकस्य स कर्मबन्धनः। यज्ञो विष्णुः। यज्ञार्थं सङ्गरहितं कर्म न बन्धकमित्यर्थः। मुक्तसङ्ग इति विशेषणात्। कामान् यः कामयते इति श्रुतेश्च। अनिष्टमिष्टम् इति वक्ष्यमाणत्वाच्च। एतान्यपि तु इति च। तस्मान्नेष्टियाजुका स्यात् इति च। विशेषवचनत्वे समेऽपि विशेषणं परिशिष्यते[१३२]।

रामानुजपक्षे यज्ञादि शास्त्रीयकर्मशेषभूताद् द्रव्यार्जनादेः आत्मीयप्रयोजनशेषभूते कर्मणि क्रियमाणे अयं लोकः कर्मबन्धनो भवति। अतः त्वं यज्ञाद्यर्थं द्रव्यार्जनादिकं कर्म समाचर। यत्र आत्मप्रयोजनसाधनतया यः सङ्गः तस्मात् सङ्गात् मुक्तः सन् समाचर। एवं मुक्तसङ्गेन यज्ञाद्यर्थतया कर्मणि क्रियमाणे यज्ञादिभिः कर्मभिः आराधितः परमपुरुषः अस्य अनादि कालप्रवृत्तकर्मवासनां समुच्छिद्य अव्याकुलात्मावलोकनं ददाति[१३३]।

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्यम्।।"४.१३।

अद्वैतभाष्ये सत्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजः प्रभृतीनि कर्माणि। तम उपसर्जनरजः प्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि। रज उपसर्जन तमः प्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशश्चातुर्वर्ण्यं मया सुष्टमित्यर्थः। यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्तारमपि सन्तं मां परमार्थतो विद्यकर्तारम्[१३४]।

मध्वमते अहमेव हि कर्तेत्याह। चातुर्वण्यमिति। चतुर्वर्णसमुदायः। सात्विको हि ब्राह्मणः। सात्विकराजः क्षत्रियः। राजसतामसो वैश्यः। तामसः शूद्रः इति गुणविभागः। कर्मविभागस्तु शमो दमः इत्यादिना वक्ष्यते। क्रियाया वैलक्षण्यात् कर्ताऽप्यकर्ता। तथा हि

श्रुतिः - विश्वकर्ता विमनाः इत्यादि। तनुर्विद्या क्रियाऽऽकृतिः इत्यादि च। साधितं चैतत् पुरस्तात्[१३५]।

रामानुजमते चातुर्वर्ण्यप्रमुखं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत् सत्वादि गुणविभागेन तदनुगुणशमादिकर्मविभागेन च प्रविभक्तम्। सृष्टिग्रहणं प्रदर्शनार्थम्, मया एव रक्ष्यते मया एव च उपसंह्रियते। तस्य विचित्रसृष्ट्यादेः कर्तारमपि अकर्तारं मां विद्धि[१३६]।

"कर्मणो ह्यपि बोधव्यं बोधव्यं च विकर्मणः।

अकर्मणश्च बोधव्यं गहना कर्मणो गतिः।।"४.१७।

अद्वैतभाष्ये कर्मणः शास्त्रविहितस्य हि यस्मादप्यस्ति बोद्धव्यं, बोधव्यं चास्त्येव विकर्मणः पिरतिषिद्धस्य, तथाऽकर्मणश्च तूष्णीभावस्य बोधव्यमस्तीति त्रिष्वप्यध्याहारः कर्तव्यः। यस्माद्हना विषमा दुर्ज्ञेया कर्मणा इत्युपलक्षणार्थे कर्मादीनां कर्माकर्मविकर्मणां गतिर्याथात्म्यं तत्वमित्यर्थः। न केवलं तज्ज्ञात्वा मोक्ष्यसे, ज्ञात्वैवेत्याशयवानाह कर्मण इति[१३७]।

द्वैतभाष्ये-

"अज्ञात्वा भगवान् कस्य कर्माकर्मविकर्मकम्।

दर्शनं याति हि मुने कुतो मुक्तिश्च तद् विना"।।

अकर्म कर्मकरणम्। कर्माकर्मान्यद् विकर्म। निषिद्धम्। बन्धकत्वात्। ततो विविच्य कर्मादि बोद्धव्यमित्यादि। न च शापादिना। कवयोऽप्यत्र मोहिताः। अशक्यं चैतज्ज्ञातुमित्याह[१३८]।

रामानुजभाष्ये यस्मात् मोक्षसाधनभूते कर्मणः स्वरूपे बोधव्यमस्ति। विकर्मणि च नित्यनैमित्तिककाम्यकर्मरुपेण तत्साधनद्रव्यार्जनाद्याकारेण च विविधताम् आपन्नं कर्म विकर्म। अकर्मणि ज्ञाने च बोधव्यमस्ति। गहना दुर्विज्ञाना मुमुक्षोः कर्मणो विकर्मणि च बोधव्यम्।

नित्यनैमित्तिककाम्यद्रव्यार्जनादौ कर्मणि फलभेदकृतं वैविध्यं परित्यज्य मोक्षैकफलतया एकशास्त्रार्थानुसन्धानम् तदेतद् उक्तम् इति न इह प्रपञ्च्यत[139]।

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।।"५.१०।

अद्वैतभाष्ये ब्रह्मणीश्वर आधाय निक्षिप्य तदर्थं करोमीति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेऽपि फले संगं त्यक्त्वा करोति यः सर्वकर्माणि लिप्यते न स पापेन न संबध्यते पद्मपत्रमिवांभसोदकेन। केवलं सत्वशुद्धिमात्रफलमेव तस्य कर्मणः स्यात्[140]।

द्वैतभाष्ये सन्यासयोगयुक्त एव च कर्मणा न लिप्यत इत्याह ब्रह्मणीति। साधननियमोपचारत्वनिवृत्त्यर्थं पुनः पुनः फलकथनम्। तात्पर्ये च तत्पूजात्मकानि तत्कृतानि मम शुभार्थमिति ब्रहमण्याधानम्। स्वातन्त्र्याभावापेक्षयैव जीवस्याकर्तृत्वम्[141]।

रामानुजमते यथा ब्रह्मशब्देन प्रकृतिः इह उच्यते। इन्द्रियाणां प्रकृतिपरिणामविशेषरुपत्वेन इन्द्रियाकारेण अवस्थितायां प्रकृतौ पश्यन् श्रृण्वन् इत्यादिना उक्तप्रकारेण कर्मणि आधाय फलसंङ्गं त्यक्त्वा नैव किञ्चित् करोमि इति यः कर्माणि करोति स प्रकृतिसंसृष्टतया वर्तमानः अपि प्रकृत्यात्माभिमानरुपेण सम्बन्धहेतुना पापेन न लिप्यते पद्मपत्रमिवाम्भसा[142]।

"कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।

योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये।।"५.११।

अद्वैतभाष्ये कायेन देहेन मनसा बुद्ध्या च केवलैर्ममत्ववर्जितैः ईश्वरायैव कर्म करोमि न मम फलाय इति ममत्वबुद्धिशून्यैरिंन्द्रियैरपि केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते, सर्वव्यापारेषु ममतावर्जनाय। योगिनः कर्मिणः कर्म कुर्वन्ति संगं त्यक्त्वा

फलविषयमात्मशुद्धये सत्वशुद्ध्य। तस्मात्तत्रैव तवाधिकार इति कुरु कर्मैव[१४३]। मध्वभाष्ये यथा- एवञ्चाऽचार इत्याह –कायेनेति।

विशिष्टाद्वैतभाष्ये कायमनोबुद्धीन्द्रियसाध्यं कर्म स्वर्गादि फलसंङ्गं त्यक्त्वा योगिनः आत्मविशुद्धये कुर्वन्ति। आत्मगतप्राचीनकर्मबन्धनविनाशाय कुर्वन्ति[१४४]।

"कर्मणः सुकृतस्याहुः सात्विकं निरिमलं फलम्।

रजसस्तु फलं दुखमज्ञानं तमसः फलम्।।"१४.१६।

अद्वैतभाष्ये कर्मणः सुकृतस्य सात्विकस्येत्यर्थः, आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति। रजसस्तु फलं दुखं राजसस्य कर्मणः। कर्माधिकारात्फलमपि दुखमेव कारणानुरुयाद्राजसमेव। तथा अज्ञानं तमस्तामसस्य कर्मणो अधर्मस्य पूर्ववत[१४५]। मध्वमते यथा रजसस्तु फलं दुखमित्यल्पसुखं दुखम्। तथाहि शार्कराक्ष्यशाखायाम् रजसो ह्येव जायते मात्रया सुखं दुखं तस्मात् तान् सुखिनो दुखिन इत्याचक्षते। अन्यथा दुखस्यातिकष्टत्वात् तमोऽधिकत्वं रजसो न स्यात्[१४६]।

रामानुजमतानुसारेण एवं सत्ववृद्धौ मरणम् उपगम्य आत्मविदां कुले जातेन अनुषठितस्य सुकृतस्य फलाभिसन्धिरहितस्य मदाराधनरूपस्य कर्मणः फलं पुनः अपि ततः अधिकसत्वजनितं निर्मलं दुखगन्धरहितं भवति इति आहुः सत्वगुणपरिणामविदः। अन्त्यकालप्रवृद्धस्य रजसः तु फलं फलसाधनकर्मसङ्गिकुले जन्म फलाभिसन्धिपूर्वककर्मारम्भतत्फालानुभव पुनर्जन्मरजोवृद्धिफलाभिसन्धिपूर्वकं कर्मारम्भपरम्परारूपं सांसारिकं दुखप्रायम् एव इति आहुः तद्गुणयाथात्म्यविदः। अज्ञानं तमसः फलम् एवमनन्तकालप्रवृद्धस्य तमसः फलमज्ञानपरम्परारूपम्[१४७]।

"शरीरवाङ्मनोभिर्यत्कर्म प्रारभ्यते नरः।

न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः।।"१८.१५।

अद्वैतभाष्ये शरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निवर्तयति नरो न्याय्यं वा धर्म्यं शास्त्रीयं विपरीतं वा अशास्त्रीमधर्म्यम्। यच्चापि निमिषितत्वेष्टितादि जीवनहेतुः तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतम्। पंचैते यथोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि। ननु एतानि अधिष्ठानादीनि सर्वकर्मणां निवर्तकानि, कथमुच्यते शरीरवाङ्मनोभिः कर्म प्रारभ्यते। नैष दोष विधिप्रतिषेधलक्षणं सर्व कर्म शरीरादित्रयप्रधानं तदंगतया दर्शनश्रवणादि च जीवनलक्षणं त्रिधैव राशीकृतमुच्यते शरीरादिभिरारभ्यते। फलकालेऽपि तत्प्रधानैः साधनैः भुज्यते इति पंचानामेव हेतुत्वं न विरुध्यते[१४८]।

मध्वमतानुसारेण अधिष्ठानं देहादिः। कर्ता विष्णुः। स हि कर्तेत्युक्तम्। जीवस्य चाकर्तृत्वे प्रमाणमुक्तम्। करणमिन्द्रियादि। चेष्टाः क्रियाः। हस्तादिक्रियाभिर्हि होमादि कर्माणि जायन्ते। ध्यानादेरपि मानसी चेष्टा कारणम्। पूर्वतनचेष्टाऽपि संस्कारकारणत्वेन भवति दैवमदृष्टम्। तथाचायास्य श्रुतिः -देहो ब्राह्मार्थेन्द्रियाद्याः क्रियाश्च तथाऽदृष्टं पञ्चमं कर्महेतु इति[१४९]।

विशिष्टाद्वैतमतानुसारेण परमात्मना दत्तैः तदाधारैः च करणकलेवरादिभिः तदाहितशक्तिभिः स्वयं च जीवात्मा तदाधारः तदाहितशक्तिभिः स्वयं च जीवात्मा तदाधारः तदाहितशक्तिः सन् कर्मनिष्पत्तये स्वेच्छया करणाद्यधिष्ठानाकारं प्रयत्नं च आरभते तदन्तः अवस्थितः परमात्मा स्वानुमतिदानेन तं प्रवर्तयति इति जीवस्य अपि स्वबुद्ध्या एव प्रवृत्तिहेतुत्वम् अस्ति। यथा गुरुतरशिलामहीरुहादि चलनादि फलप्रवृत्तिषु बहुपुरुषसाध्यासु बहूनां हेतुत्वं विधिनिषेधभाक्तं च इति[१५०]।

"शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।१८.४२।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।

दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम्।।१८.४३।

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।।"१८.४४।

४२-४४ अद्वैतभाष्ये शमो दमश्च यथाव्याख्यातार्थो, तपो यथोक्तं शरीरादि शौचं व्याख्यातं, क्षान्ति, क्षमा, आर्जवमृतजुतैव च ज्ञानं विज्ञानम् आस्तिक्यम् आस्तिकभावः श्रद्धानता आगमेषु ब्रह्मकर्म ब्राह्मणजातेः कर्म स्वभावजम्। यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानि तदेवोक्तं स्वभावजमिति। शौर्य, तेजः, प्रागल्भ्यं, धृतिर्धारणं, सर्वावस्थास्वनवसादो भवति यया धृत्योत्तंभितस्य, दाक्ष्यं, सहसाप्रत्युत्पन्नेषु कार्येष्वव्यामोहेन प्रवृत्तिः, युद्धे चाप्यपलायनम् अपराङ्मुखीभावः शत्रुभ्यः दानं देयेषु मुक्तहस्तता, ईश्वरभावश्चेश्वरस्य भावः प्रभुशक्ति प्रकटीकरणमीशितव्यान्प्रति। क्षात्रं कर्म क्षत्रियजातेर्विहितं कर्म क्षात्रं कर्म स्वभावजम्। कृषिगौरक्ष्यवाणिज्यं कृषीश्च गौरक्ष्यं गा रक्षतीति गोरक्ष्स्तद्भावो गौरक्ष्यं पाशुपाल्यम् इत्यर्थः वाणिज्यं वणिक्कर्म क्रयविक्रयादिलक्षणम्। वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजम्। परिचर्यात्मकं शुश्रूषास्वभावं कर्म शूद्रस्यापि स्वभावजम्[१५१]।

४२-४४मध्वभाष्ये यथार्थत्वनियमाभावो राजस्याः। अन्यथा तामस्या भेदाभावात्। अस्य तात्पर्ये यथा- क्षत्रियोनब्रह्मगुणो वैश्यः कृष्यादिजीवनः। तत ऊन शमाद्यैर्यः शुश्रूषः शूद्र उच्यते। अधिकाश्चेत् गुणाः शूद्रे ब्राह्मणादिः स उच्यते। ब्राह्मणोऽप्यल्पगुणकः शूद्र एवेति कीर्तितः। नरोऽपि यो देवगुणो ज्ञेयो देवो नृतां गतः। स्वकर्मणा तमभ्यर्च्य इति वचनाच्च क्षत्रियादिष्वपि शमाद्यनुवृत्तिर्ज्ञायते। न हि शमादिकं विना तस्याभिमतोऽर्चनं भवति। न च शमादीन् विना सिद्धिं विन्दति। यज्ञदानतपः कर्म न त्याज्यम्। शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रहः इति भागवते। न च क्षत्रियादिभिरपि शौचतपः क्षमादिभिहीनैर्भाव्यमिति तत्तद्धर्मेषुच्यते। युक्ता ह्येतैः सर्वगुणैर्जनक तुलाधरादयः। अतो युद्धेऽपलायनमैश्वर्यं च

क्षत्रियस्य विशेषगुणौ। तौ कृष्यादयः, जीवनानार्थं शुश्रूषा याजनं जीवनर्थं प्रतिग्रहश्चेत्येत एवान्येषां परधर्माः[१५२]।

४२-४४ भगवान् पुरुषोत्तमो वासुदेवः परब्रह्मशब्दाभिधेयो निरस्तनिखिलदोषगन्धः स्वाभाविकानवधिकातिशयज्ञानशक्त्याद्यसङ्ख्येयकल्याणगुणगणो निखिलजगदेककारणं निखिलजगदाधारभूतो निखिलस्य स एव प्रवर्तयिता तदाराधनभूतं च एव प्रवर्तयिता तदाराधनभूतं च कृत्स्नं वैदिकं कर्म तैः तैः आराधितो धर्मार्थकाममोक्षाख्यं फलं प्रयच्छति इति अस्य अर्थस्यसत्यतानिश्चयः आस्तिक्यम्। शौर्यं युद्धे निर्भयप्रवेशसामर्थ्यम्। तेजः परैः अनभिभवनीयता। धृतिः आरब्धे कर्मणि विघ्नोपनिपाते अपि तत्समापनसामर्थ्यम्। दाक्ष्यं सर्वक्रियानिवृत्तिसामर्थ्यम्। युद्धे च आत्ममरणनिश्चये अपि अनिवर्तनम् दानम् आत्मीयस्य द्रव्यस्य परस्वत्वापादानपर्यन्तः त्यागः ईश्वरभावः स्वव्यतिरिक्तसकलजननियमनसामर्थ्यम् एतत् क्षत्रियस्य कर्म। कृषिः सस्योत्पादनकर्षणम्, गोरक्ष्यं पशुपालनम्, वाणिज्यं धनसञ्जयहेतुभूतं क्रयविक्रयात्मकं कर्म एतत् वैश्यस्य स्वभावकर्म। पूर्ववर्णत्रयपरिचर्यारूपं शूद्रस्य स्वभावजकर्म। तद् एतत् चतुर्णां वर्णानां वृत्तिभिः सह कर्तव्यानां शास्त्रविहितानां यज्ञादि कर्मणां प्रदर्शनार्थम उक्तम्। यज्ञादयो हि त्रयाणां वर्णानां मुमुक्षूणां साधारणाः। ब्राह्मणस्य तु सत्वोद्रेकस्य स्वाभाविकत्वेन शमादयः सुखोपादानाः इति कृत्वा तस्य शमादमादयः स्वभावजं कर्म इति उक्तम्। क्षत्रियवैश्ययोः तु स्वतो रजस्तमः प्रधानत्वेन शमदमादयो दुखोपादानाः इति कृत्वा न तत्कर्म इति उक्तम्। ब्राह्मणस्य तु वृत्तिः याजनाध्यापनप्रतिग्रहाः। क्षत्रियस्य जनपदपरिपालनम्, वैश्यस्य कृष्यादयो यथोक्ताः। शूद्रस्य तु कर्तव्यं वृत्तिः च पूर्ववर्णत्रयपरिचर्या एव[१५३]।

### ३.४.१ शंङ्करमते कर्मसङ्कल्पः

अद्वैत वेदान्तदर्शने कर्मस्य प्राधान्यं प्रायेण अल्पमेव। अतः " ज्ञानादेव तु कैवल्यम् " इति गीताशास्त्रेऽपि उक्तम्। जीवब्रह्मैक्यं शुद्धचैतन्यम् इत्यस्य विषयस्य कृते कः अधिकारि

इत्यस्य प्रश्नस्य उत्तरं यथा—नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिषट्कसम्पत्तिः, मुमुक्षुत्वम् इत्यादीनि साधनचतुष्टयसम्पन्नः एव वेदान्तविषयस्याधिकारि[१५४]। अत्र कदापि कुत्रापि कर्माचरणीयस्यावश्यकता, कर्मस्य महत्वम् इत्यादीनधिकृत्य किमपि न प्रतिपादयति। अन्यत्र वदति वेदान्तपठनार्थं श्रवणं, मननं, निदिध्यासनम् इत्यादिकं प्रतिदिनं सर्वथा करणीयम्[१५५]। एषु मार्गद्वयेष्वपि ज्ञानेनैव परमपदप्राप्तिः भविष्यति। मोक्षविषये कर्मसम्बन्धः परोक्षः एव अद्वैते। एवं चेद् द्वैत-विशिष्टाद्वैतेषु कर्मणा ईश्वरप्रसादेन मोक्षप्राप्तिः।

अद्वैते कर्माणि फलापेक्षारहितेन करोति चेत् चित्तशुद्धिरेव प्रयोजनम्। लौकिकगृहस्थानां कृते कर्माणि अभ्युदयः एवं निश्रेयसः एवं देवादिस्थानानि च अनेन प्राप्यते[१५६]। कर्माणि फलाभिसन्धिरहितो भूत्वा ईश्वरार्पणबुद्ध्या च क्रियते चेत् चित्तशुद्धिरेव प्रयोजनम्[१५७]। तत् प्राप्तानां ज्ञानप्राप्तिना च कर्माणि मोक्षकारणो भविष्यति। मोक्षकार्ये कर्माणि प्रत्यक्षहेतुत्वो न भविष्यति। एवमेव कर्मस्तु कदापि ज्ञानेन मिलित्वा तादृशं न भविष्यति। श्रीशङ्करस्य गीताभाष्यस्तु ज्ञानकर्मसमुच्चयवादस्य खण्डनार्थमेव च भवति। सर्वकर्मणां मूलकारणस्तु अविद्याकार्य आग्रहाण्येव। यथा धूमेन आव्रियते अग्निः इव। एवमेव सर्वाणि अपि कर्माणि दोषदूषितश्च। कर्मणः दोषस्तु अहं ममाभिमानः चिन्ता इत्येव। कर्तृत्व भोक्तृत्वादिना जात अभिमानं च त्यक्त्वा कर्मफलं च त्यक्त्वा निष्कामो च भूत्वा कर्मानुष्ठानं करणीयमिति गीतातात्पर्यम्। शङ्करतात्पर्यं एवं चेदपि कर्म भक्तिः च ज्ञानोदयार्थं मनसिं क्रमेण भविष्यति। अन्यथा वदति चेत् सम्यग् ज्ञानाय कर्म, भक्तिः च अवश्यमेव। अन्यरीत्या कर्म, भक्तिः च द्वयानां सफलीकरणाय ज्ञानं निश्चयमेवाश्यम्।

### ३.४.२ मध्वमते कर्मसङ्कल्पः

द्वैतवेदान्तमते जगतश्च सत्यत्वमङ्गीकरोति[१५८]। अस्य दर्शनस्याचार्यः श्रीमध्वाचार्यः प्रस्थानत्रयस्योपरि व्याख्यानमकरोत्। गीतोपदेशस्य मुख्यहेतु कर्मयोगमेव[१५९]। दशपदार्थेष्वेकं

भवति कर्म[१६०]। अत्र स्वीयदर्शने कर्मणाम् एवम् अन्यपदार्थानां चास्तित्वम् ईश्वराश्रया इति सिद्धान्तयति[१६१]। एवं चेदपि अत्र कृतानां कर्मणाम् आश्रयिणादेव मरणानन्तरं जीवितं कथं भवेत् इत्यपि निश्चीयते[१६२]। एवं चेदपि माध्वाः ज्ञानकर्म समुच्चयवादनिराकरणं च अकरोत्[१६३]। अत्रापि निष्कामकर्म करणीयमिति च अत्र विशदयति। एवमेव कर्मानुष्ठानविषये वरिष्ठाः सनकादयः एवमेव राजर्षयः जनकादयः साधारणी जनाः इति भेदत्वं विशदयति[१६४]। श्रीमाधवाचार्यकृत सर्वदर्शनसंग्रहे –

""""यस्य प्रासादात्परमार्त्तिरूपादस्मात्संसारान्मुच्यते नापरेण

नारायणोऽसौ परमो विचिन्त्यौ मुमुक्षुभिः कर्मपाशादमुष्मात्""[१६५]।

कर्मविषये द्वैत दर्शनानुसारेण चतुरङ्गाः सन्तिः (१)विहितकर्मानुष्ठानम्, (२) श्रवणादिद्वारा परमात्मज्ञानम्, (३)सन्यासः, (४)त्यागः च इति[१६६]। माध्वमतानुसारेण ईश्वरभक्त्या एव परमानन्द प्राप्तेः मार्ग[१६७]। एवमेव जगत् ईश्वरशरीरो नास्ति जीवात्मानां विषये ते भिन्नाः इति सिद्धान्तयति। अन्यत्र आत्मनः स्वीय प्रारब्धकर्माणि यावत्पर्यन्तं वर्तते तद्वत् एव शरीरयुक्तो भूत्वा वर्तितुं शक्यते[१६८]। एवं चेदपि यदा आत्मा शरीरात् बहिरागच्छति तदा पूर्णरीत्या मुक्तो भवति। अद्वैतीनां मतानुसारेण ज्ञानिनां कर्मापि अनुष्ठेयं न हि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति। अतः द्वावपि परस्पराश्रयसम्बन्धा एव। कर्मयोगस्तु फलकामनात्यागेन ईश्वरार्पणबुध्या वर्णाश्रमविहितानुष्ठानमेव। पूर्व प्रतिपादित उदाहरणात् अन्यत् एव अत्र प्रतिपादयति गृहस्थादि कर्मत्यागेन ज्ञाननिष्ठाः सनकादयः। गृहस्थादि कर्मणासाकं ज्ञाननिष्ठौ जनकादयः च[१६९]। ज्ञाननिष्ठाः चेदपि ईश्वरेच्छया लोकसंग्रहार्थम् एव कर्मयोगः अनुष्ठितः। ईश्वरेच्छया एव कर्मकृतः प्रियव्रतादयो ज्ञानिनः च। माध्वभाष्ये दर्शने च भागवतस्य एवं भक्त्याः च आधिक्यं वर्तते। गीतायम् प्रतिपादित विषयेषु *भागवतपुराणस्य* स्वाधीनम् अधिकं द्रष्टुं शक्यते। अतः गीतायाः नाम *हरिगीता* इत्यपि आहूयते[१७०]। भागवतादिषु ग्रन्थेषु ज्ञानापेक्षया भक्तिः एव परमप्राधान्यम्। अतः एव मध्वाचार्यः

ईश्वरभक्तिरेव परमानन्दप्राप्तेः एको मार्गमिति स्थाप्यते। स्वीयमतानुसारेण मोक्षप्राप्तिः नाम तद् सेवादि कर्मणा, भक्तिः इत्यादिकं नास्ति तत् मनसि आगतं /जायमानम् अनुभवमेव, एवमेव अन्तर्दर्शनञ्च तदर्थम् अनेकानि मार्गाणि च सन्ति[१७१]।

"आकाशात् पतितं तोयं यथा गच्छति सागरं।

सर्वदेवनमस्कारं केशवं प्रति गच्छति"।।

अत्र अस्य विषये गीताशास्त्रे विरुद्धप्रकाराः अथवा विविधरीत्या मोक्षप्राप्तिः भवितुं शक्यते इति विशदीकरोति। यथा जनकादीनां स्मरणा तत्र उदाहरण रूपेण वर्तते। अन्यत् ज्ञानप्राप्तिना परमपदप्राप्तिः भविष्यति-

" श्रियो ज्ञानमभ्यासात् ज्ञानात्ध्यानं विशिष्यते,

कर्मफलत्याग्च्छान्तिरनन्तरम् " अन्यथा (१८/५६)

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः

मत्प्रसादादेवाप्नोति शाश्वतं पदमव्ययम्।"[१७२]

एषु मार्गेषु मध्वाचार्येण भावतादिषु पुराणेषु प्रतिपादित भक्ति प्रधान मार्गेण परमपदप्राप्तिः प्राप्तुं प्रयत्नः करोति। एते न कर्मप्राधान्यं मार्गम् एवमेव शङ्करादीनां ज्ञानमार्ग च न अङ्गीकरोति।

"अन्तवन्तु फलं तेषां तद् भवत्यल्पमेधसाम्।

देवान् देवयजो यान्ति मद्भक्त्या यान्ति मामपि।।७.२३।

यान्ति देवव्रता देवान् पितृन्यान्ति पितृव्रताः।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्।।"९.२५।

" न च ज्ञानं विना कर्म पुरुषार्थ करं भवेत् "[१७३]मनुष्याणां जन्मान्तरं कथं भवेत् इति तत्रापि कर्मसम्बन्धः भवति। प्रति जन्म कृतानाम् अनन्तकर्मणां भावात् एव[१७४]। कर्माणि नचाकरणे इति चेत् मुक्तिः भवति। एवमेव एकस्मिन् शरीरे बहूनि हि कर्माणि करोति। मोक्षं कथं भवेत् इत्यत्र भाष्ये अकाम कर्मणामन्तकरण शुद्ध्या ज्ञानान्मोक्षो भवति। अन्यत्र कर्मणां कर्तृत्व विषये मध्वाचार्यः पैङ्गिश्रुत्यात् एवमाह –

"कर्मृत्वं द्विविधं प्रोक्तं विकारश्च स्वतन्त्रता।
विकारः प्रकृतेरेव विष्णोरेव स्वतन्त्रता।।"[१७५]

तृतीयाध्यायस्य ६, ७ श्लोकानां तात्पर्यानुसारेण कर्मयोगं स्ववर्णाश्रमोचितं, न तु गृहस्थकर्मैवेति नियमः। अर्थात् वर्णाश्रमोचितं कर्म करणीयमित्येव। ३/९ तम श्लोकोक्तस्य भाष्ये (यज्ञार्थात् .....समाचरः) अत्र भाष्ये यज्ञशब्दस्य विष्णुरित्यर्थः यथा बर्कश्रुतिः -

"ज्ञो नाम भगवान्विष्णुस्तं यास्तुद्देश एष यः।
स यज्ञ इति सम्प्रोक्तो विहिते कर्मणि स्थिता।।"[१७६]

२० तम श्लोकेन ( कर्मणैव हि संसिद्धि .........संपश्यन्कर्तुमर्हसि ) एवं व्याख्यायते " ब्रह्मज्ञानसाधनत्वमेवोच्यते [१७७], अन्यथा मुक्ति निषिद्ध्यत अनन्तरभागे नारदीये –यानि तीर्थादि वाक्यानि कर्मादि विषयाणि च –

"स्तावकान्यैव तानि स्युरज्ञानां मोहकादि वा।
भवेन्मोक्षस्तु मद् दृष्टर्नान्यतस्तु कथञ्चन।।"

अनन्तरम् एवं विशदयति " अतो अपरोक्षज्ञानादेव मोक्षः कर्म तु तत्साधनमेव "[१७८] अग्रिम श्लोके (२७)(प्रकृतेः क्रियमाणानि .........कर्ताहमिति मन्यते ) अस्य श्लोकस्य तात्पर्यस्तु –

"नाहं कर्ता हरिः कर्ता तत्पूजा कर्मचाखिलम्।
तथापि मत्कृता पूजा तत्प्रसादेन नान्यथा।।
कर्मन्यासो हरावेवं विष्णोस्तृप्तिकरः सदा।
यस्मात्स्वतन्त्र कर्तृत्वं विष्णोरेव न चान्यगम्।।"[१७९]

३/३० तम श्लोकेन (मयि सर्वाणि कर्माणि .......युध्यस्व विगतज्वरः ) एवं विचार्यते - सर्वाणि कर्माणि मय्येव संन्यस्य, भगवानेव सर्वाणि कर्माणि करोतीति[१८०]। तदनन्तरश्लोके ( ३/३६) बहवः कर्मकारणाः सन्ति, क्रोधादयः कामाश्च। अस्य तात्पर्यस्तु परमेश्वराद्देवेभ्यश्चार्वाक्तनप्रेरकं पृच्छति। एवं गीताशास्त्रस्य कर्मयोगे कर्मविषये च मध्वेन एवं विशदयित्वा कर्मयोगो नामाध्यायश्च उपसंहरति। अस्य दर्शनमधिकृत्य अन्यत् ग्रन्थे एवं विशदयति स्वविहितवृत्या भक्त्या भगवदाराधनमेव परमो धर्मः तद्विरुद्धः सर्वमपि अधर्मश्च। अत्र मूल्याधिष्ठित कर्माणि कर्मयोग इति नाम्ना आहूयते। यथा –

"निष्कामं ज्ञानपूर्वं तू निवृत्तिमिह चोच्यते।
निवृत्तं सेवमानस्तु ब्रह्माप्येति सनातनम्।।"

अत्र चतुष्पादाः (१) विहितकर्मानुष्ठानम्, (२) श्रवणादिद्वारापरमात्मज्ञानम्, (३) सन्यासम्, (४) त्यागश्च। विहितकर्मानुष्ठानं नाम वैय्यक्तिकजीवने एवं सामूहिक जीवने च क्रियमाणानि वर्णाश्रमकर्माणि एव। द्वितीयस्तु श्रवणादिना वैय्यक्तिकरीत्या वा सामूहिकरीत्या वा व्यक्तीनां कृते लभ्यमानं आध्यात्मिक औन्नत्यमेव अत्र उद्दिश्यते। अत एव अत्र श्रवणादि द्वारा परमात्मज्ञानम् इत्यस्याशयम्। तृतीय कर्मयोगस्तु सन्यास एतत् तु कर्मणाम् अकारणत्वं

नास्ति इति। कर्मयोगस्य चतुर्थाश्यस्तु त्यागः एव। अनेन व्यक्तीनां कार्याणां गुणदाता ईश्वर एव इति[१८१]।

कर्मविषये द्वैतिनः " तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय " अनेन श्रुत्या आधारीकृत्य एवं विशदयति [१८२]। कर्मस्तु पर्याप्तमोक्षसाधनम् इति न चिन्तनीयम्। नित्यनैमित्तिकादीनां कर्माणाम् अनुष्ठानेन अमृतत्वप्राप्तिः इति चाङ्गीक्रियते। भारतीयदर्शनेषु यागादीनां कर्मणां वैशिष्ट्यव्याख्यानप्रयोगेण अधिकतया पूर्वमीमांसायां वर्तते। अतः मध्वाश्च कर्मकृत्वा मोक्षप्राप्तिः भवितुं शक्यते इति आह्वयति। एवं चेदपि गीताशास्त्रे एवम् उपनिषत्स्वपि कर्मणा मोक्षप्राप्तिः इति नाङ्गीक्रियते[१८३]। इतोऽपि अग्रे गत्वा ज्ञानकर्मसमुच्चयवादस्य इत्याह्वानमपि न अग्ङीकुर्वन्ति। कर्तृत्वाभिमानरहितो भूत्वा कर्म कृत्वा एवं ज्ञानमपि युक्तो भूत्वा तादृशं मार्गं मोक्षसाधनं भविष्यतीति आचार्यः विशदयति। अतः एवं ग्राहयितुं शक्यते यथा -फलादि विषयेषु निस्पृहो भूत्वा कर्मणा एवं ज्ञानेन च ईश्वराभिमुख्य भक्त्या च कैवल्यप्राप्तिं भवितुं शक्यते [१८४]। भगवद् भक्तिज्ञानपूर्वकं कर्म कर्तव्यम्। भक्त्या एवं ज्ञानेन च युक्तं कर्ममेव आवश्यकम् इति अत्र उद्देश्यः।

### ३.४.३ रामानुजमते कर्मसङ्कल्पः

वेदान्तदर्शनस्य भेदेष्वेकं भवति रामानुजस्य विशिष्टाद्वैतदर्शनम्। श्रीनारायणस्य सर्वोत्तमत्वम् इत्याधारीकृत्य दर्शनोऽयं पुरोगच्छति। दर्शनस्य अस्य विचारे कर्मसङ्कल्पः कथम् इति विचारयाम। तदधिकृत्य यतीन्द्रमतदीपिकायाम् एवं विशदयति " उपदेशात् जीवपरयाथात्म्यज्ञानवताशक्त्यनुसारेणफलसंङ्गरहितानिषिद्धकाम्यनित्यनैमित्तिकरुपपरिगृहीतकर्मविशेषः। स तु देवार्चनातस्तीर्थयात्रादानयज्ञादिभेदभिन्नः। अयं तु जीवगतकल्मषापनयनद्वारा ज्ञानयोगमुत्पाद्यतद्धारा साक्षाद्धाभक्त्युत्पादको भवति "[१८५]। अस्य मतानुसारेण लोकस्य कृते कारण त्रयं वर्तते। तत् –(१)पुरुषोत्तम, (२) चित्त्,(३) अचित्त् इति[१८६]।

यदम्बु वैष्णवः कायस्ततो विप्रवसुन्धरा। पद्माकरा समुद्भूता पर्वताब्ध्यादि संयुता।। जगत् कीदृशमित्यत्र यथा -अतः स्थूल सूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यकारणं चेति ब्रह्मैव उपादानं जगत्[१८७]। कर्मविषये विशिष्टाद्वैतिनः स्वीय श्रीभाष्ये "आवृत्तिरसकृदुपदेशात् " (४.१.१) अनेन सूत्र व्याख्यानावसरे कर्मविषये स्वीयवादानि विस्तरति[१८८]। श्रुत्यादीनां साहाय्येन विस्तरति—" विज्ञाय प्रज्ञां कुर्वीत अनुविद्ध विजानाति, ओमित्येवऽऽत्मा ध्यायथ निचाय्य तं मृत्युमुखात् प्रमुच्यते, आत्मानमेव लोकमुपासीत, आत्मा वा अरे दृष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः"[189]।

अद्वैते कर्म-मोक्षयोर्सहसम्बन्धं परोक्षं चेत् द्वैत-विशिष्टाद्वैतेषु कर्मणा,ईश्वरप्रसादेन च मोक्षसिद्धिः[१९०]। अद्वैते कर्म क्रियते इति कर्म व्यापारमात्रं,फलविषयेषु परिज्ञातं एकस्य परप्रेरणारहितस्य प्रवृत्तिः एव कर्म[१९१]। अद्वैतीनां कृते अत्र बाह्यफलापेक्षया नास्ति तस्य मनोवृत्यनुसारेण एव अहङ्कार एव सर्वस्य प्रवृत्तिबीजं दृष्टं लोके[१९२]। तत्र प्रेरणात्रयं क्रियाबुद्धिः, कारकबुद्धिः, फलबुद्धिः च। *भारतीयदर्शनसंग्रहम्* इति ग्रन्थे कर्मयोगस्य व्यक्तीनां हृदयशुद्धीकरणेन परमपदं प्राप्तुं भविष्यति। अनेन कर्म सर्वदा करणीयम् प्रथमपादात् द्वितीयपादौ कदा प्रापयति तस्मिन् समये च कर्मयोगं पूर्वं कथमकरोत् तद्वत् एव करणीयम[१९३]। अद्वैते अस्मिन् समये कर्मयोगस्य आवश्यकता नास्ति इति विस्तरति। मोक्षप्राप्त्यर्थं प्रत्यक्ष कारणं ज्ञानमेव। तदर्थं सहाय्य कारणमेव कर्म अतः सर्वदा कर्म करणीय इत्युद्देशः। एवमेव ज्ञानकर्मसमुच्चयवाद निराकरणे च अद्वैत-विशिष्टाद्वैतिनश्च समानवातः[१९४]।

रामानुजः स्वीय ब्रह्मसूत्रस्य भाष्ये (श्रीभाष्ये) एवं वर्ण्यते -शरीरधारणं करोति चेदपि ईश्वरः दुखं न अनुभोक्तव्यम्, अत्र दुखस्य कारणं किमिति विवृणोति कर्ममेव दुखस्य कारणमिति[१९५]। एवमेव ईश्वरः कर्मणः फलदाता, अस्य कारणस्तु कर्मणां फलानि दातुं कर्मसमर्थमेव[१९६]। अन्यत्र *भारतीयदर्शने* राधाकृष्ण महोदयेन एवं वर्ण्यते —कर्माणि आत्मना

सह सम्बन्धः च वर्तते। आत्मनां कृते कर्माणि कर्तुं शक्ति वर्तते। एवं चेदपि सर्वदा कर्माणि करोति इत्यर्थं नास्ति इति च प्रस्तूयते[१९७]। अन्यत्र श्रीभाष्ये कर्माणि कर्तुं जीवात्मनः प्रयत्नेनैव न शक्यते, तदर्थं परमात्मनोऽपि साहायम् आवश्यकं वर्तते। अन्यरीत्या विस्तरति कर्म आत्मनो दण्डरुपेण स्थीयते[१९८]। आस्तिकः इति कारणेन ज्ञानमार्गेण एवं, कर्ममार्गेण च मोक्षपदं प्राप्तुं न शक्यते, तदर्थं भक्त्या एवम् ईश्वरप्रसादेन च मोक्षपदं (परमपदं)प्राप्तुं शक्यते इति विवृणोति[१९९]। अस्याशयानि शङ्कराचार्यस्य सिद्धान्तविरुद्धमेव। एवमेव अद्वैतीनां जीवन्मुक्तिः इति मुक्ति द्वयेषु एकं वर्तते तत् नास्ति इति तस्याभिप्रायः। सर्वाणि अपि कर्माणि अवसानेन एवं भौतिकशरीरस्य नाशनस्यानन्तरमेव आत्मा ईश्वरेन सह लीयते[२००]।

पूर्वं प्रतिपादित विषयाणि गीतादर्शनस्यापि च विरुद्धरुपेण वर्तते। कर्माण्येव दुखमिति गीताशास्त्रं न अङ्गीकरोति[२०१] दुखत्रयम् एवं दुखस्य कारणादिकमपि गीतायां विवृणोति, कर्माणि कर्तुं परमात्मनः साहाय्यम् आवश्यकमिति वादं निरर्थकं कर्महेतवेषु[२०२]। अस्यकार्यं न प्रतिपादयति। गीताशास्त्रे –“ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् “ इति प्रतिपादनावसरे ईश्वरप्रसादं, परमात्मनः साहाय्यम् इत्यादिकं तत्र न गणनीयविषयम्। रामानुजेन - ईश्वरेव आदिकारणं तत्र गौणकारणरुपेण एव वर्तते[२०३]। जीवस्तु नित्याः, मुक्ताः, बद्धाः, इति त्रैविद्ध्यम् एषु नित्याः कर्मणा, प्रकृत्या च स्वतन्त्रोभूत्वा आनन्तानुभूतिं भूत्वा वैकुण्ठे वसति[२०४]। अन्यत्र मोक्षप्राप्त्यर्थं कर्मफलान् अनुभोक्तुम् आत्मानं पुनः पुनः जन्मानि स्वीकरणीयं भवेत्[२०५]। एतत् तु अद्वैतिनां वादात् समानरुपेण च वर्तते। अद्वैतिनां वादानुसारेण एवं गीताशास्त्रे च कर्मयोगविषये च विवृणोति, अत्र तु कर्मणां फलदाता च ईश्वरः एव ईश्वरः स्वीय शक्त्या एव कर्माध्यक्षः। ईश्वरः एव पुण्यपुरुषाणां कृते पुरस्कारः दुष्चिन्तकानां दण्डादयश्च ददाति[२०६]।

## ३.५ कर्मयोगः ज्ञानयोगश्च

मानवानाम् आत्यन्तिकलक्ष्यस्तु मोक्षप्राप्तिरेव तदर्थं बहवः मार्गाः सन्ति। एतयोर्मध्ये कर्मयोगः, ज्ञानयोगश्च आत्यधिक प्राधान्येन वर्तते। वेदेषु संहिता ब्राह्मणादिकं कर्मकाण्डप्रधानम् एवम् आरण्यक-उपनिषदातयः ज्ञानकाण्डप्रधानम् इति कथ्यते। पूर्ववैदिक कालात् आरभ्य कर्मकाण्ड-ज्ञानकाण्डयोः मध्ये किं स्वीकरणीयमिति चिन्ता प्राचीनादारभ्यते। बृहदारण्यके अस्य विषयस्योपरि चर्चा वर्तते[२०७]। तत्र जनकराज्ञः निष्कामकर्मः एवं याज्ञवल्क्यस्य कर्मसन्यासमार्गस्यापि चर्चा वर्तते। एवमेव ईशावास्योपनिषदि अपि ज्ञानयुक्तकर्मविषयमेव अत्र विवृणोति[२०८]। उपनिषत्सु आकारेण लघु उपनिषद् एवाऽयम्। एवं चेदपि अत्रापि अयं विषयः चिन्तापरमेति अस्य प्राधान्यं द्योत्यते। ब्रह्मप्राप्तेरनन्तरं कर्मयोग-ज्ञानयोगयोः मध्ये को भेदः इति विचारः करणीयः। ज्ञान-कर्मयोगौ द्वावपि श्रुतिषु, स्मृतिषु वर्णितम्, एवम् अनादिश्च भक्तः। ज्ञानमार्गे अग्रगामिनः श्रीशुक, याज्ञवल्क्यादयः कर्ममार्गे जनकः श्रीकृष्णादयः कर्ममार्गगामिनाः आसन्। मार्गद्वयेनापि अग्रे गत्वा आत्मज्ञानेन इन्द्रियनिग्रहेन च बुद्धिं स्थिरम् एवं निष्कामम्, आसक्तिरहितं च भूत्वा भवेत्। ज्ञानयोगेन मुक्तिं प्राप्य इन्द्रियादि विषयेषु यत्पाशेन यत्बन्धनात् स्वतन्त्रो भविष्यति। कर्मयोगे इन्द्रियादि विषयेषु विरक्तरहितो भूत्वा निष्कामबुद्ध्या कार्याणि इन्द्रियनिग्रहं कृत्वा अग्रे गच्छति। निष्काम इति पदस्य अर्थं निष्क्रियो नास्ति । ज्ञानयोगिनः यावद् चित्तशुद्धिः भविष्यति तावत् पर्यन्तं कर्मकरोति एवं चेदपि अवसाने तानि सर्वाणि त्यक्तवान्। कर्मयोगे प्रयाणकालपर्यन्तं कर्माणि करणीयमेव " न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् " इति गीतायाम् उक्तम्। ज्ञानयोगिनां मते कर्मं दुखमयम् एवं बन्धनहेतुश्च भवति। कर्मणां कर्तारः मनसि यत्फलाशयः, आग्रहादयः एव बन्धनादीनां कारणम्। ज्ञानयोगिनां कृते ज्ञानप्राप्तेरनन्तरं स्वीयकर्तव्यानि लेशोऽपि नास्ति, लोकसंग्रहार्थं कर्मकरणीयस्य आवश्यकताऽपि नास्ति, कर्ममार्गिणां कृते ज्ञानप्राप्तेरनन्तरं तत् प्राप्त्यर्थं किमपि नास्ति लोकसंग्रहार्थं कर्माणि करणीयमेव। नित्य-नैम्मित्तिकानि कार्याणि करणीयानि तानि न त्यक्तव्यानि। ज्ञानमार्गेण

गच्छति चेदपि शमदमादि धर्माणि पालनीयानि कर्ममार्गे आत्मानं युक्तं कर्माणि कृत्वा शास्त्रविहितानि समस्तानि कर्माणि मृत्युपर्यन्तं करणीयानि, एवं निष्कामकर्माणि न त्यक्तव्यानि। एवं चेदपि योगद्वयेषु अपि शान्तिः, एवं मनसः निष्कामावस्था। सामान्येन चिन्त्यते चेत् कर्मयोगस्य प्रयोगः ब्रह्मचर्य, गार्हस्थ्येषु आश्रमेष्वेवालं, ज्ञानयोगस्तु प्राधान्येन वानप्रस्थ, संन्यासाश्रमेष्वेव। गृहस्थाश्रमे एव अधिकतया पञ्चमहायज्ञानि (नित्यानि) षोडशसंस्काराणि (नैमित्तिकानि) च आगमिष्यन्ति। ज्ञानयोगस्य प्रधानकार्याणि श्रवणं, मननं, निदिध्यासनम् इत्येतदेव। अत्र द्वितीयस्य ब्रह्मणः विषये एव मनसः निरूपणमेव। अन्यथा चिन्त्यते चेत् गृहस्थाश्रमे गृहस्थाश्रमस्थाकार्याणि न करोति चेत् तत् समीचीनं न भविष्यति। परमलक्ष्यस्तु ब्रह्मप्राप्तिरेव एवं चेदपि पूर्वं क्रियमाणानि कर्मकाण्डप्रतिपादकानि कार्याणि अकृत्वा अग्रे गच्छति चेत् तत् समीचीनं न भविष्यति। यज्ञादीनां फलानि स्थावराणि न अस्य फलस्य अनन्तरं पूर्वरूपमेव भवति तत् एव कठोपनिषदि एवं गीतायां च "क्षीणे पुण्ये मर्त्यलोकं विशन्ति "[२०९]।

अत्र अर्जुनस्य पुरतः मार्गद्वयमपि (कर्मयोगं,कर्मसन्यासं )भगवता उपदिष्टम्। युद्धभूमौ सर्वेऽपि युद्धं कर्तुमेवं स्वीयपक्षस्य विजयप्राप्त्यर्थमेव आगतवन्ताः एव। अत्र युद्धधर्मं त्यक्त्वा पलायनं करोति चेत् तत् समीचीनं न, एवमेव अस्मिन् समये अर्जुनाय कर्मसन्यासं समीचीनं न कर्मयोगमेव अनुष्ठेयम्। युद्धं न करोति चेत् अर्जुनस्य कृते क्लैब्यमेव प्रापयति।

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भाहि दोषेण धूमेनाग्निरिवावृताः।। १८.४८।

या च कर्मजा सिद्धिः उक्ता ज्ञाननिष्ठा योग्यता लक्षणा तस्याः फलभूता नैष्कर्म्यसिद्धिः ज्ञाननिष्ठालक्षणा। एतावत् पर्यन्तमुक्त्वा विषयोऽयम् उपसंहरति।

### ३.६ कर्मयोगः भक्तियोगश्च

ब्रह्मज्ञानजिज्ञासूनां कृते मार्गवैविध्यं वर्तते एतेषां कृते कर्म, ज्ञान, भक्ति, योगः, ध्यानम् इत्यादयः समानरीत्या इति कथ्यते। कर्मयोगम् अथवा कर्मविषयमधिकृत्य पूर्वं विचारः अकरोत्। अत्रस्तु कर्मयोगेन साकं भक्तियोगस्य कः सम्बन्धः, एवं द्वयोर्मध्ये कः भेदः इत्येतादृश विषयाः अत्र विचारः करोति। कर्ममार्गावलम्बिनः जनकादयः राज्ञाः अनेन मार्गेण परमपदप्राप्तिः गतवन्तः, श्रीशुक, याज्ञवल्क्यादयाः ज्ञानमार्गावलम्बिनस्तु अनेनैवमार्गेण च परमपदं प्राप्तवन्ताः च। भक्तिस्तु इदानीन्तन काले कलियुगे भक्तिमार्गः एव प्रायेण समीचीनः इति वक्तुं शक्यते। अतः एव गीताशास्त्रे भगवता विचारः अपि द्रष्टुं शक्यते। भक्तिविषये शाण्डिल्यसूत्रे लक्षणं विस्तरति " सा परानरक्तिरीश्वरे [२१०] " यथा ईश्वरं प्रति परमनिरतिशयरीत्या इत्यादिभिरीत्या विस्तरति। *श्रीमद् भागवते* अहैतुक्य व्यवहितया भक्तिः पुरुषोत्तमे[२११] अस्यानन्तरं *भागवते* भक्तिः नव विधम् इत्यपि विस्तरति। *भागवते* एवं चेत् *नारदीयभक्तिसूत्रे* एकादशभेदाः तत्र विवर्णितम्[२१२]। अस्योपरि गीताशास्त्रे –

> चतुर्विधाः भजन्ते मां जनाः सुकृतिनोऽर्जुनः।
> आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।७.१६। [२१३]
>
> यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
> तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।। ७.२१।[२१४]

प्रस्थानत्रयस्थ गीताशास्त्रे अपि भागवतप्रतिपादित विषयोऽयं विवर्णितम्। भक्तिविषयस्तु उपनिषदि प्रायेण न वर्णितं चदपि भागवतादिषु ग्रन्थेष्वेवं भक्तेः प्राधान्यादिकं प्रतिपादितम्। उपनिषतादयस्तु ज्ञानविषयप्रतिपादका च। एवं चेद् गीतायां विषयोऽयं किमर्थं प्रतिपादितं इति चेत् गीताशश्त्रस्य शाङ्करभाष्यारंम्भे एवम् उक्तम् " अर्जुनं निमित्तीकृत्य आह"इति वाक्यात् एव [२१५]सामान्यजनान् उद्बोधितुमेव इत्यत्रैव गीतायां भक्ति विषयस्य

प्राधान्यम्। निर्गुण-निराकार ब्रह्मविषयस्य उपासनास्तु कर्तुम् इतोऽपि काठिन्यं वर्तते इति कारणात् रूपादीनाम् एवं प्रतिमादीनाम् उपासना एवं मन्दिरादीनां प्रसक्तिः अत्रैव वर्तते। यथा-

" क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।

अव्यक्ता हि गतिर्दुखं देहवद्भिरवाप्यते।।"१२.५।[२१६]

अत्र अनेन श्लोकेन अव्यक्तोपासनादीनां क्लेशोऽत्र अधिकं वर्तते। अतः व्यक्तोपासना अथवा प्रतिमादीनां साहाय्येन उपासनायेव इतोऽपि समीचीनमिति उद्दिश्यते। भक्ति-ज्ञानयोगयोः योग्यता समानायेव। किन्तु भक्त्यां निष्ठारहिता, ज्ञानयोगे, निष्ठामात्रमेव। अन्यमार्गेण कथ्यते चेत् ज्ञानमार्गे अव्यक्तोपासनायेव किन्तु भक्तियोगे व्यक्तोपासना च। उपनिषत्सु प्रायेण निर्गुण-निराकार ब्रह्मोपासनायेव तैत्तिरीयोपनिषदि सगुणोपासनामधिकृत्य च वर्ण्यते[२१७]। एवमेव छान्दोग्योपनिषदि च निर्गुणब्रह्मोपासनात् अन्यत् सगुणोपासना एवं सूर्यः, अन्नादीनां च सगुणपदार्थानाम् उपासना च प्राधान्येन विवर्णितम्। श्वेताश्वतरोपनिषदि च –" माया तु प्रकृतिं विद्यात् मायिनं च महेश्वरम्"।[२१८] गीताशास्त्रे विभूतिविस्तरयोगेन प्रापञ्चिक सर्वभूतेषु ईश्वर चैतन्यं वर्तते इत्याशयं दृढीकर्तुमेव (१०.१९) आरभ्य(१०.४१) पर्यन्तमस्य विशदीकरणमेव अत्र उद्दिश्यते। एतदेव " ईशावास्यमिदं सर्वं यत्किञ्चित् " इत्यनेन मन्त्रेण इत्यर्थमपि वर्तते इति कथ्यते चेदपि दोषो नास्ति। श्रीमध्वाचार्यस्य द्वैतभाष्ये ज्ञानोप्यधिकं भक्तिमार्गस्योपरि वर्तते। तत्र भागवतभक्तिवर्णनायेव वर्णना च वर्तते। विशिष्टाद्वैतपक्षेन श्रीरामानुजेन अपि भक्तिमार्गस्य कृते इतोऽप्यधिकं प्राधान्यरीत्या एव व्याख्यानमकरोत्।

### ३.७ कर्मयोगः सन्यासश्च

ज्ञेयः स नित्यसन्यासी यो न द्वेष्टि न कांक्षति (५.३) [२१९] काम्यानां कर्मणां न्यासं सन्यासं कवयोः विदुः (१८.२)[२२०] श्लोकद्धयेष्वपि सन्यासं किमिति वक्तुमेव भगवता उद्दिश्यते। गीतावचनानुसारेण कर्मयोगस्तु चित्तशुद्ध्यर्थमेव इति केचन व्याख्यायते अपरस्तु (९.२१)" क्षीणे पुण्ये मर्त्यलोकं विशन्ति "वचनानुसारेण कर्मणां फलस्तु क्षणिक कालमेव अस्यानन्तरं पूर्वं किमासीत् तत्रैव,तदेव भविष्यति। एवं वदति चेदपि कर्ममार्गेण अग्रे गत्वा (३.२०)। जनकादीनां कर्ममार्गेण अग्रे गन्तृणां च चरितानि तत्र आख्यायते। एवं चेदपि गीताशास्त्रे कर्मयोगः इति पदेन यत्प्रतिपाद्यं तत् कर्मफलस्य त्यागः एव। अन्यत्र गीताशास्त्रे - सन्यासः कर्मयोगस्य निश्रेयसकरावुभौ (५.२) उभययोः मार्गयोरपि अग्रे गच्छतः चेत् परमप्राप्तिरेव इति अत्र उद्दिश्यते [२२१]।

एतेषां कृते कर्मविषये कोऽपि सम्बन्धः नास्ति कर्म करोति न करोति इत्यादिकं तेषां विषयोऽपि नास्ति। कर्ममार्गिणां कृते गीतायां च "तस्मात् योगाय युज्यस्व (२/५०), मा ते सङ्गोस्त्वकर्मणि (२/४७), एवमेव कर्मैन्द्रियैः कर्मयोगमसक्तः स विशिष्यते (३/७), कर्मज्यायो ह्यकर्मणः (३/८), इत्यादीनि बहूनि सन्ति। एवं चेदपि शाङ्करभाष्ये च तदधिकृत्य विशदीक्रियते। वर्णाश्रमधर्मरीत्या विभज्यते चेत् अन्तिममार्गमेव सन्यासम्। ब्रह्मचर्यं, गार्हस्थ्यं, वानप्रस्थं, सन्यासम् एवं चेदपि श्रीशङ्कराचार्यादयः केचनाः ब्रह्मचर्यात् सन्यासमार्गं प्राप्तवन्तारः ते नैष्ठिक ब्रह्मचारिणः इति वदन्ति। तादृशाः गार्हस्थ, वानप्रस्थादिना विनायेव सन्यासाश्रमं प्राप्तवन्तारः। अपरश्च जनकादयः स्वीयकर्माणि कृत्वा परमपदं प्राप्तवन्ताः च [२२२]। ते परमपदप्राप्तेरनन्तरमपि एते लोकसंग्रहार्थं स्वीयकर्माणि अनुष्ठितानि च। नैष्ठिकब्रह्मचारिणास्तु श्रीशुकादयः ज्ञानमार्गेण परमपदप्रप्ति प्राप्तवन्तः। अतः भगवता एवमुक्त्वा अस्य प्राधान्यं प्रस्तौति - सन्यासः कर्मयोगस्य निश्रेयसकरावुभौ (५.२)इति।

३.८ उपसंहारः

अद्यतन दार्शनिकाः इदानीन्तनकालजीवनमेव परिगणयति अन्यत् किमपि नास्ति इति चिन्तयति, अन्यत् इस्लामिक, क्रैस्तवादयाः केवलं स्वर्गप्राप्तिरेव तेषामात्यन्तिकलक्ष्यम्। अत्र एव भारतीयदर्शनानाम् औन्नत्यम् अनेन द्रष्टुं शक्यते। अत्र गीताशास्त्रे तृतीयाध्याये कर्ममार्गस्य प्राधान्यं विवृणोति, अत्र कर्मणः हेतवः सात्विक-राजस-तामसकर्मादि कर्मणां विभजनं, तेषामनन्तरं "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इति अभिप्रायः। अतयेव कर्मयोगं फलापेक्षारहितो भूत्वा कर्माणि करणीयानि। शङ्करादीनां मतानुसारेण ज्ञानयोगः अथवा कर्मसन्यासयोगः एव समीचीनमिति तेषां मतम्। तदर्थं कर्मसु प्रायेण स्वर्गादि अफलस्थानीयानि एवं चित्तशुद्ध्यर्थं तानि न तु मोक्षार्थानि इति स्थापयति। मध्व-रामानुजस्तु भक्ति विषये अधिकं प्राधान्यं ददाति। तेषां मतानुसारेण भागवतादि पुराणेषु यद्विषयं विवर्णितं तत् एव तेषां मतमिति स्थापयति। रामानुजस्तु ईश्वर एव कर्मणः अधिकारि कर्म एव द:ुखस्य कारणमिति एतेषां मतम्।

गीताशास्त्रे कर्म तु प्रायेण सात्विक-राजस-तामसगुणानुपातेन वर्णविभजनमपि अकरोत्। ब्राहेमण-क्षत्रिय-वैश्य-शूद्रादिभेदेन च तेषां साकं कर्माणि अपि विभज्य ददाति। तत् तु प्रायेणैव ऋग्वेदीय पुरुषसूक्ते केन प्रकारेण एवं मनुस्मृतौ अपि कीदृशं विवर्णितं तेषां प्रायेण समानरीत्या एव वर्णितम्। सर्वेषामपि कर्मणाम् आत्यन्तिकफलन्तु चित्तशुद्ध्या परमपद प्राप्तिरेव अत्र उद्दिश्यते।

अद्यतनकाले फलमुद्दिश्येव कर्माणि कुर्वन्ति। प्राचीनकाले राज्ञादयः स्वप्रयोजनं विना एव कूपादीनां तादृशसमाजहिताय समाजोपकारार्थम् आसीत् कर्माणि। इदानीतनकाले स्वीयफलांकांक्षा क्रियमाणानि कर्माणि एव अधिकानि अन्यकर्माणि न्यूनमेव। मानवाः सामाजिकजन्तु इति चित्रम् एवं मूल्यमपि नष्टं भविष्यति। एवमेव शास्त्रधैषणिकविषयान् एवं यन्त्राणां प्रयोगेण मानवानां शरीरसम्बन्धकार्याणि पूर्वकालापेक्षया न्यूनमेव। एकस्मिन् क्षेत्रे

पूर्वकाले कृषिकार्याणि मानवानां कार्याण्येवाधिकतया आसीत्। अद्यतन काले यन्त्राणां कार्याणि एव अधिकतया। इदानीतनकालीयानुद्दिश्य एव भगवता तस्मिन् काले उपदिष्टं यथा। -

" तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।

ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।" १६.२४।

# अध्यायटिप्पणि

1. Srimad Bhagavad Gita ,Sivaravindam,(Mal), Mahabhashyam, Balakrishnan Nair G , State Institute of Languages kerala, १० पुटे
2. Sreemad Bhagavadgeetharahasyam, (mal) LokmanyaBal Gangadar tilak,Narendra Bhooshan(Transalator), The Mathrubhumi press ६६५ पुटे
3. श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् ३८ पुटे
4. *Ibid* ., ५५ पुटे
5. *Ibid* ., ९४ पुटे
6. *Ibid* ., ११३ पुटे
7. *Ibid* ., २१४ पुटे
8. Bharatiya chinta (mal) (Indian Thought), Damodaran K, State Institute of Languages kerala, Thiruvananthapuram २५७ पुटे
9. *Op. cit*, Srimad Bhagavad Gita ,Sivaravindam,(Mal) ३१ पुटे
10. *Ibid* ., Bharatiya chinta (mal) (Indian Thought) १२ पुटे
11. *Op. cit*, Sreemad Bhagavadgeetharahasyam, १२ पुटे
12. *Op. cit*, ५४२ पुटे
13. *Ibid* ., ५०९ पुटे
14. *Op. cit*, Sreemad Bhagavadgeetharahasyam, ५४४ पुटे
15. 144 *Op. cit*, श्रीमद्भगवद्गीता , ८३ पुटे
16. Advaitadharmam, (mal), Nilakandan Elyath K N , State Institute of Languages kerala, Thiruvananthapuram ६०पुटे
17. *Op. cit*, श्रीमद्भगगद्गीता , ४५ पुटे
18. वेदान्दसारः, सदानन्दः श्री , भावबोधिनी संस्कृत व्याख्यानसहिता, चौखाम्बा सुरभारती विद्याभवन् वारणासि, २पुटे
19. *Op. cit*, श्रीमद् भगवद्गीता (शांङ्करभाष्यम् ) ८२ पुटे
20. Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-1, Radhakrishnan S , Narayanan nambissanT(Transalator), ४८९ पुटे
21. Advaitadharmam, (mal), Nilakandan Elyath K N , State Institute of Languages kerala, ७० पुटे
22. Sri Madvacaryar; jivitavumDarsanavum (mal) Sukrtindra Oriental Institute,kuthapady,Thammanam १०४ पुटे
23. *Ibid* ., १०४ पुटे
24. श्रीभाष्यम् ,श्रीरामानुजाचार्यकृतं,(द्वितीयखण्ड), निम्बार्काचार्य श्री ललितकृष्ण गोस्वामि ,श्री निम्बार्काचार्य पीठ ,प्रयाग , १.१.२१,१५३, १५४ पुटे

25. Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-2, Radhakrishnan S , Narayanan nambissanT(Transalator), The Mathrubhumi press ६८१ पुटे
26. Sri-Bhashya of Ramanujacharya , Vasudev Sastri Abhvankar , Govt. central press Bombay ३.४.२६ ३१३ पुटे
27. *Ibid* ., १.१.१, ०१-३५ पुटेषु
28. *Op. cit*, Bharatheeya darsanam (mal) (*Indian Philosophy*) (2) ६९१ पुटे
29. *Ibid* ., ६८१ पुटे
30. श्रीभाष्यम् ,श्रीरामानुजाचार्यकृतं,(द्वितीयखण्ड), निम्बार्काचार्य श्री ललितकृष्ण गोस्वामि ,श्री निम्बार्काचार्य पीठ २.२.३,३.२.४, *Ibid* ., ६९१ पुटे
31. *Op. cit*, Sri Madvacaryar; jivitavumDarsanavum १०४ पुटे
32. ब्रह्मवैवर्तपुराणम्
33. ब्रह्मसूत्रभाष्यम्, श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं, श्रीमज्जयतीर्थ-व्यासतीर्थ-राघवेन्द्रतीर्थानां टीकाभिः समलङ्कृतम्, प्राच्यविद्यासंशोधनालयः मैसूर १.१.१७
34. शब्दकल्पद्रुमः द्वितीय खण्डः मोत्तिलाल् बनारसी दास दिल्ली, ४६ पुटे
35. शतपथब्राह्मणम् Vol -4 ,Maitteyee Deshpande(Sanskrit Text With English Translaton) New Bharatiya book corporation Delhi, १५१७ पुटे
36. कृष्णयजुर्वेदीय तैत्तिरीयसंहित, Vol-1, मैत्रयीदेशपांडे, New Bharatiya book corporation Delhi १०५पुटे
37. तैत्तिरीयब्राह्मणम् , Vol-2 श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् , गणेशउमाकान्त थिटे , New Bharatiya book corporation Delhi ९२९ पुटे
38. अथर्ववेदसंहित(मूलमातम् ) , सुरेन्द्र प्रदीप्त नाग पब्लिशर्स ३३६,३३७ पुटे
39. *Op. cit*, तैत्तिरीयब्राह्मणम् , Vol-2 श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् , ८६४ पुटे
40. *Op. cit*, कृष्णयजुर्वेदीय तैत्तिरीयसंहित, Vol-1, २१३९ पुटे
41. तैत्तिरीय आरण्यकम् ७८९ पुटे
42. *Op. cit*, तैत्तिरीयब्राह्मणम् , Vol-2 श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् , ९४८ पुटे
43. आपस्तम्बश्रौतसूत्रम् Thite(Ed) , (Sanskrit Text With English Translaton and Note), ) New Bharatiya book corporation Delhi ९६५ पुटे
44. *Op. cit*, कृष्णयजुर्वेदीय तैत्तिरीयसंहित, Vol-1, ५८ पुटे
45. *Op. cit*, शतपथब्राह्मणम् Vol -4 ,Maitteyee Deshpande, ९ पुटे
46. *Op. cit*, तैत्तिरीयब्राह्मणम् , Vol-2 श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् , ९०६ पुटे

47. Katyana sruauta sutra (text with English translation and notes) page 47

48. आपस्तम्बश्रौतसूत्रम् Thite(Ed), (Sanskrit Text With English Translaton and Note), ) New Bharatiya book corporation Delhi ३९ पुटे

49. Reg veda samhita with commentary of sayanacarya page 627

50. *Op. cit*, अथर्ववेदसंहित(मूलमातम् ) , १६९ पुटे

51. ऋग्वेद संहित, विश्वबन्धुना होषियापूर् , विश्वेश्वरानन्द वैदितशोध संस्थानं पस्चिमबंङ्गाल् vol- 4 ३३४५ पुटे

52. *Op. cit*, तैत्तिरीयब्राह्मणम् , Vol-2 श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् , ५५२ पुटे

53. गोपाथब्राह्मणम् Univer of Terento, Asiatic Society of Bengal २१६ पुटे

54. *Op. cit*, ऋग्वेद संहित, विश्वबन्धुना होषियापूर् , ३१३३ पुटे

55. *Op. cit*, कृष्णयजुर्वेदीय तैत्तिरीयसंहित, Vol-1, ७१९,१८ पुट

56. *Op. cit*, तैत्तिरीयारण्यकम् ७०३ पुटे

57. *Op. cit*, गोपाथब्राह्मणम् , १८ पुटे

58. Eighteen –Principal upanishadas २९८ पुटे

59. *Op. cit*, अथर्ववेदसंहित(मूलमातम् ) , सुरेन्द्र प्रदीप्त नाग , ८०,८१ पुटे

60. अष्टाद्ध्यायीसूत्रपाठः धातुपाठश्च २१ पुटे

61. *Ibid* ., १२ पुटे

62. *Ibid* ., २ पुटे

63. *Ibid* ., १९ पुटे

64. *Ibid* ., २८ पुटे

65. *Ibid* ., ३४ पुटे

66. *Ibid* ., ३१ पुटे

67. *Ibid* ., ३५ पुटे

68. *Ibid* ., ३७ पुटे

69. *Ibid* ., ३८ पुटे

70. *Ibid* ., ३८ पुटे

71. *Ibid* ., ४४ पुटे

72. *Ibid* ., ४६ पुटे

73. *Ibid* ., ४७ पुटे

74. *Ibid* ., ५० पुटे

75. *Ibid* ., ५१ पुटे

76. *Ibid* ., ७३ पुटे

77. *Ibid* ., ७८ पुटे

78. *Ibid* ., ८६ पुटे

79. *Ibid* ., ८६ पुटे

80. *Ibid* ., ८९ पुटे

81. *Ibid* ., ११७ पुटे

82. *Ibid* ., १५६ पुटे

83. लघुसिद्धान्तकौमुदि २२१ पुटे

84. The Sankhya Apilorisms of Kapila ,1885 , p54,127,221,222,231,245,247,255,264,269,414,451.

85. योगसूत्रवृत्तिः, श्री सदाशिवेन्द्र सरस्वति , श्री वाणिविलास् प्रस् , १९११, ३३ पुटे

86. गौतमीयसूत्रप्रकाशः , न्यायसूत्रपाठः, Poona Oriental Books , p 14

87. *Ibid* ., १५ पुटे

88. *Ibid* ., १७,१८,१९ २० पुटेषु

89. सर्वदर्शनसंग्रहः माधवाचार्यकृतः ,डा उमा शंङ्कर शर्म ऋषि , चौखाम्बा विद्याभवन् वारणासि ३५० पुटे

90. Vaisesika sutra of kanada D K print world new delhi p 41,42,43,44,45,47,52,74,79,80,87,96,109

91. वाजस्पत्यं २ १७३० पुटे,

92. *Op. cit*, सर्वदर्शनसंग्रहः ५९८ पुटे

93. *Op. cit*, वेदान्दसारः, सदानन्दः श्री ५, ६ पुटे

94. *Op. cit*, Bharatheeya darsanam (mal) (*Indian Philosophy*), vol- ( 2) ६९१ पुटम्

95. ब्रह्मसूत्रशाङ्करभाष्यम् सटिप्पनं ,मूलमात्रम्, वासुदेवशर्मणा, चौखाम्बा विद्याभवन्, वारणासि ६६ पुटे

96. *Ibid* ., २३१ पुटे

97. *Ibid* ., २१७ पुटे

98. *Ibid* ., ३७३ पुटे

99. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डम्, द्वितीयसर्गः, ब्रह्मागमनम्, ५ पुटे

100. *Ibid* ., पुटे ४६३

101. *Ibid* ., पुटे ५१२

102. Sreemad Bhagavadgeetharahasyam, (mal) ३२८ पुटे

103. *Ibid* ., ३२८ पुटे

104. शतकत्रयं भर्तृहरेः २८ पुटे

105. मनुस्मृति E coppy २५६ पुटे

106. *Ibid* ., २५६ पुटे

107. मनुस्मृति With Sanskrit commentry ९३ पुटे

108. *Op. cit,* ब्रह्मसूत्रशंङ्करभाष्यम् ६६ पुटे

109. Ten principal Upanisads , with sankarabhasya , Mothilal Banarsodass, delhi, p 146

110. *Ibid* ., p 147

111. The Brhadaranyaka Upanisad ,Sri Ramakrishna math ,mylapore,madras, p 206,207

112. कठोपनिषद् ,(हिन्दी व्याख्या ), डा पुष्पा गुप्ता, चौखाम्बा सुरभारती प्रकाशन्, वारणासि, २१ पुटे

113. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।२.४७। *Op. cit* श्रीमद्भगवद्गीता १६० पुटे

114. *Op. cit,* ब्रह्मसूत्रशंङ्करभाष्यम्, पुटे ३७३

115. कर्मणः सुकृतस्याहुः सात्विकं निरिमलं फलम्। रजसस्तु फलं दुखमज्ञानं तमसः फलम्।।१४.१६। *Op. cit* श्रीमद्भगवद्गीता ३५७ पुटे

116. श्रीमद्भगगद्गीता शांङ्करभाष्यसमेता, मोतिलाल् बनारसीदास, २७४ पुटे

117. *Ibid* ., २७६ पुटे

118. *Ibid* ., १,२ पुटे

119. *Ibid* ., ८९ पुटे

120. *Ibid* ., २६२ पुटे

121. *Ibid* ., ४९ पुटे

122. अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसन्ति।।बृहदारण्यकोपनिषद् १.५.१६

123. *Op. cit,* श्रीमद्भगगद्गीता मोतिलाल् बनारसीदास, ३० पुटे

124. सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् ५३,५४ पुटे

125. श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ६९,७० पुटे

126. *Op. cit,* श्रीमद्भगगद्गीता मोतिलाल् बनारसीदास, ४७ पुटे

127. *Op. cit,* सर्वमूलग्रन्थाः ,७८ पुटे

128. *Op. cit,* श्रीरामानुज-भाष्य ९६ पुटे

129. *Op. cit,* श्रीमद्भगगद्गीता, 48 पुटे

130. *Op. cit,* श्रीरामानुज-भाष्य हिन्दी ९८,९९ पुटे

131. *Op. cit*, श्रीमद्भगगद्गीता , 49 पुटे

132. *Op. cit*, सर्वमूलग्रन्थाः ७९ पुटे

133. *Op. cit*, श्रीरामानुज-भाष्य १०१ पुटे

134. *Op. cit*, श्रीमद्भगगद्गीता , ६५ पुटे

135. *Op. cit*, सर्वमूलग्रन्थाः १०४ पुटे

136. *Op. cit*, श्रीरामानुज-भाष्य् १४६ पुटे

137. *Op. cit*, श्रीमद्भगगद्गीता , ६६ पुटे

138. *Op. cit*, सर्वमूलग्रन्थाः १०६ पुटे

139. *Op. cit*, श्रीरामानुज-भाष्य , १५० पुटे

140. *Op. cit*, श्रीमद्भगगद्गीता , ८९ पुटे

141. *Op. cit*, सर्वमूलग्रन्थाः ११५ पुटे

142. *Op. cit*, श्रीरामानुज-भाष्य् १७७ पुटे

143. *Op. cit*, श्रीमद्भगगद्गीता , ८९ पुटे

144. *Op. cit*, श्रीरामानुज-भाष्य १७८ पुटे

145. *Op. cit*, श्रीमद्भगगद्गीता , २२३ पुटे

146. *Op. cit*, सर्वमूलग्रन्थाः २४८ पुटे

147. *Op. cit*, श्रीरामानुज-भाष्य ४७९ पुटे

148. *Op. cit*, श्रीमद्भगगद्गीता, २६३ पुटे

149. *Op. cit*, सर्वमूलग्रन्थाः् २७८ पुटे

150. *Op. cit*, श्रीरामानुज-भाष्य ५५८,५५९ पुटे

151. *Op. cit*, श्रीमद्भगगद्गीता , २७४ पुटे

152. *Op. cit*, सर्वमूलग्रन्थाः २८८,२८९ पुटे

153. *Op. cit*, श्रीरामानुज-भाष्य ५७७-५८० पुटे

154. वेदान्तसारः, चौखाम्बा सुरभारती प्रकाशन्, पृ.२

155. अष्टादश-उपनिषदः , (गान्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (श्रवणं मननं निदिध्यासनं बृहदारण्यकोपनिषद् २.४.५)२०६ पुटे

156. *Op. cit*, श्रीमद्भगवद् गीता , १ पुटे

157. Advaitadharmam, (mal), Nilakandan Elyath K N , State Institute of Languages kerala, Thiruvananthapuram ८८ पुटे

158. Sri Madvacaryar; jivitavumDarsanavum (mal) Sukrtindra Oriental Institute,kuthapady,Thammanam, पुटे ६६

159. Bharatheeya darsana sangraham(mal),(Outlines of Indian Philosophy) Hiriyanna.M , parvathidevi R,( Transalator ) State Institute of Languages kerala, पुटे ९९

160. *Op. cit*, Bharatheeya darsanam (mal) (*Indian Philosophy*), vol- (2), पुटे ७३९

161. *Ibid* ., पुटे ७३९

162. *Ibid* ., 2, पुटे ७४६

163. Sri Madhvacharya his Life, Religion &philosophy,Tapsyananda , Sri Ramakrshna math , mylapore, Madras , p 80

164. *Loc. Cit*, p 80

165. *Op. cit*, सर्वदर्शनसंग्रहः चौखाम्बा सुरभारती प्रकाशन् पुटे २३३

166. Karma and Dvaitha philosophy, P 27,28, Dvaitha vedanta Darsana of sri Madvacharya (English) P 55

167. *Op. cit*, Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-1 , पुटे ४८९

168. *Op. cit*, भारतीयदर्शनं एस् राधाकृष्णन् 2, पुटे ७४५

169. *Op. cit*, सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् ७५ पुटे

170. *Op. cit*, भारतीयदर्शनं एस् राधाकृष्णन् 1, पुटे ४८४

171. भारतीयदर्शनं एस् राधाकृष्णन् 1, पुटे ५३०

172. सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मद्प्रसादाद् अवाप्नोति शाश्वततं पदमव्ययम्।।१८.५६। *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य ४५४ पुटे

173. *Op. cit*, सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् ७६ पुटे

174. *Ibid* ., ७६ पुटे

175. *Ibid* ., ७८ पुटे

176. *Ibid* ., ७९ पुटे

177. *Ibid* ., ८४ पुटे

178. *Ibid* ., ८५ पुटे

179. *Ibid* ., ८६,८७ पुटे

180. *Ibid* ., ८९ पुटे

181. *Op. cit*, Dvaitha vedanta Darsana of sri Madvacharya (English) P 54,55

182. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (श्वेताश्वतरोनिषद् अध्यायं ३.८)२८९ पुटे

183. *Op. cit*, Sri Madvacaryar; jivitavumDarsanavum पुटे १०२,१०३

184. *Ibid* ., पुटे १०४

185. Yatindramatadipika, (Sanskrit text with English translation) Srinivasadasa, Sri Ramkrishna math ,mylapore, madras , पुटे ९४

186. A Study of the vedanta in the light of Bhrahmasutras, new Bharatiya book Delhi P 96

187. Ibid 98

188. श्रीभाष्यम् ३.४.२६, ३१४ पुटे

189. The Brhadaranyaka Upanisad ,Sri Ramakrishna math ,mylapore,madras, p 143,144

190. *Op. cit*, अद्वैतधर्मं ४७ पुटे

191. *Op. cit*, श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ४.१८ श्लोकं १५१ पुटे

192. *Ibid* ., ७.४, २३२ पुटे

193. *Op. cit*, Bharatheeya darsana sangraham(mal),(Outlines of Indian Philosophy) पुटे ४१७

194. *Loc. Cit*, पुटे ४१७

195. Sri-Bhashya of Ramanujacharya , Vasudev Sastri Abhvankar , Govt. central press Bombay १.१.२१ , १३९ पुटे

196. *Ibid* ., ३.२.३७, २८७ पुटे

197. *Op. cit*, Bharatheeya darsanam (mal) (*Indian Philosophy*), vol- (2) , पुटे ६८९

198. *Ibid* ., पुटे ७००

199. Sri-Bhashya of Ramanujacharya , Vasudev Sastri Abhvankar , Govt. central press Bombay 3.4.26, 313 पुटे

200. *Ibid* ., १.१.१ , २-१११ पुटे

201. *Op. cit*, श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् १४.१६ श्लोकं पुटे

202. *Ibid* ., १८.१४,१५ श्लोकं पुटे

203. तत्त्वत्रयं पुटे १०८,

204. रहस्यत्रयसारं ४ , *Op. cit*, भारतीयदर्शनं एस् राधाकृष्णन् 2, पुटे ६९२

205. Sri-Bhashya of Ramanujacharya , Vasudev Sastri Abhvankar , Govt. central press Bombay ३.१.१, २७७ पुटे

206. *Ibid* ., २.२.३, २४१ पुटे, ३.२.४.२८३ पुटे , *Op. cit*, भारतीयदर्शनं एस् राधाकृष्णन् 2, पुटे ६९१

207. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (बृहदारण्यकोपनिषद् ४.४.२२), २५१ पुटे

208. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi (ईशावास्योपनिषद् २ श्लोकं) ३ पुटे

209. *Op. cit*, सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १७५ पुट

210. *Op. cit,* नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम्, गीताप्रेस गोरखपूर् 11पुटे

211. श्रीमद्भागवतपुराणम् (श्रीव्यासमहषि प्रोक्तम् ), श्रीधरस्वामिविरचितया भावार्थबोधिनी नाम्नी मोतिलाल् बनारसी दास ३.२९.१२

212. नारदप्रणीतेन द्वशीतिः (८२)तम सूत्रेण यथा –" गुणमाहात्म्यासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्ति-कान्तासक्ति-आत्मनिवेदनासक्ति-तन्मयासक्ति-परमविरहासक्तिः रूपा एकधा अपि ऐकादशधा भवति "।८२। नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम्, गीताप्रेस गोरखपूर् पुटे

213. *Op. cit,* श्रीरामानुज-भाष्य ७.१६ , १४२,१४३ पुटे

214. *Ibid* ., १४८ पुटे

215. *Ibid* ., १४ पुटे

216. *Op. cit,* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् १८८ पुटं

217. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi (तौत्तिरीयोपनिषद् ३.२.६) ३१५ पुटे

218. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (श्वेताश्वतर उपनिषद् ४.१०)२९३ पुटे

219. *Op. cit,* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् १४८ पुटे

220. *Ibid* ., ४०४ पुटे

221. सन्यास कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्म सन्न्यासात्कर्मयोगो विशिष्यते।।५.२। *Ibid* ., १४८ पुटे

222. कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि।।३.२०। *Ibid* ., ९४ पुटे

Subrahmanian M. “ Śaṅkara-madhva-rɑ̄mɑ̄nujɑ̄cɑ̄ryɑ̄ṇɑ̄ṃ Śrīmad Bhagavadgītɑ̄ Vyɑ̄khyɑ̄nɑ̄ni - Ekaṃ tulanɑ̄tmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# चतुर्थोध्यायः
# ज्ञानयोगः


४.० उपोद्घातंम् .

४.१ ज्ञानशब्दस्य व्युत्पत्तिः, वेदे, वेदाङ्गे, दर्शनेषु, स्मृतौ, इतिहासौ पुराणे च

४.१.१ भारतीयदर्शने ज्ञानम्

४.१.२ भारतीय दर्शनेषु प्रमाणविचारः

४.१.३ ज्ञानस्य विभागः

४.१.४ ज्ञानस्य वैशिष्ट्यम्

४.१.५ प्रस्थानत्रये ज्ञानम्

४.२ भागवद् गीता व्याख्याने ज्ञानम्

४.२.१ गीताव्याख्याने ज्ञानं कर्म च

४.२.२ ज्ञानकर्मसमुच्चयवादः, तस्य निरासश्च, अस्योपर्याचार्यत्रयाणां व्याख्या च

४.३ ज्ञानं भक्तिः च अस्योपर्याचार्यत्रयाणां व्याख्या

४.३.१ भक्तियोगे ज्ञानस्य प्राधान्यम्

४.४ ज्ञानम् अद्वैतवेदान्तश्च

४.५ ज्ञानं द्वैतवेदान्तश्च

४.६ ज्ञानं विशिष्टाद्वैतश्च

४.७ आचार्यत्रयाणां ज्ञानविषये तुलनात्मकमध्ययनम्

४.८ अध्यायोपसंहारः

## ४.०उपोद्घातः

*भगवद्गीतायाः* प्रधानेषु तत्वेषु अन्यतमं भवति ज्ञानम्। *भगवद्गीतायाः* अन्तिमाः षटद्ध्यायाः ज्ञानकाण्डेन सङ्कल्पितमस्ति। गीतोपसंहारे एतेषु अध्यायेषु लक्ष्यम् आयाति। एते अध्यायाः गीतायाः परमतत्वं प्रतिबोधयति। तस्मात् ज्ञानमेव गीतायाः परमलक्ष्यमिति ज्ञातुं प्रभवते अद्वैतवेदान्ते ज्ञानस्यैव परमस्थानं वर्तते। अन्येषु दर्शनेषु च भक्तिः- कर्मादीनां प्राधान्यं दृश्यतेऽपि ज्ञानस्य च प्राधान्यम् अस्त्यैव । अनेन ज्ञायते यत् गीतातत्वं ज्ञानगुहायां अन्तर्न्निहितमिति। अतः अत्र ज्ञानविषये परिचिन्तयति। ज्ञानमित्यस्य शब्दस्य व्युत्पत्तिः इतिहासादिविषयं विचिन्त्य अन्येषु भारतीयदर्शनेषु ज्ञानस्य परिकल्पना च अत्रालोचयति। एवं ज्ञानस्य विभागः, ज्ञानस्य वैशिष्ट्यं, प्रस्थानत्रये, गीताव्याख्याने च ज्ञानम्, ज्ञान-कर्मसमुच्चयवादः, अस्यनिरासञ्च, ज्ञानयोगे भक्तिः-कर्मादीनां स्थानं, वेदान्तत्रयेषु ज्ञानम् इत्यादिकमपि अस्मिन्नध्याये विचारयति। ततः ज्ञानशब्दावगमनेन ज्ञान-गीतयोः सम्बन्धविषये सम्यक् विचारयितुम् अत्र प्रभवते।

## ४.१. ज्ञानशब्दस्य व्युत्पत्तिः

ज्ञा धातोः भावे ल्युट् प्रत्यये अकारान्त नपुसकलिंङ्ग ज्ञानशब्दस्य निष्पत्तिः [१] । विषयान् जानाति ज्ञः अनिति अनः कर्म्म। भावे ल्युट् बोधे अवबोधनार्थे विशेषेण एवं सामान्येन च, एवमेव वस्तुमात्रद्योतकं निर्विकल्पं चेति। विशेषेण सामान्येन चावबोधः[२]। ' मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ' इत्यमरकोशे ज्ञानस्यार्थः दृश्यते। मोक्षे शिल्पादिशास्त्रे धीः, सा ज्ञानं विज्ञानमिति अत्रत्य भावः। अन्यस्मिन् विषये लौकिकेषु घटपटादौ या धीः वर्तते साऽपि ज्ञानशब्देन सूच्यते। अनेन व्यत्यस्तविषयेयु व्यत्यस्तज्ञानं प्रयुज्यते इति अवगम्यते[३] । अन्यत्र ज्ञायतेऽनेन इति व्युत्पत्तौ ज्ञा अवबोधने इति धातोः करणाधिकरणयोश्च इति सूत्रेण[४] ल्युटि (ज्ञा अ ल्युट्) ज्ञानमिति निष्पद्यते [५]। ज्ञानं, विद्या, विज्ञानमित्यादि पदैः समानपदाः [६] विषयान् जानाति यः अनिति अनः कर्मः। तत्सामान्येन,

विशेषेण च अवबोधे। ज्ञानस्तु प्रधानेन सविकल्पक-निर्विकल्पकं च इति द्विधा विभक्तुं शक्यते [७]। वैदिककालादारभ्य ज्ञानस्य प्रयोगः द्रष्टुं शक्यते। *ऋग्वेदे* प्राचीनवेदे अष्टमाष्टके द्वितीये अध्याये चतुर्विंशति तमवर्गे ज्ञानसूक्तमेव वर्तते। ज्ञानस्य प्राधान्यं कियदस्तीति वेदकाले ज्ञातुं प्रभवति, अनेन सूक्तेन

> "उतत्वः पश्यन्नददर्शवाचमुतत्वः श्रृण्वन्नश्रृणोत्येनं
> उतोत्वस्मैतन्वंऽविसस्रेजायेवपत्येऽउशतीसुवासाः।।४।
>
> उतत्वं सख्येस्थिरपीतमाहुर्नैनं हिन्वंत्यपिवाजिनेषु
> अधेन्वाचरतिमाययैषवाचं शुश्रुवाँऽअफलामपुष्पाम्।।५।
> यस्तित्याजसचिविंदसखायंनतस्यवाच्यपिभागोऽस्ति।
> यदींशृणोत्यलकंशृणोतिनहिप्रवेदसुकृतस्यपंथाम्।। ६।
>
> अक्षण्वंतः कर्णवंतःसखायोमनोजवेष्वसमाबभुवुः
> आदघ्नासऽउपकक्षासेऽउत्वेह्रदाऽइवस्नात्वाऽउत्वेददृश्रे।। ७।" [८]

एवमेव बहुत्र वैदिकसाहित्ये ज्ञानस्य प्रयोगः अतिप्राधान्येन दृश्यते। यजुर्वेदे, अथर्ववेदे च ज्ञानस्य प्राधान्यमस्ति। किन्तु ब्राह्मण-आरण्यक-उपनिषदादिषु पश्चातकालीय वैदिकसाहित्येषु ज्ञानमधिकतया दृश्यते। तत्र च उपनिषद् काले ज्ञानस्याधिक्यम् इतरापेक्षया अधिकमासीत्। अतः वेदोऽपि यथा कर्म-ज्ञानकाण्डेन विभज्यते तथा ज्ञानकाण्डम् उपनिषद्काण्डमेवास्ति। उपनिषदि वैविध्यानि कार्याणि दृश्यते। ज्ञानविषये, भक्तिविषये, योगविषये, तन्त्रविषये वा उपनिषद् मार्गदर्शनं प्रयच्छति। किन्तु दशोपनिषदः ज्ञानस्य कृते एव प्राधान्यं कल्पयन्ति। श्रेयः, प्रेयः, परा, अपरा इत्यादि शब्देन परमज्ञानस्य मोक्षमार्गस्य प्राधान्यं परमज्ञानेन लौकिकानां लौकिकज्ञानेन सङ्कल्पनं अपरज्ञानेन सङ्कल्पितमस्ति। तत्र

परमेव ज्ञानम् उपनिषद् ऋषीणां परम् लक्ष्यम्। यतः अयमेव मार्गः तेषां सङ्कल्पे मोक्षमार्गः।

अपरा इति ज्ञानशब्देन आयुर्वेदशिल्पशास्त्रादीनां शास्त्राणां परिकल्पनं लक्ष्यते उपनिषदि। नारदभक्तिसूत्रेऽपि परा भक्तिरिति शब्देन परं ज्ञानमेव चिन्तयति इत्यतः ज्ञानस्यैव आत्यन्तिकप्राधान्यम् अन्येषु मार्गेषु च वर्तते इति ज्ञानकाण्डस्य परम प्राधान्यं द्योतते। कर्मकाण्डेऽपि स्वज्ञानमेव परं ज्ञानम्। अन्यत्र यथार्थज्ञानम्, अयथार्थज्ञानम्, अज्ञानमिति त्रिधा च। यथार्थज्ञानं ब्रह्मज्ञानमेकमेव, अयथार्थस्ते -अध्यासः, मिथ्या, अज्ञानं च, अज्ञानस्य शक्तिद्वयं वर्तते -आवरणशक्तिः, विक्षेपशक्तिश्च। अन्यत्र ज्ञानं तु प्रमाणजन्यम्, प्रमाणं च यथा भूतवस्तुविषयम् अतोऽज्ञानं कर्तुमकर्तु मन्यथा वा कर्तुमशक्यं केवलं वस्तुतन्त्रमेव तद् न चोदनातन्त्रं नापि पुरुषतन्त्रम्। न्यायदर्शने अप्रमा प्रमा चैव ज्ञानं द्विविधमुच्यते। अन्यत्र ज्ञानं पञ्चधा -मतिः, श्रुतम्, अवधिः, मनःपर्यायं केवलञ्चेति [९]। अन्यथा यथा - यथार्थज्ञानं (ब्रह्मज्ञानं), अयथार्थज्ञानम् (अध्यासः,मिथ्या,अज्ञानम्)अज्ञानम् (आवरणशक्तिः, विक्षेपशक्तिः ) ज्ञानं भगवद्गीतानुसारेण सात्विक-राजस-तामस भेदेन त्रिधा विभक्तुं शक्यते [१०]। अत्र शंङ्करदिशया ज्ञानं नाम शास्त्रतः आचार्यतश्च आत्मादीनाम् अवबोधः। अन्यत्र *अद्वैतधघर्मम्* इत्यस्मिन् ग्रन्थे अद्वैतीनां मते ज्ञानं यथार्थे न केवलं मानसिकव्यापारम्। अपि तु सत्यवस्तूनां विषये साधकस्य निश्चयात्मिका बुद्धिः। अस्य ज्ञानस्य साक्षात्करणाय स्वीकरणीयाजीवितचर्या येव ज्ञानयोगस्य विषयः।[११]

### ४.१.१ भारतीय दर्शने ज्ञानम्

आस्तिकदर्शनेषु प्रायेण ज्ञानमिति कल्पना अस्ति। किन्तु तेषां ज्ञानमित्यस्य सङ्कल्पे एव भेदं वर्तते [१२]। सांख्यदर्शने प्रकृति-पुरुषविवेचनमेव ज्ञानं, नय्यायिकानां मते बुद्धिरिति पदेन ज्ञानग्रहणं करोति। भाट्टमीमांसकास्तु ज्ञानम् आत्मगुणमिति चिन्तयति। कुमारिल्लभाट्टाः ज्ञानमित्यस्य प्रमाणम् इति पदेन एवम प्राभाकरमिश्राः संविद् इति च

आहूयते। मीमांसकानां मते ज्ञान-ज्ञेय-ज्ञाता च भिन्नाः किन्तु वेदान्तिनां मते ज्ञाता, ज्ञेयं च आत्मैव [१३]। न्यायमते ज्ञानं द्विविधं– प्रमा, अप्रमा च। गुणः स्याद् भ्रमभिन्नन्तु ज्ञानमत्र उच्यते प्रमा तत्प्रकारकं यत् ज्ञानं तद्वत् विशेष्यकम् [१४]। वेदान्तमते ज्ञानं वस्तुमात्रद्योतकं निर्विकल्पकं, सविकल्पन्तु सज्ञादि द्योतकत्वात् अनेकथा[१५]। *भारतीयदर्शनङल्* इत्यस्मिन् ग्रन्थे पञ्चविधमिति विशदयति। यथा मतिः, श्रुतम्, अवधिः, मनःपर्यायं, केवलम् इति [१६]। ज्ञानावरणस्य च पञ्चकर्माणि तद् यथा – चाक्षुषं, श्रावणं, स्पार्श्वनं, रासनं, घ्राणनं च। एवमेव विशिष्टादेवैतदर्शने (रामानुजमते) स्वरूपज्ञान, प्रमातज्ञान, प्रमेयज्ञान इति त्रिधा च[१७]। स्वरूपज्ञानस्तु धर्मज्ञानमित्यपि चाहूयते। द्वैतदर्शने माध्वमते गीतातात्पर्ये ज्ञानादेव मोक्षः इति च विस्तृतम् [१८]। यथा आत्मनः क्रियया उद्भूतः व्यापारः भवति ज्ञानम्।

*भारतीयदर्शनम्* इत्यस्मिन् ग्रन्थे एस् राधाकृष्णमहोदयेन आत्मनः क्रियाशीलेन जायमान व्यापारः ज्ञानमिति। " शबरभाष्ये ज्ञाततानुमेयं ज्ञानम् "[१९] अतः मीमांसकाः ज्ञानस्य स्वतः प्रामाण्यम् अङ्गीकुर्वन्ति। नय्यायिकास्तु ज्ञानस्य स्वतःप्रामाण्यं नाङ्गीकुर्वन्ति अन्यत्र ज्ञानस्य परिणामः शब्दः इति पतञ्जलिर्मनुते। सः कथयति यदा उपाध्यायः, शिष्यम् अध्यापयति तदा उपाध्यायस्यात्मनि विद्यमानानि ज्ञानान्येव शब्दत्वं प्रतिपद्यन्ते। यथा ज्योतिर्व्वज्ज्ञानानि भवन्ति[२०]। अपि चोक्तं कैय्यटेन यथा ज्वालारूपं ज्योतिरविच्छेदेनोत्पद्यमानं सादृश्यातत्वेनाऽध्यवसीयमानं सततं, तथैवोत्पाद्यायज्ञानानि भिन्नानि भिन्नशब्दरुपतामापद्यमानानि संततान्युच्यन्ते ज्ञानस्य शब्दरूपापत्तिः [२१]।

### ४.१.२ भारतीय दर्शनेषु प्रमाणविचारः

भारतीयदर्शनानि प्रधानेन आस्तिक-नास्तिक भेदेन द्विविधं भवति। तेषु चार्वाक-जैन बौद्धादीनि नास्तिकानि, आस्तिकेषु सांख्य-योग-न्याय-वैशेषिक-पूर्व-उत्तरमीमांसा च। आस्तिक दर्शनेषु पुनः श्रौतानि, तार्किकानीति द्विधा विभवतुं शक्यते। श्रुति प्रमाणत्वेन

मूलतत्वबोधकानि श्रौतानि, तर्क उपस्कृतेन अनुमान प्रमाणेन मूलतत्वबोधकानि तार्किकाणि च।

प्रमाणानि यथा सांख्यदर्शने पञ्चविंशति तत्वाानि सन्ति। प्रकृतिः, महत्तत्वम्, अहङ्कारः, पञ्चज्ञानेन्द्रियम्, पञ्चकर्मेन्द्रियम्, पञ्चतन्मात्राणि, मनः, पञ्चमहाभूतानि पुरुषः च [२२]। अविपर्ययाद्विशुद्ध केवलमुत्पद्यते ज्ञानम् [२३]।

"प्राकृतेर्महांस्ततोऽहङकारस्तस्माद् प्रमाणश्च षोडशकः।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि।।"[२४]

सांख्याः एव अख्यादिवादिनः

"एतत्पञ्चविंशतितत्वसाधकत्वेन प्रमाणत्रयमभिमतम्।। [२५]

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाण सिद्धम्

त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।।"[२६]

योगदर्शने (स्वेश्वरसाख्यपद्धतौ) यथा पञ्चविंशतितत्वैः साकम् ईश्वरत्वमपि तैरङ्गीकुर्वन्ति। योगो नाम चित्तवृत्तिनिरोधः गीताशास्त्रे योगशब्दस्य अर्थम् एतात् भिन्नमेव च। ज्ञानविषये सांख्यदर्शनस्यैव चास्तिसाम्यमित्यवधेयम्[२७]। प्रमाणविषये प्रत्यक्ष-अनुमान-आगमाः यौगिकैरङ्गीकृतम्। नय्यायिकैः (अन्यथाख्यातिः) साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम्। तत्र तेषामनुसारेण[२८] यथा प्रत्यक्षानुमानोपमानशब्दभेदात् चर्तुथा [२९]। वैशेषिकदर्शने (औलूक्य/काणाद) दर्शने प्रमाणानां संख्याविषये[३०] प्रत्यक्ष, अनुमानौ एव। समानमेव बौद्धानां मतः। मीमांसाशास्त्रं प्राभाकरमीमांसकैः प्रत्यक्ष, अनुमान, उपमान, शब्दा, अर्थापत्तिः इति पञ्चप्रमाणानि अङगीकरोति। कुमारिलभट्टमतेन- प्रत्यक्ष, अनुमान, उपमान, अर्थापत्तिः, अनुपलब्धिः इति षट् प्रमाणानि अङ्गीकरोति। अस्यां जैमिनी दर्शने द्वादशलक्षण्यनुसारेण प्रधानभेदौ द्वै एव स्तः तदेव भाट्टमीमासाः प्राभाकरादयश्च। मीमांसकाः अन्तिमाः उत्तरमीमांसकाः अथवा वेदान्तिनः। एते एव विर्वतवादिनश्च प्रमाणानां

स्वीकरणविषये[३१]भाट्टमीमांसकवत्। यथा-प्रत्यक्ष, अनुमान, उपमान, आगमम्, अर्थापत्तिः, अभावं च ।

"प्रत्यक्षमनुमानं च शब्दं चोपमितिस्तथा
अर्थापत्तिरभावश्च षट् प्रमाणानि मादृशाम।।५।
चार्वाकास्तावदेकं द्वितयमपि पुनबौद्ध वैशेषिकौ द्वौ
भासर्वज्ञश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्टकं वदन्ति।।
प्राहुः प्राभाकराः पञ्चकमपि चवयंतेऽवि वेदान्तविज्ञाः
षट्कं पौराणिकास्तवष्टकमभिदधिरे संभवैतिह्ययोगात्।।६।"[३२]

नास्तिक-दर्शनेषु चार्वाकाः प्रत्यक्षप्रमाणमेव[३३]। ( प्रत्यक्षमेवैकं प्रमाणं बाहस्पायसूत्रम् [३४]) अङ्गकरोति जैनाः बौद्धाः च प्रत्यक्षानुमानौ एव।

"अर्थोज्ञानान्वितो वैभाषिकेण बहुमन्यते।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः।।
आकार सहिता बुद्धियोगाचारस्य सम्मता।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः।।"[35]

ज्ञानविषये यथा बौद्धानां यथा

"मुख्यो माध्यमिको विवर्तमखिलं शून्यस्यमेने जगत्
योगाचरमते तु सन्ति मतयस्तासा विवर्तोऽखिलः।।
अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्धर्यति सौत्रान्तिकाः
प्रत्यक्षं क्षणभङगुरश्च सकलं वैभापिको भाषते।।" [३६]

माध्वमते प्रमाणाः यथा-प्रत्यक्ष, अनुमान, उपमान, शब्दः, अत्यर्थापत्तिः अनुपलब्धिः इत्येते। (पृथिव्यातेजोवायुरिति तत्वानि तत्समुदाये शरीरेन्द्रिय विषयसंज्ञा सूत्रं - २ बार्हस्पत्यम्)

### ४.२.३ ज्ञानस्य विभागाः

ज्ञानं शास्त्रत आचार्यतश्च आत्मादीनाम् अवबोधः इति गीता भाष्ये ३/४ श्रीशङ्करेण अभिप्रेतम् [३७]। तस्य अनुभवः विज्ञानश्च, अस्यां सांख्यबुद्धिः। ज्ञानमधिकृत्य महाभारते शान्तिपर्वे एवम् -

> "ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः।
>
> यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि।।"[३८]।

एवमेव चाणक्यनीतौ यथा -

> "आहारनिद्रा भयमैथुनानि समानि चैतानि नृणां पशूनाम्।
>
> ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः"।।

आत्मविषयकं ज्ञानं सांख्यमित्यभिधीयते। ज्ञानन्तु प्रमाणजन्यं यथाभूत वस्तुविषयं- ३/२/२ अस्य ज्ञानस्य प्रकाराः गीताशास्त्रे मोक्षसन्यासयोगे सात्विक-राजस-तामस भेदन विशदयति। सात्विकज्ञानं नाम-

> "सर्वभूतेषु यैनेकं भावमव्ययमीक्षते।
>
> अविभक्तं विभक्तेषु तद्ज्ञानं विद्धिसात्विकम्।।" १८.२०।[३९]

सर्वभूतेषु येन ज्ञानेन एकं भावं वस्तु भावशब्दो वस्तुवाची एकमात्मवस्त्वित्यर्थः। अव्ययं न व्येति स्वात्मना स्वधर्मेण वा कूटस्थमित्यर्थः। ईक्षते पश्यति येन ज्ञानेन तं च भावमविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मवस्तु। तत् आत्मवस्तु व्योमवत् निरन्तरं च, तज्ज्ञानं साक्षात् सम्यग्दर्शनम् अद्वैतात्मविषयं तद्विद्धि सात्विकम् इत्यद्वैतभाष्ये।

यद् ज्ञानं भवति तद् ज्ञानं साक्षात् अद्वैतात्मविषयम्। अन्य द्वैतादिदर्शनानि तानि असम्यगभूतानि राजस- तामसादीनि च इति न साक्षात् संसारंचिपये भवति।

"पृथकत्वेन तु यत् ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तदज्ञानं विद्धि राजसम्।।" १८.२१।[४०]

पृथकत्वेन पृथग्विधान् नाना भावान् सर्वेषु भूतेषु यत् ज्ञानं वेत्ति तत् ज्ञानं विद्धि राजसम्। प्रतिशरीरेषु भिन्नरीत्या येन ज्ञानेन भिन्न प्रकारैः येनज्ञानेन सर्वभूतान् जानाति तत् ज्ञानं राजसमिति विदुः। तामस ज्ञानम् एकस्मिन् विषये एकस्मिन् कार्ये देहे बहिः वा प्रतिमादौ सक्तं शरीरान्तवर्ति देह परिमाणो जीवः ईश्वरो वा पाषाणदर्वातिमात्रम् इति एवम् एकस्मिन् कार्यो सक्तम्।

"यत्तुकृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्।।"१८.२२।[४१]

यत् ज्ञानं कृत्स्नवत्समस्तवत्सर्वविषयमिह एकस्मिन्कार्ये देहे बहिर्वा प्रतिमादौ सक्तं एतावानेवात्मेश्वरो वा नातः परमस्ति इति यथा नग्नक्षपणकादीनां शरीरान्तर्वर्ति देहपरिणामो जीवः, ईश्वरो वा पाषाणदर्वादिमात्रं, इत्येवमेकस्मिन्कार्ये सक्तमहैतुकं हेतुवर्जितं निर्युक्तिकम् अतत्वार्थवत् अयथाभूतार्थवत्, यथाभूतोऽर्थस्तत्वार्थः सोऽस्य ज्ञेयभूतोऽस्तीति तत्त्वार्थवत्। एकस्मिन् कार्ये कृत्स्नवत् सक्तम् अहैतुकमतत्वार्थवत् अल्पं च यत् ज्ञानं तत् तामसमिति। तामसानां हि प्राणिनामविवेकिनामीदृशं ज्ञानं दृश्यते। एवं भवति शंङ्करदर्शने ज्ञानम्।

मध्वभाष्ये सात्विक ज्ञानेन सर्वजीवानां अस्तित्वकारणं विष्णुरेव, मुक्तश्च पृथक्त्वेन विष्णोः चैतन्यं जानाति। तत्र तारतम्य जीवानां भेदेन परस्परत्वं, जडेभ्यश्चैव जीवानां जडत्वं च परस्परम्, तत्र विष्णोः सम्यक् ज्ञानपूर्वकम् तादृश्यज्ञानं सात्विकज्ञानमिति। विष्णोः अन्यविषय यथार्थज्ञानमिति ज्ञानं राजसमिति। अन्यथा भाष्ये सर्वगतमेकमीश्वरं न जानातीत्येतावतैव राजसत्वम्, एकस्य कृस्नवज्ज्ञानमेव तामसम् इतोऽपि उपरिगत्वा,

मुक्तादिरूपेण करणीयत्वात् पराधीनत्वेनाल्पस्य जीवस्य स्वातन्त्र्यादिगुण पूर्णप्वात् कृत्सनेन ब्रह्मणैक्यज्ञानं च महातामसम्। एकजीवात् अन्यत् किमपि नास्तीति अहैतुकं ज्ञानं सर्वमपि तामसम्। सद सद्वैलक्षण्याद्यन्यथाकल्पनायुक्तमेव तामसम्[४२]। अन्यत् अल्पज्ञानमपि तामसम्। एकस्मिन् सर्ववज्ज्ञान कार्ये जीवे पूर्णब्रह्मेति सक्तं ज्ञानं निर्युक्तिकं चातच्चार्थकल्पनायुक्तमल्पज्ञानं च पृथक् पृथगपि तामसानीति च।

अस्योपरि रामानुजभाष्ये सात्विकज्ञानविषये ब्राह्मण-क्षत्रिय, ब्रह्मचारि-गृहस्थादि भेदेन विभक्तेषु सर्वेषु भूतेषु कर्माधिकारिषु येन ज्ञानेन एकाकारम् आत्माख्यं तत्रापि अविभक्तेषु भूतेषु सितदीर्घादि विभागवत्सु ज्ञानैकाकारम् आत्मानां भेदरहितम् च। व्ययस्वभावयुक्तं ब्राह्मणादि शरीरेषु अव्ययम् अविकृतं फलादिसङ्गानर्हं च कर्माधिकारवेलायाम् ईक्षते तत् ज्ञानं सात्विकमिति। राजसन्तु सर्वेष्वपि भूतेषु ब्राह्मणादिषु ब्राह्णाद्याकारपृथक्तत्वेन आत्माख्यम् अपि भावान् नानाभूतान् सितदीर्घादिपृथक्वेन च पृथग्विधान् फलादिसंयोगयोग्यान् कर्माधिकारवेलायां यद् ज्ञानं वेत्ति तत् ज्ञानं राजसमिति। तामसज्ञानं नाम एकस्मिन् कर्तव्यकर्मिणि प्रेतभूतगणाद्याराधनरूपे अत्यल्पफले अकृस्नफलवत्तया तथाविध अङ्गहेतुरहित पूर्वदेवात्मनि पृथक्वादियुक्ततयामिथ्याभूतार्थ विषयमत्यल्पफलं च प्रेतभूताद्याराधनरूपविषयत्वात् तद् ज्ञानं तामस ज्ञानमिति [४३]।

एतावत् पर्यन्तमेव गीताशास्त्रे उक्त ज्ञानस्य भेदाः सात्विक- राजस-तामसभेदाः, तेषु आचार्यत्रयाणां भाष्यसहाय्येन तेषां मतञ्च पूर्वं सूचितम्। भगवद्गीतायाः बहिस्थित्वा चिन्तयति चेत् वेदान्तमते यथा यथार्थज्ञानम् अथवा(ब्रह्म), अयथार्थ ज्ञानं, नाम प्रपञ्चं व्यावहारिकसत्यमिति वेदान्तिनां मतम्। अन्यत् अज्ञानमिति च। नय्यायिकानां पक्षे- सक्किलपकं, र्निविकल्पमिति भेदेन द्वैविद्यत्वम्। सविकल्पकमित्यस्य अन्य नाम्ना च प्रथते- वस्तुमात्रद्योतकम्। अन्यत्र ज्ञानस्य पञ्चभेदाः व्याख्यातं तद् यथा- मति, श्रुतम्, अवधिः

मनःपर्यायं, केवलं च[४४] *दर्शनामृतम्* इतिग्रन्थे ज्ञानं नाम चेतनायेव [४५]। शंङ्करसिद्धान्ते ज्ञानस्य द्वैविध्यम्- वृत्तिज्ञानं स्वरूपज्ञानश्च।

### ४.१.४ ज्ञानस्य वैशिष्टयम्

पुरुषार्थचतुष्टयेषु आत्यन्तिकलक्ष्यं मोक्षमेव। तत्प्राप्तुम् अनेकमार्गाः च मानवाः अवलम्बिताः। तदर्थम् अद्वैतवेदान्तदर्शने ज्ञानप्राप्तिरेव तस्य हेतुत्वेन परिगणयति। वेदान्त दर्शने अस्य प्राप्त्यर्थम् अज्ञाननिवारणेन अथवा अविद्या नाशनेनैव अस्य साक्षात्कारम्। अस्य सिद्धान्तान्तर्गतेयं शंङ्करभाष्ये गीताश्लोकेषु ज्ञानस्य प्राधान्यादिकं केषु स्थलेषु विस्तरति इत्यत्र विचारयति।

भगवता सृष्टा ‘‘जगति प्रवृत्तिलक्षणं धर्मं मरीच्यादीन् उद्धिश्य तान् उद्‌बोधितवन्तः। एवमेव सनकसनन्दादीनुत्पाद्य निवृत्तिधर्मं ज्ञानवैराग्य लक्षणं च उपदिष्टवान् तं धर्म भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबन्धम् [४६]। समस्तवेदार्थसारसंग्रहभूतं तत् गीताशास्त्रेन परं निश्रेयसं, सहेतुकस्य संसारस्यात्यंतोपरमलक्षणम् अस्य प्रयोजनम्। एवमेव प्राणिनां शोकमोहादिसंसार बीजभूतदोषोद्‌भवकारणप्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थः इति च [४७]। यत्परमार्थात्मतत्वनिरूपणं कृतं तत्सांख्यम्। सा येषां ज्ञानिनाम् उचिता भवति। ते सांख्याः ज्ञानेन बुद्धिरात्मनो जन्मादि षड्‌विक्रियाभावाद् कर्ताऽत्मेति प्रकरणार्थं निरूपणाद्या जायते सा सांख्यबुद्धिः। द्वितीयाध्यायस्य एकादशतमश्लोकात् आरभ्य शंडकरभाष्यमरचयत्। तत्राद्यं यथा आत्मनः शाश्वतत्वं कथमिति संस्थापयितुमुद्युक्तः भगवता तत्र। अत्र व्याख्याने आत्मा अजः, नित्यः, शाश्वतः इति ज्ञानं यदि अर्जुनस्य मनसि जायते तदायेव तेन प्रथमाध्याये उक्त धर्मसमूढचेतसः परिहारत्वं भवति इति ज्ञात्वायेव भगवता एवमुपदिशति।

“ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।।”२.२४।

अत्र भाष्ये च आत्मानात्मविवेकज्ञानेन बुद्धिवृत्या विद्याऽसत्य रुपयैव परमार्थतोऽविक्रिय एवात्मा विद्धानुच्यते[४८]। तस्मात् विशेषितस्याविक्रियात्मदर्शिनो विदूषो मुमुक्षोश्च सर्वकर्ममसन्यास एवाधिकारः। पूर्व अर्जुनेन आत्मनः ह्ननादिकं कर्तृत्वं, कर्मत्वं, हेतुकर्मत्वं च अज्ञानकृतं दर्शितमिति [४९]। अतः गीताशास्त्रे आत्मज्ञानवतः सन्यास एव अधिकारः न कर्मणि। अनन्तर भागे च पञ्चपाञ्चाशत् श्लोकादारभ्य स्थितप्रज्ञस्य लक्षणानि विवृणोति। अत्रापि स्थिताप्रतिष्ठितात्मनात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञः विद्धांस्तदोच्यते इति [५०] पुत्र वित्तादि एषणात्रयैः सन्यास्यात्माराम आत्मक्रीडः स्थितप्रज्ञः इत्यर्थः।

अनन्तरं तृतीयाध्याये कर्मयोगे आद्यभागे यथा उपोद्घातभाष्ये ज्ञान कर्मसमुच्चयवाद निराकरणायभाष्ये बहुप्रयत्नमकरोत्। तत्र सर्वकर्मसन्यास नाम पदेन" पुत्रवित्तलोकैषणादिना व्युत्थाया भिक्षार्चय" इत्यर्थः[५१]।" ब्रह्मचर्यादैव प्रव्रजेता" [५२]।। इत्यादीनां श्रुत्यनुसारेण कर्मस्य अपेक्षा नास्ति इति वादः। महाभारते च यथोक्तं -

"कर्मणा बध्यते जर्न्तुविद्याया च विमुच्यते

तस्मात्कर्म न कूर्वन्ति यतयः पारदर्शिनः।।"[५३]

तृतीये कर्मयोगे आदौ श्रीशंङ्करेण उपोद्घातभाष्ये २.४७ श्लोके उक्तरीत्ये कर्मणि एव अधिकारः अस्ति न कर्मफले इत्यास्याशयानुसारेण कर्मयोगेन तत् आश्रित्य न ततः एव श्रेयः प्राप्तिम उक्तवान्। अतः अनेनमार्गेण न मोक्षप्राप्तिः। वेदविहितानि नित्यकर्मविषये कथं स्वीकरणीयं वा परित्यजनीयं वा इति विचारे गृहस्थानामेव श्रौत-स्मार्त कर्म्म परित्यागेन केवलात् एव ज्ञानात् मोक्षः। सन्यासिनः कर्म विषये मोक्षसाधनत्वेन स्मार्तानि कर्माणि ऊर्ध्वरेतसां समुच्चीयन्ते तथा गृहस्थस्यापि इष्यतां स्मार्त्तैः एव समुच्चयेन श्रौतैः। 'सन्यासिनां विषये तस्मात् न्यासमेषां तपसामतिरिक्तमाहुः[५४]', 'न्यास एवात्यरेचयत्'। महाभारते च कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते[५५]।

तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः[५६] ज्ञान कर्मणोः युगपदनुष्ठानं न संभवति इति भिन्न पुरुषानुष्ठेयत्वं भगवता पूर्वम् उक्तं ततः ज्ञानकर्मणोः एकपुरुषानुष्ठानात्। तस्मात् केवलात् ज्ञानात् एव मोक्षः इति सर्वैपनिषत्सु गीतायां च प्रख्यापयति। न अपि सन्यसनात् एव केवलात् कर्मपरित्यागमात्रात् एव ज्ञानरहितात् एव सिद्धिं ज्ञानयोर्गेन निष्ठां प्राप्नोति। अस्य ज्ञान निष्ठायाः रिपवः के इति अनेन श्लोकेन उदाहरति -

"आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा
कामरुपेण कौन्तेय दुष्पूरेणानलेन च।। ३. ३९।
तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ
पात्मानं प्रज़हिह्येनं ज्ञानविज्ञनानाशनम्।।" ३.४१।

चतुर्थाध्यायस्य आदौ ज्ञानविषये परम्पराप्राप्तं विचारयति। अष्टादशम श्लोकेन" कर्मणि अकर्म यः पश्येत्....(४.१८) इति अष्टादशश्लोकस्य व्याख्याने कर्मविषयमधिकृत्य बहुधा उक्तम्। अस्योपस्थापनाय लौकिकोदाहरणानां सहायं स्वीकरोति। यथा - कुण्डे बदराणि इव [५७] अन्यत् भाष्ये "नौस्थस्य नावि गच्छन्त्यां तटस्थेषु अगतिषु नगेषु प्रतिकूलगतिदर्शनात् दूरेषु चक्षुषा असन्निकृष्टेषु गच्छत्सु गत्याभाव दर्शनात्। एवं नित्यकर्मणि अकर्म्म यः पश्येत् फलाभावात् इत्यस्य उपस्थापनाय यथा धेनुरपि गौः अगौः अगौ इति उच्यते क्षीराख्यं फलं न प्रयच्छति इति। एकोनविंशति (१९)तम श्लोकव्याख्याने (यस्य सर्वे..... पण्डितं बुधाः) कर्मादौ अकर्मदर्शनं ज्ञानं ज्ञानाग्निना दग्धानि। शुभाशुभलक्षणानि कर्म्माणि यस्य तं परमार्थेतः बुधाः (ब्रहमविदः) पण्डितम् आहुः। प्रयोजनम् अपश्यन् स साधनं कर्म संन्यास्य शरीरयात्रामात्र चेष्टः यतिः ज्ञाननिष्ठो उच्यते।

"ब्रह्मार्पणं ब्रह्महर्विब्रह्माग्नौ ब्रह्मणा हुतं
ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्मसमाधिना।।" ४.२४

अस्य श्लोकस्य व्याख्याने अर्पणबुध्या यत्कर्म गृहयते अपि तत् बहम एव इत्यर्थः। सर्वकर्मसन्यसिनः ज्ञानस्य फलम् उपपद्येते। विदुषः सर्वकर्मात्माः तस्मात् ब्रह्मैव इदं सर्वमिति अभिजानानि।

"श्रेयात् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप

सर्वे कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।।"४.३३।

अग्रिम श्लोके ज्ञानिनः तत्वदर्शिनः ज्ञानवन्तः अपि केचित् यथावत् तत्वदर्शनशीलाः

"श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।४.३९।

अतः - तम्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः

छित्वैनं सशयं योगमातिष्ठोत्तिष्ठ भारत।।"४.४२।

पञ्चमाध्याये ज्ञानयोगस्य उपोद्घाते आत्मविदः ज्ञानयोगे भगवान् सर्वकर्मसंन्यासम् अवोचत्। आत्मविदः तु सन्यासकर्मयोगयोः असंभवात् तयोः निःश्रेयसकरत्वाभिधानं, श्रेष्ठम्। एवमेव आत्मविदः निवृत्त मिथ्याज्ञानात् विपर्ययज्ञानमूलस्य कर्मयोगस्यासंम्भवः स्यात्। अतः अनात्मवित् कर्तृकर्मयोः एव सन्यासकर्मयोगयोः निश्रेयसकरत्वमुक्तम्।

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः

तेषाम् आदित्यवज्ज्ञानं प्रकाशयति तत्परम्।।"४.१६।

नवमे राजविद्याराजगुहायोगे प्रथमश्लोकभाष्ये सम्यग्ज्ञानं साक्षात् मोक्षप्राप्तिसाधनं वासुदेवः सर्वमिति, (७.६)आत्मैवेदं सर्वम्, एकमेवाद्धितीयं [५८] यत् ज्ञानं प्राप्य अशुभात्संसारबन्धनात् मुच्यते[५९]। त्रयोदशतमे क्षेत्रक्षेत्रज्ञयोगे द्धितीयेन श्लोकेन एवं विचार्यते।

"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत

क्षेत्र क्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम।।"१३.२।

क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियते तत् ज्ञानं सम्यग् ज्ञानम् इति मतम्। ज्ञानाज्ञानयोः भिन्नेनाद्येयेन श्रुतिषु दृष्टं यथा- "दूरमेतेविपरीते विषूची अविद्या या च विद्येति ज्ञाता[६०] " यथा च तयोः विद्याऽविद्या विषययोः फलभेदः अपि विरुद्धो निर्देष्टः। श्रेयश्च प्रेयश्च तत् अपि[६१] समानार्थ प्रयोगः एव। अतः अविद्यया सहकार्येण विद्यया अविद्यया हातव्या इति श्रुतिस्मृतिभ्यः अवगन्तुं शक्यते। मित्थाज्ञानं परमार्थवस्तु दूषयितुम् एव। नास्ति चेत् ऊषरदेशं स्नेहेन पङ्कीर्तुं शक्नोति मरीच्युदकं तथा अविद्या क्षेत्रज्ञस्य न किञ्चित् कर्तुं शक्नोति अतः च इदमुक्तं "क्षेत्रज्ञं चापि मां विद्धि" "अज्ञानेनावृतं ज्ञानम् "[६२]इति च। अविद्या ज्ञेया अन्यत् वा ज्ञेयं ज्ञेयमेव तथा ज्ञाता अपिज्ञाता न ज्ञेयं भवति।

"ज्योतिषामपि तज्जयोतिस्तमसः परमुच्यते

ज्ञानं ज्ञेयं ज्ञानगम्यं वृद्धिसर्वस्य विष्ठितम्।।"१३.१७।

ज्ञानोत्पत्यनन्तरं पुनर्जन्माभावो उक्तः। तदापि ज्ञानोत्पत्तेः प्राग् कृतानां कर्मणां अनेक जन्मकृतानां तेषां कर्मणां फलं नाशयति। अतः कर्मफल मनुभोक्तुं जन्मानि आवश्यकमेव।

"सिद्धिं प्राप्तो यथा ब्रह्म तथाऽप्नोति निबोध मे

समासेनैव कौन्तेय निष्ठाज्ञानस्य वापरा।।२८.५०।

ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम् (१८.५५)

ज्ञेयं यत्तत्प्रवक्ष्यामि यद् ज्ञात्वा अमृतमश्नुते (१३.१२)

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता(१०-११)

सर्वधर्मान् परित्यज्य मामोकं शरणं व्रज

अहं त्वा सर्व पापेभ्यो मोक्षयिष्यामि मा शुच।।"१८.६६।

### ४.१.५ प्रस्थानत्रये ज्ञानम्।

भारतीयदर्शने गणना क्रमे अन्तिमं भवति उत्तरमीमांसा अथवा वेदान्तदर्शनम्। प्रस्थान त्रयमपि वेदान्तशास्त्रे अन्तर्भवति। *उपनिषत्, बह्मसूत्रं, भगवद्गीता* इति त्रयम् श्रुति-सूत्र-स्मृति प्रस्थानभेदेन च आहूयन्ते। पूर्वाध्याये कर्मविषयं चर्चितम्। अत्र ज्ञानमधिकृत्य तत् प्रस्थानत्रये कीदृशं विचारः इति चिन्तयति।

“वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारिणी शारीरिकसूत्रादीनि च। शरीरमेव शारीरकम् तत्र भवः शारीरको जीवः सः सूत्र्यते याथार्थ्येन निरूप्यते यस्तैति शारीरकसूत्राणि” ‘अथातो ब्रह्मजिज्ञासा ‘ इत्यादीनि [६३]। अन्यथा चिन्तयते चेत् वेदान्तो नाम वेदानाम् अन्तः वेदान्तः। वेदेषु प्रधानतया यथा कर्मकाण्ड-ज्ञानकाण्ड संबंधविषयाणि अत्र चर्चयति। संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् इति क्रमं च दृश्यते। अतः उपनिषद् ज्ञानकाण्डे वर्तते इति ज्ञातुं शक्यते। अतः एव प्रस्थानत्रयं श्रुतिप्रस्थानमिति च उपनिषद् आहूयते। उपनिषत्सु प्रधानेन मानवानां परमपुरुषार्थसंबंधविषयाणि चर्चयन्ति। अतः महावाक्य चतुष्टयमपि उपनिषदि अर्न्तभवति। *ऋग्वेदीय ऐतरेयोपनिषदि* –‘ प्रज्ञानंब्रह्म[६४],’ *यर्जुवेदीय बृहदारण्यकोनिषदि* ‘अहं ब्रह्मास्मि,[६५]’ *सामवेदीय छान्दोग्योपनिषदि* ‘तत्वमसि’[६६] *अथर्ववेदीय माण्डूक्योपनिषदि* ‘अयमात्मा ब्रहम’[६७] च। अनेन ज्ञातुं शक्यते उपनिषदि ज्ञानविषयमेव चर्चयति इति। “अविद्यया मृत्युं तीत्वा विद्यया अमृतमश्नुते[६८] ” “आनन्दभूक् चेतोमुखः प्राज्ञः[६९] ” कस्मिनन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति[७०] ” ‘कश्चिद्धीरः पृत्यगात्मानमैक्षदावृत्त चक्षूरमृतत्वमिच्छन्न्’ [७१] “प्रतिबोधविदितं मतममृतत्वंहि विन्दते। आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्[७२] “।। ज्ञानमुत्पद्यते पुंसा क्षयात् पापस्य कर्मणः यथा दर्शतले प्रख्ये पश्यन्त्यात्मानमामनन्ति। “ओं ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता, सत्यं

ज्ञानमनन्तं ब्रह्म [७३] '' इति। यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। 'तस्मादेतद् ब्रह्म नामरुपमन्नं च जायते'। इत्यादि निर्देशात् ब्रह्मप्राप्तिः वेदान्तविषयमिति लभ्यते।

तदर्थं ''तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'' [७४] एवं प्रकारेण गुरुसन्निधौ गन्तव्यम्। तद् कथम् अधीतमिति चेत् (३.१.५) श्लोकेन ''सत्येन लभ्यस्तपसा ह्येषा आत्मासम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ''।। [७५]

एवं दशोपनिषदि ज्ञानमधिकृत्य विविधरीत्या विविधमन्त्रैः विस्तृतरुपेण वर्णितमेव। तेषु किञ्चिदंशाः एवात्र मन्त्रसाहाय्येन उपस्थापितम्। अत्र उपनिषदां विषये विचारः कृतं। उपनिषदि ज्ञानम् अथवा विद्या बहुप्रकारेण वर्णितम्। मुण्डकोपनिषदि विद्या परा अपरा इति द्वैविद्यरीत्या विचारमपि [७६] तत्र वर्तते उपनिषत्सु प्रधानेन मोक्षमार्गमवलब्य तदर्थमवश्यं विषयाः विचारयति अतः उपनिषत्सु ज्ञानविषयस्यैव प्राधान्यमधिकं वर्तते, न कर्मविषये, न भवति विषये च नास्ति।

प्रस्थानत्रयेषु द्वितीयं भवति बादरायणविरचितं ब्रह्मसूत्रम्। अत्र 'पञ्चशतोत्तर पञ्चपञ्चाशत्' सूत्रैः (५५५) वेदान्तविषयाः विशदयन्ति। अस्योपरि शंङ्कराद् आरभ्य बहवः आचार्याः भाष्यं विलिख्य स्वमतस्थापनमपि अकरोत्।

**ब्रह्मसूत्रभाष्यकाराणां संज्ञा,विषयं च निर्दिशति ।**

| **कर्त्ता** | **भाष्यनामम्** | **विषयः** |
|---|---|---|
| शङ्करः | शारीरकभाष्यम् | निर्विशेषाद्वैतम् |
| भास्करः | भास्करभाष्यम् | भेदाभेदौ |
| रामानुजः | श्रीभाष्यम् | विशिष्टाद्वैतम् |
| आनन्दतीर्थः | पूर्णप्रज्ञभाष्यम् | द्वैतम् |
| निम्बार्कः | वेदान्तपारिजातभाष्यम् | द्वैताद्वैतात्मकम् |
| श्रीकण्ठः | शैवभाष्यम् | शैवविशिष्टाद्वैतम् |

| | | |
|---|---|---|
| श्रीपतिः | श्रीकरभाष्यम् | वीरशैवविशिष्टाद्वैतात्मकम् |
| वल्लभः | अणुभाष्यम् | शुद्धाद्वैतात्मकम् |
| विज्ञानभिक्षुः | विज्ञानामृतम् | अविभागाद्वैतम् |
| वलदेवः | गोविन्दभाष्यम् | अचिन्त्यभेदाभेदात्मकम् |

**ब्रह्मसूत्रसंख्या विषये यथा भाष्यकाराणां सूत्रसंख्या, अधिकरणसंख्या च निर्दिशति ।**

| **भाष्यकर्ता** | **सूत्रसंख्या** | **अधिकरणसंख्या** |
|---|---|---|
| शङ्करः | (५५५) पञ्चपञ्चाशदधिकपञ्चशतानि | ( १९१) एकनवत्यधिकशतम् |
| रामानुजः | (५७५) पञ्चसप्तत्यधिकपञ्चशतसंख्यानि | (१६०) षष्ठ्यधिकशतम् |
| आनन्दतीर्थः | (५६४) चतुषष्ट्यधिकपञ्चशतसूत्राणि | (२३३) त्रयोविंशत्यधिकद्विशतम् |
| निम्बार्कः | (५४९) एकोनपञ्चाशदधिकपञ्चशतसूत्राणि | (१६१) एकषष्ट्यधिकशतम् |
| श्रीकण्ठः | (४४) चतुश्चत्वारिंशत् | (१८१) एकाशीत्यधिकशतम् |

अत्र ज्ञानविषयमधिकृत्य ब्रह्मसूत्रे कथं विचारयति इति चिन्त्यते। ब्रह्मसूत्रे अन्यसूत्रादधिकं प्रधान्यं चतुर्षु सूत्रेषु वर्तन्ते। अतः चतुःसूत्री इति प्रसिद्धं। 'अथातो ब्रह्मजिज्ञासा', 'जन्माद्यस्य यतः', 'शास्त्रयोनित्वात्', 'तत्तु समन्वायात्' च। एते सूत्राणि ज्ञानविषयमधिकृत्य प्रमाणमेव। अत्र गीताभाष्ये "ज्ञानं तु प्रमाणजन्यं प्रमाणं च यथाभूतवस्तुविषयम् अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यकेवलं वस्तुतन्त्रमेव तद् न चोदनातन्त्रं नाऽपि पुरुषतन्त्रम्"[७७]।

तत्र तस्य ज्ञानमुपदेशः (१.१.५ जैमिनीयसूत्रं)[७८] एवमेव तद्भूतानां क्रियार्थेन समाम्नायः (१.१.२५)[७९] ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतर्थानम्'' (१.२)[८०] इत्यनेन नियमेन ब्रह्म प्रतिपादकवेदान्तभागाः क्रियाश्रयाय च विधीयते। शंङ्करभाष्ये - धर्मज्ञानफलादनुष्ठानापे ज्ञानश्च विधीयते। शंङ्करभाष्ये - धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणां ब्रह्मज्ञानफलं भवितुमर्हति [८१] अस्य उपस्थापनाय/ दृढीकरणाय "आत्मा वा अरे द्रष्टव्यः श्रोतव्योमन्तव्यः निदिध्यासितव्यः " [८२]इति मैत्रेयीं प्रति याज्ञवल्क्येनोपदिदेश अत्रैव " आत्मानमेव लोकमुपासीत''[८३]।" ब्रह्मवेद ब्रह्मैव भवति [८४] "। ब्रह्मणः स्वरूपलक्षणं यथा- ''सत्यं ज्ञानम् अनन्तम् ब्रह्म' इति अस्य व्याख्याने वेदान्ते सत्यं त्रिकालाबाध्यं भवति इति। द्वितीय पदेन ज्ञानम इति पदेन ब्रह्मविशेषमेव अत्र ज्ञानेनोद्दिश्यते अत्र ब्रह्मसूत्रभाष्ये [८५] ऋषिर्वामदेव संबन्धि विषयं बृहदारण्यके[८६] एवमेव छान्दोग्ये च[८७] भगवान्सनत्कुरः इति भवन्तमधिकृत्य प्रस्तौति। अनन्तमित्यधिकृत्य ''अनन्तं वै मनोऽनन्ता विश्वदेवा अनन्तमेव स तेन लोकं जयति'' विस्तरति बृहदारण्यके[८८] महावाक्येषु 'प्रज्ञानं ब्रह्म' इति वाक्येन ज्ञानमेव ब्रह्म इति अवगम्यते। अविद्याकल्पिसंसारित्व निवर्तनेन नित्य मुक्तात्म स्वरूपसमर्पणात् न मोक्षस्यानित्यत्वदोषः नापि संस्कार्यो मोक्षम् "अविज्ञातं विजानतां विज्ञानमविजानतां " समानरीत्या ब्रह्मभावश्च मोक्षः। अतः ज्ञानं नाम मानसीक्रिया, मोक्षं न धर्मणा, न कर्मणा, वैदिकी क्रिया वा न अप्राप्यं ज्ञानेनैव प्राप्तव्यम् [८९] । ज्ञानं तु प्रमाणजन्यम्'' ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यं केवलं वस्तुतन्त्रमेव। ज्ञानं यथा-भूतब्रह्मात्मा विषयमपि न चोदनातन्त्रम्। ज्ञानस्य च कृत्यसाध्यत्वात् नोभयमात्मज्ञानं भवति। अतः ज्ञानं वस्तुतन्त्रम्। कर्मकर्तृतन्त्रं च अतः ज्ञानं मानसिकी क्रिया, कर्मात् विभिन्नं च। ब्रह्म ज्ञानं न प्रेरणादिना, तत् वस्तुतन्त्रमेव। प्रकृष्टं ज्ञानं ब्रह्म इति स्वानुभवेन ज्ञात्वा अहं ब्रह्मस्मि इति अनुभवेन ज्ञानमेव अहम् अथवा आत्मा इति स्वात्मना अनुभोक्तव्यम्, ततः शेषं तत्वमसि इति ज्ञानं त्वमपि तत् परब्रह्म त्वमेव इति ज्ञातव्यम्। इत्येतत् एव ब्रह्मसूत्रे ज्ञानविषयमधिकृत्य चतुर्थ सूत्रे प्रतिपादितविषयात् किञ्चित् एव अत्र वर्णितम्।

प्रस्थानत्रये स्मृति प्रस्थानमित्यपरनाम्ना महाभारतान्र्तगता भवति भगवद्गीता। अस्या तृतीयाध्याये ''ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां'' इति[१०] श्लोकांशश्रवणेनैव अवगन्तुं शक्यते। ज्ञानस्य माहात्म्यं स्पष्टमेव शङ्करभाष्ये प्रवृत्ति धर्म निवृत्ति धर्म'' इति पदद्वयेनोद्धिश्यते [११]। गीतायां ज्ञानं भगवता बहुवारम् उपदिष्टम्। अध्यायानां नामकरणे ज्ञानकर्मसन्यासयोगं, ज्ञानविज्ञानयोगम् इत्यादि प्रयोग दृश्यते। ज्ञानेन तु तदज्ञानं........ (५.१६)[१२], ज्ञानं तेऽहं सविज्ञानं ... (७.२)[१३] ज्ञानं श्रेयं परिज्ञाता... (१८.१८)[१४] सत्वात्संजायते ज्ञानं, श्रद्धावान् लभते ज्ञानम् इत्येवमादिषु बहुषु श्लोकेषु ज्ञानमधिकृत्य भगवता सविस्तरं विशदयति।

भगवद्गीतायां कर्म, भक्ति, ध्यानं, सन्यासं, योगम् इत्यादिकं विषयबाहुल्यं द्रष्टुं शक्यते। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन'[१५] अन्यांशौः सह कथं भवति इति अनेन श्लोकांशेन अवगन्तुं शक्यते। अनेन ज्ञानेन परमपुरुषार्थसिद्धिः, प्राप्तुं शक्यते। शंङ्करादयः अद्वैतिनः केवलज्ञानदेव मोक्षप्राप्तिरिति सिद्धान्तयति। अन्ये केचनाः ज्ञानकर्मसमुच्ययवादम् अपि अत्र प्रस्तौति। शंङ्करस्य स्वीयगीताभाष्ये ज्ञानकर्मसमुच्चयवादस्य निराकरणमपि अकरोत्। अतः लभ्यमानेषु प्राचीनभाष्यमिति सिद्धान्तयति, शंङ्कर भाष्यस्य प्रधान्यम् अन्यानपेक्ष्य इतोऽपि अधिकं वर्तते इति वक्तुं शक्यते। शंङ्करादयः अद्वैतिनः केवलं ज्ञानादेव मोक्षप्राप्तिरिति सिद्धान्तयति।

## ४.२ भगवद्गीता व्याख्याने ज्ञानम्

प्रस्थानत्रयान्तर्गते गीताशास्त्रम् अत्र स्मृतिप्रस्थानमिति अपरनाम्ना आहूयते। अद्वैतदर्शनस्य मौलिकतत्वेषु सर्वेषामुपरि ज्ञानमेव। मीमांसकेषु कर्मणा एव कैवल्यप्राप्तिः, किन्तु अत्र अद्वैतदर्शने मोक्षः ज्ञानेनैव लभ्यते। प्रस्थानत्रयान्तर्गताविति कारणादेव गीताशास्त्रे ज्ञानस्य किं वैशिष्टयम् इत्येवात्र विचिन्तयति। गीताशास्त्रे तृतीयाध्याये कर्मयोगे प्रथमश्लोकेन इति अर्जुनः पृच्छति कर्मापेक्षया ज्ञानमेव श्रेष्ठमिति चेत् किमर्थं घोरकर्मिणि माँ नियोजयसि।

अग्रिम श्लोकेषु एषु द्वयेषु" तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्"।।२। अस्योत्तर रूपेण भगवता एवं -

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघा
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।"३.३।[९६]

अस्य श्लोकस्य व्याख्यानावसरे "ज्ञानमेवयोगः तेन सांख्यानाम्, आत्मानात्मविषयविवेक विज्ञानवतां ब्रह्मचर्चाश्रमात् एव कृत संन्यासानां वेदान्त विज्ञान सुनिश्चितार्थानां परमहंस परिव्राजकानां ब्रह्मणि एव अवस्थितानां निष्ठा प्रोक्ता" [९७] अस्मिन्नेवाध्याये (३२) तम श्लोकस्य [९८] व्याख्यानावासरे सर्वेषु ज्ञानेषु विविधं मूढाः ते सर्वज्ञानविमूढाः अर्थात् निर्गुण-सगुण ब्रह्म संबंधि ज्ञानमित्युद्धिश्यये। एतादृशं ज्ञानं कथं आव्रियते इति (३/३८) तम श्लोकेन [९९] वह्निः धूमेन आव्रियते, एवमेव आदर्शो मले आव्रियते, तद्वत् एव गर्भस्थशिशु उल्बेन चावृतं भवति तादृशमेव ज्ञानमपि कामेनावृतम् इति श्लोकस्याशयः।

"आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा
कामरुपेण कौन्तेय द्वष्पूरेणानलेन च।।३.३९।
तस्मात्वमिन्द्रियाण्यादौ नियम्य भरर्तषभ
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम्।।" ३.४१। [१००]

अत्र दत्तेषु आद्य श्लोकेन ज्ञानिनां नित्यवैरी भवति कामः। अस्य विशेषण रुपेण श्लोकस्य द्वितीयपंक्तौ दुष्पूरेणानलेन च इति पंक्त्या उद्दिश्यते। अग्रिम श्लोकेन मनः बुद्धिः, इन्द्रियाणि च अस्य कामस्य अधिष्ठानत्वरूपेण वर्तते। अनेन मोहेन शरीरिणं मोहयति। ४२ तम श्लोकस्य भाष्यावसरे पुनरपि ज्ञानं किमिति व्याख्यायति- ज्ञानं शास्त्रतः आचार्यतः च

आत्मादीनाम् अवबोधः विज्ञानस्तु, विशेषतः तदर्थानुभवः। तस्माद् त्वमिन्द्रियाणि आदै एव वशीकरोतु।।

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया

उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।"४.३४।[१०१]

आचार्यान्, प्राप्य दीर्घनमस्कारादीन् कृत्वा ज्ञानं नाम किं ? किं नाम अज्ञानं ? कथं मोक्षः ? का विद्या ?, का अविद्या इत्यादीनां प्रश्नानामुत्तरम् आचार्येण अस्योत्तरं लभ्यन्ते।

"श्रेयान् द्रव्यमयादयज्ञात् ज्ञानयज्ञः परंतप

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।।"४.३३।

द्रव्यसाधन साध्यात् यज्ञात् ज्ञानयज्ञो श्रेष्ठम्। द्रव्यमययज्ञानि सर्वाणि अपि फलारंम्भकाः किन्तु ज्ञानयज्ञस्तु न फलारम्भकः अनेन कारणेन श्रेयान् प्रशस्यतरश्च।।

"यथैधांसि समिन्धोऽग्निर्भस्मसात् कुरुतेऽर्जुनः।

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।।"४.३७।[१०२]

ज्ञानमेवाग्निः ज्ञानाग्निः सर्वाणि तस्मिन् कर्माणि भस्मसात् कुरुते। यथा सम्यक् दीप्तः अग्निः काष्ठान् भस्मीकरोति तद्वत् एव ज्ञानाग्निः अपि। शंङ्कर व्याख्याने कर्मनाशं-ज्ञानेन अज्ञाननाशं कृत्वा यथा कर्तृत्वाभिमानमपि नाशयित्वा परमात्मनः दर्शनं भवति। भाष्ये ज्ञानाग्निः कर्माणि इन्धनवत् भस्मीकर्तुं शक्नोति तस्मात् सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वकारणमिति।

"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।। ४.३८।

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।"४.३९। [१०३]

ज्ञानसदृशं तुल्यं पवित्रं शुद्धिकरम् इह नास्ति। योगेन अर्थात् स्वयमेव योगसंसिद्धानाम् एवं समाधियोगेन च संसिद्धिं ज्ञानप्राप्यर्थं योग्यतामापन्नः सन्मुमुक्षुः महताकालेन आत्मनि विन्दति। शेषश्लोकेन कथं ज्ञानं प्राप्तुं शक्यते तद् कथमिति विशदयति। श्रद्धावन्तः एवं गुरुपसदनादौ अभियुक्तः, ज्ञानलब्ध्युपाये श्रद्धावान् च भवेत्। तेन श्रद्धया सः संयतेन्द्रियः च श्रद्धया भवेत् चेत् तस्य अवश्यं ज्ञानं लभते। ज्ञानं लब्ध्वा मोक्षाख्यां शान्तिम् उपरतिं क्षिप्रमधिगच्छति। सम्यग् दर्शनात् मोक्षो भवति इति सर्वशास्त्रन्यायप्रसिद्धमेव च। चतुर्थाध्यायास्यान्तिम श्लोकेन[१०४] (४२) अज्ञानभूतं सन्देहादिकं ज्ञानासिना छित्वा युद्धाय उत्तिष्ठत इति। पञ्चमे सन्यासयोगे १५, १६ नमैः श्लोकैः

"नादत्ते कस्यचित्पापं न चैवसुकृतं विभूः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।।५.१५।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषाम् आदित्यवज्ज्ञानं प्रकाशयति तत्परम्।।"५.१६।[१०५]

अत्राद्य श्लोकेन द्वितीयपङ्क्त्या वेदान्तशास्त्रस्य परम प्रमाणत्वमेव अत्र भगवता विचार्यते। अज्ञानेन आवृतं भवति ज्ञानम्। अस्याज्ञानकारणात् एवमविवेकिनः जन्तवः मोहं गच्छन्ति इति तात्पर्यम्। अग्रिमश्लोकेन सूर्योदयेन तमसः नाशं कथं भवति तद्वत् एव आत्मज्ञानेन जन्तूनाम् अज्ञानं नाशितं भवति इत्युदाहरण साहाय्येन उपस्थापयति। अग्रिम श्लोकेन आत्मज्ञानमेव परममिति विचिन्त्य तेषां पापं ज्ञानेन तद् दूरीकरोति। सप्तमे ज्ञानविज्ञानयोगे

"ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यद् ज्ञातव्यमवशिष्यते।।"७.२।

अनेन श्लोकेन स्वानुभवसंयुक्तम् आत्मविज्ञानसहितं च ज्ञानं तुभ्यं वक्ष्यामि। स्वायत्तीकर्तुं अत्यन्त दुष्करमेव। यत् ज्ञात्वा न इह भूयः पुनः अन्यत् ज्ञातव्यं पुरुषार्थ साधनम्

अवशिष्यते मत् तत्वज्ञो भवति यः सः सर्वज्ञः इत्यर्थः। अस्मिन्नेवाध्याये भक्तानां चतुः प्रकारं च सूचयति, (७/१६) अनेन विस्तरति। अनन्तरं तेषु ज्ञानी कीदृशः इति विशदयति।

"उदारः सर्व एवैते ज्ञानीत्वात्मैव मे मतम्।
आस्थितः सहि युक्तात्मा मामेवानुत्तमां गतिम्।। ७.१८।
बहूनां जन्मानामन्ते ज्ञानवान् माँ प्रपद्यते
वासुदेवः सर्वमिति समहात्मा सुदुर्लभः।।"७.१९।[१०६]

आद्य श्लोकेन चर्तुविध भक्तेषु ज्ञानिनः प्राधान्यं वर्णितं (अन्य त्रायान् अपेक्षय) आद्य पक्त्या एषु चर्तुषु सर्वेऽपि उदाराः। ते सर्वे अपि मम प्रियाः एव। एषु ज्ञानी अत्यर्थं प्रियो भवति। किं कारणेन इति चेत् ज्ञानी आत्मैव न अन्यः इति ब्रह्मसूत्रे। मां एव अथवा गन्तव्यम् अनुत्तमां गतिं गन्तुं प्रवृत्तः भवति ज्ञानी। अग्रिम श्लोकेन ज्ञानीं पुनः अपिस्तूयते - बहुनां जन्मनां ज्ञानार्थसंस्काराज्यर्नाश्रयाणां अन्ते ज्ञानवान् मां वासुदेवं प्रत्यक्षतः प्रपद्यते। तादृशाः महात्मा न तत्समः अन्यः अस्ति अत्मा एव सर्वः वासुदेवः। अनन्तरं नवमाध्याये राजविद्याराजगुह्ययोगे प्रथम श्लेकन भगवता एवं विस्तरति

"इदं तु ते गुह्यतमं प्रवक्ष्याम्यानसूयवे
ज्ञानं विज्ञानसहितं यज्ञात्वांमोक्ष्यसेऽशुभात्।।९.१।
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्त्तुमव्ययम्।।"९.२।[१०७]

साक्षात् मोक्षप्राप्तिसाधनभूतस्य ज्ञानस्य स्थापनाय अत्र छान्दोग्यादीनाम् उपनिषदां मन्त्राणि स्वीकरोति। विषयोऽयं गुह्यतमं गोप्यतमं प्रवक्ष्यामि यत् ज्ञानं ज्ञात्वा प्राप्य मोक्ष्यसेऽशुभात् संसारबन्धनात् तत् एव। अग्रिम श्लोकेन तदेव विद्यानां राजा राजविद्या, इयं विद्या सर्वविद्यानाम् अतिशयेन भवति ब्रह्मविद्या। पवित्रं, पावनं च इदं सर्वेषां पावनानां शुद्धिकारणम्, उत्कृष्टतमम् च। इदं विद्या प्रत्यक्षावगमम्। आत्मज्ञानम् अनेकगुणवत्

धर्मानुसारी अव्ययं च भवति। दशमे विभूतियोगे चतुर्थ श्लोक व्याख्यानावसरे पुनरपि ज्ञानमात्मादि पदार्थानाम् अवबोधः ३८ तम श्लोकस्य द्वितीयपादे ''मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्'' अत्र[१०८] अनेन पंक्त्या ज्ञानीनां ज्ञानविषयं ज्ञानं च अहमेव। द्वादशे भक्तियोगे द्वादशतम श्लोकेन एवं विशदयति-

''श्रेयो हि ज्ञानमभ्यासाद् ज्ञानाद्ध्यानं विशिष्यते

ध्यानात् कर्म्मफलष्यागस्त्यागाच्छान्तिरनन्तरम्।।''४.३३।

अनेन श्लोकेन कर्मफलत्यगमेव श्रेष्ठमिति विशदयति। यथा अविवेकपूर्वकात् अभ्यासात् ज्ञानं विशिष्यते ज्ञानात् ध्यानं विशिष्यते, ज्ञानवतो ध्यानात् कर्मफलत्यागो विशिष्यते इति। क्षेत्रक्षेत्रज्ञयोगे द्वितीय श्लोकेन

''क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।

क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तद् ज्ञानं मतं मम।।''१३.२।

अत्र शरीरं ऩाम क्षेत्रं, मां परमेश्वरं चाऽपि असंसारिणां विद्धि जानीहि, तदेव क्षेत्रज्ञः। क्षेत्र-क्षेत्रज्ञययोः ज्ञेयभूतयोः यत् ज्ञानं, क्षेत्र-क्षेत्रज्ञै येन ज्ञानेन विषयीक्रियते तत् ज्ञानं सम्यग् ज्ञानम्। अनन्तरं कठोपनिषद् श्रुत्यनुसारेण[१०९] श्रेयश्य प्रेयश्च मोक्षप्राप्तिः (श्रेयः) अविद्यया प्रेयश्च भवति।

''अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।

एतत् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।।''१३.११।

अत्र अध्यात्मज्ञाननित्यत्वम् आत्मादिविषयं ज्ञानम् अध्यात्मज्ञानम्, ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्वज्ञानं तस्यार्थै मोक्षः। यत् विषयं ज्ञानं तत् एव तस्य ज्ञेयस्य

परिच्छेदकं दृश्यते[११०]। अत्र अग्रिम श्लोकेन (१२) यत् ज्ञेयं ज्ञात्वा अमृतत्वमश्नुते न पुनः क्रियते इत्यर्थः।

"ज्योतिषामपि तज्जयोतिस्तमसः परमुच्यते

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्।।१३.१७।

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।

मद्भक्त एतद्विज्ञायमद्भावयोपपद्यते।।१३.१८।"[१११]

अत्र सप्तदशतम श्लोकेन गीताशास्त्रेव ज्ञानविषयं ज्ञानं, ज्ञेयं, ज्ञानगम्यम् इति त्रित्वस्य अर्थरूपेण विशदयति। ज्ञानं १३.७-११ पर्यन्त श्लोकैः, ज्ञेयं १३.१२.१७ पर्यन्तैः श्लोकेः, (ज्ञानगम्यं/ज्ञानफलं) अनन्तर श्लोकेन एतावत् पर्यन्तं ज्ञानज्ञेयादिकं संक्षेपेण विवर्णितं मद् भक्ताः एतत् सर्वमपि ज्ञात्वा मद् भावाय उपपद्यते मोक्षं गच्छति। चर्तुदशाध्याये गुणत्रय विभागयोगे प्रथम श्लोकेन एवं विचारयति-

"परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः।।१४.१।

इदं ज्ञानमुपाश्रृत्य मम साधर्म्यमागताः

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।।"१४.२।

अत्राद्य श्लोकेन ज्ञानं सर्वेषां ज्ञानानाम् उत्तमम् उत्तमफलत्वात्। तदेव यत् ज्ञात्वा प्राप्य मुनयः सर्वे परां सिद्धिं अवगच्छति। अनेन गत्वा तेन पुनर्जन्म न विद्यते। प्रलये ब्रह्मणः अपि विनाशकाले न व्यथयन्ति[११२]। षष्ठ श्लोकेन 'सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ"। ज्ञानेन किं लाभम् इत्यस्य एवं विशदयति -

"सर्वद्वारेषु देहेऽस्मिन् प्रकाशेपजायते।

ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत।।"१४.११।

शरीरस्य ज्ञानेन्द्रियेषु ज्ञानप्रकाशं यदा उपजायते तदा सत्वगुणं विवृद्धयति[११३]। मोक्ष सन्यासयोगे १८ तमश्लोकस्य व्याख्यानावसरे ज्ञानादीनां हि त्रयाणां सन्निपाते हानोपादानादि प्रयोजनः सर्वकर्म्मारिम्भः स्यात्। अनन्तरं ज्ञानस्य सात्विकादि भेदं २०, २१, २२ तम श्लोकैः विस्तरति तद् यथा-

"सर्वभूतेषु येनैकं भावमव्ययमीक्षते।

अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्।१८.२०।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्धिधान्।

वेत्ति सर्वेषु भूतेषु तजज्ञानं विद्धि राजसंम्।।१८.२१।

यत्तु कृत्स्न वदेकस्मिन् कार्यो सक्तमहैतुकं।

अतत्त्वार्थवदल्पं च तत् तामसमुदाहृतम्।।"१८.२२।

सर्वभूतेषु येन ज्ञानेन एकैव आत्मवस्तुं पश्यति तादृशज्ञानं सात्विक ज्ञानमिति। अनेनैव साक्षात् सम्यग् दर्शनं भवति अद्वैतात्मविषयकं सात्विकज्ञानमिति। ततः परं प्रतिशरीरेषु पृथक्त्वेन अन्यत्वेन यत् ज्ञानेन भिन्नान् आत्मनः पृथक् प्रकारान्, सर्वभूतेषु ज्ञानस्य कर्त्तृत्वासंभवात् येन ज्ञानेन भवति तद् ज्ञानं विद्धि राजसम्। तामस ज्ञानन्तु यत् ज्ञानं समस्तवत् सर्वविषयश्च एकस्मिन् कार्ये देहे बहिः वा प्रतिमादौ वा आत्मा ईश्वरो वा न अतः परमस्ति तादृश अतत्त्वार्थवत् अहैतुकत्त्वात् तत् ज्ञानं तामस ज्ञानमिति। तामसानां नाम प्राणिनाम् अविवेकिनाम् ईदृशं ज्ञानं दृश्यते[११४]।

"सिद्धिं प्राप्तो यथा ब्रह्म तथाऽप्नोति निबोध मे

समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा।।"१८.५०।[११५]

### ४.२.१ गीता व्याख्याने ज्ञानं कर्म च

लभ्यमानेषु गीताव्याख्यानेषु प्राचीनं भवति श्रीशङ्करेण विरचित अद्वैतभाष्यम्। तत्र उपोद्धातभाष्ये ‘‘तदितं गीताशास्त्रं समस्त वेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थम् इति पदद्वयेन अस्य गीताशास्त्रस्य संपूर्ण प्राधान्यं समस्त लोकोपकारार्थंम् अर्जुनं निमित्तीकृत्याह भगवान् वासुदेवः’’ इति अनेन अस्य प्राधान्यं द्योतयति। अत्र गीताव्याख्यानेषु ज्ञानं कर्मं अनयोः समन्वयादिकम् एवं वैरुद्ध्यादिकं च अत्र चिन्तयति। अद्वैतसिद्धान्तरीत्यायेव शंङ्करभाष्यानन्तरमागत “ गूढार्थदीपिका ” नाम मधुसूदनसरस्वत्याः भाष्ये अष्टादशाध्यायाः काण्डत्रयैः विभक्तं वर्तते। अत्र कर्म-ज्ञान-भक्ति-इत्यादि क्रमेणैव त्रैविद्यत्वमकरोत् [११६] । अस्याध्यायस्य चिन्तनीय विषयः ज्ञानमिति, तत्र कर्मणः प्राध्यान्यादिकमत्र विचारयति। भाष्यकारेषु ज्ञानेन एव कैवल्यम् इति विचारयति, अद्वैतिनः, केच्यनाः ज्ञानकर्मसमुच्चयवादिनः, अन्ये कर्मणा मोक्षप्राप्तिः अन्ये भक्त्या, अन्ये योगेन, ध्यानेन इत्यादिरुपेण बहवः व्याख्यातारा: भिन्नसिद्धान्तरीत्या/ दर्शानिकरीत्या व्याख्यानमकरोत् च।

‘‘ज्ञानाग्निः सर्वकर्मीणि भस्मसात्कुरुतेऽर्जुन’’ (४/३७), ’’सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते’’ (४/३३) एतादृशानि ज्ञानसम्बन्धीनि बहुनि श्लोकांशानि गीतायामर्न्तभवन्ति [११७]। कर्मविषये अद्वैतिनां विचारस्तु यथा - कर्मणा चित्तशुद्धिरेव प्रयोजनम्, चिन्तशुद्धिद्वारा मोक्षं प्राप्तुं शक्यते इति सिद्धान्तयति अर्थात् कर्म मोक्षस्य प्रत्यक्षकारणं नास्तीति एतेषां मतम्। मोक्षविषये कर्म परोक्षकारणमिति शंङ्करादीनां अद्वैतिनां वादः। अस्य सिद्धान्तस्य स्थापनाय उपनिषदादीनां साहाय्येन गीताभाष्यस्य ज्ञानविषयप्रतिपादकसन्दर्भेषु विशेषतया भाष्यं करोति। एवं चेद् गीताभाष्ये कर्मविषय प्रतिपादकेषु सन्दर्भेषु अस्योपरि अधिकं न भाष्यति। शांङ्करभाष्ये उपोद्घातभाष्ये द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो, निवृत्ति लक्षणश्च जगतः स्थिति कारणमिति। धर्मद्वयमं शोकमोह महोदधौ निमग्नाय

अर्जुनायोपदिदेश गुणानुष्ठानेन धर्मः प्रचयं गमिष्यतीति। कर्मणः प्रत्यागमनमेव निवृत्तिः गीतायां निवृत्ति लक्षणं धर्मं ज्ञानवैराग्यलक्षणम् इति गीताशास्त्रे च उक्तम्[११८] अस्य लक्षणस्तु ज्ञानं वैराग्यञ्च। गीताशास्त्रे च अन्यत्र [११९] निवृत्ति मोक्षहेतुः सन्यासमार्गः इति। अत्र वैराग्यं नाम वैराग्यं दृष्टादृष्टभोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यम् [१२०] । साधनचतुष्टयसम्पत्या ब्रह्मज्ञानाय धर्मज्ञानमपि नावश्यकमिति शंङ्करसिद्धान्तः। अत्र वर्णाश्रमधर्माणां ज्ञानम् अनुष्ठानादिकं वा नावश्यकं चित्तशुद्धिरेव मोक्षाय तत्प्रयोजनाय। तदर्थमेव प्रवृत्तिमार्ग अथवा कर्मयोगम् कर्मानुष्ठानार्थं अहं ममाभिमानेन युक्तः एवावश्यं कर्मसन्यास योगे अहममाभिमानरहितो भूत्वा एवं अकर्ता इति विचारः एवावश्यम्। कर्मसन्यासमिति पदेन सर्वथा सर्वत्र च सर्वकर्मसन्यासमिति विवक्षतो [१२१]।

एषणात्रय सन्यासमेव अनेनपदेन गीतायाः विवक्षा। ज्ञानयोगस्य सम्यगनुष्ठानाय इन्द्रियनिग्रहम् एवं मनोनिग्रहं च अवश्यम्। कर्मसन्यासमिति पदम् अन्यथा चिन्त्यते चेत् कर्मणि अकर्मः, एवं अकर्मणि कर्म च यदा दर्शयति तदायेव। गीताभाष्ये ३/४ कर्मयोगोपायत्वात् नैष्कर्म्यस्य इत्यपि उक्तम्[१२२] । अत्र एवं विचार्यते चेत् कर्मयोगे विंशति (२०) तम श्लोकेन -

"कर्मणैव हि संसिद्धिमास्थिता जनकादयः
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि।।"३.२०।

अनेन श्लोकेन मुमुक्षु चेदपि लोकसंग्रहार्थमेव कर्मकरोतीति अत्र सिद्धान्तयति च। कर्मानुष्ठानेन कैवल्यपदप्राप्तिं प्राप्तुमुद्युक्ताः तादृशाः जनकादयः राज्ञाः। अनेन कर्मानुष्ठानेन कैवल्यं प्राप्तुमुद्युक्ताः तादृशः लोकसंग्रहार्थय अवश्यं करणीयानि कर्माणि करोति [१२३] । गीताशास्त्रे एवं तृतीयाध्याये कर्मयोगे तृतीय श्लोके -

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानध
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।"३.३।

उपनिषत्सु केवलं ज्ञानविषयमेव विचारयति, तत्र कर्मयोगम्, अथवा कर्म विषयमधिकृत्य विचारः न्यूनायेव [124]। तस्मिन्नेवावसरे गीताशास्त्रस्य महत्वमधिकं वर्धते। भगवता अत्र ज्ञानयोगस्य प्राधान्यादिकं विवृणोति।

“नहि ज्ञानेन सदृशं पवित्रमिह विद्यते

तत्स्वयं योगसंसिद्धिः केवलेनात्मनि विन्दति।।”४.३८।

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्। एतदज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा

“श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।”४.३९।

आद्य श्लोकेन ज्ञानेन सदृशं पवित्रं पावनं शुद्धिकरम् इह् नास्ति। तद् ज्ञानं स्वयमेव मुमुक्षुः कालेन महता आत्मनि विंन्दति इत्यर्थः। तदर्थम् अस्य उपायः अग्रिमश्लोकेन श्रद्धावान् श्रद्धालु लभते ज्ञानं, श्रद्धा नाम आत्मविषया बुद्धिः इति गीता व्याख्याने उक्तं च। ज्ञानं लब्ध्वा परां मोक्षाख्यां शान्ति उपरितिंम् अचिरेण अधिगच्छति[125]।

“सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पंण्डितः

एकमप्यास्थितः सम्यगुभर्योविंदते फलम्।।५.४।

यत्सांख्यैः प्राप्यते स्थानं तद्धोगैरपि गम्यते

एकं सांख्यं च येगं च यः पश्यति स पश्यति।।”५.५।

पंडितास्तु ज्ञानिन एकं फलमविरुद्धमिच्छति, एवं पंण्डा नाम आत्मविषया बुद्धिः तं पंण्डितम् इति भाष्ये। सन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादि संयुक्तो सांख्ययोगशब्द वाच्याविति भगवतः मतम् [126]। एकं साख्यं च योगं च यः पश्यति फलैकत्वात्स पश्यति सम्यक्पश्यतीत्यर्थः।

“नादत्ते कस्यचित्पापं न चैवं सुकृतं विभुः
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जंतवः।।५.१५।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः
तेषामदित्यवज्ज्ञानं प्रकाशयति तत्परम्।। ५.१६।
तद्बुद्ध्यस्तदात्मानस्तन्निष्ठास्तत्परायणाः
गच्छन्त्यपुनरावृत्तिं ज्ञानर्निधुतकल्मषाः।।” ५.१७

ज्ञानमार्गावलम्बिनः अनेन मार्गेण अग्रेगात्वा मोक्ष पदं प्राप्य एते न पुनरावर्तन्ते। तदेव छान्दोग्ये (८/१५/१) “तद्धैतद्ब्रह्म प्रजापतय उवाच प्रजापर्तिमनवे मनुः प्रजाभ्य आचार्यकुलाद्वेददमधीत्य यथाविधानं गुरोः कर्मातिशोषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधादात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेम्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पदयेत् न च पुननावर्तते न च पुनरावर्तते।”[१२७]

ईशावास्ये च अन्यरीत्या एवं प्रस्तौति-

““‘विद्या चाविद्यां च यस्तद् वेदोभयं सह्
अविद्यया मृत्युंतीत्वा विद्ययामृतमश्नुते।। इति।।” [१२८]

समानरीत्यायेवा मनुस्मृतौऽपि /२/ ८६

“तपसा कल्मषं हन्ति विद्यामृतमश्नुते।।” [१२९]

अत्र उदाहृतस्थलेषु केवलेन ज्ञानेनैव कैवल्य प्राप्तिरित्युक्तम् एवं चेद् अन्यत् केचनाः न केवलं कर्मणा, न केवलं ज्ञानेन वा कैवल्यं भविष्यति तदर्थं ज्ञानकर्मसमुच्चयवादस्य साहाय्यमपि तैराविष्कृतम्। श्रीशंङ्करेण स्वीयभाष्येण ज्ञानकर्मसमुच्चय वादस्य

निराकरणमपि अकरोत्। श्रीमद् भागवतादिषु परस्पराश्रय रूपेण ज्ञान-कर्मयोः सह सम्बन्धः विस्तरति।

"निर्वृणानां ज्ञानयोगः कर्मयोगस्तु कामिनाम्।।"[१३०]

एवं सिद्धान्तयति यथा ज्ञानेन कर्मणः शुद्धिः, एवं शुभकर्मणा ज्ञानवृद्धिरिति अन्यत् केचनाः वदन्ति। क्रमयोगेन एवं कर्मसन्यासेन फलं समानमेव इति साक्षात् गीताायामेव उक्तम्। अत्र गीताव्याख्याने ज्ञानं कर्म च इति विषयमत्रोपसंहरति इतोऽपि अधिक विषयः अस्ति अस्य सामान्य परिचयमेव अत्र  दत्तम।

### ४.२.२ ज्ञानकर्मसमुच्चयवादः तस्य निरासश्च

"लोकेऽस्मिन् द्विविधा निष्ठा पुराप्रोक्तामयानघा।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।"३.३।

परमपद प्राप्त्यर्थं वैदिक कालात् आरभ्यैव प्रधानेन कर्ममार्गः, ज्ञानमार्गः इति द्वौ पत्थानौ स्तः। विषयोऽयं महाभारतादिषु च उक्त विषयमेव। महाभारतान्तर्गत गीतायां निष्ठाद्वैविध्यम् उक्तमेव-सांख्ययोगः, कर्मयोगश्च तौ वेदान्तशास्त्रान्निर्गताः। ज्ञानकर्मसमुच्चयेन यथा ब्रह्मचर्या गार्हस्थ्यानां कृते आश्रमेषु विहित कर्मणाम् अनुष्ठानेन साकं वानप्रस्थ सन्यासादि आश्रमेषु तत्र ज्ञानेनैव अमृतत्वमाप्नोति। अमुं विषयमधिकृत्य वेदान्तशास्त्रे वैविध्यं दृश्यते। शंङ्करादयः मोक्षः केवलं ज्ञानादेव सम्भवति न तु कर्मणा इति। अन्येतु केवलात् साक्षात्मोहप्राप्तिः यथा कर्मानुष्ठानेन साकं ज्ञानं युक्त परमपदमाप्नोति इति। प्रथमोक्तस्य उदाहरणत्वेन जनक, श्रीकृष्णादयः च द्वितीयस्य यथा श्रीशुकः ब्रह्मणः मानसपुत्रो सनकसनान्तादयश्च। अस्य विषयमेव गीतायाः शाङ्करभाष्ये प्रवृत्तिलक्षणं धर्मं, विवृत्तिलक्षणं धर्म इति समान विषयमेव उद्धिश्यते।

अस्य विषयस्योपरि श्रीशङ्करेण स्वकीयप्रस्थानत्रयभाष्येषु स्पष्टरीत्या ज्ञानकर्म समुच्चयवाद निराकरणं अकरोत्। बहदारण्यकोपनिषद् भाष्ये (४.४.७) [१३१] , छान्दोग्योपनिषद्(२.२३.१)[१३२] भाष्ये एवमेव ब्रह्मसूत्रभाष्ये (३.२.४)[१३३] ईश्वररूपापरिज्ञानाद्। बन्धस्तस्वरुप परिज्ञानात्तु मोक्षः इत्युक्तः। समानरीत्या ब्रह्मसूत्रस्य तत्तुसमन्वयात्(१/१/४) [१३४] , इयदधिकरणे इयदामननात्(३/३/३४) [१३५] , सप्तगत्यधिकरणे हस्तादयस्तु स्थितेऽतो नैवम्(२/४/६)[१३६], शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः इति सूत्रं पुरुषार्थाधिकरणे(३/४/२) [१३७] , पराभिध्यानात्तु तिरोहितं ततोह्यस्य बन्धविपर्ययौ सन्ध्याधिकरणम् (३/२/५)[१३८] इत्यादि भाष्य सन्दर्भेषु केवल ज्ञानादेव मुक्तिः। अत्र ब्रह्म विद्यैव मोक्षकारणमित्युक्तम्।

अनन्तरम् मध्वसिद्धान्तानुसारेण द्वैतवेदान्ते ज्ञानकर्मसमुच्चयवाद विषये कथं तेषां व्यवहारः इति विशदयताम्। स्वकीय सिद्धान्ते मद्धाचार्येणापि ज्ञानकर्मसमुच्चयवादस्य निराकरणमेव अकरोत्। एवमनेन सापेक्षाफल कर्माणि एव आचार्येण निषिध्यते तस्मिन्नेवावसरे फलापेक्षारहित कर्माणि न निषिध्यते च। विशिष्टाद्वैतदर्शनानुसारेण श्रीमन्नारायणः ब्रह्म अस्य सर्वोत्तमत्वम् अत्र दर्शने विशदयति। अस्य सिद्धान्तानुसारेण कर्म-भक्तिः च ज्ञानप्राप्त्यर्थम् उपायाः। एवं भक्तिरुपापन्नं ज्ञानम्। कर्म विषये कर्म फलेच्छारहितेन कृत्वा निष्कामकर्म भवति। अस्य मते ज्ञानकर्म समुच्चयविषये प्राधान्यं नस्ति। येतु द्वैतवादिनौ विशिष्टाद्वैतवादिनो वा तेषां मतेज्ञान कर्म समुच्च्यपक्षः संघटते [१३९]।

ज्ञान-कर्मसमुच्चयवाद विषये वेदान्तेदर्शने एव मतभेदाः सन्ति। शङ्करानन्तरस्थाः भामति विवरणव्याख्यानयोः कर्मणां विवदिषार्थत्वमुक्तम् [१४०] । श्रीप्रकाशात्मयतिना शारीरककाव्यसंग्रहे सर्वोपेक्षाधिकरणे- यज्ञेन विविदिषन्ति इति कर्मणि ज्ञानसाधनत्वं विधीयते इत्युक्तम् च । अनन्तरं श्री द्रविडाचार्येस्य मतानुसारेण अज्ञानादेव बन्धः संसारित्वमज्ञानोपगयमेव मोक्षः स्वरुपावगतिरुपः मोक्षः। अपरः आचार्य भर्तृप्रपञ्चस्तु

मोक्षसाधनं न केवलं कर्म न वा केवलं ज्ञानं किन्तु ज्ञानकर्मसमुच्चयः[१४१]। एवं ज्ञानेन साकं (भक्त्याः) उपासनयाः च महत्वमङ्गीकरोति। अनन्तरंम् आचार्यब्रह्मदत्तेन अज्ञाननाशनस्य उपायो मोक्षसाधनं वा न केवलं ज्ञानं, न वा केवलं कर्म किन्तु उभयमेव कर्म च ज्ञानं च। अहं ब्रह्मास्मीति ज्ञानाभ्यासेन सह वैदिककर्मकरणेन ज्ञानकर्मसमुच्चय सङ्गच्छते [१४२] गौडपादस्यमतानुसारेण अद्वैतज्ञानमेव मोक्षसाधनम् । तत् 'तत्वमसि' इत्यादि महावाक्यजन्यप्रबोधेन भवति[१४३]। मण्डनमिश्रस्य मतानुसारेण अविद्यैवात्मा संसारी भवति विद्यया च मुक्तो भवति[१४४]। यदि ब्रह्मणो जीवस्तत्वतो भिन्नः स्यात्ततः स्यादेवम्, किन्त्वविद्यया, अतो विद्ययाविद्यानिवृतौ यथा ब्रह्मरुपमेव भवति[१४५]। तदर्थं न केवलं कर्म वा अलं न वा केवलं ज्ञानं किन्तु कर्मज्ञानञ्चोभयमेव कारणम्।

इतः परं श्री शङ्करगीताभाष्ये अशोच्यानन्वशोचस्त्वम् इति श्लोकांशे शोकमोहै तयोः च सर्व कर्मसन्यास पूर्वकात् आत्मज्ञानात् न अन्यतो निवृत्तिरिति उक्तम्। अत्र केचिदाहुः सर्वकर्मसन्यासपूर्वकात् आत्मज्ञाननिष्ठमात्रादेव केवलात् कैवल्यं न प्राप्यत् भूयात् किं तर्हि अग्निहोत्रादि श्रौतस्मार्तकर्म सहिताज्ज्ञानात् कैवल्य प्राप्तिरिति सर्वासु गीतासु निश्चितोऽर्थः। (गीत २/२१)[१४६]। एवं ४-१८ कर्मण्यकर्मः पश्यत् इति शलोकस्य भाष्यावसरे च कैश्चित् कथं नित्यानां किल कर्मणामीश्वरार्थानुष्ठीयमानानां तत्फलाभावादकर्मणि तान्युच्यन्ते गौण्या वृत्या[१४७]। एवं रुपेण बहुवारं श्रीशंङ्करेण ज्ञानकर्मसमुच्यवादस्य निराकरणं कृत्वा कवलेन ज्ञानैव कैवल्यप्राप्तिरिति संस्थापितं च। तत् सिद्धान्तस्य दृदीकरणमेव प्रस्थानत्रयभाष्येषु दृश्ययते। विषयोऽयं प्रधानेन गीताशास्त्रे एव उक्तं किन्तु प्रत्यक्षरुपेण परोक्षरुपेण च ब्रह्मसूत्रे उपनिषत्सु अपि परिचिन्तित विषयेऽवयां।

भगवतः साक्षात् मुखात् आगत्य अर्जुनं निमित्तीकृत्य जगदः सर्वेषां ज्ञापनाय उपदिष्टा गीतायां ज्ञानकर्मसमुच्चयवादात् बहिः भक्तिसिद्धान्तः सन्यासविचारः, योगविचारः इत्यादिभिः भिन्नरीत्या विषयाः चर्चयति। शङ्करादीनाम् अद्वैतसिद्धान्तानुसारेण कर्मणा चित्तशुद्धिरेव

प्रयोजनं, न कैवल्यप्राप्तिः अतः एव गीताशास्त्रे कर्मस्य त्रैविद्यात्वरुपेण व्याख्यातम्। कर्म, अकर्म, विकर्म इति भदेनः एतत् दृश्यते। अतः एव गीतायां गहना कर्मणे गतिः(४.१७)''[१४८] इत्युक्तम्। मधुसूदनसरस्वतिना अपि ज्ञानकर्मसमुच्चयवादं निराकरोति। अस्य कारणरुपेण रजोगुण एवं सत्वगुणः द्वयोः अपि एकस्मिन्नेव समये प्रयोगं न शक्यते। कर्म रजोगुण प्रधानं भवति, एवं ज्ञानं सत्वगुणप्रधानं च भवति। तदेव *गूढार्थदीपिकायां* ६ श्लोकेन ''यतः समुच्चयो नास्ति तयोरतिविरोधतः''३/३ श्लोक भाष्यावसरे इत्युक्तं च ।एवमुक्त्वा विषयोऽयम् उपसंहरति ।

## ४.३ ज्ञानं भक्तिः च अस्योपरि आचार्यत्रयाणां मतम्

उत्तरमीमांसायाम् अथवा वेदान्तदर्शने उपनिषद्विद्यायाः परमतत्वं ब्रह्म इति विषये समानमताः। तदर्थं तद् ब्रह्म कथं प्राप्यते इति विषये, एवं जीवात्मानः कथं ब्रह्मैः सह कीदृशः सम्बन्ध इति विषये तर्यो मतभेदं वर्तते। अस्य ब्रह्मपदप्राप्तिः कथमिति विशदीकरणावसरे एव तयोः भेदत्वं दृश्यन्ते। अत्र श्री शङ्कराचार्यादीनां वेदान्तदर्शने ज्ञानं भक्त्याः च स्थानं एवं मध्वादीनां द्वैतदर्शने, भक्त्या च स्थानम्, एवमेव रामानुजादीनां विशिष्टाद्वैतदर्शने च ज्ञानं भक्त्यासह सम्बन्धः कीदृशमिति अत्र विचारयति।

अद्वैतवेदान्ते विशुद्धचैतन्यस्वरुपं ब्रह्मैव तद् प्राप्तुं प्रतिबन्धकारणं अज्ञानमेव। ज्ञानेन अज्ञाननिवृत्या कैवल्यं प्राप्तुं शक्यते[१४९]। ज्ञानार्जनाय श्रवण-मनन-निदिध्यासनादिना एव तत् प्राप्तुं शक्यते [१५०] । अस्य दर्शनानुसारेण कर्म नावश्यक्म् एवं भक्तिः च। अस्य सिद्धान्तानुसारेण कर्मणा केवलं चित्तशुद्धिरेव प्रयोजनम् इति। ज्ञानार्जनेन जीवात्म-परमात्मनोः परस्परभेदं नास्ति इत्यनुभवः जायते। तदैव 'तत्वमसि' इति महावाक्येन किमुद्दिश्यते तस्य सफलीकरणम्, आनन्तमनुभवति अस्मिन् शाङ्करादीनाम् अद्वैत दर्शने ज्ञानं विना न कैवल्यं प्राप्तुं शक्यते [१५१] । प्रपञ्चस्य वस्तुसर्वमपि सत्तात्रयेन गण्यते-प्रातिभासिक-व्यावहारिक-पारमार्थिक इति त्रैविध्यम्। यथा व्यावहारिक सत्यं नाम

रज्जुसर्पमेव। प्रतिभासिक सत्यमेव जगत्, पारमार्थिक सत्यं त्रिकालाबाध्यं ब्रह्मैव [१५२]। अस्य दर्शनानुसारेण भक्त्याः स्थानं गौणमेव। अत्र साधनचतुष्टयसम्पत्या श्रवणादिकं कृत्वायेव ज्ञानार्जनम्, आनन्तमार्जयति। अद्वैते जीवात्मानाः समानाः एव विशिष्टाद्वैते जीवात्मा भिन्नाः यथा घटाकाशं, मठाकाशं इत्यादिवदेव। अतः एवं वक्तुं शक्यते अद्वैतवेदान्तानुसारेण परमपुरुषार्थ प्राप्तिविषयं भक्तिमधिकृत्य विचाराः न्यूनमेव। अतः एव-

"श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः।।"

अग्रिमविचारः वैष्णव भक्तिप्रस्थानेषु ब्रह्म सम्प्रदायः इति अपरनाम्ना च प्रसिद्धं भवति द्वैतवेदान्तम्। अस्यसिद्धान्तस्य दृढीकरणाय मध्वाचार्यः अपि प्रस्थानत्रयस्य व्याख्यानेनैव स्वीयमतं स्थापितम्। तदर्थं द्वैते तत्र विचारितेषु भेदश्रुतिषु, एवमनेन भागवतादि भक्ति प्रधानग्रन्थाः अधिकतया स्वीकृतम्। अस्य सिद्धान्तानुसारेण जीवाः जगदश्च ब्रह्मात् भिन्नमेव। एते भिन्नाः चेदपि ब्रह्मैव आश्रयभूताः च। एतेन तत्वसंख्याने ईश्वरः एव स्वतन्त्रतत्वम् अन्यत् सर्वम् अस्वतन्त्र इति। यथा "स्वतन्त्रम् अस्वतन्त्रं च द्विविधं तत्वम् इष्यते" [१५३]। एतदेव अस्य दर्शनस्य मूल तत्वानि। अस्यां दर्शने पञ्चविध भेदाः विचारयति। एतेषां पञ्चानाम् एकत्वमिति विचारः मिथ्याज्ञानमेव अनेन मिथ्याज्ञानेन संसारबन्धं च भवति। पूर्वोक्त पञ्चभेदाः यदा प्रत्यभिज्ञायते तदायेवमुक्तिः साधयति।

अपरोक्षज्ञान समर्थनाय तदर्थम् आत्मानं योग्यः भवितव्यं तदर्थं साधना अनुष्ठेयम्, अत्र साधना कार्येषु भक्तिः प्रधान कारण रूपेण च भवति। ईश्वरमाहात्म्यं यदा जानाति तदा तं भगवन्तं प्रति भक्ति) अन्तकरणे जायते। लौकिककार्येषु विचारः च सफलीकर्तुम् ईश्वरभजनं न करणीयमिति तेषां मतम्। ईश्वरप्राप्तिरेव साधनीयमिति चिन्तयैव ईश्वर भजनम् आचारणीयम्। भक्त्याः धार्मिकानुष्ठानार्थं कर्मानुष्ठानमपि करणीयं यथा निष्कामकर्मरूपेण भवेत्। भक्त्या भक्तानाम् अन्तकरणे ईश्वर एव स्वतन्त्रतत्वं भक्त-ईश्वरयोः सह सम्बन्धः

बिंबप्रतिबिंबवत् भवेत्। तत्र ईश्वरः बिंबः भक्त अस्य प्रतिबिम्बश्च। द्वैतेऽपि ज्ञानयोगं वर्तते अस्य स्वायत्ताय श्रवणं, मननं, निदिध्यासनं च आवश्यकम्। भक्तिः ज्ञानं च परस्पर पूरक रूपेण भवेत्। ज्ञानयोगं विना भक्तिः न समीचीनं तत् वैकारभाव एव। एवमेव भक्ति रहित ज्ञानयोगमपि व्यर्थमेव। भगवन्तं प्रति अज्ञानेन सन्देहादिकं भक्तेः विरुद्धैव। सर्वदा ईश्वर प्रेमं दृठीकरणीयम्। अनेन भक्तः ईश्वरं स्वीयबिंबमिति विजिन्त्य उपास्यति तदा भक्तिमार्गं, ज्ञानमार्गं च एकी भूत्वा परमपदं प्राप्तुं शक्यते। अत्र द्वैतदर्शनानुसारेण ज्ञातुं शक्यते मोक्षप्राप्तेः भक्तिः ज्ञानं च समानरूपेण वर्तते। किन्तु भक्तेः प्राधान्यम् अस्ति।

आचार्य त्रयाणामिति पदेन विविक्षित दर्शनेषु तृतीयं भवति विशिष्टद्वैतम्। वैष्णवदर्शनेषु श्रीसम्प्रदायमिति अपरनाम्ना प्रसिद्धम्। अस्य मतस्य स्थापकः श्रीरामानुजः। अद्वैतदर्शने उपनिषत्सु विचारित अभेदश्रुतौ प्राधान्यं ददाति, द्वैते तत्र विचारितेषु भेदश्रुतिषु एव प्राधान्यं विचार्यते। अत्र विशिष्टाद्वैते एषु द्वयेष्वपि भेदश्रुतिषु अभेदश्रुतिषु च समान प्रधानयुक्ताः इति चिन्तयति। यथा जीव जगदश्च ब्रह्मणात् भिन्नाः एवमभिन्नाश्च। अत्र प्रधानेन त्रीणि तत्वानि सन्ति। चित्त, अचित्, ईश्वरः च[१५४]। अस्य दर्शनानुसारेण पञ्चरात्र सिद्धान्तम् अङ्गीकरोति[१५५]। अस्य दर्शने ब्रह्मसङ्कल्पः विष्णुः अथवा नारायणः [१५६]। ईश्वर भक्त्यायेव तं भगवन्तं प्रातुं शक्यते अतः ब्रह्मश्च सगुण एव। अद्वैते ब्रह्मनिर्गुणः। अस्य दर्शने भक्तेषु नवप्रकाराः सन्ति। ईश्वरः समस्त जगतः निमित्त कारणरूपेण वर्तते। उपादान कारणमपि अस्ति। जगतः जीवानां च कारणभूतः सूक्ष्मचिद् चिद्वैशिष्ट्येनीश्वरः कारणब्रह्म इति कथ्यते। तद् ब्रह्मैव भक्तान् अनुग्रहयितुं परः व्यूहः विभवः, अर्न्तयामि, अर्चवताश्चेति पंचरूपाणि धारयति। ब्रह्म विर्भुजीवोऽणुः, ब्रह्म सर्वशक्तिसम्पन्न सर्वज्ञ, जीवः स्वल्पशक्तिकः अल्पज्ञश्च। रामानुजमते मुक्तावस्थायामपि जीवः सर्वथा ब्रह्मणः पृथक् भूत्वा तदानन्दमास्वाद्यते। एवं मोक्षदायिका विष्णुभक्तिः एव। श्रीनारायणस्य चरणकमलयोरात्मसमर्पणं सर्वोत्तमं साधनमस्ति। कर्मफलस्य क्षयित्वं ब्रह्मज्ञानफलस्य चाक्षयित्वं ''परीक्ष्य लोकात्कर्मचितान्तान्ब्रह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं

स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " (मुण्डकोपनिषद् १.२.१२)[१५७] इत्यादि श्रुतिभिरनुमानार्थपत्त्युपबृंहिताभिः प्रत्यपादि। एकैकानिन्दया कर्मविशिष्टस्य ज्ञानस्य मोक्षसाधनत्वं दर्शयति श्रुतिः - अन्धं तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः।।बृहदारण्यकं ४.४.१०।[१५८]। भगवत् प्रपत्तिरपि जीवस्य पुरुषार्थेन न सिद्ध्यति तत्रापि भगवतः कृपाहेतुः। अस्य दर्शनेनैऽव भक्त्याः प्रकारद्वयं च विवर्णितम्। यथा मर्कटकिशोरवद् द्वितीयं मार्जारकिशोरवद् इति। प्रथमेन मर्कट बालो स्वरक्षार्थं मातुः शरीरे स्वशक्त्या अश्लिष्यति तादृशमेव भगवच्छरणापन्नो जनाः स्वशक्त्या भगवच्चरणशरणेन सर्वविघ्नं निवारयति। द्वितीय प्रकारेण मार्जार बालः चेष्टाशून्यो भूत्वा तिष्ठति स्वयं किमपि न करोति माता स्वेच्छया तं निधाय रक्षति, गच्छति। समानरीत्या भक्त स्वच्छरणापन्नः सन् तत्कृपामेवानुभवति च। अत्रापि विना भक्त्या विशिष्टाद्वैत दर्शन कैवल्यं न अनुभूयते। एवं भवति विशिष्टाद्वैत दर्शने ज्ञानार्जने भक्त्याः स्थानम्।

### ४.३.१ भक्तियोगे ज्ञानस्य प्रधान्यम्

उपनिषदादिषु विचारित विषयमेव ज्ञानम्। तस्योपरि गीताभाष्ये तृतीयाध्याये चतुर्थ श्लोकस्य व्याख्यानावसरे अद्वैतभाष्यकारेण श्रीशङ्करेण यथा " ज्ञानं शास्त्रतः आचार्यतश्च आत्मादीनाम् अवबोधः"[१५९] इत्युक्तम्। तत्र ज्ञानमित्यस्य गीतानुसारेण सांख्यम् अथवा सांख्यबुद्धिः इति वक्तुं शक्यते। भक्तिविषये च गीताशास्त्रे बहुवारम् व्यचरत्[१६०]। अस्योपरि बालगंङ्गाधर तिलकमहोदयेन एवं स्थापयति भगवद्गीतानुसारेण भक्तिः न केवलं श्रवणं कीर्तनम् आदिः न अन्यथा कर्ममयभक्तेः तत्वं गीतायामेव दृश्यते। एतद् विषयमेव गीतायां प्रतिपादित भक्तेः सविशेषता इत्यस्य मतम्। भक्ति-ज्ञानयोः मध्ये रामानुजमते कर्म भक्तौ एव ज्ञानस्य कारणरूपेण वर्तते। तत्रापि कर्मापेक्षया अधिकं प्राधान्यं भक्तेः अस्तिती अनेन सिद्धान्तयति। एवं ज्ञानस्य अपररूपवत् भवति भक्तिः इत्यपि तेषां मतम्। "भक्ति रुपान्तं ज्ञानम्"। ज्ञानपूर्णपरस्नेहो नित्यो भक्तिरितीर्यते। अद्वैत सिद्धान्ते अज्ञानस्य नाशनेन

ज्ञानप्राप्तिः यदा भवति तदायेव मुक्तिः भवति। ज्ञानार्जनाय श्रवण-मनन-निदिध्यासनादिकं करणीयमेव[१६१]। एवं चेद् भक्त्यर्थं यथा-

"श्रवणं कीर्तनं विष्णो स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं संख्यमात्मनिवेदनम्।।"[१६२]

इत्यादिना क्लेशरहितमार्गेः अथवा कलियुगादिषु कर्तुम् इतोऽपि सुगमपन्था रूपेण भक्तिमार्गं कथ्यते। एतयोः द्वयोः मध्ये गीताशास्त्रे अद्वैतसिद्धान्तानुसारेण गीताभाष्यकर्ता मधुसूदनसरस्वत्याः गूढार्थदीपिकानुसारेण ज्ञाने भक्त्याः स्थानं कीद्शमिति विचारयति। ज्ञानविषये तृतीयाध्याये कर्मयोगे द्वात्रिंशत्(३२) तम श्लोकेन एवं विचारयति[१६३]।

तृतीयाध्याये एकोनचत्वारिंशत् तम श्लोकस्य व्याख्याने अत्र ज्ञानं शास्त्राचार्योपदेशजं परोक्षं विज्ञानमपरोक्षं तत्फलं तर्योज्ञानविज्ञानयोः श्रेयः प्राप्तिहेत्वां त्वमिति[१६४]। यथा भक्ति विषये गीतायाम् (१३.२२) इत्यस्य भाष्यावसरे " ज्ञानलक्षणा भक्ति " इति श्रीशङ्करेणोक्तं च [१६५] । गीतायां च (१३.१०) श्लोकव्याख्याने ज्ञानिनः प्रधानलक्षणरूपेण भक्तिं व्याख्यायति[१६६]। रामानुजमते भक्तिः साधना भक्तिः पराभक्तिः इति द्विधा विभक्तुं शक्यते। द्वैतदर्शने अपरोक्षज्ञानभक्तिः, साधनाभक्तिः, पक्वभक्तिः, परिपक्वभक्तिः, अतिपरिपक्वभवितः, साध्यभक्तिः एवं प्रकारेण विभज्यते। *महाभारततात्पर्यनिर्णये* ज्ञानपूर्णपरस्नेहो नित्य भक्तिरितीर्यते[१६७]। मुक्तिर्निजसुखानुभूतिरमला भक्तिश्च तत्साधनम्[१६८], द्वैते माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिः। अतः एवं वदति तथा दुखमयात् संसारान्मुक्तये एकमात्रं सरलं साधनं भक्तिः। रामानुजमते भक्त्याः प्रधान भेदौ स्तः मार्जारा, मार्कटि च अतः एवं विशदयति यथा आराध्यविषयकारणत्वमेव भक्तित्वम् द्रवीभावपूर्विका हि मनसो भगवदाकारता सविकल्पवृत्तिरुपाभक्ति, द्रवीभावानुपेताऽद्वितीयात्ममात्रगोचरा र्निविकल्पक मनोवृत्तिब्रह्मविद्या। भगवद्गुणगरिमग्रन्थनरुपग्रन्थश्रवणभक्तिसाधनम्, तत्वमस्यादिवेदान्तमहावाक्यं ब्रह्मविद्यासाधनम्। भगवद्विषयक प्रेमप्रकर्षो भक्तिफलम्।

सर्वानर्थमूलाज्ञाननिवृत्ति ब्रह्मविद्या फलम्। प्राणिमात्रस्य भक्तावधिकार ब्रह्मविद्यायां तु साधनचतुष्टयसम्पन्नस्यपरमहं सपरिव्राजकस्य[१६९] 'ऋते ज्ञानान्न मुक्तिः' अर्थात् मुक्तेः साधनं ज्ञानमिति शंङ्करः सिद्धान्तयति। रामानुजमते मोक्षदायिका विष्णुभक्ति श्रीनारायणस्य चरण कमलयोरात्मसमर्पणं सर्वोत्तम साधनमस्ति। एवमेव पूर्वोक्तमर्कटकिशोरवद् एवमेव मार्जार किशोरवत् इति द्विधाशरणागतिः प्रसिद्धा। 'द्वैतसिद्धान्ते मुक्तेः चर्तुविधत्वं जायते। तत्र चरमो भोग एव श्रेयान्। श्लोकस्यः सामीप्यः सारुप्यः सायुज्य इति चतुर्थत्वं वर्तते। अत्र मुक्तेः उत्तमं साधनं श्रीभगवतो अमला भक्तिः।

चतुर्थे ज्ञानयोगे चतुस्त्रिंशत् तमश्लोकस्य अस्य व्याख्यानावसरे भक्तिश्रद्धातिशय पूर्वकेणावनति विशेषेणाभिमुखाः सन्त उपदेक्ष्यन्ति उपदेशेन संपादयिष्यन्ति ते तुभ्यं ज्ञानं परमात्मविषयं साक्षान्मोक्षफलं ज्ञानिनः पदवाक्यन्यायादिमाननिपुणा स्तत्वदर्शिनः कृतसाक्षात्काराः[१७०]। अनन्तरम् ३८ अष्टत्रिंशत् तम श्लोकभाष्यावसरे ज्ञानेन त्वज्ञाननिवृत्या समूल पापनिवृत्तिरिति तत्सममन्यत्र विद्यते। अनन्तरं ३९ तम श्लोके-गुरुवेदान्त वाक्येष्विदमित्थमेवेतिप्रमारुपास्तिक्यबुद्धिः श्रद्धा तद्वानुपरुषे लभते ज्ञानम् [१७१]। पञ्चमाध्यायस्य पञ्चविंशति(२५)तम श्लोकस्य भाष्ये अज्ञानेनाऽवरणविक्षेपशक्तिमता मायाख्येनावृतेन तमसाऽवृतमाच्छादितं ज्ञानं जीवेश्वरजगद् भेदाभ्रमाधिष्ठानभूतं नित्यं स्वप्रकाशं सच्चिदानन्दरुपमद्धितीयं परमार्थसत्यम्। अत्र जीवेश्वरजगद्भेदभ्रमः प्रतीयमानोवर्तते। अनन्तरं सप्तमे अध्याये ज्ञानविज्ञानयोगे द्धितीयश्लोकेन विचार परिपाकनिष्पन्नत्वाच्च तदेव विज्ञानं तेनविज्ञानेन सहितमिदपरोक्षमेव ज्ञानं शास्त्रजन्यं ते तुभ्यमहं परमाप्तो वक्ष्याम्यशेषतः साधनफलादि सहितत्वेन निरवशेषं कथयिष्यामि [१७२]। यद् ज्ञानं नित्यचैतन्यरुपं ज्ञात्वा वेदान्तजन्य मनोवृत्ति विषयीकृत्येह व्यवहार भूमौ भूयः पुनरपि अन्यत्किंचिदपि ज्ञातव्यम्। अस्मिन् तृतीये श्लोके अस्य ज्ञानस्य माहात्म्यम् अनेन श्लोके द्योतयति-

"मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः।।"७.३।

अत्र मधुसूदनसरस्वतिचरणेन शङ्करात् भिन्नरीत्या मनुष्याणां शास्त्रीयज्ञानकर्मयोग्यानां सहस्त्रेषु मध्ये कश्चिदेको अनेकजन्मकृत सुकृत समासादित नित्यानित्यवस्तुविवेकः सन्यतति यतते सिद्धये सत्वशुद्धिद्धारा ज्ञानोत्पत्तये। यततां यतमानानां ज्ञानाय श्रवणमनन निदिध्यासन परिपाकान्ते वेत्ति प्रत्यगभेदेन तत्वमसीत्यादि रुपदृष्ट महावाक्येभ्यः[१७३]। अत्रैव अनन्तरं २८ तम श्लोकैः एवं विचारयति।

"उदारः सर्वे एवैतेज्ञानी त्वात्मैव मे मतम्
अस्थितः सहियुक्तात्मा मामेवानुत्तमागतिम्।।७.१८।
बहुनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।।"७.१९।"

अत्र आर्तादयाः त्रयोरपि भक्ताः सकामाऽपि, उदारः उत्कृष्टाः च पूर्वजन्मार्जितानेक सुकृतराशित्वात्। अन्यथा हि मां न भजेयुरेव। नहि ज्ञानवान् वा कश्चिदपि भक्तो ममाप्रियो भवति। बहुनां जन्मनाम् अन्ते सर्वसुकृत विपाकरुपे वासुदेवः सर्वमिति ज्ञानवान् सन् मां निरुपाधिप्रेमास्पदं प्रपद्यते। समस्तप्रेमविषयत्वेन भजते, सर्वं वासुदेवः इति दृष्ट्या मय्येव पर्यवसायित्वात्। अत्यन्तशुद्धान्तकरणत्वात् जीवन्मुक्तः। अतः सुदुर्लभो मनुष्याणां सहस्त्रेषु दुखेनापि लब्धुमशक्यः। सर्वेऽप्यार्ता जिज्ञासवोऽर्थार्थिनश्च मामेव प्रपन्नाः सन्तोऽनायासेन सर्वोत्कृष्टं मोक्षाख्यं फलं लभन्तामित्यभिप्रायः। परमपुरुषार्थ फलमपि भगवद्भजनमुपेक्ष्य क्षुद्रफले क्षुद्रदेवताभजनेपूर्ववासनाविशेष [१७४] । दशमाध्याये विभूतियोगे चतुर्थ श्लोकव्याख्यानावसरे ज्ञानमात्मानात्मसर्वपदार्थी अवबोधः इत्युक्तं च।

"दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्

मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्।।"१०.३८।

गुह्यानां गोप्यानां मध्ये सन्यास श्रवण मननपूर्वकमात्मनो निदिध्यासन लक्षणं मौनं वाऽहमस्मि। ज्ञानवतां ज्ञानिनां यच्छ्रवणमनननिदिध्यासनपरिपाकप्रभवमद्वितीयात्म-साक्षात्काररूपं सर्वेज्ञानविरोधि ज्ञानं तदहमस्मि । अनन्तरं त्रयोदशाध्याये क्षेत्र-क्षेत्रज्ञविभागयोगे द्वितीय (२) श्लोकस्य व्याख्यानावसरे क्षेत्रज्ञश्च परमार्थ सत्यस्तद्भक्तमधिष्ठानमिति क्षेत्रक्षेत्रज्ञर्योज्ञानं तदेव मोक्षसाधनत्वाज्ज्ञानविद्याविरोधि प्रकाशरूपं मम मतमन्यत्वज्ञानमेव तद्विरोधित्वादित्यभिप्रायः। अस्मिन्नेवाध्याये अष्टादश श्लोकेन एवं विचार्यते-

"इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः

मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते।।१३.१८।"

यस्मात्तत्स्वयं ज्योतिर्जडासंस्पृष्टमत एवं तज्ज्ञानं प्रमाणजन्य चेतोवृत्यभिव्यक्तसंविद्रूपम्। श्रेयं ज्ञातुमहे मज्ञातत्वाज्जडस्याज्ञातत्वाभवेन ज्ञातुमनर्हत्वात्। मद्भक्तो मयि भगवति वासुदेव परमगुरौ समर्पित सर्वात्मभावो मदेकशरणः स एतद्यथोक्तं क्षेत्रं, ज्ञानं, ज्ञेयं च विज्ञायविवेकेन विदित्वा मूद्भावाय परमानन्तभावाय मोक्षायोपपद्यते मोक्षं प्राप्तुं योग्यो भवति[१७५]। चर्तुदशाध्याये गुणत्रविभागयोगे प्रथम श्लोकेन अस्य व्याख्याने परवस्तुविषयत्वात् परमात्मज्ञानसाधनं ज्ञानं वरं श्रेद्धुम्। यथा ज्ञानानां ज्ञानसाधनानम् । यज्ञादीनां बहिरङ्गानां मध्यम, उत्तमफलत्वात्, न त्वमानित्वादीना तेषामन्तरङ्गत्वेनोत्तमफलत्वात् उत्तममित्यनेन उत्कृष्टफलत्वमिति, परंमित्यनेनोत्कृष्ट विषयत्वमुकं यद् ज्ञानं ज्ञात्वा अनुष्ठाय मुनयः मननो शीलाः सन्यासिनः सर्वे परांसिद्धिं मोक्षाख्यमितो देहबन्धनात् गताः। अनन्तरश्लेकन-

“इदं ज्ञानमुपाश्रित्य मम साधर्म्य मागताः

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।।”१४.२।

अत्र प्रतिपादित ज्ञानं ज्ञानसाधनमुपाश्रित्यनुष्ठाय मम परमेश्वरस्य साधर्म्यं मद्रूपतामत्यन्ताभेदेनागताः। उत्पत्ति काले हिरण्यगर्भादिषुत्पद्यमानेष्वपि नोपजायन्ते प्रलये ब्रह्मणोऽपि न व्यथयन्ति च [१७६] । अस्मिन्नेवाध्याये नवमश्लोकेन। सत्वमुत्कृष्टं सुखे संश्लेषयति, सर्वत्र देहिनमित्यनुषज्यते। रजः कर्मणि च सञ्चयतीत्यनुषज्यते। तमस्तु अज्ञाने सञ्जयति। प्राप्तकर्तव्यता कस्याप्यकरण आलस्ये तामस्यां च निद्रायां सञ्जयतीत्यर्थः[१७७] । एकादशम श्लोकव्याख्याने तदेव ज्ञानं शब्दादिविषय उपजायते तदाऽनेन शब्दादि विषयज्ञानाख्यप्रकाशेने लिङ्गेन प्रकाशात्मकं सत्वं विवृद्धमुद्भूतमिति विद्याज्जानीयात्[१७८] । अस्मिन्नेवाध्याये सप्तदशम श्लोकेन श्लोकांशे - “सत्वात्संजायते ज्ञानं’ इत्यस्य भाष्यकारेण सर्वकरणद्धारकं प्रकाशरूपं ज्ञानं सत्वात् संजायते इति[१७९]।

अत्र अनन्तरं षोडशाध्याये दैवासुरसम्बद्धिभागयोगे प्रथम श्लोके “अभयं सत्वशुद्धिर्ज्ञानयोगव्यवस्थितिः” इत्युक्तम् अस्य व्याख्यानेन ज्ञानं शास्त्रादात्मतत्वस्यावगमः चित्तैकाग्रतया तस्य स्वानुभवारूढत्वं योगः तयोः व्यवस्थितिः सर्वदा तन्निष्ठता ज्ञानयोगव्यवस्थितिः [१८०] । अनन्तरं ज्ञानस्य सात्विक-राजस-तामस भेदाः विचार्यन्ते। अस्मिन्नेवाध्याये २०,२१,२२ तमश्लोकैः क्रियन्ते। अव्ययमुत्पत्तिविनाशादि सर्वविक्रियाशून्यमदृश्यमविभक्तमव्यावृतं सर्वत्रानुस्यूतमधिष्ठानतया बाधा विधितया चैकमद्धितीयं भावं परमार्थ सत्तारूपं स्वप्रकाशनन्दमात्मानं येनान्तःकरणापरिणाम भेदेन वेदान्त वाक्यविचारपरिनिष्पन्नेक्षते साक्षात्करोति तन्मिथ्याप्रपञ्च बाधकमद्धैतात्मदर्शनं सात्विकं सर्व संसारोच्छित्ति कारणं ज्ञानं विद्धि [१८१] । “राजस ज्ञानं सर्वभूतेषु देहादिषु नानाभावान्प्रतिदेहमन्यानात्मनः पृथग्विधान्सुखदुखित्वादिरुपेण परस्परविलक्षणान् येन ज्ञानेन वेत्तीति वक्तव्ये यज्ज्ञानं वेत्तीति करणे कर्तुत्वोपचारादेधांसि पचन्तीतिवत्कर्तुरहंसारस्य तादृश

भेदाद्वा तज्ज्ञानं विद्धि राजसमिति''[१८२]। तामसज्ञानन्तु नित्यविभुदेहादिव्यतिरिक्तात्मतद्यतिरिक्ते रवरग्राहितार्किकज्ञान विलक्षणमनित्यपरिच्छिन्नदेहाद्यात्माभिमानरूपं चार्वाकादीनां यज्ज्ञान तत्तामसमुदादृतं तामसानं प्राकृत जनानामीदृशज्ञानदर्शिभिः अवसाने

''सिद्धि प्राप्तो यथा ब्रह्म तथाऽऽत्नोति निबोधमे

समासेनैव कौन्तेय निष्ठा ज्ञानस्य यापरा।।''१८.५०।

परा श्रेष्ठा वा साक्षान्मोक्ष हेतुत्वात्। तां सिद्धिं प्राप्तस्य ब्रह्मप्राप्तिरुपां ज्ञाननिष्ठां परां संक्षेपेण निबोधेत्यर्थः। स्वकर्मणेश्वरमाराध्य तत्प्रसादजा सर्वकर्मत्यागपर्यन्तां ज्ञानोत्पत्ति योग्यता रुपां सिद्धिमन्तःकरण शुद्धिं प्राप्तो यथा ब्रह्म प्राप्नोति तथा तं प्रकारं निबोध मे मद्वचनादवधारयानुष्ठातमुम[१८३]।

अस्य विषयस्योपसंहाररुपेण कथयति यथा गीतायां सप्तमाध्याये समीपवर्ति श्लोकैः २७, २८ तम श्लोकांशैः चतुर्विधेषु भक्तेषु मध्ये ज्ञानी त्वात्मैव मे मतं, तेषां ज्ञानी नित्ययुक्त एक भक्तिविशिष्यते इति च अत्र विस्तरति। अत्र ज्ञानेन शोकनिवृत्तिः एवम् आत्मपदप्राप्तिश्च फलम्। तदर्थं कर्ममार्गं, भक्तिमार्गम् इत्यादीं आश्रयन्ति। कर्मयोगेन पापनिवृत्तिः अन्तकरणशुद्धिश्च लभ्यते। भक्तया दुखमयात् संसारान्मुक्तये एक मात्रं सरलं साधनम्। आराधनया ज्ञानं भक्तिरिति च कथ्यते। शास्त्रे कर्मविषये यत् प्राधान्यं दीयते तथोऽप्यधिकं भक्तिविषये वर्तते। अतः एव भक्तिः विषयं भागवतादिषु, इतिहासादिषु च परमपदप्राप्त्यर्थं प्रयत्नवन्तृणां कृते एतेषु च विशेषरुपेण विस्तृतं। अतः एव गीतायां सप्तमाध्यये (२६) तम श्लोकेन एवं विवृणोति-

''चर्तुविधा भजन्ते मां जानाः सुकृतिनोऽर्जुन

आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।''७.१६।

अत्रत्येन श्लोकेन आद्यत्रयाः साधरणीयः अन्तिमस्तु ज्ञानिरेव। एवं गीताशास्त्रे भक्तस्य लक्षणमुक्तं तत्समानरीत्यायेव स्थितप्रज्ञस्य, गुणातीतस्य च समानत्वं दृश्यते। तदेव एवं उक्तम्।

"योगस्त्रयो मया प्रोक्ता नृणांश्रेयो विधिस्तया।

ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कूत्रचित्।।"[१८४]

## ४.४ ज्ञानम् अद्वैतवेदान्ते

ज्ञानं विना अद्वैतवेदान्तं नास्तीति वक्तुं शक्यते। अस्य दर्शनस्य मूलतत्त्वं भवति ज्ञानं तदनुसृत्यैव व्यावहारिक-प्रातिभासिक-पारमार्थिकेति सत्तात्रैविध्यमपि ज्ञानमनुसृत्यैव त्रिप्रकारत्वं कुर्वन्ति। शङ्करादीनाम् अनेन दर्शनानुसारेण ज्ञानार्जनाय श्रवणादिना लभ्यते[१८५]। तदा अज्ञाननिवृत्तिः च भवति तदेव मूलसिद्धान्तम्। लभ्यमानेषु गीताभाष्येषु प्राचीनं भवति अद्वैतदर्शनानुसारेण श्रीशङ्करेण विरचित शाङ्करभाष्यम्। सुधीनां मतानुसारेण शङ्करात् प्राग् गीताभाष्यमासीत् इति तेषां वादः। अत्र शङ्करप्रणीत अद्वैतभष्ये ज्ञानविषयं ज्ञानसिद्धान्तं कथं भाष्ये सिद्धान्तयति इति अत्र विस्तरति। इतः परम् अस्य विषयस्योपरि द्वैतिनां विशिष्टाद्वैतिनां च विचारः कथम् इत्यपि चिन्तयति। अत्र शंङ्करभाष्ये अर्जुनविषादयोगस्य श्लोकानां भाष्यरचना न अकरोत्। अनन्तरं द्वितीये सांख्ययोगे एकादशम श्लोकादारभ्य एव भाष्य रचनाऽकरोत्। एवं चेदपि विषयप्रवेशनाय प्रथमाध्याये आद्यम् उपोद्धातभाष्यरुपेण किञ्चिदुक्तं वर्तते। अत्राद्यं भगवता सृष्टेदं जगति मरीच्यादीन् च सृष्ट्वा प्रजापतिः प्रवृत्तिलक्षणं धर्मं एवं, निवृत्तिलक्षणं धर्मे च ग्राहयामास। तद् धर्मं सनक-सनन्दादीन् च सृष्ट्वा तेषां कृते ज्ञानवैराग्य लक्षणं धर्ममुपदिष्टवान्। वेदोक्त धर्मः द्विविधौ एव जगतः स्थितिकारणं च। स्वप्रयोजनाभावेऽपि भूतानुजिधृक्षया वैदिकं धर्मद्वयमर्जुनाय शोकमहोदधौ निमग्नाय उपदिदेश गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति । "तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थम् "अस्य भाष्ये

अस्य गीताशास्त्रस्य प्रयोजनस्तु परं निश्रेयसं सहेतुकस्य संसारस्यात्यंतोपरमलक्षणम्[१८६]। एवं शुद्धसत्वस्य च ज्ञाननिष्ठा योगतया प्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निश्रेयसहेतुत्वमपि प्रतिपद्यते। एवं १-१ आरम्य २.१. पर्यन्तं श्लोकाः प्राणिनां शोकमोहादिनां तादृशानां उद्भवकारण प्रदर्शनार्थत्वेन गीताभाष्यमरचयत् यत परमार्थात्मतत्वनिरूपणं भवति तत्र सांख्यं, सांख्यबुद्धिः यद्विषया बुद्धिः आत्मनो जन्मादिषड्विक्रियाभावादकर्ता आत्मेति प्रकरणार्थं निरुपणाद्या जायते सा[१८७]। एतस्य बुद्धे जन्मनः प्रागात्मनो देहादि व्यतिरिक्तस्य कर्तृत्व-भोक्तृप्वाद्यपेक्षा धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठानलक्षणो योगः। तद् विषया बुद्धिः योगबुद्धिः। द्वितीयाध्याये पञ्चपाञ्चाशत् तम श्लोकस्य भाष्यावसरे पुत्र-लोक-वित्तादि एषणत्रयान् सन्यस्य आत्मराम आत्मक्रीडः एव स्थितप्रज्ञः। अनन्तरं तृतीयाध्यायस्यारम्भे भाष्ये सांख्य-योगबुद्धयादि विषयोऽधिकृत्य चर्चा अग्रे बद्ध्नाति। अत्राद्य श्लोकेन अर्जुनस्य सन्देहः द्रष्टुं शक्यते। अनेन श्लोकेन उद्धरित प्रश्नान् उद्दिश्य अत्र विचारयति[१८८]। यथा- सर्वेषाम् आश्रमिणां ज्ञानकर्मणोः समुच्चयं गीताशास्त्रे निरुपितम्। अनेन साकं श्रुतौ उक्तं कर्माणि परित्यज्य केवलात् ज्ञानात् मोक्षः इति च। यदि मोक्षसाधनत्वेन स्मार्तानि कर्माणि ऊर्ध्वरेतसां समुच्चीयन्ते तथा गृहस्थस्यापि इष्यतां स्मार्त्तैः एव समुच्चयः न श्रौतैः, स्मार्तैः च समुच्चयः मोक्षाय सन्यासिनां कृते केवलात् स्मार्तकर्मणा कर्ममत्र समुचितज्ञानात् मोक्षः। उपनिषद्-इतिहास-पुराण-योगशास्त्रेषु च वाङ्मयत्वेन मुमुक्षोः सर्वकर्मसन्यासविधानात् आश्रमविकल्प समुच्चयविधानात् न श्रुतिस्मृत्योः अतः मुमुक्षुणां सर्वकर्मसन्यासविधानात् च।

अस्योपस्थापनाय *महानारायणोपनिषदि* (१२.१९) *केनोंपनिषदि* च "न कर्मणा न प्रजया चनेन त्यागेनैकेऽमृतत्वमानशुः "अत्र, ब्रह्मचर्यादेव प्रव्रजेद्[१८९] .... एवं तर्हि- ज्यायसी चेत् कर्मणस्ते मता बुद्धि [१९०]...... (३.१) श्लोकः अनुचितं भवति इति चेत् अविवेकतः प्रश्नकल्पनायाम् अपि भिन्न पुरुषानुष्ठेयत्वेन भगवतः प्रतिवचनं न उपपद्यते न च अज्ञाननिमित्तं भगवत् प्रतिवचनं कल्पनीयम्। अतः ज्ञानात् एव मोक्षः इति एषः अर्थः निश्चितः गीतायाम् उपनिषत्सु च।

"आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा

कामरुपेण कौन्तेय द्वष्पूरेणानलेन च।।"३.३९।

अनेन श्लोकेन कामं ज्ञानिनः नित्यवैरिः एव तद् कथमिति अनन्तरः श्लोकैः प्रस्ताव्यते (४०) यथा इन्द्रियाणि, मनः, बुद्धिः, इत्यादयाः कामस्य अधिष्ठानम्। एतैः इन्द्रियमनोबुद्ध्यादिः आश्रयैः विमोहयति एष कामो ज्ञानमावृत्य देहिनं शरिरिणम्[१९१]। अतः (४२) इन्द्रियाणि आदौ पूर्वम् एव नियम्य वशीकृत्य भरतर्षभ पापाचारं कामं प्रजहादि परित्यज्य प्रकृतं वैरिणं ज्ञानविज्ञाननाशनम्। अत्र ज्ञानं नाम- शास्त्रतः आचार्यतः च आत्मादीनाम अवबोधः विज्ञानं विशेषतः तदर्थानुभवः। तयोः ज्ञानविज्ञानयोः श्रेयप्राप्तिः हेतोः नाशनं कामतः आत्मनः परित्यज्ययति। अनन्तरम् इन्द्रियात् आदौ नियम्य नित्यशत्रुं कामं जहीहि इति उच्यते। अनन्तरं (इन्द्रियाणि पराण्याहु... ४२) इत्यादीन् श्लोकान् उक्त्वा अध्यायम् उपसंहरति[१९२]।

चतुर्थे ज्ञानकर्मसन्यासयोगे आद्ये पूर्वाध्यायद्वयेषु उक्तं ज्ञाननिष्ठालक्षण संन्यासः कर्मयोगोपायः यस्मिन् वेदार्थः परिसमाप्तिः। प्रवृत्तिलक्षणो निवृत्तिलक्षणः च तत् योगम् एव भगवता मन्वानः तं वंशकथनेन स्तौतिः। अत्र एकादशम श्लोके (११)" ये यथा येन प्रकारेण यं फलार्थितया मां प्रपध्यन्ते तान् तद् फलदानेन अनुगृहणाति। अत्र एकस्य मुमुक्षुत्वं कर्मफलार्थित्वं च युगपत् न सम्भवति। ये अफलार्थिनो मुमुक्षवः (कर्मयोगिनः) च तान् ज्ञानप्रदानेन, ज्ञानिनां सन्यासिनां मुमुक्षूणां च मोक्षप्रदानेन च अनुगृह्णाति" [१९३] (कर्मण्यकर्म.... कृत्स्नकर्मकृत् ४.१८) अस्य व्याख्याने यथा "अकर्मणि कर्म पश्येत् एवं कर्मणि अकर्म पश्येत् इत्यस्य व्याख्यानावसरे न च अत्र कर्माधिकरणम् अकर्म अस्ति, कुण्डे बदराणि इव न अपि अकर्माधिकरणं कर्म कर्माभावत्वात् अकर्मणः। लौकिकाः यथा शुक्तिकारजतवत्, मृगतृष्णिकावत् च विपरीतगृहीत एव पूर्वपक्षस्य प्रश्नस्य समाधानरूपेण नौस्थस्य नावि गच्छन्त्या तटस्थेषु अगतिषु नगेषु प्रतिकूलदर्शनात् एवमेव दूरेषु चक्षुषा

असन्निकृष्टेषु गच्छत्सु गत्यभावदर्शनात्” । कर्म करोति चेदपि तत्र अहं करोमि इति कर्तत्व भावं एवं कर्माकरण समये च अहं कतार्नास्मि इति कर्तृत्व निषेधत्वञ्च अविद्या कारणात् एवजायते पूर्वसूचितः उदाहरणानुसारेण। (नदीस्थ नावीगच्छन्त्य) अत्र वृक्षेषु गति प्रातिलोक्येन अकर्म कर्माभावं यथाभूतं गत्याभावभम् इव वृक्षेषु यः तादृशाः बुद्धिमान् पण्डितो मनुष्येषु सः युक्तो योगी कृत्स्नकर्मकृत् च भवति। नित्यानां फलाभावज्ञानम् अशुभमुक्ति फलत्वेन चोदितं नित्यकर्म ज्ञानं वा न च भगवता एवम् इह उक्तम्[१९४]।

“श्रेयान् द्रव्यमयादयज्ञात् ज्ञानयक्षः परन्तप।
सर्वं कर्माखिलं पार्त्थ ज्ञाने परिसमाप्यते।।४.३३।
न हि ज्ञानेन सादृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।४.३८।
श्रद्धावान् लभते ज्ञानं तत्परः समयेन्द्रियः।
ज्ञानं लबध्वा परां शान्तिमचिरेणाधिगच्छति।।”४.३९।

एतैः श्लोकैः द्रव्यसाधन साध्यात् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः विशिष्टः अतः ज्ञानयज्ञः एवं प्रशस्यतरः। यथा ज्ञानयज्ञेनैव रैक्वादि मुनयः परमपदप्राप्तवन्ताराः च। परमात्मनः तत्वं साक्षात् प्राप्तवन्ताराः ते एव ज्ञानिनः, सम्यग् दर्शितैः उपदिष्टं यत् ज्ञानं भवति तद् एव कार्यक्षमं भवति न इतरात्। अग्रिम श्लोकेन साक्षात् एव ज्ञानाग्निः इन्धनवत् भस्मीकर्तुं शक्नोति तस्मात् सम्यग् दर्शनं सर्वकर्मणां निबीजत्वकारणं भवति इति भगवन् मतम्। ज्ञानेन यथा अज्ञानहानिः भवति एवं कर्तृत्वाभिमानं च नाशो भूत्वा परमार्थतत्वदर्शनं यदा प्राप्यते तदायेव कर्मनाशमित्याशयः। अतः अप्रवृत्तफलानि कर्मणि ज्ञानोत्पत्तेः प्राक् ज्ञानसहभावीनि च अतीतानेकजन्म कृतानि च तानि एव कर्माणि भस्मसात् कूरुते। अतः तत् ज्ञानं स्वयमेव योगसंसिद्धि संस्कृतः योग्यताम् आपन्नः सन् मुकुक्षुः कालेन महता आत्मनि विन्दति। अत्र दत्तेषु अन्तिम श्लोकेन श्रद्धालुः लभते ज्ञानम्। तदर्थं संयतेन्द्रियः भवेत्, तादृशाः श्रद्धावान्

तत्परः संयतेन्द्रियः च सः अवश्यं ज्ञानं लभते। ज्ञानं लब्ध्वा परां मोक्षाख्यां शान्तिमुपरतिम् अचिरेण क्षिप्रमेवाधिगच्छति [१९५]।

पञ्चमेऽध्याये सन्यासयोगे अध्यायस्यारंम्भभाष्ये सर्कर्मसन्यासम् अवोचत् एवं कर्मानुष्ठानलक्षणम् अनुतिष्ठ च। अत्र उभययोः कर्मानुष्ठानकर्मसन्यासयोः परस्परविरोधात् एकेन सह कतुम् अशक्यत्वात् च। एतयोः द्वयोः किम् अनुष्ठीयमित्यस्य प्रश्नरुपेण अर्जुनः एवं पृच्छति- सन्यास कर्मणां कृष्णा इत्यनेन भगवता कर्मयोग ज्ञानयोगौ भिन्नपुरुषविषयत्वात् अन्यतरस्य प्रशस्य बुभुत्सया अयं प्रश्नः अनुपपन्नः। अतः आत्मविदः कृते कर्मयोगः कर्मसन्यासात् श्रेष्ठमिति न वक्तव्यम्। अत्र पूर्वपक्षिणां प्रश्नस्योत्तररुपेण आत्मविदः निवृत्तमिथ्याज्ञानत्वात् विपर्ययज्ञान मूलस्य कर्मयोगस्य असंम्भवः स्यात्। जन्मादिविकाररहतिस्य आत्मविदः तस्य स्वीयमिथ्याज्ञानरुप अज्ञानस्य नाशनेनैव यः भवति तेषां कृतेऽत्र सर्वकर्मसन्यासस्यावश्यकता। अज्ञानात् जात, कर्तृत्वाभिमानपुरःसरस्य एवं आत्मस्वरुप क्रियायुक्तो भूक्त्वा कर्मयोगस्यासंभवत्वम् इह गीताशास्त्रे सम्यगज्ञानम् एवं मिथ्या अज्ञानञ्च तादृश कार्याणि अन्योन्य विरुद्ध इति प्रतिपादयति। अतः अज्ञानात् निवृत्तम् आत्मज्ञानिनः कृते विपरीत ज्ञानाधिष्ठितं कर्मयोगं न सम्भवति[१९६]। तद् गीताशास्त्रे एव सम्यगज्ञानमिथ्या ज्ञानतत्कार्यम् उक्तमेव। (३.३) (ज्ञानयोगेन सांख्यानां, कर्मयोगेन योगिणां च) अस्य कारणं कर्तव्यान्तरा भाववचनात्, आत्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात्, उत्पन्न सम्यग्दर्शनस्य कर्मयोगभाववचनात् एवं शरीरस्थिति कारणातिरिक्तस्य कर्मणे निवारणात्। तत्वविद् तु न किञ्चित् करोमी इत्युक्त्वा इति वचनेन शरीरनिर्वहणस्यमात्रं कर्मयोगं स्वप्नेऽपि असभव्यमिति कारणात् अनात्मवित् कर्तृकयोः सन्यास-कर्मयोगयोः निश्रेयसकरत्व वचनम्। कर्तृत्वाभिमानं पुनरपि अनुभोक्तुं कानिचन कर्मणां सन्यासयुक्त कर्मयोगिनां सन्यासम्। एतद् आत्मज्ञानिनां संपूर्णसन्यासात् भिन्नं च। सन्यासं यमनियमादिनिष्ठायुक्तम् एवं दुरनुष्टेयं च अल्पसन्यासयुक्तं कर्मयोगम् अनुष्ठितुं सरलमेव, इत्युक्त्वा भाष्यम् उपसंहरति। अतः एवम् उद्दिभ्यते ''न च सन्यसनात् एव केवलात्

सिद्धिं समधिगच्छति'' (३/४) इत्यनेन श्लोकांशेन ज्ञानयुक्त कर्मसन्यासेनैव मोक्षं सिद्यति इति सिद्धान्तयति। सन्यासयोगे तृतीयेन श्लोकेन नित्यसन्यासी किदृशमिति विस्तरति- सुखं वा दुखं वा यः न द्वेष्टि न किञ्चित् च काङ्क्षति कर्मेषु व्यापृतः चदेपि कर्मयोगी नित्यसन्यासि च[१९७]। अग्रिमश्लोक व्याख्यानाावसरे पण्डिताः तु ज्ञानिनः एकं फलम् अविरुद्धम् इच्छन्ति। अज्ञानिनः सांख्ययोगौ पृथक् विरुद्ध भिन्न फलयुक्तमिति चिन्तयन्ति। सांख्ययोगषु सम्यग् अनुष्ठितवान् उभयोः तत् एव हि परमनिश्रेयसमेव फलम्। अतः न फले विरोधः अस्ति। अनन्तरमत्र कर्मयोगस्य फलं किमिति स्थापयति- सन्यास कर्मयोगौ। सन्यासेन ज्ञानं, कर्मयोगेन ज्ञातुं तदुपायसमबुद्धित्वादि संयुतौ एतदेव सांख्ययोग शब्दवाच्यो इति भगवतो मतम्। ज्ञानापेक्षः तु सन्यासः सांख्यम् इति मया अभिप्रेतः परमार्थ योगः द्वादशश्लोकभाष्ये योगस्थः कर्मफलं त्यक्त्वा ईश्वराय कर्माणि करोति न ममफलाय एव कर्मफलं त्यक्त्वा ईश्वराय कर्माणि करोमि न मम फलाय इत्येदं समाहितः कर्मफलं परित्यज्यमोक्षं प्रापयति[१९८]। अत्र अद्वैतभाष्ये सत्वशुद्धिज्ञान प्राप्ति सर्वकर्म सन्यास ज्ञाननिष्ठा क्रमेण इत्यपि एतेन साकं योजनीयम्। षोटशतम श्लोकस्य भाष्ये येन अज्ञानेन आवृतां ज्ञानं मुह्यन्ति जन्तवः तत् अज्ञानं येषां जन्तुनां विवेकज्ञानेन अर्थात् यत्परं परमार्थतत्वं ज्ञानप्रकाशितं च। अग्रिम श्लोकेन विस्तृत तद्बुद्धयः, तदात्मनः, तन्निष्ठाः तादृशः तत् एव परमयनं परागतिः एषा भवति ते तत्परायणः अथवा आत्मरतय तादृशः अपुनावृत्तिम् अपुर्नदेहसम्बन्ध, ज्ञानर्निधूतकलमषाः यतयः भवन्ति। एतातृश पण्डिताः, यतयः च विद्याविनयसम्पन्न ब्राह्मणे, गवि हस्तिनि, शुनि च एवश्वपाकं च समदर्शिनः। षटविंशति तम श्लोकभाष्ये कामक्रोध नियुक्तानां यतीनां सन्यासिनां उभयतः अधुना जीवतः मृतानां च ब्रह्मनिर्वाणवर्तन्त इत्यर्थः। यतेन्द्रिय मनोवुद्धिः, मुनिः, सन्यासी, मोक्षपरायणः च भवेत्[१९९]। सप्तमे अध्याये ज्ञानविज्ञानयोगे द्वितीय तम श्लोकेन-

> ''ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
>
> यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञात व्यमवशिष्यते।।''७.२।

इदं ज्ञानं तुभ्यंम् अहं सविज्ञानं विज्ञानसहितं स्वानुभवसंयुक्तमं इद् वक्ष्यामि अशोषतः कार्त्स्न्येन। अहं परमात्मा भेदरहितम्, आत्मा इति अपरोक्षमेवं साक्षात्, अनुभवयुक्तं च जायमान विशेष ज्ञानमेव विज्ञानम्। तद् ज्ञानं कीद्शमिति भाष्ये यत् ज्ञानं ज्ञात्वा न इह भूयः पुनः अन्यत् ज्ञातव्य पुरुषार्थ साधनम अवशिष्यते इति। मनुष्याणां शास्त्रीयज्ञानकर्मयोगाभ्यां सहस्रेषु मध्ये कश्चिदेकोऽनेकजन्मकृतसुकृतसमासादितनित्या-नित्यवस्तुविवेकः सन्यतति यतते सिद्धये सत्वशुद्धिद्धारा ज्ञानोत्पत्तये। यततां यतमानानां ज्ञानाय सिद्धानां प्रार्जितसुकृतानां साधकानामपि मध्ये कश्चिदेकः श्रवणमननिदिध्यासनपरिपाकान्ते मामीश्वरं वेत्ति साक्षात्करोति तत्त्वतः प्रत्यगभेदेन तत्वमसीत्यादिगुरुपदिष्टमहावाक्येभ्यः। अनेकेषु मनुष्येष्वात्मज्ञानसाधनानुष्ठायी परमदुर्लभः साधनानुष्ठायिष्वपि मध्ये फलभागी परमदुर्लभ इति किं वक्तव्यमस्य ज्ञानस्य माहात्म्यमित्यभिप्रायः। यः मत् तत्वं ज्ञेयः स सवज्ञो भवति। अतः विशिष्ट फलत्वात् दुर्लभतरं ज्ञानम्[२००]।

"मनुष्याणां सहस्रेषु कश्चिदयतति सिद्धये

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः।।"७.३।

अस्मिन्नेवाध्याये अष्टादश श्लोकः उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् आस्तितः सहि युक्तात्मा मामेवानुत्तमां गतिम्। सकामानां त्रयाणां काम्यमानमपि प्रियसहमपि प्रियः ज्ञानिनस्तु प्रियान्तरशून्यस्याहमेव निरतिशयप्रीतिविषयः अतः सोऽपि मम निरतिशयप्रीतिविषय इति विशेषः[२०१]। अन्यथा हि मम कृतज्ञता न स्यात्कृतघ्नता च स्यात्। अत एवात्यर्थमिति विशेषणमुपात्तं प्राक्। यथा हि " यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति " इत्यत्र तरबर्थस्य विवक्षितत्वाद्विद्यादिव्यतिरेकेण कृतमिति कर्म वीर्यवद्भवत्येव। ज्ञानी तु अत्यर्थं प्रियो भवति इति विशेषः। ज्ञानी युक्तात्मा सदा मयि

समाहितचित्तः सन्मां भगवन्तमनन्तमानन्दघनमात्मानमेवानुत्तमां सर्वोत्कृष्टां गतिं गन्तव्यं परमं फलमास्थितोऽङ्गीकृतवान् न तु मद्भिन्नं किमपि फलं स मन्यत। ज्ञानी तु आत्मैव। अतः -

"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्वतः
ततो मां तत्वतोज्ञात्वा विशते तदनन्तरम्।।"१८.५५।

नवमाध्याये राजविद्याराजगुह्य योगे प्रथम श्लोकेन -

"इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे
ज्ञानं विज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेऽशुभात्।।९.१।
राजविद्या राजगुह्यं पवित्रमिद मुत्तमम्
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्।।"९.२।

इदं ब्रह्म ज्ञानमेव सम्यग्ज्ञानं, साक्षात् मोक्षप्राप्ति साधनम्, आत्मैवेदं सर्वं[२०२], एकमेवाद्धितीयम्[२०३] इत्यादि श्रुतिभ्यः उक्तम् अवगम्यते। ज्ञानं विज्ञानसहितम्, अनुभवयुक्तं च। यत् ज्ञानं प्राप्य अशुभात् संसारबन्धनात् मुक्तो भवति तत् विद्यानां राजा, दीव्यते हि इयम् अतिशयेन। इदं ब्रह्मज्ञानम् उत्कृष्टतम् अनेकजन्म सहस्रसञ्जितं, धर्मादि अधर्मादि समूलं, कर्मस्तु क्षणमात्रात् एव भस्मीकरोति, आत्मज्ञानं न धर्मविरोधि, तत् धर्म्यं धर्मात् अनपेतं च। एवमपि स्यात् दुःखसंपादयम् इति अतः आह सुसुरवं कर्तुं यथा रत्नविवेकविज्ञानवत्[२०४]। अस्य फलतः कर्मवत् व्ययः नास्ति, अतः श्रद्धेयं भवति आत्मज्ञानम्। अतः

"ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्।।"९.१५।

दशमाध्याये विभूतियोगे चतुर्थ श्लोकस्य व्याख्याने ज्ञानं नाम आत्मादि पदार्थानां अवबोधः। अत्र एकादशतम श्लोके-

"तेषामेवानुकं पार्थ महमज्ञानजं तमः

नाशयाम्यात्म भावस्थो ज्ञानदीपेन भास्वता।।"१०.११।

अहमज्ञानजम् अविवेकतो जातं मिथ्या प्रत्यय लक्षणं मोहान्थकारं तमो नाशयामि यथा ज्ञानदीपेन विवेकप्रत्ययरुपेण तत् ज्ञानं कीद्शमिति भाष्ये एवं रुपेण विशदयति"भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावाभिनिवेशवातेरितेन ब्रह्मचर्यादि साधनसंस्कारवत् प्रज्ञावर्तितेन विरक्तान्तकरण आधारेण विषयव्यावृत्तचित्त रागद्वेषा कलुषित निवातापवरकस्थाने नित्यप्रवृत्तयैकाग्रय ध्यानजनितसम्यक्दर्शन भास्वता [२०५] ज्ञानदीपेन इत्यर्थः"। (१०/३८) "ज्ञानं ज्ञानवतामहम्"/ द्वादशाध्याये भक्तियोगे (१२) श्लोके -

"श्रेयो हि ज्ञानमभ्यासाज्ज्ञानां ध्यानं विशिष्यते।

ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तम्।।"१२.१२।

अस्य श्लोकस्य भाष्ये विशेष रुपेण एवं व्याख्यायते यथा अविवेकपूर्वाकात् अभ्यासात् तस्मात् अपि ज्ञानात् प्रज्ञापूर्वकं ध्यानं विशिष्यते, ज्ञानवतो ध्यानात् अपि कर्मफल त्यागो विशिष्यते इति अनुषज्यते। यस्मात् च अर्जुनस्य अत्यन्तम् एव हितैषि भगवान् तस्य सम्यगदर्शनान्वितं कर्मयोगं भेददृष्टिमन्तम् एव उपदिशति[२०६]। त्रयोदशाध्याये क्षेत्रक्षेत्रज्ञयोगे द्वितीयेन श्लोकेन यथा

"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत

क्षेत्रक्षेत्रज्ञर्योज्ञानं यत्तज्ज्ञानं मतं मम।।"१३.२।

क्षेत्रक्षेत्रज्ञयोः ज्ञेयभूतयोः यत् ज्ञानं तेन विषयीक्रियते तत् ज्ञानं सम्यग् ज्ञानम् इति मतम्। श्रुतिष्वपि एवं वर्णयति "दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता[२०७]। यथा च तयोः विद्याऽविद्याविषययोः फलभेदः अपि विरुद्धो निर्दिष्टः "श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति[२०८]। "इह चेदवेदीदथसत्यमस्ति न चेदि ह्यवेदीन्महती

विनष्टि[२०९] ।" नान्यः पत्थाविद्यतेऽयनाय[२१०] । "आनन्दं ब्रह्मणो विद्वान् न विभोति कूतश्चन[२११] । "अविद्यायामन्तरेवर्तमानाः स्वयं धीराःपण्डितंमन्यमानाः[२१२] । " स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति[२१३] ।"अन्योऽसौ अन्यः अहम् अस्मि इति न स वेद यथा पशुरेवं स देवानां[२१४] । "आत्मविद् यः स इदं सर्वं भवति[२१५] । इत्यादिषु सहस्रशः श्रुतिषु ज्ञानमधिकृत्यविस्तरति। अनन्तरमत्र सैद्धान्तिकरीत्या ज्ञातृ ज्ञेययोः मध्ये सम्बन्धादि विषयं पूर्वपक्ष-समाधान रूपेण विस्तरति[२१६] । षष्ठेण श्लोकेन तस्यव्याख्याने ज्ञानसाधनगणम् अमानित्वादि लक्षणं यस्मिन् सति तत् ज्ञेयविज्ञाने योग्यः अधिको भवति यत्परः सन्यासी ज्ञाननिष्ठः उच्यते तम् अमानित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान्। अध्यात्मज्ञाननित्यत्वम् आत्मादिविषयं ज्ञानम् अध्यात्मज्ञानं तस्मिन् नित्यभावो नित्यत्वम्[२१७]। सर्वत्र एव च यत् विषयं ज्ञानं तत् एव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते तत् एव ज्ञानम्। अतः तद् ज्ञानम्-

"ज्योतिषामपि तज्योतिस्तमसः परमुच्यते

ज्ञानं ज्ञेयं ज्ञानगम्यं हृति सर्वस्य विष्ठितम्।।"१३.१७।

अस्यैवाध्यायस्य त्रयोविंशति(२३)तम श्लोकस्य व्याख्याने। भाष्ये ज्ञानात्पत्तेः पूर्वं कृतानां कर्मणां फलम् एवम् अनन्तरं कृतानां कर्मणां च फलविषये विशदयति। अत्र पूर्वपक्षस्य समाधाने पूर्व जन्म कृतकर्मणां फलं भोक्तुं न सः भूयः अभिजायते इत्येतद् अयुक्तमिति। विदूषः सर्वकर्मदाहः विषये च श्रुतिषु च उक्तमेव। अविद्या कामक्लेशबीजनिमित्तानि हि कर्माणि जन्मान्तराहङ्कारम् आरभन्ते[२१८] । तदेव महाभारते वनपर्वे (२००, ११०, १९९, १०७) 'बीजान्यग्नुयप दग्धानि न रोहन्ति यथा पुनः ज्ञान दग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः इति च"। "एव इषुः प्रवृत्तिनिमित्ता नारब्धवेगः तु अमुक्तो धनुषि प्रयुक्तः अपि उपसंह्रियते तथा अनारब्ध फलानि कर्माणि स्वाश्रयस्थानि एव ज्ञानेन र्निबीजीक्रियन्ते इति। पतिते अस्मिन् विद्वच्छरीरे न स भूमोऽभिजायते इति युक्तमेव उक्त इति सिद्धम्[२१९]।

चतुर्दशाध्याये गुणत्रयविभागयोगे आद्यं जगतः कारणभूतं स्वतन्त्र-परतन्त्रयोः क्षेत्रक्षत्रज्ञै इति। तद् कथम् इति आद्य श्लोकैः विवृणोति

"परं भूयः प्रवक्ष्यामि ज्ञानानं ज्ञानमुत्तमम्

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितोगताः।।१४.१।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।।"१४.२।

परमज्ञानं सर्वेषां ज्ञानानाम् उत्तमम् उत्तमफलत्वात्। पूर्वाध्याये उक्त अमानित्वादिकं न मोक्षाय, इदं ज्ञानं तु मोक्षाय यत् ज्ञानं ज्ञात्वा मुनयः सन्यासिनश्च सर्वे परां सिद्धिं मोक्षाख्याम् इतः अस्मात् देहबन्धनात् ऊर्ध्वं गताः प्राप्ताः तं ज्ञानं सर्गेऽपि सृष्टिकाले न उपजायन्ते, न उत्पद्यन्ते प्रलये ब्रह्मणोऽपि विनाशकाले न व्यथन्ति च। न तु समान धर्मता क्षेत्रज्ञ ईश्वरयोः भेदाभ्युपगमात् [२२०]।

" सर्वद्वारेषु दहेऽस्मिन् प्रकाश उपजायते।

ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमियुत।।"१४.११।

सर्वद्वारेषु, अन्तःकरणेषु, बुद्धेः वृत्तिः प्रकाशो देहेऽस्मिन् उपजायते। तत् एव ज्ञानं तद् एव प्रकाशो ज्ञानाख्या उपजायते, तदा ज्ञानप्रकाशेन लिङ्गेन विद्याविवृद्धं सत्वं जायते [२२१]। सप्तदशमे श्लोकांशे एवं सत्वात् संजायते ज्ञानमिति पूर्वोक्तस्य विषयं सिद्धान्तयति। षोडशे दैवासुरसम्बद्धिभागयोगे प्रथम श्लोकस्य व्याख्याने ज्ञानस्य अन्यत् भाष्यं दीयते। "ज्ञानयोगव्यवस्थितिः" अस्य भाष्ये ज्ञानं शास्त्रतः आचार्यतः च आत्मादिपदार्थानाम् अवगमः इति। अत्र श्लोकेन दैवीसम्पदां जातानां गुणाः वर्ण्यते। अन्तिमे मोक्षसन्यासयोगो नाम अष्टादशमे अध्याये विंशतिः आरभ्य श्लोकत्रयैः ज्ञानस्य सात्विकादि भेदं विवृणोति-

"सर्वभूतेषु येनैकं भावमव्ययमीक्षते।

अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्।।१८.२०।

पृथक्त्वेन तु यज्ज्ञानां नाना भावान् पृथग्विधान्।

वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।।१८.२१।

यत्तु कृत्स्न वदेकस्मिन् कार्ये सक्तमहैतुकम्।

अतत्त्वार्थ वदल्पं च तत् तामसमुदाहृतम्।।"१८.२२।

सात्विक ज्ञानं नाम सर्वभूतेषु येन ज्ञानेन एकं भावम् अव्ययं न व्येति कूटस्थः पश्यति तादृशम् अविभक्तं, तत् अत्मवस्तुव्योमवत् साक्षात् अद्वैतात्मविषयम् इति। एवं यानि द्वैतदर्शनानि तानि असम्यग्भूतानि राजसानि तामसानि च इति न साक्षात् संसारोच्छिन्तये भवन्ति। राजसज्ञानेन प्रतिशरीरं नानाभावान् भिन्नान् आत्मनः पृथक् प्रकारान् विजानाति तद्ज्ञानं विद्धि राजसम्। रजोगुण निवृतं तामसज्ञानं - समस्तवत् सर्वविषयम् इव एकस्मिन् कार्ये देहे बहिः वा प्रतिमादै वा सक्तं हेतुवर्जित नियुक्तिकं अतत्वार्थवत् अल्पं च तादृशज्ञानम्[२२२]। अनन्तरं पञ्चाशत् तम श्लोके -

"सिद्धिं प्राप्तो यथा ब्रह्म तथाऽप्नोति निबोध मे

समासनैव कौन्तेय निष्ठा ज्ञानस्य या परा।।"१८.५०।[२२३]

अत्रापि आत्मविषयं ज्ञानमधिकृत्यैव भाष्येचर्चा वर्तते ज्ञानं कीदृशमित्यादिकं पूर्वोक्तमेव। अतः अत्र विषयोऽयम् उपसंहरति।

### ४.५ ज्ञानं द्वैतवैदान्तञ्च

ब्रह्मणः सत्यत्वाङ्गीकारेण जगतश्च सत्यत्वमङ्गीकरोति द्वैतवेदान्तिनः। एवमेव अस्य दर्शनानुसारेण वेदाः अपौरुषेयाः एवम् एते स्वतः प्रामाण्यवादिनश्च[२२४]। परमार्थ सत्तायाः यथार्थज्ञानं प्राप्तुं वेदानाम् आश्रयम् अवश्यमेव, तत्र ज्ञातृ-ज्ञेययोः मिथः संबंन्धः साक्षात्

प्रत्यक्षः, अव्यवहितश्च भवति। प्रत्यक्षम्, अनुमानं, वेदसाक्ष्यम् इत्यादीनां प्रमाणैः ज्ञानोत्पादनस्य उपकरणस्वरुपाः इत्यतः ज्ञातृ-ज्ञेयरहितेन ज्ञानं न उत्पद्यते[२२५]। *'भारतीय चिंता'* इत्यस्मिन् ग्रन्थे विषयं विषयि इत्यनयोः भेदं नास्ति एकमस्ति चेत् तेषां सकाशात् ज्ञानं नोत्पद्यते। एवं चेत् ज्ञानमपि नास्ति "अथातो ब्रह्म जिज्ञासा" इति बादरायणसूत्रस्यावश्यकतापि नास्ति इति[२२६]। ब्रह्म सगुणमेव ईश्वरः सगुणब्रह्मैव।

"बुद्धिपूर्वं सर्वकर्तृत्वात् सर्वज्ञत्वात्
सर्वज्ञात्वादेयो गुण युक्ताः।।"[२२७]

द्वैतदर्शनानुसारेण ज्ञानस्य द्वैविद्यं -स्वरुपज्ञानम्, एवं वृत्तिज्ञानञ्च। आनन्ततीर्थेन विरचित *तत्त्वोद्योतमिति* ग्रन्थे "असतः प्रतीति विनाऽसद्वैलक्षण्यं ज्ञानानुपपत्तेः" इति विशदयति[२२८]। एवमेव "नहि ज्ञानज्ञेययोरेकाकारता[२२९] "। अनेन च ज्ञान ज्ञययोः एकसत्ता इति वादः च खण्डयति-

"अतद्विषयज्ञानेन तदज्ञाननिवृत्तौ घटज्ञानेननिवर्तेत
अविषयत्वादेव तस्य ज्ञानत्वं न स्यात्।।" [२३०]

मध्वाचार्येण स्वीय गीताभाष्ये, गीतातात्पर्ये च द्वितीयाध्यायस्य पञ्चचत्वारिंशत् तम श्लोकेन भाष्ये एवं विचार्यते। परमात्मा मम स्वामीतिज्ञानमात्मवत्वम्, तेन जीव ब्रह्मणोः ऐक्यज्ञानं निवारयति। अत्र अनेन श्रीलक्ष्मीनारायणः एव[२३१] सन्तत विष्णुस्मरणां नित्यसत्वस्थत्वम् ४२ तम श्लोकस्य व्याख्याने गीतातात्पर्ये "अज्ञानां ज्ञानिनां चैव मुक्तानां शरणं हरिः"[२३२]। अत्रैव पञ्चाशत्(५०) तम श्लोकस्य तात्पर्ये "अतो योगाय युज्यस्व ज्ञानोपाय" एवं यथावद्विष्णुं ज्ञात्वा तदर्थत्वेन कर्मकरणमित्येतत्कर्मकौशलमेव योगः, भगवज्ज्ञानमेव बुद्धिः। अनन्तरश्लोके (५२) बुद्धियुक्ताः सम्यग् ज्ञानिनो भूत्वा पदं गच्छन्ति। सयोगकर्म ज्ञानसाधनमिति च। तृतीयाध्यायस्य तृतीयश्लोकस्य व्याख्याने एवं विस्तरति। गृहस्यादि कर्मत्यागेन ज्ञाननिष्ठाः

सनकादिवत्, अधिकारिकत्वात् ईश्वरेच्छया लोकसंग्रहार्थत्वात् च या कर्मयोगः भवन्ति। तेऽपि योगिनः ज्ञानप्रचुरो योगो ज्ञानयोगः, कर्मप्रचुरो योगो कर्मयोगः[२३३]। विंशतितमे श्लोके कर्मणैव हि संसिद्धि... इत्यस्य श्लोकस्य भाष्ये कर्म कृत्वैव ततो ज्ञानं प्राप्य वा न तु ज्ञानं विना। प्रसिद्धं हि तेषां ज्ञानित्वं भारतादिषु। ब्रह्मज्ञानसाधनत्वम् एवोच्यते अन्यथा मुक्ति निषिद्धञ्च-

"ब्रह्मज्ञानं विना मुक्तिन कथञ्चिदपीष्यते
प्रयोगादेस्तु या मुक्तिर्ज्ञानोपायत्वमेव हि"।।

तात्पर्ये यथा –

"अज्ञानां ज्ञानदं कर्म ज्ञानिनां लोकसङ्ग्रहात् ।
अद्वैत तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा।।"[२३४]

एकोनचत्वारिंशत् तम श्लोकेन

"आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा
कामरुपेण कौन्तेय दुष्पूरेणानलेन च।।"३.३९।

भाष्ये शास्त्रतो जातमपिज्ञानं परमात्मापरोक्ष्याय न प्रकाशते कामेनावृतं ज्ञानिनोपि[२३५]। चतुर्थाध्याये त्रयस्त्रिंशत् तम शलोकस्य भाष्यतात्पर्ये सर्वं कर्माखिलमासमन्तादल्पं ज्ञाने परिसमाप्यते। ज्ञानं जाते पूर्यते। ज्ञानासिनां आत्मनः[२३६]। अग्रिम श्लोकेऽपि भाष्यं नास्ति। तात्पर्येण अत्र ज्ञानं तेऽहं सविज्ञानमिति। वक्ष्यमाणत्वात्स्वयमेव उपदेक्ष्यति। पञ्चमाध्याये १५, १६ तम श्लोकानां (नादन्ते कस्यचित्पापं ... मुह्यन्ति जन्तवः। ज्ञानेन तु तदज्ञानं... प्रकाश्यति तत्परम्) भाष्ये ज्ञानमेवाज्ञाननाशकमित्याद् –ज्ञानेनेति[२३७]। प्रथमज्ञानं परोक्षज्ञानम् षष्ठाध्याये सप्तमश्लोकस्य व्याख्यानावसरे यथा- विज्ञानं - विशेषज्ञानं.

“सामान्यैर्थे त्वविज्ञेया विशेषा मम गोचराः

देवादीनां तु तज्यज्ञानं विज्ञानमिति कीर्तितम्।।

श्रवणान्मननाञ्चैव यञ्ज्ञानमुपजायते

तज्ज्ञानं दर्शनं विष्णोर्विज्ञानं शम्भूरब्रवीत्।।

अस्य तात्पर्यस्तु सर्वत्र विष्णोरुत्कर्ष ज्ञानं ज्ञानमितीर्यते

तद्विशेष परिज्ञानं विज्ञानमिति गीयते।।” [२३८]

सप्तमाध्यायस्य द्वितीय श्लोके ज्ञानविषयमधिकृत्यैव वर्तते (ज्ञानं तेऽहं सविज्ञानमिदं ... अन्यज्ज्ञातव्यमवशिष्यते।।) अत्रापि ज्ञानम् इदं मद्विषयं ज्ञानं, विज्ञानं विशष ज्ञानम्।[२३९]

“विष्णोराधिक्यसंवित्तिः सर्वस्माज्ज्ञानमुच्यते

एवं विविच्य तज्ज्ञानं विज्ञानमिति कीर्तितम्।।”

दशमाध्यायस्य चतुर्थ श्लोकस्य भाष्ये ज्ञानं प्रतीतिः ज्ञानं प्रतीर्ति बुद्धिस्तु कार्याकार्याविर्निणयः इत्यभिधानम्।

द्वादशाध्यायस्य पञ्चदशा (२४) श्लोकस्य व्याख्यानावसरे तत्र गीता तात्पर्ये श्लोकांशैः एवमुच्यते-

“असम्यगज्ञानिनो ध्यानाज्ज्ञानमेव विशिष्यते

ज्ञात्वा ध्यानं ततस्तस्मात् तत् फलोच्छाविवर्जितम्

तस्माज्ज्ञानाद् भवेन्मुक्तिः त्यागाध्यानयुतात् स्फुटम्।।”[२४०]

त्रयोदशाध्याये द्वादशतम श्लोकेन एवं विस्तरति-

“अध्यात्म ज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनम्।

एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।।”१३.१२।

अस्य भाष्यं तत्वज्ञानार्थदर्शनम् अपरोक्षज्ञानार्थं शास्त्रज्ञानम्। तात्पर्ये- तत्वज्ञानविषयस्य विष्णोः अपरोक्षदर्शनं तत्व ज्ञानार्थ दर्शनम्। ज्ञायतेऽनेनेति ज्ञानम् ज्ञप्तिज्ञानमिति व्युत्पत्या एतज्ज्ञानम् इति ज्ञानसाधनं ज्ञानं चोक्तम्[२४१]। अस्मिन्नेवाध्याये १८, १९ अष्टादशे, एकोनविंशतितमे श्लोकेः अस्य तात्पर्ये ज्ञानेन मुक्तौ प्राप्यत्वाज्ज्ञानगम्यम्। स्वयमेव आत्मना आत्मानं वेत्थ इति स्वज्ञेयत्वाज्ज्ञेम् अन्यज्ञेयत्वस्य ज्ञेयं यत् तत् इति पूर्वमेव सिद्धत्वात्। कर्तृकर्मविरोधवादि मतं निराकरोत्युत्तरज्ञेय शब्देन[२४२]। चर्तुदशाध्याये द्वितीयेन श्लोकेन -

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।।"१४.२।

पुरुषोत्तम योगस्य तृतीय श्लोकस्य व्याख्यानावसरे-

"न रुपमस्येह तथोपलभ्यते नान्तो न चार्दि न च संप्रतिष्ठा
अश्वत्थमेनं सुविरुढमूलमसङ्गशस्त्रेण दृढेन छित्वा।।"१५.३।

अत्र असङ्ग शस्त्रेण इत्यस्य पदस्य व्याख्यानावसरे सङ्गराहित्यसहितेन ज्ञानेन, इत्येव व्याख्यायति। अनेन ज्ञानासिनोपासनया शितेन इति भगवते च व्याख्यायति। अन्तिमाध्याये मोक्षसन्यासयोगे पञ्चमश्लोकस्य भाष्यावसरे ज्ञानयज्ञमधिकृत्य एवं विशदयति तद् यथा। ज्ञानयज्ञा -विद्याभयदानब्रह्मचर्यादि तपसो हि ते इत्युक्तम्। अनन्तर भागेषु ज्ञानस्य सात्विक-राजस-तामस भेदाः २०, २१, २२ श्लोकैः वर्णयन्ति। आद्यं सात्विकज्ञानमधिकृत्य अस्य तात्पर्यरुपेण एवं यथा-

"तारतम्येन जीवानां भेदेनैव परस्परम् ।
जड़ेभिश्चैव जीवानां जडानां च परस्परम् ।
तेभ्यो विष्णोश्च सम्यक् तल्लक्षणज्ञानपूर्वकम् ।
ज्ञानं सात्विकमुद्दिष्ठं यत् साक्षान्मुक्तिकारणम् ।"

राजस- तामसानां एवं भवति तात्पर्यं

"विष्णोरन्यस्य यथाथ्यज्ञानं राजसमुच्यते ।
यदि विष्णुं न जानाति यदि वा मिश्रतत्ववित् ।
अन्यथा करणीयत्वात् कार्याख्यं जीवमेव यः ।
अकार्य ब्रह्म जानाति स एवाखिलमित्यपि ।
एकजीवपरिज्ञानात् कृत्सनज्ञोऽस्माति मन्यते ।
युक्तिर्भिज्ञानराहित्यात् स्वपक्षस्याल्प युक्तितः ।
अयुक्ततामेव गुणं मन्यते चाल्प दर्शिनः ।
अतत्वार्थं जगद् ब्रूते तत्वार्थज्ञानवर्जनात् ।
स मुख्यतामसज्ञानी हेकैकेनापि किं पुनः ।।"

सर्वेरेतेर्विशेषैश्च युक्तः पापतमाधिकः। इति *पदमपुराणे* उक्ते सर्वगतमेकमीश्वरं न जानातीत्येतावदैव राजसत्वम्। एकस्य कृत्सनवज्ज्ञानमेव तामसम्। अस्यापि पुनः भेदं निरूपयित्वा एवं विशदयति यथा- मुक्तत्वादिरुपेण करणीयत्वात् पराधीनत्वेन अल्पस्य जीवस्य स्वातन्त्र्यादि गुणपूर्णत्वात् कृत्स्नेन ब्रह्मणैक्यज्ञाने च महातामसम्। एकजीवादन्यत् किमपि नास्तीति अहैतुकं ज्ञानं सर्वमपि तामसम्[२४३]। अतत्वार्थवत् सदसद्वै लक्षणयाद् अन्यथार्थ कल्पना युक्तमेव तामसम्। एकस्मिन् सर्ववज्ज्ञानां कार्ये जीवे पूर्णब्रह्मेति सक्तं ज्ञानं निर्युक्तिका च अतत्वार्थकल्पनायुक्तमल्पज्ञानं च पृथक् तामसमेव एतावत् पर्यन्तमेव गीताभाष्ये, गीतातात्पर्ये च ज्ञानविषयमधिकृत्य भाष्यकारेण, श्री मध्वाचार्येण विस्तृत विषयाः उपसंहरति।

अस्य सिद्धान्तनुसारं ब्रह्मैव स्वतन्त्र तत्वम् जगद्, जीवात्मानाः च ब्रह्मभिन्नाः चेदपि ते न स्वतन्त्राः। ब्रह्मात् भिन्नाः चेदपि तेऽपि ब्रह्मैव आश्रयवस्तु। अतः एते परतन्त्रत्वम् इति नाम्नौव अस्य सिद्धान्ते आहुयते। यथा स्वतन्त्रम् अस्वातन्त्रं च द्विविधं तत्वमीषयते"

(तत्वसंख्यानां) अत्र प्रापञ्चस्थ वस्तुनौ पञ्चभेदाः निर्दिशन्ति - ''प्रकृष्टः पञ्चविधो भेदः प्रपञ्चः''। जीवेश्वरभिदाचैव जडेश्वरभिदा तथा जीवभेदो मिथश्चैव जडजीव भिदातथा मिथश्च जडभेदोयं प्रपञ्चो भेदपञ्चकः [२४४]। अस्य सिद्धान्तानुसारेण एतानि पञ्चभेदानि यदा प्रत्यभिज्ञायते तदामोक्षं लभते। मोक्ष्यस्य चतुःप्रकारं च कर्मक्षयं, जन्म क्षयं, अर्चिरादिमार्गं, भोगश्च एषु भोगस्य पुनः अपि उपप्रकाराः एते सालोक्यं, सामीप्यं, सारूप्यं, सायुज्यं च। मुक्तिर्हित्वान्यथारूपं स्वरुपेण व्यवस्थितिः इति ब्रह्मसूत्रस्य (१.१.१७)भाष्ये स्पष्टयति।

मोक्षोपायमार्गेषु एकं भवति ज्ञानं, मोक्षकारणेषु प्रधानकारणेष्वेकं भवति ज्ञानं चेदपि आत्यन्तिककारणं नास्ति अपरोक्षज्ञानाय तदर्थम् अवकाशः भक्ति तदर्थं साधना क्रमं चाचरणीयम्। एषु साधनाक्रमेषु सुप्रसिद्धघटकमेव भवति तदर्थं साधनाक्रमं च आचरणीयम्। एषु साधनाक्रमेषु सुप्रसिद्धघटकमेव भवति भक्तिः। मोक्षोपार्जनार्थम् ईश्वर-उपासकयोः मिथः सम्बन्धः बिंम्बप्रतिबिम्बवत् भवेत् [२४५]। ज्ञानयोगे श्रवणं, मननं, निदिध्यासनम् इति त्रयमपि अन्तर्भवति। भक्ति-ज्ञानयोः मिथः परस्परपूरकत्वेन भवेत्। ज्ञानयोगं विना भक्तिः व्यर्थमेव। एवमेव भक्तिरहित ज्ञानयोगश्च निष्फलमेव। अननेध्यवसायी भक्तः ईश्वरं स्वीय बिंम्बरुपेण उपासति तदा भक्तिमार्गः ज्ञानमार्गेश्च मिलित्वा मुक्तिपदं प्रापयति। ज्ञानस्य भक्तिभागत्वात् भक्तिर्ज्ञानमितीर्यते। ज्ञानस्य विशेषो यद्भक्तिरित्यभिधीयते।। [२४६]

## ४.६ ज्ञानं विशिष्टाद्वैतञ्च

श्रीमन्नारयणस्य सर्वोत्तमत्वप्रतिपादनेन वेदान्तदर्शनेषु वैशिष्ट्यं भवति विशिष्टाद्वैतदर्शनम्। तत्र भगवद्गीतायाः भक्तिसिद्धान्तानुसारलिखितभाष्येषु प्राचीनं, भवति श्रीसम्प्रदायस्य स्थापको श्रीरामानुजः। अस्य भाष्ये प्रथमाध्याये भगवता विष्णोः स्वरुप विवरणं विस्तरेण दृश्यते [२४७]। अस्य दर्शनानुसारेण मोक्षोपायः भक्तिरेव। किन्तु अत्र

गीताशास्त्रे कर्म-भक्ति-ज्ञानादीनां सिद्धान्तानां प्रयोगाः प्रत्येक सन्दर्भेषु आविष्कृतं भवति। एषां सिद्धान्तानुसारेण अव्यक्तोपासना ब्रह्मोपासना नास्ति, अर्थात् प्रत्येकं प्रत्येकम् आत्मनः आत्मस्वरूपस्य चिन्तनमेव इति। एतादृश विविध विषयेषु अन्य दार्शनिक सिद्धान्तैः सह भेदः सन्ति। अद्वैतादि दार्शनिकानां गीताभाष्यकाराणां सिद्धान्तानां च खण्डनमपि अत्र आचार्येण *भाष्ये* अकरोत्। अष्टादशाध्यायात्मकं गीताभाष्यं षट्कत्रयेण च विभक्तं भवति। अत्र प्रथमेन षटकेन श्रीमतो नारायणस्य प्राप्त्युपायभूतोपासनं तदङ्गभूतम् आत्मज्ञानपूर्वककर्मानुष्ठानं साध्यं प्राप्तु प्रत्यगात्मनो याथात्म्यदर्शनं च उक्तं द्वितीयेन षट्केन परब्रह्मभूतपरमपुरुषस्वरूपं तदुपासनं च भक्ति शब्दवाच्यम् उच्यते[२४८]। अन्तिमेन षट्केन प्रकृति पुरुष तत्संसर्गरूप् प्रपञ्चेश्वर याथात्म्य कर्मज्ञान भक्तिस्वरूपतदुपादान प्रकाराः विशदयन्ति[२४९]। अत्र ज्ञानविषये उभयवेदान्तिनः दर्शनं गीताभाष्यानुसारेण विचारयति।

अत्र भाष्यस्यारंम्भे श्रीलक्ष्मीनाराणस्य गुणान् वर्णयति। ज्ञानानन्दैकसोपाधिकनवाधिका ज्ञानबलैश्वर्यवीर्यशक्तिभेदादि महोदधि। गीताविषयोऽयं पाण्डुतनयम् अर्जुनस्य युद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षण मोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगम् अवतारयामास [२५०] एकादशे श्लोकव्याख्याने अर्जुनविषादपरिहारार्थम् "अशोच्यान्वशोच्यस्त्वम" इति श्लोके अनुशोचनं यच्च देहातिरिक्तात्मज्ञानकृतं धर्माधर्मभाषणम्। अत्र व्याख्याने बाधितानुवृत्ति विषये एवं विशदयति" अद्वैतात्मज्ञानेन आत्मव्यतिरिक्त भेदज्ञानकारणस्य अज्ञानादेः विनष्टत्वात्। २६ तम श्लोकस्य भाष्ये विष्णुपुराणे" सद्भाव एवं भवता मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् (२/२२/४५)[२५१] अत्र ज्ञानशब्देन आत्मवाचकमिति, आत्माज्ञानस्वरूपमेव। श्लोकस्य(३९) भाष्यावसरे साख्यबुद्धिः, योगबुद्धिः इति पदद्वयविषये आत्मतत्वं साङ्ख्यं, साङ्ख्याबुद्धिः बुद्ध्याऽवधारणीयम् आत्मतत्वं साङख्यम्। आत्मज्ञानपूर्वकमोक्षसाधनभूतकर्मानुष्ठाने यो बुद्धियोगो वक्तव्यः तद् एव इह योग शब्दनेन उच्यते[२५२]। ४१ तम श्लोके व्यवसायात्मिका बुद्धिः.... इति श्लोके मुमुक्षुणा अनुष्ठेये कर्माणि बुद्धिः व्यवसायात्मिका बुद्धिः एवं काम्य

कर्मविषया तु बुद्धिः अव्यवसायात्मिका इति च। तृतीये कर्मयोगे ज्ञानमधिकृत्य ३९ तम श्लोके-

“आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा
कामरुपेण कौन्तेय दुष्पूरेणानलेन च।।३.३९।
तस्मात्वमिन्द्रियाप्यादौ नियम्य भरतर्षभ
पाम्पानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्”।।३.४१।

अत्र श्लोकत्रयैः अस्य ज्ञानिनः रिपुवत् भवति कामादीन्, इन्द्रियाणि च। मोक्षोपायारम्भ समये एव इन्द्रियव्यापाररुपे कर्मयोगे आत्मस्वरुपविषयस्य ज्ञानस्य तद्विवेकविषयस्य च नाशनम् इत्याशयः [253] । चतुर्थाध्यायस्य उपोद्घाते यथा पूर्वोक्तः कर्मयोगस्थं निखिलजगदुद्धरणाय मन्वन्तरादौ एव उपदिष्टतया कर्तव्यतां दृढयित्वा अर्न्तगत ज्ञानतया अस्यैव ज्ञानयोगाकारतां प्रदर्श्य कर्मयोगस्वरुपभेदाः कर्मयोगे ज्ञानांशस्य एव प्राधान्यं च उच्यते।

“श्रेयान्द्रव्यमयाद्यज्ञानज्ज्ञानयज्ञः परन्तप
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।।४.३३।
तद्विध्दि प्रणिपातेन परिप्रश्नेन सेवया
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः”।।४.३४।

आद्य श्लोकेन समस्तमपि कर्ममन्यत् सर्वमपि ज्ञाने परिसमापयति। ‘तद् एवं सर्वैः साधनैः प्राप्यभूतं ज्ञानं कर्मान्तर्गतत्वेन अभ्यस्यते। अनेन अभ्यस्यात्मानां क्रमेण प्राप्यदशां प्रतिपद्यते। द्वितीयश्लोकेन अत्र प्रतिपाद्य आत्मविषयकं ज्ञानं भगवता उपदिष्ट विषयं भगवदुक्त कर्मणि वर्तमानः त्वं विपाकानुगुणं काले/समये/युक्तावसरे प्रणिपात, प्रश्नः, सेवाभिः विशदयित्वा ज्ञातव्यमित्याशयः। तादृश ज्ञानम् अर्जुनस्य सद् जिज्ञासा उपदेक्ष्यन्ति[254]।

"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते
तत्स्वयं योगसंगिद्धः कालेनात्मनि विन्दति।।४.३८।
श्रद्धावाल्लभते ज्ञानं तत्परः संयतेन्द्रियः
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।"४.३९।

एषु श्लोकद्वयेषु आद्य श्लोकेन आत्मज्ञानेन सदृशं शुद्धिकरम् अत्र जगदि नास्ति अनेनात्मज्ञानेन सर्वमपि पापं नाशयति। एवं वर्णितज्ञानम् उपदेशमहरहरनुष्ठीयमानं ज्ञानाकार कर्मयोगेन स्वस्यात्मनि स्वयमेव लभते। अग्रिम श्लोकेन तादृश ज्ञानं लब्ध्वा अन्यविषयात् इन्द्रियाणि सर्वाणि विषयात् प्रत्यानीय शीघ्रमेव पूर्वोक्तलक्षणयुक्तज्ञानं लभते, एवं रुपविधज्ञानं लब्ध्वा परं निर्वाणं प्राप्नोति[२५५]। पञ्चमे कर्मसन्यासयोगे पञ्चदश (१५) षोडश (२६) श्लोकद्वयेन एवं विचार्यते-

"नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।।५.१५।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।"५.१६।

पूर्व-पूर्वकर्मणा स्वस्यफलानुभवयोग्यत्वात् यः तादृशस्य ज्ञानम् आवृतं भवति अनेनावृतमिति कारणेन ज्ञानावृतरूपेण कर्मणा देवादि देहसंयोगः तद्वारा आत्माभिमानरूप मोहः च उत्पद्यते। तादृश आत्माभिमानवासनया उचितकर्म वासना च जायते तादृश वासनातो विपरीतात्माभिमानः अथवा कर्मारम्भश्च जायते[२५६]।

आत्मसंयमयोगो नाम षष्ठाध्याये अष्टमश्लोकस्य भाष्यावसरे अत्रापि ज्ञानशब्देन आत्मस्वरूपविषयेण ज्ञानेन प्रकृति- विलक्षण-रूप - विषयविज्ञानादिरुपेषु यस्य मनः तृप्तो भवति सः ज्ञानविज्ञानतृप्तात्मा। सप्तमे ज्ञानविज्ञानयोगे द्वितीय श्लोकेन कृष्णः ममसम्बन्ध यत् विषयं वर्तते तत् विज्ञानेन युक्तम् अथवा विविक्ताकारविषयं ज्ञानं वर्णातीत गुणयुक्तं च

भवति। अस्मिन्नेवाध्याये अष्टादश श्लोकस्य व्याख्याने ज्ञानि तदायत्तात्मधारणः अहम् इति मन्ये। यथा स्वीयान्तस्य चैतन्यम् आत्मचैतन्यं ज्ञानमिति यः जानाति सैव। राजविद्या-राज गुह्ययोगमिति नवमाध्याये प्रथम श्लोकेन -

"इदं तु ते गुह्यतमं प्रत्यक्ष्याम्यनसूयवे
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।।९.१।
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्।।"९.२।

सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं न तु ध्यानं तस्याज्ञाननिवर्तकत्वात्। तत्वन्तःकरणशुद्धिद्वारेदमेव ज्ञानं संपाद्य क्रमेण मोक्षं जनयतीत्युक्तम्। गुह्यविषयेषु गुह्य रूपेण वर्तते उपासना संम्बन्धिभक्तिरुपस्थ यत् ज्ञानं भवति तत् मत्सम्बन्धिविषयमेव, परिमितिरहितादि सीमारहितं च मम माहात्म्यान् च श्रुत्वा एवमेव सम्भवति इति मन्वनाय ते प्रवक्ष्यामि। अस्य तात्पर्यम् अस्य ज्ञानस्य अनुष्ठानादिकं ज्ञात्वा ईश्वर प्राप्तेः विरोधिनः सर्वस्मात् अपि कारणात् मोक्ष्यसे[२५७]। अनन्तर श्लोके अत्र विस्तृत ज्ञानं धर्मयुक्तं च भवति। अनेकजन्मसहस्रसंचितानां सर्वेषामपि पापानां स्थूलसूक्ष्मावस्थानां तत्कारणस्य चाज्ञानस्य सद्य एवोच्छेदकम्। न चातीन्द्रिये धर्मम् इवात्र कस्यचित्संदेहः स्वरूपतः फलतश्च प्रत्यक्षत्वादित्याह। प्रत्यक्षमवगमो मानमस्मिन्निति स्वरूपतः साक्षिप्रत्यक्षत्वं, प्रत्यक्षोऽवगमोऽस्येति फलतः साक्षिप्रत्यक्षत्वम्। मयेदं विदितमतो नष्टमिदानीमत्र ममाज्ञानमिति हि सार्वलौकिकः साक्ष्यनुभवः। निःश्रेयसाधनत्वम् अत्यर्थप्रियत्वस्वरूपेण मद्दर्शनोपादानतया स्वयं निश्रेयसरूपं अपि निरतिशय विश्रेयरुपात्यन्तिक मत्प्राप्ति साधनम् इति तात्पर्यार्थः[२५८]। दशमाध्यायस्य चतुर्थश्लोक भाष्ये ज्ञानं नाम चिदचिद्वस्तुविशेष विषयः निश्चयः। त्रयोदशे क्षेत्र-क्षेत्रज्ञ विभागयोगे द्वतीय श्लोके

"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत

क्षेत्र क्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम।।"१३.२।

पृथिव्यादि सङ्धातरुपस्य क्षेत्रं-क्षेत्रज्ञयोः द्वोयरपि स्वभावस्वरुपौ अद्वितीयस्यैव भगवतः शरीरमेव अतः द्वयोरपि मूलरुपस्तु भगवता जातमेव। द्वयोः आत्माऽपि भगवतायेव। अस्य दृढीकरणाय बृहदण्यके यः पृथिव्यां निष्ठन्,....य आत्मनि निष्ठन्नात्मनो....।[२५९] अनेन क्षेत्र-क्षेत्रज्ञयोः विवेकद्वारा तयोः मदात्मकत्वमनेन क्षेत्र-क्षेत्रज्ञयोः विवेकद्वारा तयोः मदात्मकत्वविषयं च ज्ञानमुक्तम्। तद् एव उपादेयं ज्ञानमिति रामानुजमतम्। निवृत्ताज्ञानः चेत् निर्विशेषचिन्मात्रैक स्वरुपे आत्मनि अतद्रूपाध्यास सम्भावनया कौन्तेयादि भेद दर्शनं तान् प्रति उपदेशादि व्यापारः च न सम्भवति। ईश्वरस्य अज्ञानात् क्षेत्रज्ञत्वं प्रापयति। अस्य क्षेत्रज्ञस्य निवृत्यर्थं समन्वयस्य उपदेशं यथा सत्यवादिनो पुरुषः रज्जुः इयं न सर्पः अनेन सर्पत्व भ्रान्त्याः निवृत्तिरेव लभ्यते। अनेन आप्तोपदेशेन सर्पत्वभ्रम निवृत्तिवत् क्षेत्रज्ञत्व भ्रमो निवर्तते इति। अत्र पूर्वपक्षेण आत्मयाथात्म्यसाक्षात्कारेण निवृत्ताज्ञानः उत न अस्योत्तररुपेण निवृत्ताज्ञानः इति चेत् निर्विशेष चिन्मात्रैकस्यरुपे आत्मनि अतद्रूपाध्यास सम्भावनया कौन्तेयादि भेददर्शनं न सम्भवति[२६०]। आत्मनः यथार्थ स्वरुप साक्षात्कारस्य कारणं भगवतः अज्ञाननिवृत्तिराहित्यं वा इति चेत् (४.३४) श्लोके "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः"। श्रुत्यादिषु जडवस्तु चैतन्यवस्तु इति परब्रह्मणः स्वरुपविवेचनं श्रुतिषु विशदयति -*श्वेताश्वतर उपनिषद्* अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः ( ४/९),मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (४/१०), क्षरं प्रधानममृताक्षरं हरः क्षरात्मनावीशते देव एकः (१/१०) एषु अमृतमक्षरं इत्यादि नाम्ना परमेश्वरैव भोक्ता एवं भोग्यत्वेन प्रकृतिरपि अस्यैव शक्तिः इतोऽपि -*श्वेताश्वतर उपनिषद्* स कारणाधिपाधिनो न चास्य कश्चिज्जनिता न चाधिपः (६/९), प्रधानक्षेत्रज्ञपतिर्गुणेशः (६/१६) तैं नां पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् (१०), *श्वेताश्वतरउपनिषद्* ज्ञाज्ञौ द्वावजावीशनीशौ (१,९), नित्यो नित्यानां चेतनश्चेतनानामको बहूनां यो विदधाति कामान् (६/१३), भोक्ता

भोग्यं प्रेरितारं च मत्वा (१/१२), पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति (१/६) मुण्डके तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति (३/१/१) श्वेताश्वतर उपनिषद् अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः(४/५), समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः(४/७) इत्यादि अस्य प्राधान्यं विशदयति। स्मृतौ नाम गीतायां च ७-४,५, ९-७,८,१०, १३/१९, १४/३ अनेन जगदि जातेषु भूतेषु मम प्रकृत्याः नाम ब्रह्मैव, मदीयं प्रकृत्याख्यं भूतसूक्ष्मम् अचिद्वस्तु जडवस्तुरेव। *मुण्डकोपनिषदि* च तस्माद् "एतद् ब्रह्म नामरुप मन्नं च जायते अनन्तरं परमपुरुषस्य आत्मतत्वं संस्थापयितुं काश्चन श्रुतयः- *बृहदारण्यकोपनिषद्*- ३/७/३, ३/७/२२, *सुबालोपनिषदि*- ७, *तैतिरीय आरण्यके* ३/११ इत्यनेन द्योतयति। अनन्तरं परम पुरुषस्यैव चिदचिद्विस्तु शरीरतया कार्यावस्था कारणावस्था जगद्रूपेण अवस्थित इति स्थापितुं *छान्दोग्योपनिषदि* ६/२/२, ६/२/३ ६/८/६, ६/८/७ *तैत्तिरीये* २/६१, *छान्दोग्ये* ६/३/२ *तैत्तिरीयं* २/६/१ च ब्रह्म जीवात्मरुपेण ब्रह्मात्कत्वं अनेन एकार्थाद् आत्मशरीर भावनिबन्धनमिति विज्ञायते।

अतः एव परम पुरुषस्य कार्यावस्थः, कारणावस्थः, स्थूल-सूक्ष्म-चिद् अचिद् वस्तु शरीरः इति। अनेन कार्यस्य अनन्यत्वेन, कारण विज्ञानेन कार्यस्य च ज्ञानेन एक विज्ञानेन सर्वविज्ञानमिति युक्तमेव। अतः स्थूल सूक्ष्मचिदचित्प्रकारं ब्रह्म एव कार्यं करणं च इति ब्रह्मोपादानं जगत्। सूक्ष्मचिद् अचिद् वस्तुशरीर ब्रह्म एककारणं जगदः ब्रह्मेपादानत्वे चिदचितोः ब्रह्मणः च स्वभावासङ्करः अपि उपपन्नतरः। चितचिदीश्वर सङ्घातोपादानत्वेऽपि भोक्तृत्व भोग्यत्व नियन्तृत्व नियम्यत्वाद्यासङ्करः [२६१] । चिदचित्तोः सर्वावस्थयाः परमपुरुषशरीरत्वेन तत्प्रकारतया एव पदार्थत्वात् तत्प्रकारः परमपुरुष एव कारणं कार्यं च/ स्थूलावस्थायः नामरुप विभाग विभक्तस्य चिदचिद्वस्तुन आत्मतया अवस्थानात् कार्यत्वम्, अवस्थान्तरापत्तिः एव हि कार्यता। निर्गुणवादाः परब्रह्मणः हेयगुणसम्बन्धाभावात् उपपद्यन्ते।

अतः ब्रह्म ज्ञानस्वरूपम् इति वादः च सर्वज्ञस्य सर्वशक्तेः निखिलहेय प्रत्यनीक कल्याणगुणाकारस्य परस्य ब्रह्मणः स्वरूपं ज्ञानैक इति निरूपणीय स्वप्रकाशतया ज्ञानस्वरूपमिति। तथा ब्रह्मणः स्वरुपलक्षणं - "सत्यं ज्ञानमन्तं ब्रह्म" *तैत्तिरीयोपनिषद्* २.१.१) *मुण्डके* -१/१/९ श्वताख्वतरे ६१८, *बृहदारण्यकोपनिषद्* २/४/१४, अनेन श्रुत्यादिना ज्ञानैक निरूपणीयता स्वप्रकाशतया च ज्ञानस्वरूपत्वम्। *तैत्तिरीयोपनिषद्* २/६/१, *छान्दोग्योपनिषद्* ६/२/३, *बृहदारण्यकोपनिषद्* १/४/७, ४/५/६, ४/५/७, ४/५/११ अनेन श्रुत्यादिना ब्रह्मणः स्वसङ्कल्पाद् विचित्रस्थिरत्वस्व रुपतया नानाप्रकारमविस्थितमिति। ब्रह्णः एकत्वं बोधयितुं केचन श्रुत्यः ४/४ *बृहदारण्यकोपनिषद्* /१९, कठोपनिषद् २/१/११, *बृहदारण्यकोपनिषद्* २/४/१४, *तैत्तिरीयोपनिषद्* २/६ इत्यादिना ब्रह्मणः नाना नामरूप भाक्तत्वेन नाना प्रकारत्वमपि निषिध्यते। अत्र चिदचिदीश्वराणां स्वरुप-स्वभावादीनां भेदाः पूर्वं सूचित सन्दर्भेषु, श्रुतीनां साहाय्येन सिद्धान्तितम्। अनेन ब्रह्मज्ञानवादस्य, औपाधिकब्रह्मस्य, भेदवादस्य, इत्यादिनां भेदाश्रयश्रूतीनां समन्वयीकरणम्, व्यचारितम्। अनन्तरमत्र एकादशमश्लोकेन-

"अध्यात्मज्ञान नित्यत्वं तत्वज्ञानार्थ दर्शनम्।

एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा"।।१३.१२।

अनेन श्लोकेन ज्ञानस्य, एवमज्ञानस्य च किं विषयं किमिति विशदयति। ज्ञायते अनेन आत्मा इति ज्ञानम्, आत्मनि ज्ञानम् अध्यात्मज्ञानं तत्वम्। अज्ञानमित्यस्य क्षेत्र सम्बन्धिनः पुरुषस्य अमानित्वादिकमुक्तं गुणवृन्दम् एव। आत्मज्ञानोपयोगी एतदव्यतिरिक्तं सर्वं क्षेत्रकार्यं आत्मज्ञानविरोधि[२६२]।

"ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते

ज्ञानं ज्ञेयं ज्ञानगम्यमिति सर्वस्य विष्ठितम्।।१३.१८।

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः

मद्भक्त एतद्विज्ञाय मद्भावयोपद्यते"।।१३.१९।

अत्र उदाहृतेषु प्रथम श्लोकेन दीपादित्यादीनाम् अपि आत्मप्रभारूपं ज्ञानमेव प्रकाशकम्। अतः ज्ञानं ज्ञेयं ज्ञानैकाकारम् इति ज्ञेयं तत् च ज्ञानगम्यम् अमानित्वादिभिः उक्तैः ज्ञानसाधनैः प्रत्यक्षम् इति।

गुणत्रयविभागयोगो नाम चर्तुदशाध्याये प्रथम द्वितीय श्लोकैः ज्ञानमधिकृत्य एवं वदति-

"परं भूयः प्रक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः।।१४.१।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च"।।१४.२।

प्रकृति पुरुषान्तर्गतं सत्वादि गुणविषयमेव ज्ञानं, तत् च सर्वेषां प्रकृतिपुरुष विषय ज्ञानं उत्तम विषयमेव। आनेन सर्वे मुनयः इतः संसारमण्डलात् परां सिद्धिगताः। मयोक्त ज्ञानेन मामुपाश्रिताः मम साधर्म्यमागताः सर्गेऽपि न उपजायन्ते। ज्ञानेन ते सृष्टि- नाशादि कर्मैः उपरिगच्छति इति तात्पर्यम्[२६३]। अत्र नवमश्लोकेन, सत्वं सुखसङ्ग प्रधानम् भवति, रजः कर्मसङ्गप्रधानम्, तमः वस्तुयाथात्म्यज्ञानमावृत्यविपरीतज्ञानहेतुतया कर्तव्य विपरीतप्रवृत्ति सङ्गप्रधानम् च भवति। एकादशमश्लोकेन ज्ञानेन्द्रियैः यदा वस्तुयाथात्म्य प्रकाशे ज्ञानमुपजायत अनेन तस्य देहौ सत्वं वर्धयति इत्यर्थः। सप्तदशश्लोकेन सत्वादि गुणैः आत्मयाथात्म्यापरोक्ष्यरूपं ज्ञानं जायते। रजोगुणेन स्वर्गादि फलं लोभः च लभ्यते, तमसः वर्धनात् अज्ञानमेव लभ्यते।

अष्टादशाध्याये अन्तिमाध्याये मोक्षसन्यासयोगे ज्ञानस्य त्रैविध्यत्वमुक्तम् । सात्विक- राजस- तामस भेदाः २०, २१, २२ श्लोकैः विस्तृतम्। द्विचत्वारिंशत् तम श्लोकस्य

व्याख्यानावसरे परावर तत्वयाथात्म्यज्ञानं, ज्ञानम्, विज्ञानं परत्वगतासाधारण विशेष विषयं ज्ञानमिति च उक्तम् अत्र ज्ञानस्य त्रैविद्यत्वमेवं विशदयति। यथा-

"सर्वभूतेषु येनैकं भावमव्ययमीक्षते
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्।।१८.२०।
पृथक्त्वेन तु यज्ज्ञानं नाना भावान्पृथग्विधान्
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।।१८.२१।
यत्तु कृत्सनवदेकस्मिन्कार्यो सक्तमहैतुकम्
अतत्तवार्थ वदल्पं च तत्तामसमुदाहृतम्"।।१८.२२।

सात्विक ज्ञानेन यथा-ब्राह्मण-क्षत्रिय, ब्रह्मचारि-गृहस्थादिरीत्या विभक्तेषु कर्माधिकारिषु प्राणिषु येन ज्ञानेन एकरुपत्वं भावं लभ्यते, एवं विविध प्राणिजालेषु भूतेषु येन ज्ञानेन एकत्वरुपेण पश्यति, नाशत्वसहितेषु ब्राह्मणादिशरीरेषु अविकृतः फलादिसङ्गानर्हं च कर्मोधिकारवेलायाम् ईक्षते तत् एव सात्विकज्ञानम्। ब्राह्मणादिषु ब्राह्मणाद्याकार पृथक्त्वेन आत्माख्यन् अपि सितदीर्घादिपृथक्त्वेन च फलादि संयोगयोग्यान् कर्माधिकारवेलायां यत् ज्ञानं वेत्ति तद् ज्ञानं राजसम् एकस्मिन् कर्तव्ये कर्मणि प्रेतभूतगणाद्याराधनरुपे अत्यल्पफले अकृत्स्न फलवत्ततया तथाविध सडध्गहेतु रहितम् आत्मनि पृथगत्वादि युक्ततया मिथ्याभूतार्थ विषयम् अत्यल्पफलं च प्रेतभूताराधन रुपविषयत्वात् तत् ज्ञानम् तामसमिति [२६४]।

"ईश्वरश्चिदचिच्येति पदार्थत्रित्रयं हरिः
ईश्वरश्चित् इत्युक्तो जीवो दृश्यमचित्पुनः"।।

अस्य सिद्धान्तानुसारेण आत्मा केवलज्ञानस्वरुपः नास्ति ज्ञाता एव, अतः मोक्षप्राप्तिः प्रापयति चेदपि जीवाः ब्रह्मे न लीयते।

> "वासुदेवः परं ब्रह्म कल्याणगुणसंयुतः।
> भुवनानामुपादानं कर्ता जीवनियामकः"।।

अपहतपापत्वं विरजत्वं विमृत्युक्तं, विशोकत्वं, सत्यकामत्वं सत्यसङ्कल्पत्वम् इति षट् गुणैः युक्तं वासुदेवादिपदवाच्यं परब्रह्मैव सूक्ष्मत्वेन वर्तते। अभिगमनम्, उपादानम्, इज्य, स्वाध्यायं योगे एते पञ्च प्रकाराः सन्ति उपासनायाम्। उपासनया साकं कर्म च विज्ञानं च मिलित्वा भक्तानाम् अयथार्थज्ञानं नाशो भवति। तदा एव भगवता पुरुषोत्तमेन भक्तैः अनन्त-आनन्दरूपं पुनरावृत्तिरहितं च स्वपदं ददाति।

> "स्वभक्तं वासुदेवोऽपि संप्राप्यानन्तमक्षयं
> पुनरावृत्तिरहितं स्वीयं धाम प्रयच्छति।"

## ४.७ आचार्यत्रयाणां ज्ञानविषये तुलनात्मकमध्ययनम्

धर्मार्थकाममोक्षाख्येषु पुरुषार्थचतुष्टयेषु परमपुरुषार्थः मोक्षः एव। अस्य मोक्षस्यार्जनाय बहवः मार्गाः दार्शनिकैः र्निदिश्यन्ति। वेदान्तशास्त्रे परमपुरुषार्थ इत्यनेन अधिकतया ज्ञानेन ब्रह्मप्राप्तिः प्राप्तुं शक्यते। किन्तु तदर्थं सफलीकरणाय विविधैः आचार्यैः विविधदर्शनिकपद्धतिः च निदिशति। अस्य वेदान्तशास्त्रस्य प्रमाणग्रन्थरूपेण वर्तते प्रस्थानत्रयम्। स्वमतस्थापनाय आचार्यैः अस्योपरि पृथक् भाष्याणि च अरचयन्। तद्धारा एव अद्वैतं, द्वैतं, विशिष्टाद्वैतं, द्वैताद्वैतं, शुद्धान्द्वैतम् इत्यादि दार्शनिकपद्धतिः च आविष्कृतवन्तश्च। एषु द्वैत-अद्वैत विशिष्टाद्वैतेषु प्रस्थानत्रयस्य प्रत्येकं भाष्यम् आलिखितं च। सर्वैषामपि वेदान्तदर्शनानां लक्ष्यस्थानं ब्रह्मैव।एवं चेदपि अस्य स्वरूपविषये गुणविषये च भेदाः वर्तन्ते। एवमेव अस्य ब्रह्मणः समर्थनाय च मतभेदाः सन्ति। एषु त्रयेषु एवं लभ्यमानेषु भाष्येषु च प्राचीनं शङ्करभाष्यमेव। तस्यानन्तरमेव विशिष्टाद्वैतम्, अनन्तरं द्वैतं च। एवं भवति कालगणनानुसारेण एतेषां रचनायाः कालः इति पण्डितमतम्।

अद्वैतवेदान्ते ब्रह्मणः स्वरूप-तटस्थलक्षणै स्तः। तद् 'सत्यं ज्ञानम् अनन्तं ब्रह्म', ''यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म इति''[२६५] अस्यां दर्शनानुसारेण अज्ञान नाशनेनैव ज्ञानार्जनम्। तदर्थं साधन चतुष्टय सम्पत्या एवमेव श्रवण-मनन-निदिध्यासनादिना च ज्ञानं प्राप्तुं शक्यते। अद्वैते ब्रह्म निर्गुणं, निष्क्रियं, निराकारं, निरुपमम् अनन्तं च भवति। एवं चेत् द्वैत विशिष्टाद्वैतेषु ब्रह्म सगुणं च। विशिष्टाद्वैते श्रीनारायणः ब्रह्मरूपेण ते सिद्धान्तयति। द्वैतमतानुसारेण मोक्षकारणेषु प्राधनं भवति ज्ञानं किन्तु ज्ञानं मोक्षस्य आत्यन्तिक कारणं नास्ति। यथा केवलेन ज्ञानेन मोक्षं प्राप्तुं न शक्यते। तेषां मतानुसारेण भक्तियोग-ज्ञानयोगयोः एकीभावेन कैवल्यं प्राप्तुं शक्यते। तदर्थं भक्ति-ज्ञानयोः परस्परपूरक रूपेण भवितव्यम्। अद्वैते केवलेन ज्ञानेन कैवल्यं प्राप्तुं शक्यते। किन्तु द्वैते केवलेन ज्ञानेन मोक्षप्राप्तिः न भवति। मोक्षार्जनाय ईश्वरप्रेमेण भक्तः ईश्वरः स्वीय बिंम्ब इति रूपेण उपास्यते चेत् तदा भक्तिमार्गं ज्ञानमार्गं च एकीभूत्वा मोक्षं प्रापयति।

रामानुजीय विशिष्टाद्वैत सिद्धान्तानुसारेण सर्वेरपि कैवल्य प्राप्यथर्थं भजनादिना समाश्रयणीयम्। तत्र अस्यदर्शने ईश्वरम् इत्यनेन श्रीनारायणमेव परिगणयति। अत्र ईश्वरत्वं नाम व्यापकत्वे सति चेतनत्वं सत्यसङ्कल्पत्वम् अन्यवेदान्तदर्शनवत् ईश्वरः एव अस्य जगतः कारणम्। अद्वैतिनां निर्गुणं ब्रह्म इत्यस्य खण्डनं विशिष्टाद्वैतिनः र्निगुणे ब्रह्मणि जगत्कारणत्वस्य सुतरामसंभवात् सगुणमेव ब्रह्मेति रामानुजमते। अद्वैते च निर्गुणब्रह्मैव जगत्कारणम्। उभयवेदान्तिनां मते सर्वेऽपि जनाः मोक्षप्राप्यर्थं परमेश्वरं भजन्ति। भक्तिरेव मोक्षप्राप्यर्थं प्रधानमार्गः। ज्ञानं, कर्म च भक्तिलाभे प्रयोजकमिति तेषां मतम् सत्कर्माचरणेन ज्ञानं लभते, ज्ञानलाभेन अन्तःकरणस्य शुद्धीकरणम् अनेन भक्तिः च लभ्यते।

अन्तिमे यथार्थ ज्ञानं प्राप्तुम् अन्य प्रमाणाः च क्रियते। विशिष्टाद्वैतिनः प्रत्यक्षम्, अनुमानं, शाब्दमिति प्रमाणत्रयमेव अङ्गीकरोति। शङ्करमते प्रत्यक्षम्, अनुमानम्, उपमानं,

शाब्दाम्, अर्थापत्तिः,अनुषलब्धिरिति षट् प्रमाणानि अङ्गीकुर्वन्ति। माध्वमते प्रमाणाः तथा प्रत्यक्ष, अनुमान, उपमान शब्दः, अर्थापत्तिः, अनुपलब्धिश्च। अवसाने आस्तिकदर्शनेषु ज्ञातृज्ञानज्ञेययोः विषयं मतभेदाः सन्ति, अद्वैतसिद्धान्तानुसारेण ज्ञातृज्ञानज्ञेय मितित्रित्वं ब्रह्मैव। ज्ञानमेव।

## ४.८ अध्यायोपसंहारः

अस्मिन्नध्याये गीताशास्त्रे ज्ञानमधिकृत्य /ज्ञानमित्यस्य भगवद् गीतायाः वीक्षणं, कथमिति ज्ञातुं प्रयत्नमकरोत्। अस्य विषयस्योपरि आचार्यत्रयाणां मतं, दार्शनिक वीक्षणे ते कथं स्वीकरोति, निराकरोति इत्यस्य अंशाः एव अत्र पर्यालोचितम्। पूर्वाध्यायेषु समानरीत्यायेव कर्मविषये, भक्तिविषये चिन्तितमेव। अद्वैतसिद्धान्ते ज्ञानेनैव अमृतत्वप्राप्तिरिति सूचिताः अभेदश्रुतयः च सन्ति। एवं चेदपि एकैकानां मतानां पर्यालोचनसमये एव केचनाः ज्ञानवादिनाः अपरे ज्ञानकर्मसमुच्चयवादिनश्च। एवं चेदपि द्वैतदर्शने मध्वाचार्येण ज्ञानकर्मसमुच्चयवादस्य निराकरणमकरोत्। उभयवेदान्तिनः/विशिष्टाद्वैते च समानरीत्यायेव।किन्तु द्वैत-विशिष्टाद्वैतौ तु भक्तिविषये प्राधान्यंम् अधिकं दादाति। अद्वैतिनां निंगुणब्रह्म इति सङ्कल्पमपि ते तेषां सिद्धान्तानुसारेण खण्डयति च। द्वैत- विशिष्टाद्वैतिनस्तु उपनिषत्सु विचारित द्वैतश्रुत्यनुसारेण तेषां दर्शनानां सिद्धान्तनिर्णयञ्चाकरोत्। ब्रह्म ज्ञानमेवेति उपनिषत्सु एवं प्रायेण दर्शनिकाः च अङ्गीकुर्वन्ति। अन्याः शून्यवादिनः बौद्धाः परिणामवादिनः सांख्याः च। ख्याति विषये अनिर्वचनीयख्यातिनः वेदान्तिनः। मध्वाः असत्ख्यातिवादिनः,माध्यमिक बौद्धाः सत्ख्यातिवादिनः विशिष्टद्वैतिनः/उभयवेदान्तिनः च। इदमध्यायाननन्तरं कर्म-भक्ति - ज्ञानयोगत् भिन्नं गीताशास्त्रे विचारित विषयाः एकमध्यायरूपेण परिचिन्तियति। कर्म-ज्ञान-भक्त्यादिकं समान प्राधान्य युक्त विषयाः एव ध्यान योग सन्यासम् इत्यादि विषयेषु आचार्यत्रयाणां मतं कीदृशमिति अनन्तराध्याये विचारयति।

## अध्यायटिप्पणि

1. वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण ,तृतीयोभागः , चौखाम्बा संस्कृत आफीस्, वारणासि, पुटं ३१४०
2. Amarakosham *Paarameswarivyakhyanam* , Parameswaranmoosad, Kerala Sahitya Akademi , Thrissur १६४ पुटे
3. शब्दकल्पद्रुम्, ५४७ पुटे
4. अष्टाध्यायिसूत्रपाठः धातुपाठश्च ,विनायकरजतः, वक्रतुण्डप्रकाशनम् ,शृङ्गोरि, ३.३.११७ ,४६ पुटे
5. पाणिनीय व्याकरणशास्त्रे वैशेषिकतत्वमीमांसा १२५ पुटे
6. Indian knowledge system p 12
7. Darsanika Nighandu ,( Mal ) Prasad C , Sky Book Publishers Mavelikkara १२६ पुटे
8. ऋग्वेदभाष्यं , ओ ए सि नारायणन् नम्पूतिरि , भागं ८, वटक्केमठम् ,कैरली बुक्स्, तृश्शूर् , २५४ २५२,२५१ पुटेषु
9. भारतीयदर्शनङल्, सि वि वासुदेवन् भट्टतिरि नाषणल् वुक्स् ६११पुटे
10. *Op. cit*, शब्दकल्पद्रुमम् ।, ५४८ पुटे
11. Advaitadha rmam, (mal), Nilakandan Elyath K N , State Institute of Languages kerala, Thiruvananthapuram ८१
12. *Ibid* ., ८०पुटे
13. *Ibid* ., ८०पुट
14. *Op. cit*, शब्दकल्पद्रुमम् , ५४७ पुटे
15. *Op. cit*, वाजस्पत्यम् ३१५०पुटे
16. *Op. cit*, भारतीयदर्शनङल्, ६११पुटे
17. Epistemology of visitadvaitha, Vedavalli Narayanan, Munshiram Manohar lal Publishers, 2008, p 14.
18. सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १९६-२०० पुटे
19. मीमांसासूत्रीयशरबभाष्यटीका, भट्टश्रीकुमारिल्लस्वामि विरचिता, विद्या विलास प्रेस्, १९०४, १० पुटे
20. पतञ्जलि सूत्रं महाभाष्यम् १.४.२६
21. *Op. cit*, पाणिनीय व्याकरणशास्त्रे वैशेषिकतत्वमीमांसा १२५ पुटे
22. दर्शन शास्त्रस्येतिहासः, शशिबालगौडः,चौखाम्बा सुरभारती प्रकाशन् प्रकाशन्, पुटे ४१,४२
23. *Ibid* . पुटे ९३
24. सांख्यकारिका - २२पुटे
25. सर्वदर्शन संग्रहः, सपरिशिष्ट प्रकाश हिन्दीभाष्योपेतः चौखाम्बा विद्याभवन् ४३७ पुटे

26. सांख्य कारिका-४पुटे

27. *Op. cit*, दर्शन शास्त्रस्येतिहासः, शशिबालगौडः,चौखाम्बा सुरभारती प्रकाशन् प्रकाशन्, पुटे ४३

28. *Op. cit*, सर्वदर्शन संग्रहः, सपरिशिष्ट प्रकाश हिन्दीभाष्योपेतः चौखाम्बा विद्याभवन् पृ.३८९

29. हेत्वाभासश्छलं जातिनिग्रह स्थानमित्यपि

प्रत्यक्ष मनुमानाख्यमुपमानागमाविति।।

चत्वार्यत्र प्रमाणानि नोपमानन्तु कस्यचित्

प्रत्यक्षमस्मदादीनामस्प्यन्यद्यो गिनामपि।। १४। सर्वसिद्धान्तसंग्रहः पृ. २४)

30. ईश्वराज्ञेति विज्ञेया न लक्ष्या वैदिकैः क्वचित्।

त्रिधा प्रमाणं प्रत्यक्षमनुमानागमाविति।। ३३। *Op. cit*, सर्वदर्शन संग्रहः, सपरिशिष्ट प्रकाश हिन्दीभाष्योपेतः चौखाम्बा विद्याभवन् २२ पुटे

31. सोऽपि पञ्चेन्द्रियै पश्यन् विषयं नातिरिच्यते ।प्रत्यक्ष मनुमानाख्यमुपमानमनन्तरम्।। २६। *Ibid* . पृ.३३

32. सर्वदर्शन संग्रहः, सपरिशिष्ट प्रकाश हिन्दीभाष्योपेतः चौखाम्बा विद्याभवन् ६०१, ६०२ पुटे

33. मानमेयोदयः चौखाम्बाविद्याभवन् पृ. १०, ११,

34. प्रत्यक्षगम्यमेवास्ति नास्प्यदृष्टमदृष्टतः । अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यत।। सवेसियान्तसङसंङ्गहः पृ. ५

35. दर्शनशास्त्रस्येतिहासः ८२ पुटे

36. पृथिव्यातेजोवायुरिति तत्वानि तत्समुदाये शरीरेन्द्रिय विषयसंज्ञा सूत्रं २ बार्हस्पत्यसूत्रम्

37. *Op. cit*, सर्वदर्शन संग्रहः, सपरिशिष्ट प्रकाश हिन्दीभाष्योपेतः चौखाम्बा विद्याभवन् पुटे ८२

38. *Ibid* .पुटे ८३

39. श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर्, ४२४पुटे

40. महाभारते शान्तिपर्वे १२. २०४.८

41. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् ४२४ पुटे

42. *Ibid* . ४२४ पुटे

43. *Ibid* . ४२४ पुटे

44. सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८२-२८३ पुटे

45. श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५६३-५६५पुटे

46. भारतीयदर्शनम् .एस् राधाकृष्णन्, पुटे ६११

47. *Op. cit*, दर्शनामृतम् पृ७४

48. *Op. cit*, श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् १४ पुटे

49. *Ibid* .` १४ पुटे

50. *Ibid* . १९ पुटे

51. *Ibid* . २० पुटे

52. *Ibid* . ३३,३४ पुटे

53. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (बृहदारण्यतोपनिषद् ४.४.२२) २५१पुटे

54. १०८ उपनिषद् , युगनिर्माण योजना, गायत्री तपोभूमि, मथुरा, उत्तरप्रदेश, २००५, जाबलोपनिषद् ४खण्डे प्रथम श्लोकम्,११७ पुटे

55. म.भा. शान्ति - २४१ -८

56. महा नाशयणोपनिषद् ७९ अनुवाक, वलि १६

57. *Ibid* . ७८,१२

58. *Ibid* . २४१.७

59. *Op. cit,* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् पुट पृ.१८

60. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (छन्दोग्योपनिषद् ७.२५.२), १५८ पुटे

61. *Ibid* . ६.२.१ १३७ पुटे

62. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi ( कठोपनिषदि १.२.४), ७० पुटे

63. *Ibid* . १-२२ पुटे ६९

64. *Op. cit,* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् पुट प ५.१५

65. वेदान्तसारः, चौखाम्बा सुरभारती प्रकाशन्, पुटे २

66. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् , ऋग्वेदीय ऐतरेयोपनिषद् १/२, ६३ पुटे

67. *Ibid* . यजुर्वेदीय बृहदारण्यकोपनिषद् १.४.१०, १८७ पुटे

68. *Ibid* . सामवेदीय छान्दोग्योपनिषद् ६.८.७, १४२ पुटे

69. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi अथर्ववेदीय माण्डूक्योपनिषद् १.२ १७८ पुटे

70. ईशावास्योपनिषद् ११ श्लोकम् १९ पुटे

71. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi माण्डूक्योपनिषद् १.५, १८० पुटे

72. मुण्डकोपनिषद् १.१.३, ११पुटे

73. *Op. cit,* Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi कठोपनिषद् ४/१, ८५ पुटे

74. केनोपनिषद् ४.४, २७ पुटे

75. तैत्तिरीयोपनिषद् ३, ५८ पुटे

76. मुण्डकोपनिषद् १.२.१२ , २८ पुटे

77. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम . ३.१.५ ४५ पुटे

78. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi १.१.५ मुण्डकोपनिषद् १४४ पुटे

79. *Op. cit,* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् पुट पृ.१२

80. औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः। तस्य ज्ञानमुपदेशः, अव्यतिरेकश्चार्थे ऽनुपलब्धे। तत्प्रमाणाम्बादरायणस्यानपेक्षत्वात्।।१.१.५। purva mimasa sutras of jaimini, the Panini office Bhuvaneswari ashrama Bahadurganj Allahabad

81. *Ibid* तद्भूतानाङ्क्रियार्थेन समाम्नायः, अर्थस्य तन्निमित्तत्वात्।।१.१.२५

82. *Ibid* आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्,तस्मादनित्यमित्युच्यते।।१.२.१।

83. ब्रह्मसूत्रशंङ्करभाष्यम्, सटिप्पनं, मूलमात्रम्, चौखाम्बा विद्याभवन् वारणासि पुटे १२

84. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् ( बृहदारण्यकोपनिषद् २.४.५ ), 206 पुटे

85. *Ibid* . १.४.१५, १८९ पुटे

86. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi मुण्डकोपनिषदि च ३,२,७, १६२ पुटे

87. *Op. cit,* ब्रह्मसूत्रशंङ्करभाष्यम्, सटिप्पनं, मूलमात्रम्, चौखाम्बा विद्याभवन् वारणासि पुटे १५

88. *Op. cit,* अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् ( बृहदारण्यकोपनिषद् १.४.१०) १८७ पुटे

89. तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुखानां सर्व ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतं च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमस्पारं दर्शयति भगवान्सनात्कुमारस्तं स्कन्द इत्याचक्षते तं स्कन्द इत्याचक्षते।। छान्दोग्योपनिषद् ७.२६.२। २१४ पुटे

90. *Ibid.,* ( बृहदारण्यकोपनिषद् ३.१.९) २१४ पुटे

91. *Op. cit,* ब्रह्मसूत्रशंङ्करभाष्यम्, सटिप्पनं, मूलमात्रम्, चौखाम्बा विद्याभवन् वारणासि पुटे १५

92. लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघा। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।३.२। श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् पुटे ८२

93. श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, २ पुटे

94. ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।५.१६। १५७ पुटे

95. ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।।७.२। १९७ पुटे

96. ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः।।।१८.१८। ४२२ पुटे

97. *Op. cit,* श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ८० पुटे

98. श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ४५ पुटे

99. *Ibid.,* ४५ पुटे

100. ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः।।३.३२। ९९ पुटे

101. धूमेनाव्रियते वह्निर्यथादर्शो मलेन च। यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्।।३.३८। १०३ पुटे

102. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ५९ पुटे

103. *Ibid* ., ७९ पुटे

104. *Ibid* ., ८० पुटे

105. श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ८१ पुटे

106. तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत।।४.४२। १४०,१४१ पुटे

107. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ९२,९३ पुटे

108. *Ibid* ., १२२,१२३ पुटे

109. *Ibid* ., १२२,१२३ पुटे

110. *Ibid* ., १५८ पुटे

111. *Op. cit*, कठोपनिषद्, पुष्पा गुप्ता, पुटे २५, १.२.२

112. श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, २०१ पुटे

113. *Ibid* ., २०६ पुटे

114. *Ibid* ., २१८ पुटे

115. *Ibid* ., २२१ पुटे

116. *Ibid* ., २६७ पुटे

117. *Ibid* ., २७९ पुटे

118. श्रीमद्भगवद्गीता श्रीमधुसूदनसरस्वतीकृता गूढार्थदीपिका, चौखाम्बा संस्कृत संस्थान, उपोद्घातम् पुटे श्रेयान्द्रव्यमयाद्यज्ञाद्ज्ञानयज्ञः परंतप। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।। ४.३३ ।१३५ पुटे

119. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, २ पुटे

120. *Ibid* ., २७० पुटे , १८/३०

121. *Ibid* ., ११२ पुटे , ६/३५

122. *Op. cit*, अद्वैतधर्मम् ८५ पुटे

123. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ४६,४७ पुटे

124. *Ibid* ., ५२ पुटे

125. *Ibid* ., ४५ पुटे

126. *Ibid* ., ८० पुटे

127. *Ibid* ., ८७ पुटे

128. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम्, ( छान्दोग्योपनिषद् ८.१५.१), १७३ पुटे

129. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi ईशावास्योपनिषद् ११ श्लोकम् ९ पुटे

130. मनुस्मृति, निर्णयसागरमुद्रणयन्त्रालये १८८७ , १२.१०४, ६१५ पुटे

131. श्रीमद्भागवतम्, भागवतप्रकाशनकार्यालयद्वारा प्रकाशितं, मुरादाबाद, १९५८, ११.२०.७, १०९१ पुटे

132. तदेष श्लोको भवति। यदा सर्वे प्रमुच्यन्ते कामा योऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति। तद्यथाहि निल्वर्यनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वेदेहः।। अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (बृहदारण्यकोपनिषद् ४.४.७) २४९ पुटे

133. त्रयो धर्मस्कन्धा यज्ञोऽध्यनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति। ।छान्दोग्योपनिषद् २.२३.१, ९३ पुटे

134. पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ।।ब्रह्मसूत्रशंङ्करभाष्यम्, सटिप्पनं, मूलमात्रम्, चौखाम्बा विद्याभवन् वारणासि ३.२.५।

135. *Ibid* . , पुटे ११-२४ पुटेषु

136. *Ibid* . ४०८पुटे

137. *Ibid* . ३०९-३११पुटेषु

138. *Ibid* . ४३३,४३४पुटेषु

139. *Ibid* . ३४७पुटे

140. भारतीयदर्शनम् .एस् राधाकृष्णन्, पुटे ४८१

141. शङ्करात्प्रणद्वेतवादः, श्रीमुरलीधरपाण्डेयः,भारतीय विद्या भवन् द्ल्ली, पुटे ६३

142. *Ibid* ., पुटे १९३

143. *Ibid* ., पुटे २७५

144. *Ibid* ., पुटे ३५२

145. *Ibid* ., पुटे ४६१

146. *Ibid* ., पुटे ४६२

147. *Op. cit*, श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, १८, १९ पुटे

148. *Ibid* ., ६७ पुटे

149. *Ibid* ., ६६ पुटे

150. *Op. cit*, वेदान्तसारः चौखाम्बा विद्याभवन् वारणासि पुटे २८

151. *Ibid* ., पुटे ८६

152. सामानाधिकरण्यञ्च विशेषणविशेष्यता। लक्ष्यलक्षण सम्बन्धः पदार्थप्रत्यगात्मनाम्।। वेदान्तसारः चौखाम्बा विद्याभवन् वारणासि पुटे ६५

153. अद्वैततत्त्वमीमांसा पुटे १२९

154. *Op. cit*, सर्वदर्शनसंग्रहः २१२ पुटे
155. *Ibid* ., १६१ पुटे
156. *Ibid* ., १९४ पुटे
157. *Ibid* ., १९० पुटे
158. Sri Sankara Sarasvata Sarvasvam,(mal),Dasopanishad Sankara Bhashyam,vol.1, p 634,635
159. *Op. cit*, सर्वदर्शनसंग्रहः १९७ पुटे
160. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास, ५९ पुटे
161. *Ibid* ., २३८ पुटे
162. *Op. cit*, वेदान्तसारः चौखाम्बा विद्याभवन् वारणासि पुटे ८६
163. *Op. cit*, भागवतं५.२३,२४
164. *Ibid* ., पुटे
165. *Ibid* ., २०८ पुटे
166. *Ibid* ., 209, २१० पुटे
167. *Ibid* ., 201 पुटे
168. महाभारतात्पर्यनिर्णयं , श्री आनन्दतीर्थ भगवत्पाद विरचितं, तत्व-संशोधन समितिः, उडुप्पि, २००९ , १.१.०७, ८ पुटे
169. त्रि चु पुटे ३१
170. संस्कृतकान्यशास्त्रे भक्तिरस विवेचने पृ. १७५, १७६
171. *Op. cit*, श्रीमद्भगवद्गीता श्रीमधुसूदनसरस्वतीकृता गूढार्थदीपिका, चौखाम्बा संस्कृत संस्थान २५२ पुटे
172. *Ibid* ., पुटे
173. *Ibid* ., ३७७ पुटे
174. *Ibid* ., पुटे
175. *Ibid* ., ३२४-३२६ पुटे
176. *Ibid* ., ५५४,५५३ पुटे
177. *Ibid* ., ५७० पुटे
178. *Ibid* ., ५७४ पुटे
179. *Ibid* ., ५७६ पुटे
180. *Ibid* ., ५७९ पुटे
181. *Ibid* ., ६१० पुटे
182. *Ibid* ., ६९६ पुटे
183. *Ibid* ., ६९७ पुटे

184. *Ibid* ., ७२१ पुटे

185. *Op. cit*, भागवते ११/१०/६

186. *Op. cit*, वेदान्तसारः चौखाम्बा विद्याभवन् वारणासि पुटे ८६

187. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास,१,२ पुटे

188. *Ibid* ., 9 पुटे

189. *Ibid* ., 41-44 पुटे

190. जाबालदर्शनोपनिषद्, १०८ उपनिषद्, सरल हिन्दी भावार्थ सहितं, युगपरिवर्तन योजना, गायत्री तपोभूमि, मथुरा, उत्तरप्रदेश, ९६,९७ पुटे

191. ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन। तत्किं कर्मणि घोरे मां नियोजयसि केशव।। ३.१। ८२ पुटे

192. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास,59 पुटे

193. *Ibid* ., 60 पुटे

194. *Ibid* ., 64 पुटे

195. *Ibid* ., 67-70 पुटे

196. *Ibid* ., 78-81 पुटे

197. *Ibid* ., 82,83 पुटे

198. *Ibid* .,,87 पुटे

199. *Ibid* ., 90 पुटे

200. *Ibid* ., 96 पुटे

201. *Ibid* ., 116 पुटे

202. *Ibid* ., 117 पुटे

203. *Op. cit*, अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (छन्दोग्योपनिषदि ७. २५. २) १५८ पुटे

204. *Ibid* . ६.२.१, १३५ पुटे

205. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास,137 पुटे

206. *Ibid* ., 152 पुटे

207. *Ibid* ., 184 पुटे

208. *Op. cit*, अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् ( कठोपनिषद् १.२.४), १६ पुटे

209. *Ibid* . .१.२.२ , १५ पुटे

210. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi केनोपनिषद् उप २.५, २९ पुटे

211. *Op. cit*, अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् , श्वेताश्वतरोपनिषद् - ३.८, २८९ पुटे

212. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi तैत्तिरीयोपनिषद् .उ. २.९.१ , ३११ पुटे

213. *Op. cit*, कठोपनिषद् १.२.५ , ७० पुटे

214. *Op. cit*, मुण्डकोपनिषद् ३.२.९, १६३ पुटे

215. *Op. cit*, अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् ( बृहदारण्यकोपनिषद् १.४.१०)१८७ पुटे

216. *Ibid* . १.४.१० , १८८ पुटे

217. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास,190-197 पुटे

218. *Ibid* ., 198 पुटे

219. *Ibid* ., 203 पुटे

220. *Ibid* ., ३५६ पुटे

221. *Op. cit*, श्रीमचंछकराचार्यविरचितं श्रीमद्भगवद्गीता मोतिलाल् बनारसीदास,218 पुटे

222. *Ibid* ., 221 पुटे

223. *Ibid* ., 267 पुटे

224. *Ibid* ., 272 पुटे

225. *Op. cit*, भारतीय दर्शनं, एस् राधाकृष्णन्, पुटे ७३७

226. *Ibid* . पुटे ७३८

227. *Op. cit*, भारतीयचिन्ता के दामोदरन् पुटे ३६८

228. कर्मनिर्णयं, पृ.१०

229. तत्त्वादित्रयं पुटे २६

230. *Ibid* . पुटे ३७

231. *Ibid* . पुटे ४०

232. *Ibid* ., पुटे ५२

233. *Ibid* ., पुटे ५५

234. *Ibid* ., पुटे ७५

235. *Ibid* ., पुटे ८४,८५

236. *Ibid* ., पुटे ९२

237. *Ibid* ., पुटे १०८

238. *Ibid* ., पुटे ११६

239. *Ibid* ., पुटे १२६

240. *Ibid* ., पुटे १३८

241. *Ibid* ., पुटे २२३

242. *Ibid* ., पुटे २२९

243. *Ibid* ., पुटे २३०

244. *Ibid* ., पुटे २८२

245. विष्णुतत्त्वनिर्णयं ३०३-३०८ पुटेषु

246. *Op. cit*, श्रीमध्वाचार्यर् -जीवितवुं दर्शनवुं १०४ पुटम्

247. अनुव्याख्यानं ३.४ पुटे ५

248. श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् १०,११ पुटे

249. *Ibid* ., २२७ पुटे

250. *Ibid* ., ४०८ पुटे

251. *Ibid* ., १२ पुटे

252. विष्णुपुराणम् २.२२.४५

253. *Op. cit*, श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ६१ पुटे

254. *Ibid* ., १३०,१३१ पुटे

255. *Ibid* ., १६३ पुटे

256. *Ibid* ., १६६ पुटे

257. *Ibid* ., १८२ पुटे

258. *Ibid* ., ४३४ पुटे

259. *Ibid* ., २८४ पुटे

260. *Op. cit* अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् ( बृहदारण्यकोपनिषद् ३.७.३, ३,७,२२) २२१ पुटे

261. *Op. cit*, श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ४२४ पुटे

262. *Ibid* ., ४२२ पुटे

263. *Ibid* ., ४३५ पुटे

264. *Ibid* ., ४६० पुटे

265. *Ibid* ., ५६४ पुटे

266. Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi तैत्तिरीयोपनिषद् ३.१,३१३ पुटे

Subrahmanian M. “ Śaṅkara-madhva-rᾱmᾱnujᾱcᾱryᾱṇᾱṃ Śrīmad Bhagavadgītᾱ Vyᾱkhyᾱnᾱni - Ekaṃ tulanᾱtmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# पञ्चमोऽध्यायः
# भक्तियोगः

५ : उपोद्घातम्

५.१ : भक्त्याः स्वरूपं,विकासश्च

५.१.१ : भक्तिलक्षणम्, व्युत्पत्तिः, वेदे, स्मृतौ, इतिहासे, पुराणे च

५. १ .२ : भारतीयभक्तिप्रस्थानस्य विकासः

५ .२ : भारतीयदर्शनेषु भक्तिः, भागवते, नारदीयभक्तिसूत्रे, शाण्डिल्यभक्तिसूत्रे च

५.३ : प्रायोगिकवेदान्ते भक्तिः

५.४. : भगवद्गीतायां भक्तिः

५.४.१ : भक्तिः कर्मं च गीताशास्त्रे

५.४.२ : भक्तिः ज्ञानं च गीताशास्त्रे

५.५ : आचार्यत्रयाणां मते भक्तिः/ भक्तिदर्शनम्

५.५ .१ : शाङ्करभाष्ये भक्तिः

५.५.२ : मध्वभाष्ये भक्तिः

५.५.३ : रामानुजभाष्येभक्तिः

५.५.४ : मध्व-रामानुजयोः भक्तिविषये सारुप्य-वैरुप्याणि

५.६ : भक्ति समर्थने भगवद्गीतायाः प्रमाणम् आचार्यत्रयेषु

५.७. : आचार्यत्रयाणां भक्ति विषये तुलनात्मकमध्ययनम्

५.८ : अध्यायोपसंहारः

प्रपञ्चे स्थितानां जन्तूनाम् आत्यन्तिकलक्ष्यं मोक्षमिति पूर्वाध्यायेषु सूचितम्। तदर्थं बहवः मार्गाः च वर्तन्ते। तेषु कर्मविषयमेवं ज्ञानविषयं च पूर्वाध्यायेषु सूचितम्। अध्यायस्यास्य विषयं भक्तिः, विषयोऽयं सुपरिचितमेव। अस्यकारणस्तु अद्यतन लौकिकजीवने कर्ममार्गेण वा ज्ञानमार्गेण च परमपुरुषसिद्धिः च किञ्चित् क्लेशमिति कारणेन। अतः समीचीनं भक्तिमार्गमेव। अनेन मार्गेण एव गृहस्थादीनां तादृशानां परमपदप्राप्त्यर्थं समीचीनपद्धतिः एतदेव। तदेव मन्दिरादिषु प्रवृत्तमानानि कार्यक्रमाणि, पुराणापारायणादिकम् उपासनादिकं, यज्ञादिकं च अस्यामन्तर्भवन्ति। अतः गीताशास्त्रे च भगवता –" यज्ञानां जपयज्ञोऽस्मि "[१] इत्युक्तमित्येतत् अस्य प्राधान्यं द्योतयति। इतिहास-पुराणादिषु भक्त्याः प्राधान्यं विवर्णितं च। तादृशभक्तेषु अग्रेसरः आसीत् अर्जुनः। प्रह्लादः, द्रौपदी, विभीषणः, ध्रुवः, अजामिलः, शबरिः, मार्कण्डेयः, पृथुः, अम्बरीषः, सुदामा, गजेन्द्रः, परीक्षित्, इत्यादयः बहवाः भक्त्या पारंङ्गताः। श्रीमद्भागवते यथा –

कामाद् द्वेषाद्भयात्स्नेहात्सम्बन्धादीश्वरे मनः।
आवेश्यतदघंहित्वाबहवस्तद्गतिंगताः।।
गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः।
सम्बन्धातृष्णाायस्नेहाद्यूयंभक्त्यावयंविभोः।।७/१/२९ [२]

## ५,१ भक्त्याः स्वरूपं विकासश्च

वैदिक कालादारभ्य मानवाः देवान् उपासन्ते। यथा वेदेषु वैदिकदेवताः इन्द्र-वरुण-अग्नि-सविता-विष्णु- सवितृ-इत्यादीनाम् उपासनाप्रकारं च विषयोऽत्र वर्णितरूपेण वर्तते। अनन्तरकाले इतिहासपुराणादीनां स्मृतीनां च विषये भक्तेः बहूप्राधान्यमस्ति। महर्षिः शाण्डिल्यः भक्तिर्न्नाम" सा परानुभक्तिरीश्वर"[३], देवर्षिर्नारदः -" सा त्वस्मिन् परमप्रेमरुपा,

अमृतस्वरूपा च अस्य स्वरूपस्तु अनिर्वचनीयं प्रेमस्वरूपम्" [४]। अस्य विषयमधिकृत्य प्रबन्धे अन्यत्र पठितम् वर्तते। अत्र अस्याः प्रकारादिकं, भेदाः च कीदृशमिति विचारयति। भक्तिस्तावद् द्विधा -वैधी, रागात्मिका च [५]। वैधी पुनः नवधा विभज्यते, अस्य वर्णनं *श्रीमद् भागवते* सप्तमस्कन्धे पञ्चमाध्याये(त्रयोविंशतिः,चतुर्विंशतिः) २३,२४ श्लोकैः विशदयति यथा-

श्रवणं कीर्तनं विष्णोः स्मरणंपादसेवनम्।
अर्चनंवन्दनंदास्यंसख्यमात्मनिवेदनम्।।२३।।
इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यथा तन्मयेऽधीतमुत्तम्।। २४।।[६]

वैधी भक्तिः नाम विधिनिषेधानुकूलं साधनं कुर्वतो भक्तस्य हृदये प्रथमं या भक्तिः उदैति सा वैधी भक्ति इत्युच्यते [७]। रागात्मिका नाम निरन्तरं भगवच्चरणारविन्द विषयिणी सा भक्तिः। गौणीभक्तिस्तावत्– पराभक्तप्राप्तिपूर्वं या भक्तिः विधिविधानपूर्वं निद्र्श्यते सा एव गौणी भक्तिः। गौणी भक्तिः प्रधानतया त्रिधा, सा एव त्रिधाभक्तिः इति च उच्यते [८]। गौणी त्रिधा "गुणभेदात् आर्तादिभेदात् वा", षट्पञ्चाशत्(५६), अनन्तर सूत्रे " उत्तरस्मादुत्तरस्मात् पूर्व पूर्वाश्रयाय भवति" सप्तपञ्चाशत् (५७)। नारदप्रणीतेन द्वशीतिः (८२)तम सूत्रेण यथा –" गुणमाहात्म्यासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्ति-कान्तासक्ति-आत्मनिवेदनासक्ति-तन्मयासक्ति-परमविरहासक्तिः रूपा एकधा अपि एकादशधा भवति " इति विशदयति च [९]। श्री रूपागोस्वामिना भक्तिरसामृतसिन्धौ भक्तेः त्रिधा भेदाः कृताः। साधनं भावः प्रेमा च। अनेन च साधना भक्तिः पुनः द्विविधा वैधीरागानुभेदात्। यत्र रागानवाप्तत्वात्प्रवृत्तिरुपजायते। शासनैव शास्त्रस्य सावधी भक्तिरुच्यते।। एवं वैधी भक्तिः एकाङ्गाऽनेकाङ्गभेदेन द्विधा पुनर्विभक्तुं शक्यते।

अनन्तरं भावभक्तिः। प्रेम्णस्था प्रथमावस्था भाव इत्यभिधीयते। सात्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः।। प्रेमभक्तिलक्षणं यथा-

सम्यग् मसृणुस्वान्तो ममत्वातिशयाङ्कितः।
भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्ध्यते।।[१०]

पूर्वोक्त नवधा भक्तिः - तत्र प्रथमं श्रवणभक्तिः भगवद्गुणगाथायाः श्रवणमेव तत्। सा च सर्वधर्मेभ्यः श्रेष्ठा स्वीकृताऽस्ति [११]। अनेन एव महाराजः परीक्षित्, अजामिलः, सनकादयः, बहवाः मोक्षपदमलङ्कुर्वन्ति। द्वितीयं भगवच्चरित्रकीर्त्तनं कीर्तनभक्तिः इति कथ्यते [१२]। तृतीयं भगवच्चरणारविन्दादि स्मरणात्मिका स्मरणभक्तिः [१३]। चतुर्थं भगवत्पादाब्जसेवनरुपा पादसेवनभक्तिः[१४]। पञ्चमस्तु पाषाणादि- निर्म्मिताया भगवतो मूर्तेः पूजनम् अर्चनभक्तिः अस्ति [१५]। तथा च भगवतः प्रीतिकारीणी विद्यते। षष्ठे - भगवच्चरणारविन्दयोर्वन्दनं वन्दनभक्तिरुच्यते [१६]। सप्तमम् अत्र भगवतो दासो भूत्वा तत्सेवाभ्यासद्धाराभिमानापनयनं भक्तेरुदयश्च भवति [१७]। अष्टमं भगवत्सखिरुपेण एकप्राणतायै हार्दिकप्रयत्नैः भक्तहृदये भगवति मधुरमयस्य प्रेम्णो विकारो जायते [१८]। अन्तिमम् अथवा नवमं च आत्मनिवेदनभक्तिः आत्मनिवेदनव्दारा भक्तानां शारीरिकी, वाचकी, मानसिकी च सरला चेष्टा भगवद् भावमयी भवति[१९]। तदा भक्तानां हृदये भगवद्विषये अपूर्वदिव्यरागस्य विकास उदेति। नव विधासु भक्तिषु एकविधया अपि भक्त्या भक्तः संसारसागरादुद्धर्तुं शक्नोति। इतः पूर्वं भक्तेः नवविधमधिकृत्य सूचितम्। इतः परं भक्तेः एकादशविधमधिकृत्य किञ्चित् विचारयाम। तदधिकृत्य नारदभक्तिसूत्रे (द्वशीतिः) ८२ तम सूत्रेण एवं विशदयति – गुणमाहात्म्यासक्ति-रुपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्ति-कान्तासक्ति-आत्मनिवेदनासक्ति-तन्मयासक्ति परमविरहासक्तिरुपा एकधाऽपि एकादशधा भवति [२०]। अत्र अस्यां सूत्रे भक्तिशब्दम् आसक्तिरिति पदेन व्यवह्रियते। पारमार्थिकतया भक्तिरेव किन्तु अत्र एवं प्रकारेण निरुपितं

च। तदेव सूत्रे एकधा इति पदेन एवं चिन्तितं च। एकादशस्तु प्रथमं गुणमाहात्म्यासक्ति अनेन भगवता गुणमाहात्म्यादीनां विचिन्तनम्। तद् वदति श्रुणोति एतास्वनन्यरीत्या आसक्तिरेव। तादृशाः ईश्वरमाहात्म्यविषये सर्वप्रापञ्चिकविषयादुपरि ईश्वरचित्तो भूत्वा वर्तते [२१]। द्वितीयस्तु रुपासक्तिरर्थात् ईश्वररुपस्तु आसक्तिरेव। भक्ताः स्वीय इष्टदेवतायाः प्रतिमा-चित्रादिषु आसक्तिरुपो भूत्वा आनन्दमनुभवति [२२]। सर्वदा स्वस्य मनसि भगवद् रुपं दृष्ट्वा आनन्दमनुभवति तदैव। पूजासक्तिः- सर्वदा स्वीय इष्टदेवता पूजनौ भक्तस्यासक्तिरेवतत् अनेन पूजया आनन्दमनुभवति भक्तः। तदेव(षोडश)१६ तम सूत्रेण पूजादिष्वनुरागः इति परामर्शः। भक्तस्य सकाशे यद् यद् श्रेष्ठवस्तूनि लभते तत् सर्वमपि स्वस्य इष्टदेवतायाः पूजनार्थमुपयुज्य स्वस्यात्मानमपि विस्मृत्य भगवति लीयते तद् भक्तिरेव एकादशेषु तृतीयं पूजासक्तिः[२३]। स्मरणासक्तिः यथा- " ईश्वरस्मृतौ यद् आसक्तिः तदा भक्तः सर्वदा भगवत्स्मरणे आनन्दमनुभवति"। प्रापञ्चिकवस्तुषु सर्वेषामपि वस्तुषु ईश्वररुपं दृश्यति भक्तः[२४]। दास्यासक्तिः - अस्यां भक्तस्य मनसि ईश्वरस्य दासो भवितुम् आसक्तिरेव। अस्य संसारस्य स्वामिरेव भगवन् तादृशस्य भगवतः दासोऽस्मि तद् भावो भूत्वा भक्तः पुरोगच्छति। अत्र ईश्वरैव प्रपञ्चस्य स्वामी, अहं तस्य इच्छापालनार्थं स्थित दासः इति चिन्ता सर्वदा मनसि जायते[२५]। सख्यासक्तिः- ईश्वरः स्वस्य सखा इति आसक्तिरेव। भक्तं स्वीय सुहृद्भिः कीदृशं व्यवहारं करोति तादृशैव ईश्वरेण सह व्यवहारम्[२६]। कान्तासक्तिः - पुराणादिषु द्रष्टुं गोपिकानां भक्तिरेव कान्तासक्तिः। भगवन्तं स्वस्य कान्तवत् द्रष्टुं यत् आसक्तिः तत् एव। अनेन आत्मनिवेदनमेव उद्दिश्यते[२७]। वात्सल्यासक्तिः- भगवन्तं स्वीयपुत्रवत् दृष्ट्वा भक्तस्य मनसि जायमानभक्तिरेव वात्सल्यासक्ति । केन प्रकारेण मातुः स्वीयपुत्रं लालयति तद्वत् एव भक्तः इष्टदेवतां परिपालयति [२८]। पुराणादिषु यशोदादयः अस्याः भक्तेः उदाहरणम्। आत्मनिवेदनासक्तिः- स्वस्यदेह आत्मानं च भगवते दातुं जात आसक्तिरेव आत्मनिवेदनासक्तिः। एतदेव नवधा भक्तया उद्दिश्यते। तन्मयतासक्तिः- भक्तेः सर्वोच्चतलमेव एतद्। ईश्वरस्यैव सर्वम् इति विचिन्त्य ईश्वरस्वरुपमयः भवति भक्तः उपासकः ईश्वरः

उपास्यमिति द्वैतादुपरि गत्वा ईश्वरस्वरूपस्थस्य भक्तस्य पुरोगामित्वमेव[२९]। अत्र भक्तस्य सर्वस्वमपि ईश्वरस्यैव। परमविरहासक्तिः- यदा ईश्वरदर्शनस्याभावं तदा जायमानपरमविरहतापेन जातं आसक्तिरेव। ईश्वरस्मरणं-ईश्वरदर्शनं च यदा नष्टो भवति तदानीं जायमाना आसक्तिः परमविरहासक्तिः भागवतादि पुराणे कृष्णदर्शनाभावात् गोपिकानां मनसि अत्र स्मरणासक्तिरेव जायते[३०]। भक्तेषु अग्रेसरः अवर्तत प्रहलादः। स्वीयवरलाभसमये भगवन्तं नरसिंहमूर्तिम् एवं प्रार्थयति। ----

"या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सामे हृदयान्मापसर्पयतु।। " [३१]

**त्रिधा भक्तिः**

विधिविधानपरा भक्तिः गौणीभक्तिः। भक्तिसूत्रे यथा-" गौणी त्रिधा गुणभेदात् आर्तादिभेदात् वा " विभक्तुं शक्यते[३२]। गुणभेदेन इति शब्देन सात्विक-राजस-तामसादि भेदेन विभक्तुं शक्यते। अमरकोशे च भक्तानां भेदत्वं कीदृशमिति निरुपयति। एवम् आर्तादि भेदेन इति शब्देन आर्त्तः, जिज्ञासुः, अर्थार्थि इत्यनेन त्रैविध्यत्वं मन्यते।

अत्राद्यं सात्विक भक्तौ साधकः स्वीय इष्टदेवताम् आराध्यते। तद् अर्चनादिकं, जपयज्ञेन च सत्वगुणाधिक्यरीत्याः करोति। तदर्थम् उपयुक्तं द्रव्यादिकं सर्वमपि सत्वप्रधानाः एव, अनेन साधकाय सत्वादियुक्त कार्याणि लभ्यते। मध्यम भवति राजसिक भक्तिः। तत्र साधकः राजसिक विधानौ स्वीय इष्टदेवतां रजोगुण प्रधानान् वस्तून् चोपयुज्य पूजादिकम्, अर्चनादिकं च क्रियते। अन्तिमं भवति तामसभक्तिः, तत्र तमोगुणप्रधानविधानौ स्वीयइष्टदेवताम् आराध्यते। तमो गुण प्रधानानि वस्तूनि, द्रव्याणि च उपयुज्य पूजादिकं करोति। अधुना भक्तेषु तमो गुणः एव अधिकतया वर्तते। अन्यत्र *भक्तिरसामृतसिन्धौ* अन्यरीत्या त्रिधा भेदं कृतोऽस्ति। यथा- साधना भक्ति, भावभक्ति, प्रेमाभक्ति च। तदेव यथा-

सा भक्ति साधनं भावः प्रेमा चेति त्रिधोदिता।

वैधी रागानुगा चेति सा द्विधा साधनामिधा।।[33]

भक्तिसूत्रे सप्तपञ्चाशत् (५७) तम सूत्रेण ' उत्तरस्मादुत्तरस्मात् पूर्वपूर्वाश्रयाय भवति '[34] इत्यनेन विषयेऽपि भक्ति रहितान् अपेक्ष्य तामसिकभक्तः श्रेष्ठः, तान् अपेक्ष्य राजसिक भक्ताः श्रेष्ठाः अतोऽपि अग्रे भवति सात्विकभक्तिः अनया सात्विकभक्त्या त्रिगुणान् चातिक्रम्य अग्रे गन्तुं शक्यते। गौणी "त्रिधा गुणभेदादार्तादि भेदात् वा" पञ्चाशत् (५६) इत्यनेन सूत्रेण आर्तादीनां विभागीकरणम् अत्र विशदयति। तद् - आर्तः, जिज्ञासुः, अर्थार्थि इत्येवं त्रैविध्यत्वेन विभक्तुं शक्यते। आर्तः इति पदेनैव अनेन किम् उद्दिश्यते इति ज्ञातुं शक्यते। केनाऽपि कारणेन वा दुखेन वा तस्य परिहाराय वा तस्य निवारणाय वा ईश्वर सन्निधौ प्राप्यते क्रियन्ते। तादृशानाम् आर्तानां बहूनि उदाहरणानि *भागवतादि* पुराणेषु द्रष्टुं शक्यते। मेल्पुत्तूर् नारायण भट्टपादस्य नारायणीयमिति काव्यस्य उत्पत्तिरपि प्रसिद्धमेव।। " उत्तरस्मादुत्तरस्मात् पूर्वपूर्वाश्रयाय भवति " (५७) इत्यनेन सूत्रेण विचिन्त्यते चेत् आर्तानां भक्तिरेव अन्यानपेक्ष्य श्रेष्ठतरम्। द्वितीयं भवति जिज्ञासूनां भक्तिः। ईश्वरस्वरूपं किं, कीदृशं इति ज्ञातुं भक्तस्य मनसि जायमाना भक्तिरेव जिज्ञासा भक्तिः। अस्य प्रपञ्चस्य नियन्तुः वैभवं प्रपञ्चस्य कारणादिकं च किमिति इति ज्ञातुं तदर्थं जायमाना भक्तिरेव जिज्ञासा भक्तिः। तृतीयं भवति अर्थमित्यस्य अपेक्षकः, याचकः इत्यर्थः। अद्यतन कालीनानां धन-सुखादिवस्तूनां ग्रहणाय भक्तस्य मनसि जायमाना भक्तिरेव तद्। तेषाम् इच्छानुसारेण धनादि सुखादि च साधकाय साहाय रूपेण या भक्तिः वर्तते तदेव आर्थीभक्तिः। अन्यरीत्या मनुष्याणां गुणस्वभावभेदाद् भक्तिरपि तादृशभेदवती परिलक्ष्यते कथ्यते च। तामसराजसादिस्वभावानां जनानां हि भजनीया देवा अपि तादृशा भवन्ति। यजन्ते सात्विका देवान्यक्षरक्षांसि राजसाः, प्रेतान्भूतगणांश्चान्ये यजन्ते तामसाः जनाः। क्रोधिनोऽपि हिंसार्थं दम्भमात्सर्यादितामसिकभावैर्भक्तिमार्गे प्रवर्तन्ते। सांसारिकविषयैश्वर्यादिकामिनां भक्ति राजसी।

ये जनाः साधका वा स्वपापादि कर्मनाशार्थं भक्तिसाधनानि कुर्वन्ति तेषां गुणानुरुपा भक्तिः सात्विकीति अभिधीयते।[३५]

### ५.१.२ भारतीयभक्तिप्रस्थानस्य विकासः

लभ्यमानेषु ग्रन्थेषु प्राचीनतम् भवति वेदाः। वैदिककालादारभ्य भक्तिप्रस्थानम् आरब्धमिति मन्यते। आदिकाव्यमिति प्रसिद्धे रामायणे च भक्त्याः स्वरुपादिकम् उदाहरन्ति [३६]। समानरीत्या महाभारते च तादृशसन्दर्भानि, भक्तानाम् उदाहरणानि सन्ति। पुराणेषु तत्र अधिकतया श्रीमद् भागवतमहापुराणे भक्तिस्वरुपं प्रकारादिकं च विवर्णितमिति। अतः तत्कालात् आरभ्य भारते मोक्षोपार्जनमार्गेषु अग्रिमस्थानं भक्तिरिति परिगण्यते। वेदे प्रधानतया कर्मकाण्डं– ज्ञानकाण्डम् इति द्वैविध्यम् द्रष्टुं शक्यते। तत्राद्यभागे संहिताभागे मन्त्रभागेषु वरुण, सूर्य, विष्णु, अग्नि, इन्द्रादीनां देवतानाम् उपासनादिकं तत्र विस्तरेण प्रतिपादितं च। तत् एव नित्योपासकानां विविध गायत्रीमन्त्राणाम् उपासनादिकं च दत्तम्। यथा -ऋग्वेदे " हे अग्ने त्वं सर्वेषां मित्रमसि त्वमधरे सर्वेषां धनानां निवासयिता भवसि तवातिशयेन शर्मणि शरणे निवासधाम्नि वा वर्तमाना भवेम, विप्राः सोमस्य पानाय इन्द्रं गावो वत्समिवाभिशब्दयन्ति" [३७]।

"इदं विष्णुर्विचक्रमे त्रेधा निदधेपदम्,

तमु स्तोतारः पूर्व्यं यथा विद् ऋतस्य गर्भं जनुषा पिपर्तन।

आस्य जानन्तो नाम चिद् विवक्तन महस्ते विष्णो सुमति भजामहे "[३८]। एतदेव नारदभक्तिसूत्रे –" पूजादिष्वनुरागः " इति सूत्रे विस्तृतम्। वेदे संहिता भागेषु एवं रुपप्रकाराः वर्ण्यन्ते चेत् उपनिषत्सु सगुण-निर्गुणब्रह्मोपासनायाः प्रकाराः इत्येवमादिकं विशदयति। ब्राह्मणेषु प्रधानतया गृहस्थानां नित्य-नैमित्तिककार्याणि विशदयति। तत्रापि अग्निहोत्रादिकम् अग्नेः उपासनायाः उत्तम उदाहरणत्वेन परिगणयितुं शक्यते।

वैदिक कालादारभ्य तादृश उपासनादिकम् अद्यापि अत्यधिक विस्तृतरूपेण प्रचलति। उपासना उपनिषत्सु विद्या इति नाम्ना च आहूयते। यथा- *छान्दोग्योपनिषदि*(४.१५.१)अक्षिपुरुषविद्या, *बृहदारण्यकोपनिषदि* (५.५२)अन्तरादित्यविद्या, छान्दोग्ये यथा (७.२३, २४,२५)भूमविद्या, (८.१)दहरा विद्या, (३.१२)गायत्रीविद्या, (३.१-११) मधुविद्या, (५.३-१०)पञ्चाग्निविद्या, (३.१६,१७)पुरुषविद्या, (६.२.१,२)सद्विद्या, (४.३)संवर्गविद्या,(३.४) शाण्डिल्यविद्या,(४.१०-१५) उपकोसलविद्या,(५.११-१७)वैश्वानरविद्या, *बृहदारण्यकोपनिषदि* (६.२)पञ्चाग्निविद्या,, (५.९)प्राणाग्निहोत्रविद्या, (५.८.१) उद्गीतविद्या, *कौषीतकी उपनिषदि* (१) पर्यङ्ग विद्या इत्यादीन्यधिकृत्य विचारयति। अद्यतन काले प्राचीनकाले च स्थितेषु मन्दिरेषु च उपयुज्यमानाः मन्त्रादीनां च प्रयोगः वैदिकानुसारेण एव। एवमेव आगम ग्रन्थेषु उक्तरीत्या एव मन्दिरेषु देवतादीनां पूजापद्धतयः, प्रत्येकं प्रत्येकं देव्या उपासनादिकं तदर्थमावश्यकानि द्रव्याणि च तादृशविषयाणि तत्र विस्तरेण विशदयति। एवमेव प्रत्येकं प्रत्येकं होमादीनां द्रव्याणि पूजामन्त्राणि विशदयति।

भक्तिप्रस्थानं तु वैदिककालानन्तरमेव इदानीन्तन कालरीत्या शक्तिं प्राप्तवन्ताश्च। दर्शनादिषु वेदान्तदर्शने शङ्करानन्तराः आचार्याः मध्वाचार्याः, रामानुजाचार्यः, श्रीवल्लभाचार्यः, निम्बार्काचार्यः इत्यादयाः आचार्याः परमपदप्राप्त्यर्थं ज्ञानोपार्जनाय कर्मणः अधिकं प्राधान्यं भक्त्याः दत्तम्। एतेषां दर्शनानुसारम् एवं सिद्धान्तरीत्या च मोक्षोपार्जनार्थम् उत्तमरीतिः भक्त्या एव इति चिन्तयति। भक्तेः मुख्यधारा प्रधानतया वैष्णवभक्तिः अन्यदेवतादीनपेक्ष्य अधिकरूपेण वर्तते। श्रीमद् भागवतमहपुराणे यथा प्रह्लादः, ध्रुवः, अजामिलः, कुचेलः, द्रौपत्यादयाः उद्धवः एवं बहवः सन्ति। भगवद् भक्त्याः अनन्तरकालीनाः मीराबाई, सूरदास, तुलसीदास, श्रीधरस्वामि, श्रीविठलनाथगोस्वामि, औदुम्बराचार्यः, हरिव्यासदेवाचार्यः, लक्ष्मीधरः, श्रीरुपस्वामि, सनातनगोस्वामि इत्यादयः कैरल्यां भक्तेः प्राधानतया *नारायणीय* काव्यस्य कर्त्ता मेल्पत्तूर नारायणभट्टतिरि अस्य योगदानं महत्तररूपेण वर्तते। अस्य भक्तिरसं साहित्य शास्त्रकाराः रसरूपेण च परिगणयित्वा तत्र तस्य भेदादिकं च विवर्ण्य विशदयति च -

श्रीविष्णोः श्रवणे परीक्षिद् भवद्वैयासकिः कीर्तने प्रह्लादः ।

स्मरणे, तदंघ्रिभजने लक्ष्मीः पृथुः पूजने।

अक्रूरस्त्वभिवन्दनेऽथ हनुमान् दास्ये च सख्युऽर्जुनः ।

सर्वस्वात्मनिवेदने बलिरभूत् कैवल्यमेषां फलम्।।[३९]

## ५.१.२..भक्तिलक्षणं व्युत्पत्तिः च

भज् सेवायाम् इति धातोः क्तिन् प्रत्ययेन निष्पन्नोऽयं भक्तिशब्दः। सेवा इत्यर्थः, अस्य पूर्णता भगवत्यनन्यप्रेम्णैवास्ति। भज्यते इति अनुरागविशेषः, पूज्येष्वनुरागः भक्तिः इत्युपदेशः[४०]। अष्टाध्याय्यां (४.३.९५) भक्ति इति सूत्रं च भवति[४१]। एवमेव (४.३.९८) वासुदेवार्जुनाभ्यां वुन् इति सूत्रे च भक्तिं सूचयति[४२]। शाण्डिल्यसूत्रे यथा ईश्वरे परानुरक्तिः, अथातो भक्तिजिज्ञासा, सा परानुरक्तिरीश्वरे परमेश्वरविषये परमप्रेम, उपास्याकाराकारित चित्तवृत्यावृत्तिरुपा परिपक्व निदिध्यासनाख्याश्रवणमननाभ्यास फलभूता अनुरक्तिः [४३]। देवर्षिर्नारदः -सा त्वस्मिन्परमप्रेमरुपा, अमृतस्वरुपा च[४४]। अङ्गिराश्च -सानुरागरूपा नारदपञ्चरात्रे अस्य विषयस्योपरि एवं विवर्णितं यथा- सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्। हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते[४५]। हरिभक्तिविलासे यथा- अन्याभिलासिताशून्यं ज्ञानकर्म्माद्यनावृतम्।

आनुकूल्येनकृष्णानुशीलनं भक्तिरुत्तमा।। [४६]

आराध्यविषयकारणत्वमेव भक्तित्वम्। शांङ्करभाष्ये भक्तिः नाम ज्ञानलक्षणा भक्तिः। *विवेकचूटामण्यां* (३२) श्लोकेन मोक्षकारणसामग्र्यां भक्तिरेव गरीयसि। स्वरुपानुसन्धानं भक्तिरित्यभिधीयते।। [४७] स्वात्मतत्वानुसन्धानं भक्तिरित्यपरे जगुः।। [४८] *भागवते* अहैतुक्यव्यवहितया भक्तिः पुरुषोत्तमे इति [४९]। सालोक्य साष्टिर्सामीप्य सारुप्यैकत्वमाप्युत। दीयमानं न गृह्णाति विना मत्सेवनं जनाः। रामानुजमते भक्तिः ज्ञानरुपा किं वा ज्ञानहेतुरर्थान्तरम्, अतो भक्ते र्मुक्ति हेतुत्वमयुक्तम्।यथा निरतिशयानन्दप्रियानन्यप्रयोजन-

सकलेतरवैतृष्ण्यवज्ज्ञानविशेष एव। तत्सिद्धिश्च विवेकादिभ्यो भवतीति वाक्यकारेणोक्तम् तल्लब्धिर्विवेकोविमोकाभ्यासाक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति [५०] । द्वैतमते –ज्ञानपूर्णपरस्नेहो नित्यभक्तिरितीर्यते इति [५१] । पशुपक्ष्यादिनां भगवद्भक्त्या परमप्राप्तिदर्शनात् एवं चेदपि जन्तूनां कृते ज्ञानसाधनयोरभावादीश्वर भक्ति कर्तुमसमर्थतया शास्त्रकारा ईश्वरभक्तौ प्रधानतया मनुष्याणामेवाधिकारं वदन्ति। भज इत्येष वै धातुः सेवायां परिकीर्तितः। तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधन भूयसि। अन्यत्र भक्तिलक्षणम् –देवानां गुणलिङ्गानामामुश्रविककर्म्मणाम्। सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या। नारदपञ्चरात्रे –प्रेमभक्तिलक्षणम् -अनन्यममताविष्णौ ममता प्रेमसङ्गता भक्तिरित्युच्यते प्रह्लादेनोद्धव-नारदैः। स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते। पूजादिष्वनुरगः इति परामर्शः। कथादिद्धिति गर्गः आत्मरत्यविरोधेनति शाण्डिल्यः, नारदस्तु तदर्पिताखिलाचारतातद्धिस्मरणे परमव्याकुलतेति।

### ५.१.३ भक्तिः वेदे

वेदेषु प्रायेण भक्त्याः स्थानं प्रत्यक्षेण न्यूनमेव। तत्र अधिकतया उपासनादीनां तादृशानामेव अधिकोपदेशानि सन्ति। वेदेषु यद्यपि सहेतुकी भक्तिराधिक्येन दृश्यने परन्तु या भक्तिर्भक्तिरसाचार्यो रस रूपतया प्रतिपादिता साऽपि वेदेषु वर्तते। ऋग्वेदे– 'कामानां वर्षिते जगतो भत्रे वरुणाय पापरहितः सन्नहं पर्याप्तं परिचरणं करवाणि यथा भृत्यः स्वामिने सम्यक्परिचरति तद्वत् [५२] '। अन्यत्र –हे वसो शतक्रतो त्वं नः पिता पितृवत्पालकः, त्वं माता मातृबद्धारकश्च भव [५३] '। एवमेव–' हे मघवन् त्वत्तेऽन्यदस्माकं प्रशस्यः पिता नास्ति भक्तस्य परमात्मनि पितापुत्रसम्बन्धः कांक्षितः स्थापितश्च [५४] । अन्यत्र उपास्योपासकयोः सख्यसम्बन्धः दृश्यते। यथा- त्वं जार्मिर्जानानामग्ने मित्रो असि प्रियः सखा सखिभ्य ईड्य[५५]। अन्यत्र – 'विप्राः सोमस्य पानाय इन्द्रं गावो वत्समिवाभिशब्दयन्ति[५६] '। अत्र इन्द्रं प्रति विप्राणां वात्सल्यमयी उपासना भावना वा अभिव्यक्ता तस्मात् भक्तिरसाचार्याणां

वात्सल्यभक्तिरसोऽपि श्रेष्ठमेवा। अन्यत्र अथर्व वेद संहितायामपि ऋषयो भगवतो भक्तिमभिलषन्ति यथा- देव संस्फान सहस्रापोषस्याशिषे तस्य नो रास्व तस्य नो धेहि तस्य ते भक्तिवांसः स्याम [५७] । वेदे प्रतिपादितानां विष्णु-सूर्य-शिव-शक्ति-गणपति इत्यादीनां परिवर्तिकाले पञ्चसम्प्रदायाः प्रवर्तिताः। एवमेव गायत्री उपासनादिषु मन्त्रांशः वेदभागात् एव स्वीकृतं, पुरुषसूक्तादि मन्त्रांशाः वेदभागाात् एव स्वीकरोति। वेदे एव भक्तेर्मूलं तत् तु मन्त्रब्राह्मणात्मकश्च। मन्त्रभागे विस्तृता या भक्तिः सा प्रायः सकामैव दृश्यते। निष्कामभक्तेः लक्षणं *गोपालतापन्युपनिषदि* विशदयति- भक्तिरसस्य भजनं तदिहामुत्रोपाधिनैरास्येनास्मिन्मनः कल्पनमेतदेव च नैष्कर्म्यम्। वेदाङ्गेषु निरुक्ते अर्चा हि भक्तेः मुख्यमङ्गम् पूजार्थे, अर्चार्थे वा भक्तिशब्दस्य सामर्थ्यं ज्ञायते। वेदेषु च रसशब्दो अर्चा वाचको अर्थात् भक्तिवाचको गृह्यते। अन्यत्र शिक्षाग्रन्थेषु, ज्योतिषे वा एतादृशेषु भक्तिमधिकृत्य प्रायेण विचाराः विरलाः । किन्तु उपासना विषये छान्दोग्योपनिषतादिषु सौरोपासनायाः, गायत्री उपासनायाः च प्रकारादिकं विचारितविषयमेव।

**५.१.४ इतिहासे भक्तिः**

इतिहासेषु आदिमं भवति रामायणं, आदिकविना वाल्मीकि महर्षिणा प्रणीतोऽस्मिन् चतुःसहस्राणि श्लोकानि सन्ति अतः चतुसाहस्रीसंहिता इति अपरनाम्ना प्रसिद्धं च। एषु इतिहासद्वयेषु भक्त्याः स्वरुपं प्राधान्यं चाधिकतया विवर्णितमेव। महाभारतस्य कर्ता कृष्णद्वैपायनोऽपि विष्णोरंशावतारत्वेन परिगण्यन्ते। भक्तिशास्त्रमताचार्याणां मतौ भगवद् गीता भक्तिशास्त्रम् इति सिद्धान्तयन्ति। तादृशांशाः गीतायाम् सप्तमाध्याये १०-१३ पर्यन्तश्लोकैः विस्तृतम्।

। रामायणे च भक्त्याः उत्तमोदाहरणत्वेन शबरिः नाम तापसी, अहल्या, तारा, हनुमतादयः बहवः सन्ति। निषादराजा गुहः, एवमेव रावणसोदरः विभीषणादयः, विपिने तपसा यापयन्तः बहवः मुनयः, ऋषयश्च भक्त्याः उत्तमोदाहरणत्वेन रामायणे दृश्यते।

रामायणे सर्वोपरि रामस्य सोदरः भरतः भक्तिभावस्य उत्कृष्टदशाम् अनुभवति स्म। यथा रामस्य चरणचिह्नरजसाङ्किताां भूमिं पश्यतो भरतस्य तन्मयतां वर्णयन् भगवता महेश्वरेण पार्वतिं प्रति प्राह अध्यात्मरामायणे यथा-

स तत्र वज्राङ्कुशवारिजाञ्जितध्वजादिचिह्नानि पदानि सर्वतः।

ददर्श रामस्य भुवोऽतिमङ्गलान्यचेष्टयत्पादारजःसु सानुजः।

अहो सुधन्योऽहममुनि राम पादारविन्दाङ्किंत भूतलानि।

पश्यामि यत्पादरजो विमृग्यं ब्रह्मादि देवैः मुनिभिश्च नित्यम्।।[५८]

अहल्या तु गौतम शापेन शिलीभूत्वा गौतमपत्नी भगवतो रामस्य चरणरजसां स्पृष्ट्वा सति सचेतना भुत्वा भगवन्तं श्रीरामं स्तौति। यथा-

अहोकृतार्थास्मिजगन्निवास! ते पादाब्जसंलग्नरजःकणादहम्।

स्पृशामि यत्पद्मजशङ्करादिभिविमृश्यते रन्धितमानसैः सदा।। [५९]

ततः शबरवंशजा शबरी नाम निषादी रामभक्तेः मकुटोदाहरणेन प्रसिद्धंम्। पम्पासरस्समीपे रामेण दृष्टा सा फलमूलादिभिः राममुपचरति, चिरकालं रामं प्रतीक्षितवती सा भक्तेर्माहात्म्यं ज्ञात्वा एवं रामं स्तौति –

तस्मात् भामिनि संक्षेपाद्वक्ष्येऽहं भक्तिसाधनं

सतां संगतिरेवात्र साधनं प्रथमं स्मृतम्।

द्वितीयं मत् कथालापस्तृतीयं मद्गुणेरणम्।

मद्वचसां व्याख्यातृत्वं चतुर्थं साधनं भवति।

आचार्योपासनं पञ्चमं, पुण्यशीलत्वं यमादि नियमादि च।

निष्ठा मत्पूजने नित्यं षष्ठं साधनमीरितम्।

मम मन्त्रोपासकत्वं सांगं सप्तममुच्यते।

मद्भक्तेष्वधिकापूजा सर्वभूतेषु मन्मतिः।

बाह्यार्थेषु विरागित्वं तथा। अष्टमं नवमं तत्वविचारो मम भामिनी"।

एवं नवविधा भक्तिसाधनं यस्य कस्य वा स्त्रियो वा पुरुषस्यापि तिर्यग्यो निगतस्य वा। भक्तिः संजायते प्रेमलक्षणा। [६०]

अध्यात्मरामायणे आरण्यकाण्डे भगवता तपस्विनं शबरिम् एवमुपदिशति यथा –

" सतां संगतिरेवात्र साधनं प्रथमं स्मृतम्,
द्वितीयं मत्कथालापस्तृतीयं मद् गुणेरणं।।
व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं भवेत्,
आचार्योपासनं भद्रे मद्बुद्ध्या मायया सदा।।
पञ्चमं पुण्यशीलत्वं यमादि नियमादि च
निष्ठा मत्पूजनेनित्यं षाष्ठं साधनमीरितम्।।
मम मन्त्रोपासकत्वं सांङ्गं सप्तममुच्यते
मद् भक्तेष्वधिकं पूजा सर्वभूतेषु मन्मतिः।।
बाह्यार्थेषु विरागित्वं शमादि सहितं तदा अष्टमं
नवमं तत्त्वविचारो मम भामिनिः।।
एवं नवविधा भक्तिः साधनं यस्य कस्य वा।[६१]

कृष्णद्वैपायन विरचित महाभारते भक्त्याः उत्तमलक्षणानि, उदाहरणानि च बहूनि सन्ति। कुन्ती, द्रौपती, विदुरः, भीष्मः, युधिष्ठिरः, अर्जुनः तादृशाः कृष्णभक्तिं स्वानुभवैः ज्ञाताः च। अन्यत्र पाण्डपत्नी द्रौपती यदा दुश्शासनेन कौरवसभायां विवस्त्रा अभवत्।कर्तुमभिलषिता तदा सा –

गोविन्द ! द्वारकावासिन् ! कृष्ण ! गोपीजनप्रिय

कौरवैः परिभूतं मां किं न जानासि केशव।

कौरवार्णवमग्नां मामुद्धरस्व जनार्दन प्रपन्नां

पाहि गोविन्द ! कुरुमध्येऽवसीदतीम्।। [६२]

एवमेव महाभारते पाण्डवानां कृते बहूनि कार्याणि अकरोत्। तत्र भगवता कौरवान् दूरे परित्यज्य पाण्डवानां मंङ्गलार्थं भगवता अर्जुनस्य रथे सारथिरूपेण कार्ये व्यापृतवान् अन्यत्र स्वगुरोः सान्दीपनिमहर्षेः पुत्रम् असुरहस्तात् प्रतिगृह्य गुरुन् ददाति च। कृष्णस्य बाल्यकालीन सखा सुधामायाः कृते किमावश्यकं तत् सर्वमपि दद्यात् । भक्त्याः सोपानेषु एकं भवति श्रवणम्। महाभारते परीक्षित् महाराज्ञः अन्तिमदिनानि सः भक्त्या भगवद् कथायाः श्रवणेन यापितवान्।अतः एव अर्जुनाय भगवता निरायुधः चेदपि तेन साकं युद्धभूमौ स्वीयोद्यमानि अकरोत्। एतादृशानि बहूनि सन्दर्भानि, भक्ताः च महाभारतान्तर्गता वर्तन्ते।।

### ५.१.६.पुराणेषु भक्तिः।

पुराणानि प्रधानतया द्विधा विभक्तुं शक्यते महापुराणं, उपपुराणञ्च। सामान्यतया पुराणानां नामानि अनेन श्लोकेन संगृह्यते। - ‘‘मद्वयं भद्वयं चैव ब्रत्रयं व चतुष्टयंम् अनाप लिंग्डकूस्कानि पुराणानिह्येषाष्टादश ‘‘।। अनेन श्लोकेन यथा -मद्वयमित्यनेन- *मत्स्यपुराणं,मार्कण्डेयपुराणं*,भद्वयमिति पदेन -*भविष्यपुराणं, भागवतपुराणं*, ब्रत्रयमित्यनेन - *ब्रह्माण्डपुराणं, ब्रह्मपुराणं, ब्रह्मवैवर्तपुराणं*, व चतुष्टयमित्यनेन- *वामनपुराणं, वराह पुराणं , वायुपुराणं, विष्णुपुराणम्,* अनाप इति पदेन- *अग्निपुराणं,नारदपुराणं, पद्मपुराणं,* लिंग्डकूस्कानि इत्यनेन *लिंग्डपुराणं,गरुडपुराणं,कूर्मपुराणं,स्कन्दपुराणम्* इत्येतानि अनेन श्लोकेन सूचितम्। एतेषु भिन्ना एव उपपुराणानि। भक्तिविषये पुराणेषु वैविद्ध्यरीत्या प्रतिपादनानि वर्तन्ते। पुराणेष्वपि *शिवपुराणादि* शैवमाहात्म्यप्रधानानि, *भागवदपुराणादि* विष्णोर्माहात्म्यप्रतिपादकानि, एवं ब्रह्मपुराणादि ब्रह्मणः गुणादिकं विचारितपुराणानि इति

त्रैविध्यत्वमपि अस्ति इति मन्यते। श्रीमद् भागवत महापुराणस्य एकादशे स्कन्धे विंशति अध्याये

> "योगास्त्रये मया प्रोक्ता नृणां श्रेयो विधिस्तया।
> ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्।। ११.२०।
> कर्मभिर्भगवद्भक्ति र्भवतीश कृपा तथा।
> ज्ञानं तेन विमुक्तिश्च मोक्षधर्मार्थसंग्रहः "।। [६३]

मुक्तेः प्रधानानि त्रीणि साधनानि सन्ति। निष्कामकर्म, ज्ञानं, भक्तिः, च। अधुना कलियुगे भक्तेषु एव परमपदं प्राप्तुं शक्यते पद्मपुराणे -

> "सत्यादि युगे बोधयुगे बोधवैरायो मुक्तिसाधकौ।
> कलौ तु केवलं भक्तिब्रह्मसापूज्यकारिणी "।।
> न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा।
> हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः।। [६४]

भागवतमहापुराणे भक्त्याः गरिमा एवं विशदयति यथा -

> "श्रीविष्णोः श्रवणे परीक्षिदमवद् वैयासकिः कीर्तने।
> प्रहलादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने।
> अक्रूरस्त्वभिवादने कतिपतिर्दास्येऽथ सख्येऽर्जुनः।
> सर्वस्वात्मनिवेदने बलिरभूत्कृष्णात्पिरेषां परम् "।।[६५]

पुराणानुसारं समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वाद् भक्तियोगोऽपि परमपुरुषार्थोऽभिप्रेतः। अमुं विषयमधिकृत्य श्रीमद् भागवते --

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुपक्रमे।

कुर्वन्त्यहैतुकिं भक्तिमित्थ भूतगणो हरिः "।। [६६]

एकैकेषु पुराणेषु भक्त्या भक्तानां दुखबहुलादस्मात् संसारवत् परमानन्दपूर्ण परिस्थितौ समुपस्थापयितुं भक्तिमार्गं उपदिशति। यथा विष्णुपुराणे -

"धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करेस्थिता।

समस्त जगतां मूले यस्य भक्तिः स्थिरा त्वयि "।। [६७]

अनेन पुराणानां मतेन भक्तिः परमपद प्राप्तये सर्वश्रेष्ठमस्ति। पद्मपुराणानुसारं भगवन्तं स्वानुकूलं कर्तुं न तपसः आवश्यकतया अस्ति वा न वा वेदाध्ययनम् अनिवार्यं विद्यते, नापि ज्ञानोपार्जनं श्रेष्ठं वर्तते न च कर्मणः कर्तव्यत्वं भवति किन्तु भगवत्साधनाय भक्तिरेव सर्वोत्कृष्टं साधनमस्ति। [६८] विष्णुपुराणे प्रह्लादेन भगवन्तं नरसिंहं प्रति एवं निवेदयति -

"या प्रीतिरविवेकेनां विषयेष्वनपायिनि।

त्वामनुसरतः सा मे हृदयान्मापसर्पतु "।।[६९]

विषयलोलुपा अज्ञानिनो मानवाः विषयान् प्रत्येकचित्ताः सन्त आन्तरिकीं प्रति कुर्वन्ति तथैव ममापि अविच्छिन्नं प्रेम परमात्मनि स्यात्, न ममान्तकरणात् तत् प्रेम कदाचिदपि दूरीभवतु। स्कन्दपुराणे भक्तेः उत्तमोदाहरणम्

"सकृन्नामपीयूषरसपानपरः पुमान्

निश्रेयसं तृणमिव मन्यते तं हरिं भजे "।। [७०]

भगवतः नाम स्मरणायाः

"एतन्नामाक्षररसं रसयन्तीदिवानिशम्

रसनानैव जानाति तस्य अन्यद्रासान्तरम् "। [७१]

भक्तिसोपानेषु अन्यदेकं भवति पादसेवनं तदधिकृत्य पद्मपुराणे -

"तस्माद् गोविन्दमाहात्म्यमानन्दरससुन्दरम् "[७२]

अन्यत्र

तत्प्रेम भावरस भक्तिविलास नाम हारेषु चेत्खलु मनः किमु कामिनीभिः।।[७३]

ब्रह्मवैवर्तपुराणे भक्ति शब्दस्य रस शब्देन सामानाधिकरण्यं यथा-

"विष्णुदास्यं वैष्णवानां विष्णुभक्तिरसं परम्"

विष्णुभक्तिरसाब्धौ च निमग्नश्च भवेद् ध्रुवं शाश्वतं पिबन्ति,शान्ताश्च विष्णुभक्तिरसामृतम्। जरामृत्यु जराव्याधिशोकसन्तापनाशनम् –

तत्पादाब्जे मन्मनोऽलिः सततं भ्रमतु प्रभो।

पातु भक्तिरसं पद्मे मधुपश्च यथामधु।।[७४]

भगवद् भक्त्याः पात्रीभूतं भवितुं प्रपञ्चे वर्तमानाः सर्वप्राणि जालाः भवेयुः, पशुपक्षिप्लवगादीन् सर्वाः भगवद्भक्त्या परमपदप्राप्ति दर्शनात् तथापि सर्वसाधारणपशु-पक्षिषु ज्ञानसाधनयोरभावादीनां ईश्वरभक्त्या भक्तिं कर्तुमसमर्थतया शास्त्रकारा ईश्वरभक्तौ प्रधानतया मनुष्याणामेवाधिकारमिति वदन्ति।।

### ५. २ .१ भागवते भक्तिस्वरूपम्

भागवते भगवता कृष्णस्य बाल्यकालीय लीला, तस्य साकं गोपिकानाम्, एवं राधायाः मनोमय प्रेममयिभिः क्रीडाभिरारभ्यते। तथा अक्रूरस्य भक्तिः गोपानां भक्तिश्च

वर्ण्यते। यशोदा बाल्यकाले एव बहुवारं अवगता च पुराणेषु प्रायेण कथारूपेण तात्विकांशाः विशदयति। तत्र च विविधानि विषयानि स्पष्टयति कर्म, ज्ञानं, भक्ति, सन्यासं, योगं, ...इत्यादीनि विषयाणि तत्र कथासाहाय्येन विषयाणि प्रस्तौति। तत्र च विशेषरूपेण भागवतपुराणे भक्तिमधिकृत्य विवर्णितम् च। भागवते विशेषरूपेण भक्त्या परमपदप्राप्तिं भवितुं शक्यते। तदर्थं प्रधानतया भक्तिलक्षणं ३.२९.१२- यथा अहैतुक्य व्यवहितया भक्तिः पुरुषोत्तमे अत्र च विशदयति भक्तिप्रकाशः (७.५.२३)

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।
इति पुसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् "।।[७५]

भगवद्भक्ति सिद्धान्ते गुणत्रयं सर्वथाऽतिक्रम्यैव पूर्णरूपेण भगवद् भावप्राप्तिः जायते स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। अत्र भागवतमहापुराणे विष्णुना सह वैष्णवभक्तिप्रतिपादिता षट् पुराणानि सन्ति। *संस्कृत काव्यशास्त्रे भक्तिरसविवेचनम्* इति ग्रन्थे भागवत शब्दो भगवतोऽयं जनोग्रन्थे वेति स्थलद्वये रुढः अर्थात् भगवद् भक्तिमान् भक्तो भागवतः भगवद् भक्तिमयो भगवद् भक्तिस्वरूपो वा ग्रन्थो भागवत इति। *श्रीमद् भागवते* भक्तेः सत्वम् एवं विशदयति यथा –

संसारसिन्धु मतिदुस्तरमुत्तीर्षानयनः प्लवो भगवतः पुरुषोत्तमस्य।
लीलाकथा रसनिषेवणमन्तरेण पुंसो भवेद्विविध दुखदर्वार्दितस्य।
सतां प्रसङ्गमवीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथााः।।[७६]

श्रीमद् भागवतस्य एकादशस्कन्धे भगवत्स्वरुपसाक्षात्कारार्थं त्रयो मार्गाः विशदयति। तत्र भगवद् भक्तिः एव सर्वसाधारणा सुभग, सुलभा च प्रतीयते। तद् यथा –

“योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।

ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽन्योस्ति कुत्रचित्।

कर्मभिभगवद्भक्तिर्भवतीशकृपा तथा ज्ञानं तेन विमुक्तिश्च मोक्षधर्मार्थसंग्रहः “।।

एवमेव भागवते भक्तस्य उत्तमोदाहरणानि बहूनि सन्ति। पञ्चवर्षीय बालकस्य ध्रुवस्य, अजामिलस्य, द्रौपत्याः, वृन्दावनवासिनाः गोपिकाः, अम्बरीक्षः, पृथु एव कृष्णस्य सखा सुधामा गजेन्द्रमोक्षे गजेन्द्रः केवलेन कथा श्रवणेन परीक्षित् महाराज्ञः प्रहलादः इत्यादयः बहूनि उदाहरणानि सन्ति। भागवतानुसारेण पूर्वोक्त नवधा भक्तेः स्पृष्टमुदाहरणानि भागवते एव बहूनि वर्तते। अस्मिन् कलियुगे भक्त्याः अन्यमार्गानपेक्ष्य इतोऽपि समीचीनमिति विजिन्त्य एव मानवाः अधिकाधिकरुपेण मन्दिरेषु गत्वा पूजादिकं करोति। एवमेव भागवतस्य सप्ताहपरायणादीनां कार्यक्रमाणाम् अधिकाधिक जनानां भागवतं श्रुणोति, तत्सम्बन्धित कार्यक्रमेषु आयोजनं करोति। अनेन स्वस्वगृहेषु पारायणं करोति अनेन भागवतस्य जनस्वाधीनं अत्यधिकं वर्धयति। यथा -

“मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये

मनोगतिरवच्छिन्ना यथा गंङ्गाभसाऽबुधौ ।

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्

अहैतुक्य व्यवहितया या भक्तिः पुरुषोत्तमे।।” [७७]

## २ भारतीयदर्शनेषु भक्तिः

प्राचीनकालात् आरभ्य भारते सर्वत्र दर्शनानां प्रचुरप्रचारमलब्धम्। अत्र तादृश भारतीय दर्शनेषु आस्तिक-नास्तिक दर्शनेषु भक्त्याः स्वाधीनं कीदृशमिति विचारः अत्र करोति।वेदानां प्रामाणमङ्गीकरोति आस्तिकदर्शनानि एवं चेदपि भक्तिविषये सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसादयाः न अङ्गीकरोति। प्रकृति पुरुषाणाणां विवेचनादिकं

तादृशतत्वानि एव सांख्य शास्त्रे (दर्शने) विचारयति। तत्र भक्तेः स्थानं नास्त्येव। योगे च यम-नियमादिना परमपदप्राप्तिः एव अनेन दर्शनेन विचारयति। एवमेव न्याय-वैशेषिक-मीमांसकाः च तेषां सिद्धान्ते भक्तिः इति विषयं कदाऽपि न प्रतिपादयति। मीमांसादर्शने प्रधानतया यज्ञयागादीनां कर्मणां तत्र चर्चयन्ति। भक्तिविषयस्तु अन्यत्र वेदान्तदर्शने एव किञ्चितरीत्या एव। किन्तु प्रबलरीत्या द्वैत-विशिष्टाद्वैत-शुद्धाद्वैत दर्शनादिषु भक्तिरेव प्रधान्यमधिकं वर्तते। एवमेव नास्तिक दर्शनेषु नास्तिकदर्शनेषु चार्वाक-जैन-बौद्धादयः च तेषां दर्शने भक्तिरिति पदमपि न उपयुज्यते।

वेदान्तदर्शने शङ्करादीनाम् अद्वैतवेदान्ते भक्तिप्रभावं मध्वादीनपेक्ष्य न्यूनमेव। अस्य कारणस्तु अद्वैते अज्ञान निवर्तनेन अथवा ज्ञानेनैव परमपदप्राप्तिः किन्तु मध्व-रामानुजादीनां दर्शने भक्त्याः प्राधान्यम् अधिकं वर्तते। भारतात् बहिरागताः क्रैस्तव-इस्लामिक इत्यादीनां मते च भक्तिरिति एवं चेदपि एतेषां कृते उपासनार्थं चर्च्, मस्जिद् इत्यादि विशिष्टं वा प्रत्येक स्थानमावश्यकमेव।

### २.२.२ नारदीयसूत्रे भक्तिः .

भक्तिविषयमधिकृत्य बहवः ग्रन्थाः सन्ति। तेषु भक्तेः निर्वचनादिकं, प्रकाराः उदाहरणानि च विस्तरति। किन्तु सूत्ररूपेण लभ्यमानेषु प्रधानौ भवतः *नारदभक्तिसूत्रम्* एवं *शाण्डिल्यभक्तिसूत्रञ्च*।। अत्राद्यं नारदभक्तिसूत्रमधिकृत्य विचारयाम।

चतुरशीतिः (८४)सूत्रान्तर्गतं भवति नारदभक्तिसूत्रम्। नारदमहर्षिणा प्रणीतम् इति वदन्ति। भक्तानाम् आध्यात्मिकाचार्याणां तादृश साधकानां च कृते प्रकृष्टोपकारकं भवति। अस्यां प्रथमतया भक्त्याः लक्षणम्, अस्य प्रकाराः अस्य प्राप्त्यर्थं किं करणीयं, किम् अकरणीयम् एवमेव भक्तानां कर्माणि, भक्तानां महिमादि विषयाः अत्र सूत्रेषु विस्तरेण विचारयन्ति। द्वितीय सूत्रात् आरभ्य भक्तिलक्षणानि वदन्ति। सूत्रे –" सा त्वस्मिन्

परमप्रेमरुपा, अमृतस्वरुपा च" भवति [७८]। अनन्तरं यः भक्तिं प्रापयति चेत् सः न किञ्चित् वाञ्चयति, न शोचति, न द्वेष्टि, न रमते नोत्साहि भवति। सा भक्तिस्तु कामयमाना निरोधरुपत्वात्। कर्मविषये एवं वदति -लोकवेदेषु तदनुकूलाचरणं तद्विरोधिषुदासीनता अनन्तरं पराशरः, गार्ग्यः शाण्डिल्यादीनां, भक्तिलक्षणानि विचारयित्वा स्वीयमतम् विंशति(२०)तम सूत्रेण (अस्त्येवमेवम् ) स्थापयति। ततः परमस्य उदाहरणानि उपस्थापयति। अनन्तरम्– कर्म-ज्ञान-योगादिषु अपि अधिको श्रेष्ठो भवति इति पञ्चविंशति(२५)तम सूत्रेण विस्तरति [७९]। अनन्तरस्थ भागेषु भक्त्यां ज्ञानादि विषयानां स्थानमित्यादिकं विशदयति शेषसूत्रेषु भक्त्याः आर्जनार्थम् अनुष्ठीयमानानि कार्याणि विचारयति। अष्टचत्वारिंशत् (४८)तम सूत्रेण यः कर्मफलं त्यजति कर्माणि सन्यसति ततो निर्द्वन्दो भवति, अनेन सूत्रेण तादृशः सः मायां जयति [८०]। एकपञ्चाशत् सूत्रेण भक्त्यः स्वरुपं पुनः विचारयति – तद् यथा " अनिर्वचनीयं प्रेमस्वरुपम् " अनन्तरं भक्तिः सत्वादिगुणरहितं कामनारहितं तादृशभक्तिमार्गेण अग्रे गत्वा तं भगवन्तमेव पश्यति, श्रृणोति, तदेव चिन्तयति च [८१]। अग्रिम सूत्रेण गौणीभक्तिः गुणभेदात् त्रिधा आर्तादि भेदैः विभक्तुं च शक्यते। गौणी त्रिधा गुणभेदात् आर्तादिभेदात् वा एतदेव *भगवद्गीतायाम्*

"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।" ७.१६।

अनन्तर सूत्रेण उत्तमा भक्तिः सात्विकभक्तिः इति। अग्रिम सूत्रेण (५८)अन्य मार्गानपेक्ष्य सौलभं भक्तौ(अन्यस्मात् सौलभ्यं भक्तौ ) [८२]।

लोकहानौ चिन्ता न कार्या निवेदात्म लोकवेदत्वात् द्विषष्ठिः(६२) एतदेव गीतायां –

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।" ९.२२।

अनन्तरसूत्रेषु पराभक्त्यां ये साधकाः प्रयत्नं करोति तादृशाः स्त्री, धनं, नास्तिकाः रिपुः एतादृशानां चरित्रं न श्रवणीयं। एवमेव अभिमानदम्भादिकं त्याज्यम्। सप्तषष्ठिः (६७) तम सूत्रेण भक्त्या एकान्तिको मुख्याः। एकः मानवः एव मुक्तरीत्या भक्तो भवति चेत् किं भविष्यति इति (द्विसप्ततिः)(७२) तम सूत्रेण विशदयति - मोदन्ते पितरो नृत्यन्ति, देवताः सनाथा चेयं भूर्भवति [८३] । अहिंसासत्यशौचदयास्तिक्यादि चारित्र्याणि परिपालनीयानि अष्टसप्ततिः (७८)। अत्र सूत्रोक्त सद्गुणाः भक्तैः परिपालनीयमेव। द्विरशीति(८२)तम सूत्रेण भक्तेः एकादशप्रकाराः विशदयति। "गुणमाहात्म्यासक्ति-रुपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्ति-कान्तासक्ति-आत्मनिवेदनासक्ति तन्मयसक्तिपरमविरहासक्तिः रुपा एकधा अपि एकादशधा भवति " [८४]।

तस्यानन्तरसूत्रेण भक्त्याचार्याणां नामानि परिचाययति। इत्येवं वदन्ति जनजल्पनिर्भयाः एकमताः कुमारव्यास शुकशाण्डिल्य गर्ग विष्णु कौण्डिन्यो शेषोद्ध वारुणि बलि हनुमद् विभीषणादयो भक्त्याचार्याः। त्र्यशीतिः ८३ अनन्तरसूत्रेण नारदभक्तिसूत्रं समापयति। अनेन सूत्रेण नारदप्रोक्तं यः इदं शास्त्रं विश्वसति सः भक्तिमान् भवति इत्युक्त्वा ग्रन्थसमाप्तिं सूचयतुम् अन्तिमपदम् आवर्तयति।।

### ५.२.३ शाण्डिल्यसूत्रे भक्तिः

भारतीयभक्तिशास्त्रे आधारशिलावद् भवति भक्तिसूत्राणि तेषु अतिप्रधानो भवति नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रं च। तेषु नारदभक्तिसूत्रमधिकृत्य पूर्वं चिन्तितम्। शाण्डिल्यसूत्रे शतसूत्राणि अध्यायत्रयेण विभक्तम्, एकैकेषु अध्यायेषु आह्निकद्वयं च भवति। प्रथमाध्याये षटिंवशतिः (२६), द्वितीये अष्टपञ्चाशत् (५८), तृतीये षटिंवशतिः २६, सूत्राणि च विस्तरति।

अत्र प्रथमाध्यायस्य प्रथमाह्निके नव(९) सूत्राणि तेषु द्वितीयेन सूत्रेण " सा परानुरक्तिरीश्वरे " अनेन अमृतत्वप्राप्तिः च प्राप्तुं शक्यते [८५]। एवं चेदपि भक्तिः ज्ञानरूपं, एकता च नास्ति इत्यपि स्थापयति पञ्चमसूत्रेण। अनन्तरसूत्रेण भक्तिः रागस्वरूपा इति वदति अस्य फलस्तु अनन्तमेव। द्वितीयाह्निकेन प्रथमसूत्रेण ज्ञानयोगादीन् भक्त्याः आवश्यकत्वं साधयति [८६]। भक्त्या आत्मरतिरुपा फलस्तु स्वराज्यसिद्धिः इति। अनन्तरसूत्रेण *श्रीमद् भागवते* उक्तगोपांङ्गनादीनां मुक्तिः केवलेन भक्त्यायेव।' एतेन विकल्पोऽपि प्रयुक्तः' षोडश(१६) अनेन सूत्रेण ज्ञानम् अङ्गं भक्तिः अङ्गी इति वादस्य खण्डनमेवानेन करोति। अग्रिम सूत्रेण 'देवभक्तिरितरस्मिन् साहचर्यात् ' इत्यनेन सूत्रेण देवान् अतिरिच्य गुरुरादिषु भक्तिः अपि देवताभक्तिवत् इति स्थापयति [८७]। अनन्तरस्थ सूत्रेण योगः एवं ज्ञानं द्वयमपि भक्त्याः साधनमिति वदति तत् नारदभक्तिसूत्रेषु उक्तसमानरीत्यायेव। गौणभक्त्या योगशास्त्रे उक्त समाध्यवस्था प्राप्तुं शक्यते। द्वाविंशति (२२) सूत्रेण 'तदेव कर्मिज्ञानियोगिभ्य आधिक्य शब्दात् ' इत्यनेन सूत्रेण भक्त्याः सर्वश्रेष्ठत्वं साधयति [८८]। अनन्तरसूत्रेण अस्य विषयस्योपस्थापनं पूर्वं गीताशास्त्रे द्वादशाध्याये अस्य श्रेष्ठता पूर्वोक्तमेव इति विचारयति। प्रथमाध्यायस्य अन्तिम सूत्रेण सूत्रकारस्य वादस्तु वेदस्य ब्रह्मकाण्डं तत् भक्तिविषयं संस्थापयितुमेव न कर्मार्थं, न ज्ञानार्थम् इति। द्वितीयाध्यायस्य प्रथमाह्निके ब्रह्मज्ञानस्य कारणभूतं यत् श्रवणादिना अन्तःकरणस्य शुद्धिः न भविष्यति। अर्थात् भक्त्या ईश्वरं सर्वदा मनसि विजिन्त्यैव मनःशुद्ध्यादि प्राप्तुं शक्यते [८९]। अनन्तरस्थ सूत्रेण (तामैश्वर्यपरां काश्यपः परत्वात् ) परमेश्वरः एवं जीवात्मा च सर्वथा द्वैविध्यं वर्तते। ( त्रिंशतिः) ३० तम सूत्रेण 'आत्मैकपरां बादरायणः 'अनेन आत्मनः आश्रमस्थानं बुद्धिः सा बुद्धिरेव मोक्षदायिनि इति विजिन्तयति। अग्रिमसूत्रेण आचार्यः शाण्डिल्योऽपि समानाभिप्रायः। एवमेव जीव तथा ब्रह्मस्य च एकैव इतिवादः। अनन्तरसूत्रेण त्रयस्त्रिंशत् (३३) जीवोपाधिविशिष्टचैतन्यम् आत्मनि जायमानः दुखादीन् क्लेशादीन् च परमेश्वरं न स्पर्शयति [९०]। अर्थात् परमात्मनि

जीवात्मा भिन्नमिति उद्देशः। अनन्तरस्थ सूत्रेषु जगत् एवं माया द्वयमपि ब्रह्मणः सृष्टिरेव। एवं प्रकृति माया द्वयोरपि आश्रयं ब्रह्मैव। अग्रिमसूत्रे एवं चेदपि सृष्टिविषये ब्रह्म तथा प्रकृति च परस्पराश्रय भूतमेव।' चेत्यचितोर्न तृतीयम् ' इति सूत्रेण प्रकृति एवं पुरुषमेतद् द्वयात् भिन्न वस्तु नास्ति इति। अग्रिमसूत्रे च अस्य विषयमेव विचारयति। तदैव गीताशास्त्रे च (प्रकृतिं पुरुषं चैव विद्ध्यनादि उभावपि।।(१३/१९) अत्र सूत्रे द्वयमपि अनादि कालात् आरभ्य परस्पराश्रयमेव। "

सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् "। चतुःश्चत्वारिंशत् (४४) इत्यनेन सूत्रेण गीतायां [९१]चतुर्थाध्याये ज्ञान-कर्मसन्यासयोगे-

"इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।"४.१।

इत्यत्रोक्त योगमेव भगवता भक्त्याः पात्रीभवितुं विविध प्रकाराः विशदयति अनेन सूत्रेण विदुरादीनां भगवता दर्शनेन प्रीति वृन्दावनस्थ गोपिकानां विरहानुभूतभक्ति, व्यास-भीष्मादीनां महिमावर्णनेन जातभक्तिः, हनुमतः एवं व्रजवासिनां च भक्तिः प्रह्लादादीनां च विविध भक्त्याः प्रकाराः इति अनेन सूत्रेण उद्दिश्यति। षट्चत्वारिंशत् (४६) तम सूत्रेण "यद्वाक्यशेषात् प्रादुर्भावेष्वपि सा " [९२]इत्यनेन सूत्रेण गीतायां –देवान् देवयजो यान्ति,मद् भक्ता यान्ति मामपि (७.२३)अस्य सूत्रस्याशयमपि एतदेव। अनन्तरसूत्रमपि सप्तचत्वारिंशत् (४७) "जन्मकर्मविदश्चाजन्मशब्दात् " समानाशयमेव गीतायाम्-

"जन्मकर्म च मे दिव्यमेवं यो वेत्ति तत्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन।।"४.९।

भक्तिसूत्रे पञ्चाशत् (५०) सूत्रेण प्राणित्वान्न विभूतिषु अस्य समानाशयमेव गीताशास्त्रे दशम (१०) विभूतियोगे षट्विंशतिः (२६) तम श्लोकेन-

"उच्चैः श्रवसमश्वानां विद्धिममृतोद्भवम्।

एरावतं गजेन्द्राणां नराणां च नराधिपम्।।"१०.२७।

इत्याशयसमानमेव अस्य सूत्रस्याशयम्। "वासुदेवेऽपीति चेन्नाकारमात्रत्वात् " ५२ तम [९३] सूत्रस्य समानाशयं गीतायां विभूतियोगे ३७ तम श्लोकेन –

वृष्णीनां वासुदेवोऽस्मि, पाण्डवानां धनञ्जयः।। (१०.२१) इति वृष्णिषु श्रैष्ठ्येन तत्। ५४।। अस्य सूत्रस्याशयमेव दशमाध्याये एकविंशति तमश्लोकेन यथा- " आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् " इति। एकसूत्रमपि उक्त्वा द्वितीयाध्यायस्य प्रथमाह्निकं समापयति। ईश्वरप्रेमस्य पात्रीभूतं भवितुं बहवाः अत्र प्रतिपादिताः ते सर्वेऽपि पराभक्तिरेव तत् एव मोक्षसिद्धिप्राप्तीनां कृते अवश्यम्। द्वितीयाध्यायस्य द्वितीयाह्निके प्रथमश्लोकेन "भक्त्या भजनोपहाराद्गौण्या परायैतद्धेतुत्वात् " षट्पञ्चाशत् (५६) अनेन सूत्रेण गौणभक्तिरेव उद्दिश्यते अर्थात् गौणभक्तिमार्गेण अग्रे गच्छति चेत् एव पराभक्त्यां प्राप्तुं शक्यते। एतदेव गीताशास्त्रे च -

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।।९.२९।

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।

नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।"९.१४।

इत्यादि श्लोकेषु समानाशयाः अग्रिम सूत्रैः- “रागार्थप्रकीर्त्ति साहचर्याच्चेतरेषाम् “ इति सप्तपञ्चाशत् (५७) तमेनोक्तम्। नवधा भक्तिष्वेकं भवति कीर्तनम् एतदेव गीताशास्त्रे एकादश (११) तमाध्याये एवं -

“स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।

रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः।।”११.३६।

इति श्लोकाशयवत् सादृश्यं द्रष्टुं शक्यते।” अन्तराले तु शेषाः स्युरुपास्यादौ च काण्डत्वात् “अनेन सूत्रेण एकवारमपि ब्रह्मकाण्डं भक्तिकाण्डमिति समर्थयति। भक्त्याः प्रधानसोपानानि राजविद्याराजगुह्ययोगे चतुर्दश(१४) तः आरभ्य एकोनविंशतिः (१९) पर्यन्तश्लोकेषु समानविषयमेवात्र विचारयति। अत्र भगवता भक्तेः प्राधान्यत्वादिकं च विशदयति। “ताभ्यः पावित्र्यमुपक्रमात् “ इति सूत्रेण अन्तकरणशुद्धिरेवात्र उद्दिश्यते [९४] । अनन्तरसूत्रेण कीर्तनादिना पराभक्तिं प्राप्तुं शक्यते। पराभक्तेः प्राप्त्यर्थं श्रवण-कीर्तनादिकं यदाकाले करणीयं तदा एव करणीयमिति तात्पर्यः। एवमेव कर्मणा शुभाशुभफलादीन् न ददाति, एवं चेद् भक्त्या तादृश गुणान् प्राप्तुं शक्यते। वैष्णवभक्त्याः सर्वे समानाः तत्र पूज्य-अर्चकादिभावं विनायेव करणीयम्। यथा-

“पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।”९.२६।

श्लोके भगवता उक्तकार्यमेव “पत्रादेर्दानमन्यथा हि वैशिष्ट्यम् “सप्ततिः (७०) इत्यनेन सूत्रेण विचारयति “गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् “ द्विसप्ततिः(७२) अनेन सूत्रेण [९५]गौणभक्त्याः त्रैविध्यत्वं विशदयति यथा - आर्त-जिज्ञासा-अर्थार्थी एतदेव गीतायाम्।

" चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।

आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।"७.१६।

स्मरण कीर्तनादीनां प्राधान्यस्तु यज्ञ-होमादीनां अन्तिमे यागादीनां निर्वहणसमये च विष्णुं स्मारयति। स्मरणं, कीर्तनं, श्रवणमित्यादि प्रकाराः अत्र भक्त्याः प्रायश्चित्तरुपेण भवति इति चतुःसप्ततिः ७४ तम सूत्रेण चिन्तयति। अग्रिम सूत्रेण यथा महापातकानां पापनिवारणार्थं समर्थो भवति स्मरण-कीर्तनादिकं गीताशस्त्रे एतदेव मोक्षसन्यासयोगे षट्षष्ठिः (६६) तम श्लोकेन यथा -

" सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।"१८.६६।

एकोनाशीतिः (७९) तम सूत्रेण यथा मानवेषु उच्च नीचजातीनां विवेचनं नावश्यकम्, मानवाः सर्वे समानाः इति। अग्रिम सूत्रेण अनेन जन्मना पराभक्त्या परमपदं प्राप्तुं न शक्यते चेत् भगवता अग्रिम जन्मेन तत्रभक्तिसाधनैः तत् प्राप्तुं शक्यते इति पुराणादिषु च उक्तमेव। "अतो ह्यविपक्वभावानामपि तल्लोके "इति सूत्रेण एतदेव उक्तम्। अग्रिमसूत्रद्धयेन अग्रगामिना लोकैः विविधैः लोके नीत्वा भगवन्पदं प्रापयति।" उत्क्रान्तिस्मृतिवाक्यशेषाच्च " एकाशीतिः (८१) इति सूत्रेण गीताशास्त्रे तारकब्रह्मयोगे १०-१३ पर्यन्तश्लोकैः विस्तरति। अनन्तर सूत्रेण "महापातकिनां त्वार्तौ " द्व्यशीतिः(८२) इति सूत्रेण सर्वेषां कृते भक्त्यां अधिकारो वर्तते इति पुनः पुनः स्मारयति। गीताशास्त्रमधिकृत्यपि एकं सूत्रम् " सैकान्तभावो गीतार्थप्रत्यभिज्ञानत् "त्र्यशीतिः(८३) अनेन सूत्रेण [९६]भगवन्तम् अनन्य प्रेम्णा पराभक्तिं प्राप्तुं शक्यते, इत्युक्त्वा द्धितीयाध्यायं समापयति।

तृतीयाध्याये प्रथमाह्निकं प्रथम सूत्रेण अत्रत्य जगतः भगवान् च अभिन्नरुपेण वर्तते। अत्र प्रपञ्चे स्थित सर्वमपि भगवतः स्वरूपमेव। भगवतः ऐश्वर्य शक्त्याः नाम माया। एवं

चेदपि द्वावपि भिन्नमेव। अनन्तरस्थ सूत्रेषु ईश्वर्य बुध्यायेव अत्र सृष्टिः अकरोत्, तादृश विषयाः शेषसूत्रेषु विचार्यते। द्वितीयाह्निके च प्रथम सूत्रेण ईश्वर जीविभिः मध्ये भेदं नास्ति द्वावपि एकमेव [९७]।।

## ५.३. प्रायोगिक वेदान्ते भक्तिः

भक्त्याः प्रयोगाणि प्रायेण भारते सर्वत्र विभिन्नयारीत्या विभिन्न समयेषु अभवत्। भक्तिप्रस्थाने च प्रमुखाः दार्शनिकाः मध्व-रामानुज-वल्लभ-मधुसूदनसरस्वत्यादयः भिन्न दार्शनिकतया विभिन्नप्रदेशेषु आसन्। कैरली प्रान्ते च प्राचीनकालादारभ्य भक्तिप्रस्थानस्य आचार्याः आसन्। प्रायोगिक वेदान्तो नाम–विवेकानन्द, श्रीनारायणगुरुः, चट्टम्बिस्वामिनश्च एते प्रायोगिकवेदान्तिनः इति प्रथिता। तादृश प्रायोगिकवेदान्तिनांः बहवाः सन्ति चेदपि अत्र आचार्यत्रयाणां भक्तिविषये तैषां दर्शनमत्र विचारयति। आद्यं श्रीनारायणगुरुदेवस्य भक्तिविषयं विचारयाम।

कैरलीप्रान्ते जनिं लब्धेषु नवोत्थाननायकेषु प्रथमगणनीयः भवति श्रीनारायण गुरुदेवः। १८५६ तमे क्रिस्त्वब्धे आगस्तमासस्य २८ दिनांङ्गे तिरुवनन्तपुरं जनपदे 'चेम्पषन्त्यां ' जनिमलभत । अनेनाचार्येण बहुद्घोषणानि समाजोद्धरणाय दत्तम्। एतेषु केचन अत्र –" ओरू जाति ओरु मतम् ओरु दैवं, मतमेतायालुं मनुष्यन् नन्नायाल् मति, जाति चोदिक्करुत्, संघटिच् शक्तराकुविन् विद्यकोण्ड् स्वतन्त्रराकुविन् " इत्यादीन्येव कैरलीभाषायां जनान् उद्बोधयितुं बहुप्रयत्नमकरोत् । ग्रन्थरचनया एवं कैरल्यां बहुमन्दिराणां प्रतिष्ठादि कार्याणि गुरुदेवेन अकरोत्। एवमेव अरुविक्करा नाम ग्रामे दर्पणप्रतिष्ठा चानेन अकरोत्। अनेन प्रसिद्धं दैवदशकादिकं स्तोत्रकाव्यादिकं बहूनि स्तोत्रकाव्यानि, *दर्शनमाला, आत्मोपदेशसतकम्, अद्वैतदीपिका, वेदान्दसूत्रादीनि* ग्रन्थानि *विनायकाष्टकं,* गुहाष्टकादिस्तोत्रकृतीनि *शिवस्त्वं ब्रह्मविद्यापञ्चकं, मुनिचर्या पञ्चकमित्यादीनि ईशावास्योपनिषदः* भाष्यं च अनेन अलिखन्। एवमेव अनेन

संस्कृतभाषायां बहुवः कविता च अरचयन्। *कर्मदर्शनम्, भानुदर्शनं, ज्ञानदर्शनं भक्तिदर्शनम्* इत्यादिकाः एतेषु केचना एव। अत्र भक्तिदर्शनमिति पद्यानपसारेण विचारयाम। आनन्ते अधिष्ठितम्, अधिष्ठितमात्मानं निरन्तर ध्यानं भक्तिः। दशश्लोकयुक्ते अस्मिन् पद्ये स्वीयभक्ति दर्शनं विशदयति। विविधया रीत्या एकैकेन श्लोकेन विशदयति। अवसानेस्तु पराभक्तिरुपेण अनेन श्लोकेन विशदयति। एवमेवानेन संस्कृतभाषायां बहूनि कविताः अरचयन्। *कर्मदर्शनं, भानुदर्शनं ज्ञानदर्शनं, भक्तिदर्शनम्* इत्यादिकम् एषु केचनाः।अत्र भक्तिदर्शनमिनति पद्यानुसारेंण विचारयाम। आनन्ते अधिष्ठितम् आत्मानं निरन्तरध्यानं भक्तिः। अवसानेस्तु पराभक्ति रुपेण अनेन श्लोकेन विशदयति।

"नियन्तरि निषिद्धस्य सर्वेषां हितकर्त्तरि।
योऽनुरागो भक्तिरत्र सा परा परमात्मनि।।" १०।।

शाण्डिल्य सूत्रे "सा परानुरक्तिरीश्वरे " नारद भक्तिसूत्रे " सा त्वस्मिन् परमप्रेमरुपा " अस्य समानाशयः अनेन श्लोकेन प्राप्तुं शक्यते। प्रथम श्लोकेन यथा-

"भक्तिरात्मानुसन्धानमात्माऽनन्दघनो यतः।
आत्मानमनुसन्धत्ते सदैवात्मविदात्मना।।१"।[९८]

द्वितीयेन श्लोकेन बहिस्तु आनन्दघनः अतः निरन्तरब्रह्मानुसन्धानमेव भक्तिः। तृतीयेन श्लोकेन आनन्दपरो ध्यानमेव भक्तिः, चतुर्थेन आत्मैव ब्रह्म, आत्मज्ञानिस्तु आत्मानं भजति, तदेव भक्तिः। भक्तः आनन्ते, आत्मनि ब्रह्माणि च अचञ्चलबोधयुक्तः भक्तः। अन्तिमेन दशमेन श्लोकेन पराभक्तिविषयं पूर्वं विस्तृतम्। अत्र उपनिषत्सु –" न वा अरे पत्युः कामाय प्रियं भवति आत्मनस्तुकामाय सर्वं प्रियं भवति [९९] "। मन्त्रस्थ आशयमेव सप्तमेन श्लोकेन अविचारितम्। केवलेन दशश्लोकेनैव गुरुदेव स्वीय भक्तिदर्शनं प्रस्तावितम्।

नारदृभक्तिसूत्रे चतुरशीतिः(८४) सूत्राणि, शाण्डिल्यसूत्रे(शत) १०० सूत्राणि च सन्ति। एवं चेत् अत्र केवलं भक्तिरेव विस्तृतं तस्य प्रकारादिकं न विवर्णितम्।

भारते जनिलब्धेषु सन्यासि वृन्देषु प्रथमगणनीयः, एवं नवोत्थाननायकः चासीत् नरेन्द्रः। पश्चिम बंङ्गाल् प्रान्ते जनिं लब्धोऽयं (१८६३—१९०२) प्राचीन शिक्षारीत्या साकम् आधुनिक विद्याभ्यासरीत्या विद्यां च अलभन्। बंङ्गाले समानकाले एव श्रीरामकृष्णदेवश्चासीत्। नरेन्द्रः श्रीरामकृष्णदेवात् सन्यासदीक्षां स्वीकृतवान्। ततः परमेव विश्वप्रसिद्धमतसम्मेलने १८९३ तमे सप्तम्बर मासस्य ११ दिनाङ्गे अमेरिक्कायां चिक्कागो नगरे भागं गृहीतवान्।

अमुं विषयमधिकृत्य १८९७ नवम्बर् ९ दिने लाहोर् देशे कृत प्रभाषणेन विवेकानन्दस्य भक्तिविषयमधिकृत्य विस्तरति। एतादृशभाषणादिनायेव स्वामिना स्वीय मतविस्तरणं करोति। भक्तिविषयं वैदिकसाहित्येषु, संहितासु, उपनिषत्सु च दृश्यते इति स्वामिनः वादम्। अस्य विकासादिकं पुराणेषु उपलभ्यते। अतः भक्तिः सम्यग्तया अवगन्तुं पुराणादीनां पठनमत्यन्तापेक्षितमेव। अस्य मतानुसारेण पुराणेषु भक्त्याः सूक्ष्मांशादिकं ज्ञातुं पुराणपठनेनैव लभ्यते। पुराणेषु विस्तृत भक्तेः उपदेशेन साधारणीयमानवानां दैनन्दिनजीवितेषु कर्तुमेव भक्तिः। तदर्थम् इदानीन्तनकाले समीचीनमार्गस्तु मन्दिराणि एवं विग्रहाराधनादिकमेव। तद् न केवलं हैन्दवानां विषये स्वामिना तस्मिन्ऽवसरे यहूदादीनां पाश्चात्यानाम् अवस्थादिकं चात्र विचारयति। अनेन भक्तिमार्गस्तु आध्यात्मिकमेव इत्यपि स्थापयति। एवमेव विग्रहादीनाम् आराधनादि विषयम् आध्यात्मिकविषये प्राथमिकस्तरः अनेन मार्गेणैव गत्वा अग्रे प्राप्तव्यम् इति स्पष्टयति। अत्र सुस्पष्टतया अवगन्तुं शक्यते नरपूजायेव नारायणपूजा इति। यथा ग्रामेषु दीनावलम्बानां दरिद्रानां च कृते तेषां किमावश्यकं तद् दातव्यमिति अस्य मतम् तदेव इदानीन्तनकाले अस्माकं भारते अवश्यमिति

अस्य वादः। अस्य प्रभाषणस्य अन्तिमे भक्तिम् एकं त्रिभुजवत् एवमिति विचारयति,भक्तिः ईश्वरः ईश्वरस्तु प्रेममेव।

अन्यत्र पञ्जाब् देशे सियाल्क्कोट्ट् इति प्रदेशे स्वामिना चिन्तितविषयमेव शाण्डिल्य सूत्रे द्वितीयेन सूत्रेण चिन्तितवतेव। विविध नाम्ना जनाः शैवाः, सर्वशक्तः परमेश्वरेण इति चिन्तयति, एवं चेत् वैष्णवाः विष्णुरेव, शाक्तेयाः देविरेव अनेन परस्पर कलहः क्रियते। अनेन भक्तिमार्गं गन्तुं न शक्यते इति स्वामिनः वादम्। अन्यरीत्या ईश्वरः प्रेममूर्तिः इति विजिन्त्य सर्वाणि वस्तूनि ईश्वराय इति विजिन्त्य सर्ववस्तूनि दृश्यते चेत् तदानीमेव परमभक्तिः प्राप्तुं शक्यते। भक्तियोगमिति ग्रन्थे प्रथमाध्याये ज्ञान-भक्तिश्च द्वे पक्षाः स्तः यथा एकस्य पक्षिणः पक्षवत् इति चिन्तयति।पक्षिम् अग्रे गन्तुं (डयतुं) ज्ञान-भक्त्यात्मकं पक्षं विना न शक्यते। योगस्तु पक्षिणः गतिनियन्त्रकं पुच्छमिति व्याख्यायते। स्वीयमतानुसारं भक्तिः विषयोपस्थापनाय विवेकानन्देन *उपनिषद्, भगवद्गीता, भागवतं, पुराणादीनि* इत्यादीन् उपयुज्य नारद-शाण्डिल्यसूत्रेषु यदुक्तं तदेव नुतनोदाहरणैः व्याख्यायति। अतः एव विवेकानन्दः “ प्रायोगिक वेदान्तस्य मतस्य कर्ता भवति स्वामि विवेकानन्दः इति।

चट्टम्बिस्वामी केरलीय मासरीत्या १०२९ चिङ्गमासे १८५३ तमे क्रिस्त्वब्दे आगस्त् २५ दिनांङ्गे तिरुवन्तपुरं जनपदे कोल्लूर् नामग्रामे निरुनङ्क-वासुदेवशर्म दम्पत्योः सीमन्त पुत्रोऽजायत। बाल्यकाले अस्य नाम अय्यप्पन्, कुञ्चन् इत्यादि नामेषु प्रसिद्धोऽसीत्। बाल्यकालादारभ्य अस्य कृते सन्यासविषये अतीवतात्पर्यशाली आसीत्। यौवनकाले एषः एकं सन्यासिनम् अमिलत्। सन्यासिनस्तु कुञ्जन्पिल्लायै एकं मन्त्रम् उपदिश्य सः गतवान्। अस्य शक्त्यायैव अनन्तरकाले चट्टम्बिस्वामी इति नाम्ना प्रसिद्धः सन्यासीवर्यः आसीत्। इदमेव स्वामिनः पूर्वाश्रम चरितम्। अनन्तर काले केरले ग्रामग्रामान्तरेषु अटनं कृत्वा सामुदायिक औन्नत्यर्थं बहूनिकार्याणि अकरोत्। अनन्तरमन्यत् एकं योगीश्वरमपि दृष्ट्वा दीक्षादिकं च स्वीचकार। सः कदापि प्रत्येकवर्णवस्त्रादिकं न स्वीकृतवान्। सः शुभ्रवस्त्रधारी एवासीत्।

स्वामिनः द्वे शिष्यौ स्तः। नीलकण्ठतीर्थपादः, तीर्थपादपरमहंसश्च। अनेन *प्राचीनमलयालम्, वेदाधिकारनिरूपणं, जीवकारुण्यनिरूपणम्, अद्वैतचिन्तापद्धतिः, देवीमानसपूजास्तोत्रं, क्रिस्तुमतछेदनम्, निजानन्दविलासं श्रीचक्रपूजाकल्पम्* इत्यादिकमेव एषु भक्तिविषयसम्बन्धी *देवीमानसपूजास्तोत्रं, श्रीचक्रपूजाकल्पम्* इत्यादि बहून् ग्रन्थान् विरचितवन्तः अस्य महात्मनः समाधिः (१०९९) तमे वर्षे अभवत्। श्रीशंङ्कराचार्येण विरचितं स्तोत्रकाव्यं भवति *देवीचतुःषष्ट्युपचारपूजास्तोत्रम्*। अस्य स्तोत्रकाव्यस्य कैरलीभाषायां चट्टम्बिस्वामिना कृतं व्याख्यानं भवति *देवीमानसपूजास्तोत्रम्*। अस्यां देवीपूजायाः विविधांशानि विचारयति। तद् आधारीकृत्य पञ्चोपचारपूजा, षोडशोपचारपूजा, चतुःषष्ट्युपचारपूजा इत्यादि पूजाविधानं अस्मिन् ग्रन्थे निरूपयति। चतःुषष्टयुपचारेण साकं भक्त्या मानसपूजा यः करोति चेत् सः धर्माथकामौ प्राप्य सकलाभीष्टान् च प्राप्य मोक्षपदं प्राप्तुम योग्यः भवति इति अनेन स्तोत्र कृतिना विशदयति। अस्मिन् ग्रन्थे १०,१३,४१,६४,६७ एतेषु श्लोकेषु तैः भक्तिशब्दमुपयुज्यते। न केवलं भक्तिविषये एवं वेदान्तविषयेऽपि बहूनि ग्रन्थानि तैः विरचितम्।

### ५.४ भगवद्गीतायां भक्तिः

भगवद्गीतायां भक्तिविषयमधिकृत्य एकं योगं(अध्यायम्)वर्तते।ततः परम् अन्येषु योगेषु बहूनि पद्यांशानि द्रष्टुं शक्यते। भक्तिप्रतिपादक अन्यग्रन्थेषु केन प्रकारेण विवृणोति तस्यापि अपररीत्यायेव गीतायां भगवता भक्तिविषयं विस्तरति। नारद-शाण्डिल्यसूत्रादिषु सूत्ररूपेण च विवर्णितं नारद-शाण्डिल्यादि मुनयः स्वस्मिन् ग्रन्थे भक्तिविषयमधिकृत्य यत् विचारितं तदपि गीतायां द्रष्टुं शक्यते। भक्तिविषयं गीताशास्त्रे षष्ठााध्यायात् आरभ्य विशदयति। एवं चेदपि ध्यानयोगे (६)अन्तिम श्लोके एवं विचारयति -

योगिनामपिसर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावन् भजते यो मां स मे युक्ततमो मताः।।६.४७।।

योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये मयि वासुदेवे समाहितेन अन्तरात्मना अन्तःकरणेन श्रद्धावान् च श्रद्धधानः सन्भजते स मे अतिशयेन युक्ततमो भवति।[100] सप्तमे ज्ञानविज्ञानयोगे षोटशतम श्लोकेन यथा -

"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुनः।
आर्त्तो जिज्ञासुरत्थार्त्थी ज्ञानी च भरतर्षभ।।"७.१६।

चतुर्विधाश्चतुष्प्रकारा भजन्ते मे सुकृतिनः जनाः पुण्यकर्मणो हे अर्जुनः आर्तापरिगृहीतस्कतव्याघ्ररोगादिना अभिभूतापन्नः जिज्ञासुर्भगवत्तत्वं ज्ञातुमिच्छति यः अर्थार्थी धनकामः विष्णोस्तत्वविद् इति शंङ्करभाष्ये। समानविषयमेव *शाण्डिल्य भक्तिसूत्रे* च वर्तते। द्वितीयाध्यायस्य द्वितीयाह्निके विषयोऽयं उपवर्णितम्। (गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम्।।२.२.१६) अनेन श्लोकेन चतुःप्रकाराः मां भजन्ते, आर्त्तः, जिज्ञासुः, अर्त्थार्थी, ज्ञानी च [101]। अनन्तरस्थ श्लोकेन चतुर्णां मध्ये ज्ञानी नित्ययुक्तो भवति। तस्य च अहम् अत्यर्थं प्रियः भवति। अनन्तरम् एकविंशति तम श्लोकेन एवंमुद्दिश्यति।

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलं श्रद्धां तामेव विदधाम्यहम्।।"७.२१।

यः भक्तः श्रद्धया येन रूपेण अर्चयति तेनैव रूपेण तस्य भक्तस्य अचलां श्रद्धाम् अहं विदधामि भगवता उक्तं श्लोकस्याशयः। एतद् अद्यतन काले प्रसक्तमेव। परमभक्त्या एव परमपदं प्राप्तुं शक्यते इत्यर्थं [102]। भक्त्या किं प्रयोजनमिति विशदयति।यथा-

"अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि।।"७.२३।

अविवेकिनः कामिनः ये देवान् यजन्ति ते देवान् यान्ति, मद् भक्ताः तु मां प्रापयति। अन्यदेवान् यान्तुं प्रयत्नस्तत् समानमेव [१०३]। एव तारक ब्रह्मयोगस्य दशमश्लोकेऽपि इदमाशयम् उदाहरति यथा-

"प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्।।"८.१०।

अस्मिन्नेवाध्याये द्वाविंशति (२२)तम श्लोकेन समानाशयं ददाति यथा-

"पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तः स्थानि भूतानि येन सर्वमिदं ततम्।"८.२२।

प्रयाणकाले अचलेन मनसा भक्तियुक्तो भूत्वा एवमेव योगबलेन च भ्रुवोः मध्ये प्राणं आवेश्य श्रद्धावधानयुक्तः ज्ञानी सः परमपुरुषमुपैति [१०४]। प्रयाणकाले अचलेन भक्त्या एव परमपदं प्राप्तवन्ताराणां कथा भागवतादिषु पूर्वं विसतृम्। पुरो निरतिशयो यस्मात् पुरुषात् न परं किञ्चित् स्वभक्त्या लभ्यस्तु ज्ञानलक्षणयाऽनन्याऽत्मविषयया यस्यान्तस्थानि मद्यस्थानि कार्यभूतानि कारणान्तर्वर्तिं भवति इत्याशयः शंङ्करभाष्ये [१०५]। सर्वजन्तूनाम् अन्तर्यामि भूत्वा यत्चैतन्यं वर्तते तं चैतन्यं मानवानाम् अनन्यभक्त्या प्राप्तुं शक्यते। राजविद्याराजगुह्ययोगे यथा-

"सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।"९.१४।

भगवता एवं विस्तरति सर्वदा मां कीर्तयन्तं दृढव्रताः, प्रयतन्तः, नमस्यन्तः च मां हृदये शयम् आत्मानं भक्त्या नित्ययुक्ताः सन्तः माम् उपासते [१०६]। अनन्तर श्लोकेन च यथा ज्ञानयज्ञेन, केचनाः माम् उपासते एवमेव द्वैतभावेन, पृथिव्यां नाना बहुरुपेण बहुधा मार्गेण

च माम् उपासते। यादृशाः माम् अनन्यः इति विजिन्त्य जनाः पर्युपासते तादृशानां नित्याभियुक्तानां योगक्षेमम् अहमेव वहामि [१०७]।

“यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रताः।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ।”९.२५।

देवतादीन् उद्दिश्य व्रतादीन् यान्ति चेत् देवान् प्रापयति, एवं पितृगणानुद्दिश्य श्रद्धादिकं करोति चेत् पितृलोकं प्राप्य पितृभक्तो भवितुं शक्यते, एवमेव भूतगणानुद्दिश्य बलिः इत्यादिकं कृत्वा भूतलोकं प्राप्तुं शक्यते [१०८]।

“पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।९.२६।”

तदर्थं यः पत्रं, पुष्पं, फलं, तोयं, वा भक्त्या प्रयच्छति। तत् अहं प्रयतात्मनः अश्नामि। तथा च एकोनत्रिंशत् तम श्लोकेन भगवति उक्तम् -

“समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।

यो भजति तु मां भक्त्या मयि ते तेषु चाप्यहम्।।”९.२९।

अहं समः सर्वभूतेषु न मे द्वेष्यः, प्रियो नास्ति। अग्निवदेवाहं दूरस्थानां यथा अग्निः शीतं न अपनयति, समीपं उपसर्पताम् अपनयति। तथायेव भक्तानां विषये। अनन्तरस्थभागेषु यत्कोऽपि दुर्वृत्य चलति चेदपि भगवता वासुदेवस्य अनन्य भक्त्या बाह्यां दुराचारान् उत्सृज्य भगवत्पदं प्राप्तुं शक्यते एवमेव [१०९]।

“क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।

कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।” ९.३१।

भगवत् भक्त्या कुत्रापि न विनश्यति इति भगवत् भक्ताय प्रतिज्ञां दत्नाति।

"किं पुन ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।

अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।"९.३३।

ब्राह्मणाः पुण्याः, पुण्ययोनयो भक्ताः तथा राजानः किं पुनः यतः एवम् अतः अनित्यं क्षणभङ्गुरं सुखवर्जितम् इमं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं लब्ध्वा मामेव भजस्व[११०]। तद् कथं करणीयमिति यथा-

"मन्मना भव मद्भक्तो मद्याजी मां नमस्करु।

मामेवैष्यसियुक्तैवमात्मानं मत्परायणः।।"९.३४।

सर्वेषां कृते भक्त्या मोक्षं प्राप्तुं शक्यते ब्राह्मणानाम् एवं राजषयार्णां च अवस्था किं इति वक्तव्यम्। अन्यत्र यथा कर्मयोगे विंशति तम श्लोकेन (३.२०) कर्मणा परमपदं प्राप्तवन्तारं जनकादीन् अपेक्ष्य अत्र भक्त्य सर्वेषां कृते मुक्तिं प्राप्तुं शक्यते इत्याशः। अमुं विषयमेवात्र अध्यायानन्तरस्थ श्लोके च वर्णितम्। मयि वासुदेवौ भक्त्यां मद् भक्तो भूत्वा मां नमस्कुरु। मां एव ईश्वरं एष्यसि एवं चेद् मत्पदं प्राप्तुं शक्यते इति। विश्वरुपदर्शनयोगे अन्तिमभागो यथा केवलया भक्त्यायेव भगवन्तं प्राप्तुं शक्यते। न अनन्योपायेन इति भगवता भक्तेः माहात्म्यं दृढीकरोति ।

"नाहं वेदैर्न तपसा न दानेन न चेज्यया।

शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा।।११.५३।

भक्त्या त्वनन्यया शक्या अहमेवंविधोऽर्जुनः।

ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परन्तप।।११.५४।

मत्कर्म्मकृत्मत्परमो मद्भक्तः सङ्गवर्जितः।

निर्वैरः सर्वभूतेषु यः समामेति पाण्डव।।"११.५५।

अत्र नारद भक्तिसूत्रे द्वितीय-तृतीयसूत्रैः यत्वर्णितं तदैव भगवता अत्र विशदयति। अत्र वेदपठनेन वा, तपसा वा, दानेन वा, यज्ञेन वा,साक्षात् प्रत्यक्षरुपेण मां द्रष्टुं न शक्यते। एवं तर्हि अनन्यया भक्त्या पूर्वोक्तप्रकारैः ज्ञातुं द्रष्टुं न शक्यते। अतः एव सर्वाणि अपि कर्माणि मदर्थम् इति हृदि निश्चित्य एवमेव परमभक्त्या लौकिककार्येषु निसंङ्गो भूत्वा यः अस्ति सः मां प्रापयति इत्यत्र उद्दिशयते[१११]।

द्वादशाध्याये भक्तिलक्षणं एवमुपदिशति।

"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्म्ममो निरहङ्कारः समदुखसुखः क्षमी।"१२.१३।

सर्वभूतेषु द्वेष्टारहितो भूत्वा सर्वाणि भूतान्यत्वेन हि पश्यति मैत्रः, करुणा, कृपा सर्वभूताभयप्रदः निर्ममो समदुःखसुख क्षमावान् आकृष्टोऽभिहतो वा अविक्रियेवास्ते स मे प्रियः।

"सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर् यो मद्भक्तः स मे प्रियः।"१२.१४।

यथा सर्वभूतेषु अद्वेष्टः, सर्वः मित्रतया वर्त्तयता दुखितेषु कृपा, सर्वभूताभयप्रदः सन्यासी, एवमेव सर्वदा सन्तुष्टः, दृढचित्तयुक्तः मनः बुद्धिं च मयि अर्पितः तादृशाः तादृशभक्तः स मे प्रियः। [११२]

"यस्मान्नोद्विजते लोके लोकान्नोद्विजते च यः।
हर्षाऽमर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।"१२.१५।

यस्मात् यः न उद्विजते, न सन्तप्यते, न संक्षूभ्यन्ते तादृशः सः,हर्षम्, अमर्षं, भयम्, उद्वेगः, तादृशात् मुक्तः च यः भवति सः मम प्रियः।

“अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।

सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।।”१२.१६।

एवमेव देहेन्द्रियविषयसम्बन्धादिषु यस्य अपेक्षा नास्ति, प्रियाप्रियविषयेषु समोभूत्वा सर्वारंम्भपरित्यागी च यो मद् भक्तः स मे प्रियः।

“यो न हृष्यति न द्वेष्टि न शोचति न कांङ्क्षति।

शुभाऽशुभ परित्यागी भक्तिमान् यः स मे प्रियः।।”१२.१७।

इष्टानिष्ट वस्तु प्राप्तौ,नष्टे च असमो भूत्वा शुभाशुभपरित्यागी भक्तिमान् यः सः मे प्रियः।

“:समः शत्रौ च मित्रे च तथा मानाऽपमानयोः।

शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।”१२.१८।

शीतोष्णादिषु एवं शत्रौ च मित्रे च मानापमानेषु च निन्दास्तुतिषु च एवं शोकसन्तुष्ट्यादिषु च समदृष्ट्या यः पश्यति तादृशाः स्थिरमतिः भक्तिमान् सः मे प्रियनरः।

“तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित्।

अनिकेतः स्थिरमतिर् भक्तिमान् यः स मे प्रियो ।।”१२.१९।

तुल्यनिन्दा स्तुतिः मौनी संतुष्टो येन केनचिदाच्छन्नो येन केनचिदाशिनः यत्र क्वचन शायी स्यात्तं देवा ब्राह्मणं विदुः [११३]। अनिकेतः, स्थिरमतिः च तादृश भक्तिमान् मे प्रियो नरः ।

“ये तु धर्म्याऽमृतमिदं यथोक्तं पर्युपासते।

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः।।”१२.२०।

येतु पूर्वोक्त विषयेषु श्रद्धायुक्तो भूत्वा यः मयि एव मन आधत्त्स्व यः उपासते आश्रयते ते अतीव मे प्रियाः। एवं क्षेत्रक्षेत्रज्ञविभागयोगे --

"मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।

विविक्तदेशसेवित्वमरतिर्जनसंसदि।।"१३.१०।

अव्यभिचारिणी बुद्धिः अनन्ययोगः तेन भजनं भक्तिःन व्यभिचचरणा अव्यभिचारिणी सा च ज्ञानं। आत्मादि भावना विविक्ते उपजायते अतो विवक्तदेशसेवित्वं ज्ञानम् उच्यते। प्राकृतानां जनानां संस्कारशून्यानाम् अविवीतानां संसत् समवायो जनसंसत् अतः प्राकृतजनसंसदि अरतिः अतः तद्ज्ञानमपि ज्ञानम् [११४]। एवमेव गुणत्रयविभागयोगे यथा-

"मां च योऽव्यभिचारेण भक्तियोगेन सेवते।

स गुणान् समतीतैत्यान् ब्रह्मभूयाय कलिपते।।"१४.२६।

मां च ईश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः कर्मी वा अव्यभिचारेण न कदाचित् यः व्यभिचरति भक्तियोगेन भजनं भक्तिः सा एव योगः तेन भक्तियोगेन सेवते स गुणान् समतीत्य एतान् यथोक्तान् ब्रह्मभूयाय भवनं भूयः ब्रह्मभवनाय मोक्षाय कल्पते समर्थः भवति [११५]। इति अव्यभिचारि भक्तस्य लक्षणम् उदाहरति। गीताशास्त्रस्यान्तिमाध्याये मोक्षसन्यासयोगे एवं विचारयति।

"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्वतः।

ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्।" १८.५५।

भक्त्या परमात्मानं मां किं स्वरुपेण इति परमार्थ स्वरुपेण जानाति। परमार्थस्वरुपं ज्ञात्वा मयि विशते।

"मन्मना भव मद्भक्तो मद्याजि मां नमस्कुरु।

मामेवैष्यसि सत्यं मे प्रतिजाने प्रियोऽसि मे।।"१८.६५।

शरीरान्तर्वर्ति मनं मां निश्चित्य मद्भक्तो भव, मदर्थं यज्ञं(कर्म) करोतु,मां नमस्करोतु एवं चेद् मयि एव त्वं प्रापयति [११६]।

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।"१८.६६।

गीतोपदेशस्यान्तिमश्लोकं, अथवा भक्तिविषयकप्रतिपादितेषु प्रधानश्लोकमिति च वक्तुं शक्यते। तत्र भगवता -सर्वाणि धर्माणि च त्यक्त्वा एकं अद्वितीयं च मामेव शरणं व्रज। भगवता एव त्वयि स्थित सर्वेभ्योऽपि पापेभ्यो मोक्षयिष्यामि मा शुच। सर्वेऽपि जनाः अर्जुनवत् सर्वं भगवत्येव समर्प्य अनन्य भक्तियुक्तेन स्वजीवितं नयति चेत् भगवत् सायूज्यमेव प्राप्नोति[११७]। नास्ति अत्र संशयः।

"य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।

भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः।।" १८.६८।

इदं परम् गुह्यं निश्रेयसार्थं केशवार्जुनयोः संवादरूपं मयि भक्तिमत्सु अभिधास्यति वक्ष्यति ग्रन्थतः

अर्थतः स्थापयिष्यामि [११८]। अस्य श्लोकस्य अन्यदपि प्राधान्यं वर्तते – "द्वितीयाध्यायस्य ११ श्लोकात् आरभ्य (अशोच्यानन्वशोच्चस्त्वं ... )अत्र मोक्षयिष्यामि मा शुच " इति सान्त्वन वचसा च समापयति। तस्मात् शोकं कर्तुं नार्हति इति परमभक्ताय अर्जुनाय भक्तिरहस्यम् उपदिश्य गीताशास्त्रं समापयति।

### ५.४.१ भक्तिः कर्म च गीताशास्त्रे

अत्र भक्तिविषये कर्मणः प्राधान्यमधिकृत्य विचारयति। पूर्वं गीताशास्त्रे उक्त भक्तिविशेषणादिकम् अचिन्तयत्। एवं चेदपि गीताशास्त्रे न केवलं भक्तिविषयम् एतेन साकं

पूर्वमेव तृतीयाध्याये कर्मयोगं नामाध्याये कर्मविषयं विस्तरेण विवर्णितं च। चतुर्थाध्याये ज्ञानकर्मयन्यासयोगे च तदनुबन्धीनि विषयाणि एव तत्रापि विचारितम्। द्वादशाध्यायस्य नाम भक्तियोगम्, एवं चेदपि सप्त माध्यायात् आरभ्य केचन श्लोकैः भक्तिविषयकम् उपस्थापितं च। अत्र गीताश्स्त्रस्यान्तर्गतस्य भक्ति-कर्मविषययोः मध्ये सम्बन्धादिकविषयाणि अत्र चर्चयन्ति।

एस् राधाकृष्ण महोदयेन स्वीय *'भारतीयदर्शनमिति* ' ग्रन्थे परमात्मनः षट् सिद्धयः सन्ति तेषु ज्ञानं, भक्ति इत्यादिकं सन्ति [११९]। एवमेव अन्यत्र भक्तिमोक्षयोः मध्ये अङ्गाङ्गी भावश्चास्ति इति विशदयति। एतेनसाकं *'भारतीयचिन्ता'* इति ग्रन्थे कर्म-भक्ति एव ज्ञानस्य उपाधिनः। एषु भक्त्याः एव कर्मात् इतोऽपि अधिकं प्राधान्यं, तदर्थं तिलधारा वाहिकरूपेण स्थितः ध्यानमेव आवश्यमिति [१२०]। एवमेव सम्यक् ज्ञानाय कर्म-भक्तिः चावश्यकम्। अन्यथा कर्म भक्तिः फलप्राप्त्यर्थं ज्ञानं विना निरर्थकमिति वादः [१२१] । गीताभाष्ये बालगंङ्गाधरनिसकमहोदयेन विभिन्नरीत्या स्वीयमतं स्थापयति —गीतायाः भक्तिः कर्मप्रधानमेव मुक्त्वात्। तद् न ईश्वरपूजया, ईश्वरभजनेन इत्यादिना अप्राप्यमेव स्वधर्मार्थं निर्दिष्ट निष्काम कर्मणा एव [१२२]। एतद् सर्वैरपि करणीयमेव। एवं रूपेण कर्ममयभक्त्याः तत्वं गीतायाः बहिः अन्यत्र न विचारयति एतद् विषयमेव गीतायां प्रतिपादित भक्तिमार्गस्य सविशेषता इति महोदयस्य वादः। *संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम्* इति ग्रन्थे सात्विक-राजस-तामसभक्तेः लक्षणानि[१२३] उक्तं यथा-

"ये जनाः साधका वा स्वपापादिकर्मनाशार्थं भक्तिसाधनानि।
कुर्वन्ति तेषां गुणानुरूपाभक्तिः सात्विकीति ।"

आगमशास्त्रे च अभिगमनम् नाम तत्र देवप्रतिमादिषु मनसा, वाचा, कर्मणा च भगवद् भावं विधाय मन्दिरं प्रतिगमनम्- इत्यभिगमनम्। रामानुज दर्शनानुसारेण (विशिष्टाद्वैत) न केवलं ज्ञान-कर्मणा कैवल्यप्राप्तिः अपि तु भक्त्याऽपि परमपदं प्राप्तुं

शक्यते इति अस्य मतम् [१२४]। गीताशास्त्रे प्रतिपादित कर्मसन्यासमिति अस्य तात्पर्यस्तु एषणात्रय सन्यासमेव अनेनोद्दिश्यते [१२५]। भक्त्याः सिद्ध्यर्थं च कामादीनाम् एतादृशानां त्यागेनैव तत्साध्यम् इति तत्र द्रष्टुं शक्यते। श्रीशङ्करस्य गीताभाष्येण ज्ञान-कर्मसमुच्चयवादस्य निराकरणमेव क्रियते। अत्र कर्मयोगेन केवलं चित्तशुद्ध्यर्थमेव क्रियते इति। भगवद् भक्तिमार्गेण अपि निर्मलमनसा चित्तशुद्ध्यायेव सर्वदा ईश्वरस्मरणादिकं करणीयमिति तात्पर्यम्। कर्मणः मूलकारणमिति गीताशास्त्रे एकत्र यथा सत्व रजस्तमो रूपया प्रकृत्या अथवा मायया एव कर्मणः कारणमिति व्याख्यायति [१२६]। अन्यत्र प्रकृत्या क्रियमाणा कर्माणि अहङ्कारेण जातः मुदात्मनि युज्यः शरीरोपाधिः एव करोति इति अन्यत्र विशदयति। द्वैविध्येष्वपि एकं माया, अपरा अहङ्कारः। भक्तिविषये द्वयमपि नावश्यकं तत्र केवलं मनसः चित्तशुद्ध्या युक्त ईश्वरोपासनया एव मोक्षं प्राप्तुं शक्यते इति भक्तिविषये सिद्धान्तयति। परमपदप्राप्त्यर्थं पूर्वाचार्यः उक्ततिथिषु भक्ति-कर्मयोः मध्ये कीदृशं भवति अवस्था इति विषयमेवात्र अविचारयत्।

### ५.४.२.भक्तिः-ज्ञानं च गीताशास्त्रे

पुरुषार्थचतुष्टयेषु अग्रिमं स्थानं भवति मोक्षस्य तद्सिध्यर्थं प्रधानतया भक्ति-ज्ञानं – कर्म इति त्रीणि पन्थानः सन्ति। तेषु कर्मश्च भक्त्याश्च माहात्म्यं पूर्वभागे विस्तृतमासीत्। अत्र ज्ञानस्य भक्त्याश्च प्राधान्यम् उपन्यस्य भक्तिमार्गमेव आचरणस्थाने गरीयसि इति स्थाप्यते। सर्वैः वेदान्तशास्त्रैः ज्ञानमार्गस्य एव प्राधान्यम् उद्घोषयति। ज्ञानादेव तु कैवल्यं इति तेषां मतम्। आत्यन्तिकलक्ष्यं ज्ञानादेव तद् सत्यमेव। श्रीशङ्करभगवत्पादेन स्वकीयगीताभाष्ये भक्तिलक्षणे ज्ञानलक्षणा भक्तिः इति व्यवह्रियते। तस्मात् ज्ञानसिद्ध्यर्थं भक्तिः अवश्यमेव। भक्त्या भगवत्स्वरूपं भक्तानां हृदयेषु प्रतिष्ठति तेनैव मार्गेण ज्ञानप्रकाशः सिद्ध्यति इति गीताशास्त्रमपि स्थापयति। पराभक्तिः ज्ञानमेव इति शङ्करभगवत्पादो अपि मन्यते। अमुं विषये भक्त्याः स्थानम् औन्नत्यादिकं चात्र विचारयाम। भागवते यथा-

ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः।

द्वयोरप्येक एवार्थे भगवच्छब्दलक्षणः।।[१२७]

जन्ममुक्त्यर्थं गीताशास्त्रे अनेकानि योगानि निर्दिशन्ति। तेषु ज्ञानस्यैव अधिकतया प्राधान्यमस्ति। किन्तु भक्तिविषयमधिकृत्य सर्वेषु योगेषु निरूपितम्। तदपि सार्थकमेव अतः ज्ञानसिद्ध्यर्थं भक्तिरेव गरीयसि इत्यपि अवगन्तुं शक्यते। किन्तु भक्तिसमार्जनाय युक्ततमम् भवति कर्मशास्त्र कर्ममधिकृत्य अनेकेषु योगेषु बहुधा स्तौति, कर्म संत्यज्य जीवितमपि दुस्साध्यमेव अतः सर्वेऽपि जनाः सदा कर्मण्येव वर्तते। गीताशास्त्रे तु तत्कर्मं तु स्वार्थं विनैव आचरणीयं स्वार्थ त्यागमेव निष्कामकर्मरुपेण व्यवह्रियते। फलत्यागपूर्वकं यदि कर्म अनुतिष्ठति चेत् कर्मो न बध्यते। अन्यथा कर्ममेव बन्धकारणं भवति। कर्मबन्धनिर्मुक्तिरेव मोक्षः कर्माचरणस्य प्राधान्यं चित्तशुद्ध्यर्थमिति सर्वे अद्वैतवेदान्ताचार्याः प्रशंसन्। तद् चित्तशुद्धिप्रापणाय भक्तिरावश्यकी भक्तानां हृदये भगवत्स्वरुपं विना अन्यत् किञ्चित् नास्ति। ततः भगवत्स्वरुपस्थितस्य चित्तस्य मालिन्य निर्मुक्ततया अत्यन्त शुद्धिरेव जायते। ततः कर्मद्वारा चित्तशुद्धिः सम्पादनीयमिति बहुभिः आचार्यैः स्थापितः, शङ्करभगवत्पादः कर्मानुष्ठानेन चित्तशुद्धिं सम्पाद्य भक्तिः प्राप्नोति इति स्थापियति। डँ एस् राधाकृष्णन् महोदयोऽपि एतद् अङ्गीकरोति। किन्तु बालगंगाधरतिलकः स्वकीयमाशयं कर्मानुष्ठानेन वा भक्त्या वा येन केनचिदुपायेन वा चित्तशुद्धिः आवश्यकी इति समर्थ्यते। मध्वाचार्यस्तुचित्तशुद्धिरावश्यकमिति स्वकीयद्वैतदर्शने स्थापितः किन्तु चित्तशुद्ध्यर्थं कर्मस्यावश्यकता नास्तीति तैः उपगम्यते। द्वैतसिद्धान्तेऽपि भक्तेः माहात्म्यं अङ्गीकरोति। रामनुजाचार्योऽपि स्वकीयमते भक्तेरावश्यकता सिद्धान्तयति। चित्तशुद्धिरेवास्य शुद्धिं सम्माज्यं भक्तेः प्रतिष्ठापनं तैः अङ्गीक्रियते। सर्वैः आचार्यैः भक्तेः माहात्म्यम् आवश्यकता च सर्वप्रकारेण साधयति। भक्तियोगनामके ऽस्मिन्नध्याये भक्तेः माहात्म्यं सर्वान् योगान् अनुसृत्य स्थापयति।

*भारतीयदर्शने* एस् राधाकृष्णन् महोदयेन यथा -संस्कारसम्पन्नानां ज्ञानमार्गेण लक्ष्यं प्राप्तुं शक्यते गीताशास्त्रे उपदिष्ट भक्तिमार्गे सर्वेषां पालयितुं शक्यते [१२८]। *नारदभक्तिसूत्रे* सा तु कर्म –ज्ञानयोगेभ्योऽप्यधिकतरा फलरुपत्वात् अन्यत्र ज्ञान-भक्त्यादीनां योग्यता समानमेव। किन्तु ज्ञानन्तु एकानिष्ठया भक्तेः पर्यवसानम् अथवा फलं ज्ञानप्राप्तिः [१२९] । भक्तिः ज्ञानसाधनायैव भक्तिस्तु केवलं मार्गं वा उपासना वा ज्ञानसाधना च। न तदनुष्ठानशास्त्रमेव सर्वेऽपि देवताराधना भगवत्येव अवगम्यते।

"येऽप्यनन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्।।९.२३।[१३०]
तथा च *भगवद्गीत्यां* ज्ञानकर्मसन्यासयोगे ३९ तम श्लोकेन यथा -
श्रद्धावान् लभते ज्ञानं तत्परं संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमेवाचिरेणाधिगच्छन्ति।।" ४.३९।

इति श्लोकेन भक्तिमार्गेणैव ज्ञानप्राप्तिः इति स्थापयति मोक्षसन्यासयोगे समानरीत्या एवं यथा -

"सर्वधर्मान् परित्यज्य मामेकं शरणं ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच।।"१८.६६।

ज्ञानप्राधान्यम् उद्घोषयन् उपनिषदि उपासनामार्गस्य, भक्तिमार्गस्य च मार्गो न उपेक्षते। तेषां मते भक्तेः द्वैविध्यमस्ति सकामभक्तिः निष्कामभक्तिश्च। देवताराधनेन तत्काल कामप्राप्त्यर्थं केचन जनाः भक्तिरुपयुज्यते। उपनिषदः लक्ष्यं तद् न ब्रह्मपदप्राप्त्यर्थं निष्कामभक्तिः उपनिषद् उपदिशति। निष्कामभक्तेः लक्षणम् उपनिषतादिषु *गोपालतापनीयादिषु* लभ्यते यथा- भक्तिरसस्य भजनं तदिहामुत्रोपाधिनैरास्येनास्मिनः

कन्पनमेतदेव च नैष्कर्म्यम्। श्रीशङ्करेण स्वीय *विवेकचूटामण्यां* स्वस्वरुपानुसन्धानं भक्तिरित्यभिधीयते। अन्यस्मिन् ग्रन्थे 'आराध्यत्वेन ज्ञानं भक्तिरिति " अत्रैव जीवगोस्वामिना यथा –" स्नेहानुबन्धो यतस्मिन् बहुमानपुरःसरः भक्तिः " इत्युच्यते। अन्यत्र " मुख्रमयात् संसारान्मुक्तये *भक्तिरसायने* मधुसूदनसरस्वतिना –" पुरुषार्थ चतुष्टयान्तर्गतत्वेन वा स्वातन्त्र्येण वा भक्तियोगः भक्तस्य संसारमोक्षस्यावश्यकत्वान्मोक्षान्तर्गतो वा भक्तियोगम् [१३१]"।

## ५.५. आचार्यत्रयाणां मते भक्तिदर्शनस्य महत्वम्

आस्तिकदर्शनेषु षट्सु अन्तिमं भवति उत्तरमीमांसा अथवा वेदान्तदर्शनम्। तेषु आधारशिलावत् भवति प्रस्थानत्रयं, तत्रापि गीताशास्त्रे भक्तिविषयं प्रतिपादितम्। वेदान्तशास्त्रे च मतभेदाः सन्ति। तेषु भक्तिविषये शङ्कर-मध्व-रामानुजाचार्याणां भक्तिविषये तेषां मतमेवात्र विचारणीयविषयः। बादरायणकृतवेदान्तसूत्राणां व्याख्यानेन प्रसिद्धः श्रीशङ्करः, मध्वः, रामानुजः इति आचार्यत्रयः। अद्वैत-द्वैत-विशिष्टाद्वैतदर्शनभेदेन ते आचार्याः स्वकीयं मतभेदं *भगवद्गीता*मधिकृत्य भाष्यरुपेण प्रकटीकृतः। *भगवद्गीतायां* न केवलं कर्म-भक्ति-ज्ञानविषयान् अधिकृत्य निरुपितं किन्तु सन्यास विभूत्यादि अन्यान् विषयान् निरुपितम्। अत्र ज्ञानभक्त्योः माहात्म्यमेव उपन्यस्यति। वेदान्तिनां मते ब्रह्मणः स्वरुपलक्षणम् –" सत्यं ज्ञानम् आनन्तम् ब्रह्म " इति[१३२]। तटस्थलक्षणस्तु " यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म " इति[१३३]। अत्र परमलक्ष्यं ब्रह्मज्ञानेन मोक्षप्राप्तिः एव। तदर्थं श्रवण-मनन-निदिध्यासनादिकं करणीयमेव।"अनाध्येयातिशयब्रह्मस्वरुपत्वान् मोक्षस्य नित्यशुद्धब्रह्मस्वरुपत्वान् मोक्षस्य ब्रह्मभावश्च मोक्षः ब्रह्मैव हि मुक्त्यवस्था " इति *ब्रह्मसूत्रशङ्करभाष्ये* समन्वयाध्याये, एवं साधनाध्याये च विशदयति [१३४] । अत्रोक्तविषयेषु कुत्रापि कदापि भक्तिविषयादिकं न विचारितम्। एतेन ज्ञातुं शक्यते यत् यथा शङ्करादीनां कालात् अनन्तरकाले एव

भक्तिप्रस्थानस्य दृढीकरणमभवत्। वेदान्तशास्त्रे एव अन्तर्भवति मध्व-रामानुजादयः, भक्तिविषये तेषां मते उन्नतस्थानमेव। सदानन्दप्रणीत वेदान्तसारं नाम ग्रन्थे अमुं विषयमधिकृत्य सम्यग्तया विचारितम्। वेदान्तशास्त्रे -अधिकारि-विषय-सम्बन्ध-प्रयोजनं च निरुपितम् [१३५]। तत्र भक्ति विषयं न चर्चितम्। अनेन ज्ञातुं शक्यते अद्वैतदर्शने भक्तिः गौणरुपेण, न मुख्य रुपेण निरुपितम्। एवं चेदपि श्रीशङ्करेण भक्तिं व्याख्यातं च। एवमेव " स्वस्वरुपानुसन्धानं भक्तिरित्यभिधीयते " च। शङ्करेण स्वकीयगीताभाष्ये "ज्ञानलक्षणाभक्तिः"इत्युक्तञ्च। अद्वैतदर्शने अन्याचार्यैः यथा मधुसूदनसरस्वतिना भक्तिविषयमधिकृत्यैव रचितं ग्रन्थं भवति *भगवद्भक्तिरसायनम्*। अस्यां च भक्तिविषयमधिकृत्य विस्तरेण विचारितमेव। ब्रह्मसूत्रस्य शांङ्करभाष्ये उपासनादिकमधिकृत्य विचारितम्। यथा चतुर्थाध्याये –"मनो ब्रह्मेत्युपासीतेत्याध्यात्मा, अथाधिदैवतम् आकाशो ब्रह्मेति [१३६] " एवमेव -आदित्यो ब्रह्मेत्यादाशः [१३७]। श्रीशङ्करोऽपि प्रतीकोपासना अङ्गीकरोति। अत्र ब्रह्मणोपासना यः प्रतीकेषु तद्दृष्टवा अध्यारोपणं प्रतिमादिष्विव विष्णवादीनाम् [१३८] प्रतीकाणाम् आरोपितरुपेण भक्तिः जायते। जीवब्रह्मयोः भेदत्वेन सिद्धान्तयति द्वैतपक्षिनः। ब्रह्मसत्यं, जगदश्च सत्यत्वमिति अङ्गीकरोति।

मध्वाचार्यस्य द्वैतमते स्वसुखानुभवमेव मोक्षम्। तस्य हेतुः निर्मलभक्तिरेव। प्रपञ्चमपि सत्यमेव, जीवात्मनः परस्परभिन्नाः एवं ते हरेः अनुचराः अमुं दर्शने श्रीनारायणः एव उत्कृष्टः [१३९]। वैष्णव भक्तिधारायाम् प्रधानेन प्रकारचतुष्टयं वर्तते। तद्यथा श्रीसम्ब्रदायः, रामानन्दसम्प्रदायः, ब्रह्मसम्ब्रदायः(मध्व), सनकादि सम्ब्रदायश्च (निम्बार्कसम्प्रदायः )। भगवता विष्णुना एव उद्भवस्थितिप्रलयनियमनज्ञानावरणबन्धमोक्षाणाम् इत्यादीनां कर्तुमकर्तुमन्यथाकर्तुं समर्थो भगवानस्ति। इतरदर्शनापेक्षया ज्ञानस्य वा कर्मयोगस्य वा प्राधान्यमत्र न दृश्यते। मध्वाचार्येण अन्यत्र- "मुक्तिर्नजसुखानुभूतिरमलाभक्तिश्च तत्साधनम्' [१४०]। माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः। स्नेहो भक्तिः इति अस्य लक्षणम्। अतः

सर्वत्र च भगवता विष्णोः सर्वोत्तमत्वं विशदयति। वेदे रामायणे चैव पुराणे भारते तदा आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते। अनेन सिद्धान्तनुसारेण ज्ञानं भक्तेः भागभाक् भवति अतः भक्तिज्ञानमिति चाहूयते। एवमेव ज्ञानस्य विशेषमेव भक्तिरित्यपि विचारयति महाभारततात्पर्यनिर्णये भक्तेः स्वरूपं पुनः विस्तरति। यथा-

"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः।

स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चानन्यथा।"

अनेन भक्त्या सेवकः मुक्तो भवति जीवात्म परमात्मनोः मध्ये भगवतायोः मध्ये सेव्य-सेवकभावस्त्वस्तु।सेव्यः भक्तः सेवकः च कदापि तयोर्मध्ये एकत्वं न भविष्यति।हरेः उपासना नित्यसुखस्वरूपिणिरेव। तादृशाः उपासकाः नैकत्वमपि गृह्णाति न स्वर्गं नापुनर्भवं। जीवात्मनः नित्यानन्दज्ञानादिः सादृश्ययुक्तं, नित्यसिद्ध्यं चेत् अपि विना भक्त्या तद् न अभिव्यक्तयति।

अनन्तरं विशिष्टाद्वैतमतस्थापकः रामानुजाचार्यः भक्ति विषयं विचारयति। भक्तिः परिणाम क्रियया युक्तोमोक्षमेव। ज्ञानकर्मसमुच्चयं भक्तियोगम् प्रीतिरुपाभक्तिः [१४१]। एवमेव रामानुजः *वेदार्थसंग्रहं* नाम ग्रन्थे साधनाभक्तिः, पराभक्तिः, इति भक्तिः द्विधा विभज्यते। एवमेव मर्क्कटि रीतिः मार्ज्जाररीतिः इति द्वैविध्यमपि अस्य दर्शने सन्ति। अस्य दर्शने स्मृतयः एव प्रमाणत्वेन स्वीकरोति। एवमेव शरीरधारणं क्रियते चेदपि ईश्वरः न दुखमनुभूयते। किमिति चेत् शरीरधारणं कर्मैवतद् दुखकारणम् [१४२]। अस्य दर्शने ब्रह्मस्तु वैकुणठवासी श्रीनारायणः यथा- परब्रह्म परवासुदेवादि वाच्च्यो नारायणः . एवमेव व्यूहविषये परमात्मनि षट् सिद्धयः सन्ति[१४३]। अस्य मते व्यूहत्रयं सन्ति। व्यूहानि तु ब्रह्मणि भक्तानाम् उपरिदयादिना जातनूतनरुपाणि एव। प्रद्युम्नः, अनिरुद्धः, सङ्कर्षणः इत्यादयः व्यूहाय [१४४]। जीवाः-नित्यः, मुक्तः, बद्धः इति भेदत्रयेण सन्ति। एषु मुक्ताः ज्ञान-पुण्य-भक्त्या चमुक्तिं प्रापयति। न ज्ञानकर्मणा मुक्तिं प्रापयति तत् भक्त्यैव इति चिन्तयति। एतेन ज्ञान-कर्माणि च

भक्त्याः उपायाः एव इति सिद्यति। अस्य दर्शने भक्तिः अस्पष्टरुपेण वर्तते। अनेन देवतायाः पूजादीन् आरभ्य उत्कृष्ट रुपम् आत्मदर्शनपर्यन्तं वर्तते। रामानुजः भिन्नारीत्या भक्तिं व्याख्यायते। भक्तिस्तु ईश्वरस्य पूर्णज्ञानपर्यन्तं मौननिष्ठया एवं ध्याननिष्ठया च गमनमेव। तदर्थं बहुविध कार्याणि करणीयानि इति चाऽह्वयति भोजनविषये अभ्यासम् ईश्वर विषये निरन्तर विचारः इत्यादिक्म् अवश्यमेव। सम्पूर्णमनसा एवं निर्मलपूर्णहृदया च ईश्वर स्नेहं भक्तिः [१४५] । भक्ति-मोक्षयोः मध्ये अङ्गाङ्गीभावसम्बन्धः। अतः अङ्ग रुप मुक्तिः अङ्गीरुपमोक्षश्च भवति इति तस्य दर्शनेन विज्ञातुं शक्यते।

## ५.५.२ .शंङ्करसिद्धान्ते भक्तिः

"श्लोकार्धोन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।

ब्रह्मसत्यं जगत् मिथ्या जीवोब्रह्मैव नाऽपरः"।।

श्लोकोक्तसिद्धान्तानुसारेण श्रवण-मनन-निदिध्यासनादिना ज्ञानप्राप्ति सम्पद्यते। अन्यथा ज्ञानमज्ञानेनावृतं भवति, अज्ञानरुप, अविद्यानाशनेन अमृतत्वप्राप्त्यति। प्रवृत्ति-निवृत्तिषु शङ्करसिद्धान्तानुसारेण निवृत्तिरेव मोक्षस्य प्रत्यक्ष कारणम्। प्रवृत्त्या (कर्मणा) चित्तशुद्धिरेव प्रयोजनम्। अतः एवं वदति ज्ञानादेव तु कैवल्यम्। एतर्थमेव स्थापयितुं श्रीशङ्करेण गीताभाष्यं विलिख्य ज्ञानकर्मसमुच्चयवादस्य निराकरणम् अस्य मुख्योद्देशः [१४६]। अद्वैतसिद्धान्ते भक्त्याः स्थानं कथम् इति अत्र विचारयति।

*भगवद्गीतायाः* ज्ञानकर्मसन्यासयोगस्य द्वितीय श्लोकस्य भाष्ये भगवता श्रीकृष्णेन भक्तानां मोक्षं ददाति। एवं मोक्षहेत्वर्थम् ईश्वरप्रसादम् अवश्यमेव इति च विस्तरति [१४७]। सप्तमे ज्ञानविज्ञानयोगो नामध्याये— यद्भक्तिं न विना मुक्तिर्यः सेव्यः सर्वयोगिनाम् तं वन्दे परमानन्दधनं श्रीनन्दनन्दनम्। अध्याये ज्ञानविज्ञानयोगस्य १६ तम श्लोकस्य [१४८] व्याख्यानावसरे भक्ति बहुविधा इति शङ्करेणोक्तम्। अस्य भाष्ये यथा चतुःप्रकारा भजन्ते सेवन्ते मां जनाः सुकृतिनः पुण्यकर्माणो हे अर्जुन आर्त

आर्तिपरिगृहीतस्तस्करव्याघ्ररोगादिनाभिभूत आपन्नो,जिज्ञासुर्भगवतत्त्वं ज्ञातुमिच्छति यः अर्थार्थी धनकामो, ज्ञानी विष्णोस्तत्वाविच्च हे भरतर्षभ इति [१४९]। अत्र अपरा भक्तिः ईश्वरं प्रति प्रेम भावश्चेत् पराभक्तिः ज्ञानमेव। तेषां चतुर्णां मध्ये ज्ञानी तत्ववित्तत्ववित्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्यादर्शनादतः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थः। प्रियो हि यस्मादहमात्मा ज्ञानिनोऽतस्तस्याह मत्यर्थे प्रियः। प्रसिद्धं हि लोक आत्मा प्रियो भवतीति तस्माज्ज्ञानिन आत्मत्वाद्वासुदेवः प्रियो भवतीत्यर्थः। स च ज्ञानी मम वासुदेवस्यात्मैवेति ममात्यर्थं प्रियः। त्रयोदशे क्षेत्रक्षेत्रज्ञविभागयोगे १० श्लोकेस्य भाष्यावसरे " विविक्तदेशसेवित्वम्, एवं प्राकृतजनसंसदि आरतिः ज्ञानार्थत्वात् – ज्ञानमिति उक्तम्, अव्यभिचारिणी बुद्धिः अनन्ययोगः तेन भजनं भक्तिः " इति व्याख्यायति [१५०]। विवेकचूटामण्यां श्रीशङ्करेण ३२ तम श्लोकेन स्वस्वरुपानुसन्धानं भक्तिरित्यभिधीयत्। भक्तिलक्षणं पूर्वं विचारितम्। अन्यत्र *भारतीयदर्शनमिति* ग्रन्थे ज्ञान-भक्त्योः योग्यता समानायेव किन्तु भेदस्तु भक्तिः कदापि निष्ठा नास्ति ज्ञानस्तु निष्ठायेव। ज्ञानस्तु अव्यक्तोपासना, भक्तिस्तु व्यक्तोपासना इति चोक्तम्। भक्तिविषये शंङ्करापेक्षया इतोऽपि प्राधान्यं ददाति मधुसूदनसरस्वतिना। स्वकीय गूढार्थदीपिका नाम गीताव्याख्याने भक्तिविषयं कथं व्यवहरति इति विचारयति। आत्मसंयमयोगो नामाध्याये अन्तिमश्लोकेन मयि भगवति वासुदेवे सगुण-निर्गुणादि भेदं विना समाहितेभ्यो परमेश्वरस्य सर्वज्ञस्य मतो निश्चितः इति।

अत्र गूढार्थदीपिकानुसारेण भक्तानां प्रकारादि विषयेषु इतोऽप्यधिकरीत्या विवृणोति मधुसूदनसरस्वतिना, तदनुसारेण यथा- ये सुकृतिनः पूर्वजन्मकृतपुण्प्रसंचया जनाः सफलजन्मानस्त एव नान्ये ते मां भजन्ते। ते च त्रयः सकामा एकोऽकाम इत्येवं चतुर्विधाः। अत्र चतुर्थप्रकारणानाम् उदाहरणादीनि विस्तरति। मखभङ्गेन कुपित इन्द्रे वर्षति व्रजवासि जनाः, द्युतसभायां वस्त्राकर्षणे द्रौपती च, ग्राहग्रस्तो गजेन्द्रश्च। जिज्ञासुरात्मज्ञानार्थी मुमुक्षुः। यथा मुचुकुन्दः, यथा वा मैथिलो जनकः श्रुतदेवश्च, निवृत्ते मौसले यथा चोद्भवः। अर्थार्थी इह वा परत्र वा यद्भोगोपकरणं तल्लिप्सुः। तत्रेह यथा सुग्रीवो विभीषणश्च यथा चोपमन्युः

परत्रयथा ध्रुवः। एते त्रयो अपि भगवद् भजनेन मायां तरन्ति। तत्र जिज्ञासुर्ज्ञानोत्पत्त्या साक्षादेव मायां तरति आर्तोऽर्थार्थी च जिज्ञासुत्वं प्राप्येति विशेषः। निष्कामभक्तो ज्ञानी यथा सनकादिर्यथा नारदो यथा प्रहेलादो, पृथु, शुकः। निष्कामः शुद्धप्रेमभक्तो यथा गोपिकादिर्यथा अक्रूरयुधिष्ठिरादिः। कंसशिशुपालयस्तु भयाद्द्वेषात् च सतत भगवच्चिन्ता परा अपि न भक्ता भगवदनुरक्तेरभावात्। अनन्तरस्थ श्लोकेन चतुर्विधेषु ज्ञानी तत्वज्ञानवान्निवृत्तसर्वकामो विशिष्यते। यतो नित्ययुक्तो भगवति प्रत्यगभिन्ने सदा समाहितचेता विक्षेपकाभावात्। अत एवैकभक्तिरेकस्मिन्भगवत्येव भक्तिर्नुरक्तिर्यस्य स तथा, तस्यानुरक्तिविषयान्तराभावात्। निरुपाधिप्रेमास्पदमत्यर्थमत्यन्तातिशयेन ज्ञानिनोऽहं प्रत्यगभिन्नः परमात्मा च तस्मादत्यर्थं स मम परमेश्वरस्य प्रियः [१५१]। अग्रिम श्लोकेन सर्वोऽपि देवताः सर्वात्मनो ममैव तनुवस्तदाराधनमपि वस्तुतो मदाराधनमेव, यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति इत्यत्र तरबर्थस्य विवक्षितत्वाद्विद्यादिव्यतिरेकेण कृतमिति कर्म वीर्यभवत्येव, तथाऽत्यर्थं ज्ञानी भक्तो मम प्रिय इत्युक्तेर्यो ज्ञानव्यतिरेकेण भक्तः सोऽपि प्रिय इति पर्यवस्यत्येव अत्यर्थमितिविशेषेणविविक्षितत्वात्। विवक्षितत्वाद्विद्यादिव्यतिरेकेण सर्वत्रापि च फलदाता अन्तर्याम्यहमेव, तथापि साक्षान्मद्भक्तानां च तेषां च वस्तु विवेकाविवेककृतं फलवैषम्यं भवति [१५२]। अनन्तरम् अक्षरब्रह्मयोगे दशम श्लोकेन प्रथमं हृदयपुण्डरीके वशीकृत्य तत्र ऊर्ध्वगामिना सुषुम्न्या नाड्या गुरुपदिष्ट मार्गेण भूमिजयक्रमेण भ्रुवोर्मध्ये आज्ञाचक्रे प्राणमावेश्य ब्रह्मरन्ध्रदुत्क्राम्य दिव्यं परं पुरुषम् उपैति।

"सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।।"[१५३]

अनन्तरं २२ तम श्लोकेन प्रेमलक्षणया भक्त्या एव निरतिशयं परमपुरुषं लभन्ते नाऽन्यथा। सगुणोपासकाः तत्पदं प्राप्य न निवर्तन्ते। तत्पूर्वं तदनपेक्षेत्युपासकानां

तल्लोकप्राप्तये देयमानमार्गम् उपदिश्यते। सगुणब्रह्मोपासकास्तत्पदं प्राप्य न निवर्तन्ते किं तु क्रमेण मुच्यन्ते। तत्र तल्लोकभोगात्प्रागनुत्पन्नसम्यग्दर्शनानां तेषां मार्गापेक्षा विद्यते न तु सम्यग्दर्शनमिव तदनपेक्षेत्युपासकानां तल्लोकप्राप्तये देवयानमार्गम् उपदिश्यते [१५४] । राजविद्याराजगुहययोगे नवमाध्याये १४ तम श्लोकेन श्रवण-मनन-निदिध्यासनासमर्थास्तेऽपि त्रिविधा उत्तमा, मध्यमा, मन्दाश्चेति सर्वेऽपि स्वानुरूप्येण मामुपासते।

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।

श्रुतौ- यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।"[१५५]

यद्वेदान्तवाक्यजमखण्डगोचरं साक्षात्कारमहं ब्रह्मास्मीति ज्ञानं तत्सर्वशङ्काकलङ्कास्पृष्टं सर्वसाधनफलभूतं स्वोत्पत्तिमात्रेण दीप इव तम सकलमज्ञानं तत्कार्यं च नाशयतीति निरपेक्षमेव साक्षान्मोक्षहेतुर्न तु भूमिजयक्रमेण भ्रूमध्ये प्राणप्रवेशनं मूर्धन्यया नाड्या प्राणोत्क्रमणमर्चिरादि मार्गेण ब्रह्मलोकगमनं तद्भोगान्तकालविलम्बं वा प्रतीक्षते। द्वाविंशति (२२)तम श्लोकेन नित्याभियुक्तानां नित्यमनवरतमादरेण ध्याने व्यापृतानां देहयात्रामात्रार्थमप्यप्रयतमानानां योगं च क्षेमं च वहामि। देवतान्तर भक्ता त्वामेव भजन्त। अनेन भजनेन वसुरुद्रादित्यादिभक्ता लभन्ते[१५६]। अनन्तरं पञ्चविंशति(२५) तम श्लोकेन अविधिपूर्वक याजिनो हि त्रिविधा अन्तकरणोपाधिगुणत्रय भेदात् सात्विक-राजस-तामसादयः। सात्विकाः, देवव्रताः, वसुरुद्रादित्यादयस्तत्संबन्धिव्रतं बल्युपहारप्रदक्षिणप्रह्लीभावादिरूपं पूजनं येषां ते तेनैव देवान्यान्ति तं यथा यथोपासते तदेव भवति इति श्रुतेः। राजसास्तु पितृव्रताः श्राद्धादिक्रियाभिरग्निष्वात्तादीनां पितृणामाराधकस्तानेव पितृन्यान्ति। तामसा भूतेज्या यक्षरक्षोविनायकमातृगणादीनां भूतानां पूजकाः तदेवं देवतान्तराणि परित्यज्यानन्तफलत्वाद्भगवत एवाराधनं करणीयमिति [१५७]। षट्विंशतिः (२६) तम श्लोकेन

भक्तिरेव परमस्थितौ अन्यत् किमपि नास्ति, भक्तिरेव मत्परितोषनिमित्तं देवतान्तरवद्धल्युपहारादि बहुवित्तव्ययाससाध्यं किञ्चिदिति देवतान्तरमपहाय मामेव भजते। भक्त्या प्रयच्छतीत्युक्त्वा पुनर्भक्त्युपहृतमिति वदन्नभक्तस्य ब्राह्मणत्वतपस्वित्वादि मत्स्वीकारनिमित्तं न भवतीति परिसंख्या सूचयति। श्रीदामब्राह्मणानीततण्डुलकणभक्षणवत्प्रीतिविशेषप्रतिबद्धभक्ष्याभक्ष्यविज्ञानो बाल इव मात्राद्यर्थं पत्रपुष्पादि भक्तार्पितं साक्षादेव भक्ष्यामीति वा। तेन भक्तिरेव मत्परितोषनिमित्तं न तु देवतान्तरवद्धल्युपहारादि बहुवित्तव्ययायाससाध्यं किञ्चिदिति देवतान्तरमपहाय मामेव भजते[१५८]। एकोनत्रिंशत् (२९) तम श्लोकेन ये भजन्ति तु ये तु भजन्ति सेवन्ते मां सर्वकर्मसमर्पणरूपया भक्त्या। सर्वत्र समोऽपि स्वच्छे भक्तचित्ते अभिव्यज्यमानोऽस्वच्छे चाभक्तचित्तेऽनभिव्यज्यमनोऽहं न रज्यामि न वा द्वेष्मि [१५९]। एकत्रिंशत्(३१) तम शलोकेन विषयभोगस्पृहानिवृत्तिं निगच्छति। चिरकालमधर्मात्माऽपि मद्भजनमहिम्ना क्षिप्रं शीघ्रमेव भवति धर्मात्मा धर्मानुगतचित्तो दुराचारत्वं झटित्यैव त्यक्त्वा सदाचारो भवतीत्यर्थः। किं च शश्वन्नित्यं शान्तिं विषयभोगस्पृहानिवृत्तिं निगच्छति नितरां प्राप्नोत्यतिनिर्वेदात्। अत्र अजामिल–प्रहलाद-ध्रुव-गजेन्द्रादयः तेषामुदाहरणद्वारा अस्य श्लोकस्य व्याख्यानं करोति [१६०]। राजभक्तो वा कोऽपि वा मद् भजनेन सर्वेषां कृते मदेकशरणेन परमानन्दघनं स्वप्रकाशं प्राप्स्यति। एकादशाध्याये ५४,५५ श्लोकैः भक्त्यैवानन्यया मदेकनिष्ठया निरतिशयप्रीत्यैवंविधो दिव्यरूपधरोऽहं ज्ञातुं शक्योऽनन्यया भक्त्या, न केवलं शास्त्रतो ज्ञातुं शक्योऽनन्यया भक्त्या एवं वेदान्तवाक्यश्रवणमनननिदिध्यासन परिपाकेण च। ततश्च स्वरूपसाक्षात्कारादविद्यातत्कार्ये निवृत्तौ तत्वेन प्रवेष्टुं मद्रूपतयैवाऽप्तुं चाहं शक्यः इति। मत्प्राप्त्याशया मद्भक्तः सर्वे प्रकारैः मां भजन् [१६१]। अनन्तरं भक्तियोगे शुद्धे ब्रह्मणि यः पर्युपासते श्रवणेन, मननेन च प्रमेयगतामनन्तरं विपरीतभावना निवृत्तये ध्यायन्ति विजातीयप्रत्ययतिरस्कारेण तैलधारावदृवच्छिन्न समानप्रत्ययप्रवाहेण निदिध्यासन संज्ञकेन ध्यानेन विषयीकुर्वन्ति। ‘‘ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मैव सन्ब्राह्माप्येति ‘‘। अत्र ६,७,८

तमश्लोकैः ये सर्वाणि कर्माणि मयि सन्यस्य सगुणे वासुदेवे समर्प्यं मत्परा अहं भगवान्वासुदेव एव परः प्रकृष्टः प्रीतिविषये येषां ते तथा सन्तोऽनन्येनैव योगेन न विद्यते मां भगवन्तं मुक्त्वाऽन्यदालम्बनं यस्य तादृशेनैव योगेन समाधिनैकान्तभक्तियोगापरनाम्ना मां भगवन्तं वासुदेवं सकलसौन्दर्यसारनिधानमानन्दघनविग्रहं द्विभुत्वं चतुर्भुजं वा समस्तजनमनोमोहिनीमुरलीमतिमनाहरैः सप्तभिः स्वरैरापूरयन्तं वा दरकमलकौमोदकीरथाङ्गसङ्गिपाणिपल्लवं वा नरसिंहराघवादिरूपं वा यथादर्शितविश्वरूपं वा ध्यायन्तश्चिन्तयन्त उपासते समानाकारमविच्छिन्नं चित्तवृत्तिप्रवाहं संतन्वते समीपवर्तितयाऽऽसते तिष्ठन्ति वा तेषां मय्यावेशितचेतसां मयि यथोक्त आवेशितमेकाग्रतया प्रवेशितं चेतो यैस्तेषामहं सततोपासिनो भगवान्मृत्युसंसारसागरान्मृत्युयुक्तो यः संसारो मिथ्याज्ञानतत्कार्यप्रपञ्चः स एव सागर इव दुरुत्तरस्तस्मात्समुद्धर्ता सम्यगनायासेनोदूर्ध्वं सर्वबाधावधिभूते शुद्धे ब्रह्मणि धर्ता धारयिता ज्ञानावष्टम्भदानेन भवामि [१६२] । सगुण ब्रह्मध्यानाशक्तानाम्शक्तितातम्येन प्रथमं प्रतिमादौ बाहये भगवध्यानाभ्यासस्तदशक्तौ भागवतधर्मानुष्ठानं तदशक्तौ सर्वकर्मफलत्याग इति त्रीणि साधनानि अत्र विचार्यते। अध्यायस्यान्तिमे श्रवण-मनन-निदिध्यासनान्यावर्तयतो वेदान्त वाक्यार्थं तत्वसाक्षात्कारं संभवात्ततो मुक्त्युपपत्तेमुक्तिहेतु वेदान्तमहावाक्यार्थान्वययोग्यस्तत्पदार्थेऽनुसंन्धेय इति अध्यायोपसंहोर विवृणोति[१६३]। अन्तिमे मोक्षसन्यासयोगे ५४ तम श्लोकेन एवं विचार्यते ज्ञाननिष्ठो यतिः मद्भक्तिं शुद्धपरमात्मनि भक्तिमुपासतां मदाकारचित्तवृत्यावृत्तिरुपं परिपक्वनिदिध्यासनाख्यं श्रवणमननाभ्यासफलभूतां लभते परां श्रेष्ठमव्यवधानेन साक्षात्कारफलं चतुर्विधा भजन्ते [१६४] । अग्रिमश्लोकेन भक्त्या निदिध्यासनात्मिकत्या ज्ञाननिष्ठया मामद्धितीयमात्मानमभिजानाति। ततो मामेवं तत्वतो ज्ञात्वाऽहमस्म्यखण्डानन्दाद्धितीयं ब्रह्मेति साक्षात्कृत्य विशतेऽज्ञानतत्कार्यं सर्वोपाधिशून्यतया मद्रूप इति [१६५] । ततः परं ६५ तम श्लोकेन वासुदेवे मनो यस्य भवति सः मद्भक्तः। बहुप्रकारेण तत् प्रेम्णा विरोधेन, पूजनेन तदेव भागवते-

“श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तम्।।”

अग्रिम श्लोकेन वर्ण-आश्रम-साधारण धर्माः परित्यज्य मामीश्वरम् एकमेवाद्वितीयं सर्वधर्माधिष्ठातारं फलदातारं च शरणं व्रज परमानन्दघनमूर्तिमनन्दं श्रीवासुदेव भजस्व। विद्यमानेन अपिकर्मणि तत्रानादरेण भगवदेकशरणतामात्रं ब्रह्मचारीगृहस्थवानप्रस्थभिक्षूणां साधारण्येन विधीयते। ६८ तम श्लोकेन भक्तिं मयिपरां कृत्वा भगवतः परमगुरोः शुश्रूषैवेयं मया क्रियत इत्येवं कृत्वा निश्चित्य योऽभिधास्यति स मामेवैष्यति मां भगवन्तं वासुदेवमेष्यत्ये वा चिरान्मोक्षयत एव संसारादत्र संशयो न कर्तव्यः[१६६]।

भक्त्याः फलं ज्ञानमेव। भक्तिः ज्ञानसाधनायेव न अन्तिमलक्षणम्। शंङ्करमते मुक्तिः प्राप्तौ वैराग्यमात्मबोधो भक्तिश्चेति, साधनात्रयं वर्तते तेषां भक्तिर्गरीयः साधनम्। मद्भक्ति शून्येभ्यो मद्भक्तस्यैव श्रेष्ठत्वं मद्भक्तो परमो युक्ततमोऽमायासेन भवितुं शक्यते।

## ५.५.२. मध्वसिद्धान्ते भक्तिः

वेदान्तसिद्धान्तेषु मध्वाचार्यस्य द्वैतदर्शनस्य प्राधान्यं सर्वत्राङ्गीकृतमस्ति। शङ्करापेक्षया मध्वदर्शने भक्तेः प्राधान्यमितोऽपि अधिकं वर्तते। मध्वाचार्यः स्वीयग्रन्थेषु भक्तिस्वरुपं - माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिः।

"मुक्तिजनैसुखानुभूतिरमला भक्तिश्च तत्साधनम्।

ह यक्षादि त्रितयं प्रमाणमकिलाम्नायैकविद्यो हरिः"।।[१६७]

*संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम्* इति ग्रन्थे १२७तम पुटे अस्य मुक्तेः उत्तम् साधनं *श्रीभागवतो*ऽमला भक्तिः ज्ञानपूर्वपरस्नेहो नित्यभक्तिरितीर्यते। इति *महाभारततात्पर्यनिर्णये* विशदयति। -

"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।

स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा।।"[१६८]

भक्त्यायेव भगवदनुग्रहाय पात्रीभवितुं शक्यते। अनेनैव भगवजनुग्रहेणैव संसारबिम्बनाशं पूर्णतां प्रापयति। भक्तानां भक्त्या सन्तुष्टः भगवतः संसारबन्ध छेदयति। ज्ञानस्य भक्ति भागत्वात् भक्तिर्ज्ञानमितीर्यते। ज्ञानेनैव विशेषा यत् भक्तिरित्यभिधीयते।। [१६९] ज्ञानं भक्तेः भागमेव अतः भक्तिज्ञानमिति कथ्यते। अत्र ज्ञानस्य विशेषः भक्तिः इति च। भक्तेः स्वरुपं स्वस्वरुपानुसन्धानमिति केचनाः वदन्ति। दृढम् अचञ्चलस्य सक्तोऽधिकस्नेहो भक्तिरिति। भक्तिरेव मोक्षसाधनमिति च भक्त्या ज्ञानं ततः भक्तिः, ततः दर्शनम् अनन्तरं मुक्तिः पुनरपि सुखस्वरुपिणी भक्तिः एतदेव भक्तिभावनायाः वैशिष्ट्यम्। मुक्तः भक्तियुक्तो भूत्वा भगवतः सेवाकार्यं निर्वहन्ति। भगवता –जीवात्मयोः मध्ये सेव्य-सेवकभावः। कदापि एक्यं न प्रापयति। हरेः उपासना नित्यसुखस्वरुपिणी। अनेन स्वसिद्धिः, तदेव माध्वमते मोक्षम् [१७०]। जीवात्म असंख्याः ते त्रिधा विभक्ताः मुक्तियोगः नित्यसंसारिणः, तमोयोग्याः च। एषु मुक्तियोग्यान् पुनः पञ्चथा विभक्ताः (१) ब्रह्मादिदेवाः (२)नारदातयः ऋषयः, (३)विश्वामित्रादि पितृभ्यः (४)रघु अम्बरीक्षादयः चक्रवर्तिनः, (५) ईश्वरभक्ताः उत्तममानवाः। जीवात्मानाः अन्यजीवात्मानभेदयुक्ताः मोक्षविषये च गुणयोग्यतादि विषयेषु भिन्नाः। माध्वदर्शनानुसारेण मोक्षस्तु चतुर्प्रकारं सन्ति। (१) कर्मक्षयम्,(२) जन्मक्षयम्,(३) अर्च्चिरादिमार्गम् (४) भोगम् [१७१]। अत्र मोक्षकारणस्तु प्रधानकारणहेतुः ज्ञानं किन्तु अत्र

ज्ञानं मोक्षस्यात्यन्तिककारणं नास्ति। मुक्त्यर्थं साधनाक्रमम् विवर्णितं तेषु वैराग्यं, माहात्म्यज्ञानं, भक्तिः, निष्कामकर्म ज्ञानयोग्यम् भक्तिज्ञानयोः परस्परपूरणम्। अत्र एवं विशदयति चेत् सर्वमूलग्रन्थाः इति गीताभाष्ये, एवं गीतातात्पर्यस्य उपोद्घातभाष्ये गीतादर्शने भक्तिः इत्यत्र भक्त्यायेव परोक्षज्ञानम्, अपरोक्षज्ञानं चार्जयितुं शक्यते। भक्तिप्रकाराः ३ वर्णयति। पक्वभक्तिः, परिपक्वभक्तिः, अतिपरिपक्वभक्तिः इति त्रैविध्यत्वेन विभज्यते। त्रयमपि साध्यभक्तिः इति आहूयते। अतिपरिपक्वभक्तिरेवमोक्षसाधनम् परिपकक्वभक्तियोग एव दृष्टिसाधननम्। भक्तियोग्य एव ज्ञानसाधनम्।[१७२] षष्ठाध्यायस्य अन्तिमश्लोकेन[१७३] (४७) ज्ञानिभ्यः योगज्ञानिभ्यः। तपस्विभ्यः कृच्छ्रादिचारिभ्यः इति। अस्यव्याख्यानावसरे *गारुड–नारदीय पुराणौ* चोपयुज्य विवृणोति। अत्र भक्तिविषये नारदीये एव विषयमधिकृत्य विस्तरति। "दर्शनाच्चैव भक्तेश्च न किञ्चित् साधनाधिकम् " (४६,४७) श्लोकस्याऽस्य गीतातात्पर्ये "अपरत्वदुगुदासीनो विद्वेषी चेत्यभक्तयः मद्भक्तोऽपि हि कार्यार्थं यो ध्यायेदन्यदेवताः " [१७४]। सप्तमे ज्ञानविज्ञानयोगे (२१,२२, २३) तम श्लोकैः एवं विशदयति [१७५]। यां यां ब्रह्मादि तनुम् उक्तं च नारदीये अन्तो ब्रह्मादि भक्तानां मद्भक्तानामनन्तता इति। मुक्तिश्च कां गतिं गच्छेन्मोक्षश्चैव किमात्मकः[१७६] इत्यादेः परिहारसन्दर्भाश्च मोक्षधर्मेषु। अवतारे महाविष्णोर्भक्तः कुत्र च मुच्यते[१७७] इत्यादेश्च । अन्तो ब्रह्मादि भक्तानां मद्भक्तानाममनन्तता।

मुक्तश्च कां गतिगच्छेन्मोक्षश्चैव किमात्मकः। ब्रह्मवैवर्ते (२१-२३)अवतारे महाविष्णोः भक्तः कुत्र च मुच्यते। इत्यादि गीताभाष्ये चेत् गीतातात्पर्ये च प्रत्येकता किमपि न विशदयति। तारकब्रह्मयोगे दशमश्लोकेन -

"प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्।।"८.१०।

वायुजयादि योगयुक्तानां मृतिकालकर्तव्यमाह ज्ञानभक्तिवैराग्यसम्पूर्णानां भवत्येव मुक्तिः। तद्धतां त्वीषज्ज्ञानामसम्पूर्णानामपि निपुणानां तद्बलाद्कथञ्चित्भवतीतिविशेषः [१७८] । अत्र भागवते(३.५.४५,४६ ) "पानेन ते देवकथासुधायाः प्रवृद्धभक्त्या विशदाशया ये " वैराग्यसारं प्रतिलभ्य बोधं यथाऽञ्जसात्वाऽऽपुरकुण्ठधिष्ण्यम्। तथा परे त्वात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम। त्वामेव धीराः पुरुषाः विशन्ते तेषां श्रमः स्यान्नत्तु सेवयाते। देवकथा श्रवणेन प्रवृद्धया भक्त्या पुरुषं विशन्ति। अत्र तात्पर्यस्तु तमसः परस्तात् अप्राकृतदेहम् [१७९] । अस्मिन्नध्याये द्वादिंशति तमश्लोकेन भाष्येण "परमं साधनमाह पुरुष इति " राजविद्या-राजगुह्ययोगे चतुर्दश(१४) तम श्लोकेन एवं विस्तरति। - नेतरे द्विषन्तीति दर्शयितुं देवानाह - महानात्मा अस्य गीतातात्पर्ये च नास्ति [१८०] । अस्मिन्नेवाध्याये पञ्चविंशति तमश्लोकेन च भक्तिविषये विशेषतया किमपि नोक्तम्। एकोनत्रिंशत् तमश्लोकेन -

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।।"९.२९।

अस्य भाष्ये तर्हि स्नेहादिमत्वादल्पस्यापि कस्यचित् बहुफलं ददासि, विपरीतस्यापि कस्यचित् विपरीतमित्यत आह- समोऽहमिति। तर्हि न भक्तिप्रयोजमित्यत आह –ये यजन्तीति। मयि तेषु चाप्यहमिति मम ते वशस्तेषामहं वश इति उक्तं च –ये वै भजन्ते परमं पुमांसं तेषां वशः स तु ते तद्वशाश्च इति। तद्वशा एव ते सर्वदा। तथापि बुद्धिपूर्वकत्वाबुद्धिपूर्वकत्वेन भेदः। उद्धवादिवत्, शिशुपालादिवच्च। अत्र *गीततात्पर्ये पद्मपुराणीय* श्लोकं तत्रोक्त्वा विशदयति [१८१]। श्लोकस्य तात्पर्यरूपेण यथा-

" नास्य भक्तो यो द्वेष्यो नाचाभक्तोऽपि यः प्रियः।
किन्तु भक्त्यनुसारेण फलदोऽतः समो हरिः"।।

प्रीत्या मयि ते। भाष्ये स्नेहादिमत्वादल्पभक्तस्यापि कस्यचिद्बहुफलं ददासि, विपरीतस्यापि कस्यचित् विपरीतमित्यत आह -समोऽहमिति। बुद्धिपूर्वकत्वाबुद्धिपूर्वकत्वेन भेदः। अबुद्धिपूर्वाद् यो वशस्तस्य ध्यानात् पुनर्वशात् भक्ते बुद्धिपूर्वम्। ये भजन्तीति तेषु मयि चाप्यहमिति वशास्तेषाम् अहम् वश। विश्वरूपदर्शनयोगे चतुःपञ्चाशत्तम श्लोकेन भाष्ये स्वेकं रूपं तु भ्रान्त प्रतीत्या। अन्यथा तदपि स्वकमेव प्रमाणानि तुक्तानि पुरस्तात्। तात्पर्ये च ये दर्शनकांङ्क्षिणस्तैरपीदानीं दृष्टं प्रायः [१८२] । द्वादशाध्याये भक्तियोगे श्लोकात्पूर्वम् अव्यक्तोपासनात् भगवदुपासस्योत्तमत्वं प्रदर्श्य तदुपायं प्रादर्शयत्यस्मिन्नध्याये भगवदुपासनमपि हि मोक्षसाधनंम् प्रतीयते इति [१८३]। अत्र *कठोपनिषद्* श्रुत्या विषयोपस्थापनं करोति। यथा - महतः परमव्यक्तम्[१८४]। अनाद्यनन्तं महतः परम ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते इति च। *सामवेदे* अग्निवेश्यशाखायाम् [१८५] उपास्यतां श्रियमव्यक्तसंज्ञा भक्त्या मर्त्यो मुच्यते सर्वबन्धैः। *भागवते* च यथा–

"यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्।
प्रधानं प्रकृतिं प्राहुरविशेषम् विशेषवत्"।।

अन्यत्र *श्रीमद् भागवते*- आनन्दमानन्दमयो वसाने सर्वात्मके ब्रह्मणि वासुदेवे।।

अनन्तरं पुरुषसूक्तादि भागेषु विवर्णित भागानि विशदयति। तृतीयश्लोकस्य व्याखायानावसरे गीताश्लोकान्येवात्र विस्तरति। ब्रह्माण्डवचनाच्चाव्यक्तोपासनान्मोक्षाशङ्क्या पृच्छति। कूटस्थोऽक्षर उच्यते इत्युत्तरवचनात् कूटस्थमचलम्। इत्यत्राप्युक्तेरव्यक्तशब्दश्चित्प्रकृतिवाची। अन्यथा ये त्वां पर्युपासते, ये चाप्यक्षरम्, तेषां के योगवित्तमाः इति भेदेन प्रश्नानुपपत्तिः। "परं ब्रह्म परं धाम पवित्रं परमं भवान्" इति तेनैवोक्तत्वात्। "ये तु ते मे युक्ततमा मताः मय्येव मन आधस्व" इत्यादौ भगवतोक्तेऽप्यव्यक्तोपासकानामाधिक्यं वदन्ति ते त्वल्पापकत्वादेवातिसाहसिका इति सुशोच्या एव। भागवतोक्तेऽप्यव्यक्तोपासकानामाधिक्यं वदन्ति ते त्वपला पकत्वादेवातिसाहसिका इति सुशोच्या एव। चतुर्थश्लोकस्य व्याख्यानावसरे

भगवदुपासकाः एव उत्तमाः। *भागवते* माया- अप्रतर्क्यादनिर्देश्याम् इति केष्वपि निश्चयः। *सामवेदे* काषायणश्रुतौ नासदासीन्नो सदासीत् तदानीमिति। पञ्चमश्लोकस्य भाष्यावसरे अतिशयोपासना सर्वेन्द्रियातिनियमन सर्वसमबुद्धिसर्वभूतहितकरत्वाति सुष्ट्वाचारसम्यग्विष्णुभक्त्यादि साधनसन्दर्भमृतेनाव्यक्तापरोक्ष्यम्। तद्दते च न विष्णुप्रसादः। सत्यपि तस्मिन् न सम्यक् भगवदुपासनमृते। नर्ते च तं मोक्षः। विनाऽप्यव्यक्तोपासनं भक्त्येव भगवदुपासकानां मोक्ष इति क्लेशिष्टोऽयं मार्गः इति भावः। तथाऽप्यपरोक्षीकृताव्यक्तानां सुकरं भगवदुपासनमित्येतावत् प्रयोजनम्। तत्रापि योऽव्यक्तापरोक्ष्ये प्रयासस्तावता प्रयासेन यदि भगवन्तमुपास्ते, ऊनेन वा, तदा भगवदापरोक्ष्यमेव भवतीति द्वितीयमधिकम्। इन्द्रियसंयमनाद्यूनभागे सति उपासकस्यापि देवि नातिप्रसादमेति। देवस्तु तानि साधनानि भक्तिमतः स्वयमेवाप्रयत्नेन ददातीति चातिसौकर्यामिति भक्तानां भगवदुपासने। इतरत्र च क्लेशोऽधिकतरः[१८६]। तदेतत् सर्वं पर्युपासते, सन्नियम्य, अधिकतरः इति परि सन् तरप् शब्दैः प्रतीयते। यथा *सामवेदे* मधुच्छन्दसशाखायां -

" भक्ताश्च येऽतीव विष्णावतीव जितेन्द्रियाः सम्यगाचारयुक्ताः

उपासते तां समबुद्धयश्च तेषां देवी दृश्यते नेतरेषाम्।"

दृष्टा च स भक्तिमतीव विष्णौ दत्वोपास्तौ सर्वविघ्नांश्छिनन्ति। उपास्य तं वासुदेवं विदित्वा ततस्ततः शान्तिमत्यन्तमेति। परो हि देवः पुरुहूतो महत्तः इति। नाचाव्यक्तस्य रूपं भगवता निषिद्धम्। भारतादौ साधितत्वात् शरीररूपकविन्यस्तगृहीते इत्यादौ सांङ्ख्य प्रसिद्धम् प्रधानं निषिद्धयञ्चवैदिकमव्यक्तोपगम्यम्। सौकरायण श्रुतौ -शरीररू पिका साऽशरीरस्य विषणोर्यतः प्रिया सा जगतः प्रसूतिः। सुवर्णवर्णा पद्मकरां च देवीसर्वेश्वरीं व्याप्तजडां च बुध्वा। सैवेति वै सुव्रतानां तु मासान्महाभूतिं श्रीस्तु दध्यान्न देवः। अन्यत्र एकादशमश्लोकेन- उपासते ये पुरुषं वासुदेवमव्यक्तादेरीप्सितं किं नु तेषाम्। १३-१५ पर्यन्तश्लोकानां तात्पर्क्ये– विष्णोरन्यन्नस्मरेद् यो विना तत्परिवारताम् [१८७] । तदधीनतां

वाऽनन्ययोगी स परिकीर्तितः इति च। ''अन्तवत्तुफलं तेषाम् ''इत्यादिना ऽन्यदेवोपासनायाः पूर्वमेव निन्दितत्वात् लक्ष्म्यास्त्वतिसामीप्यात् विशेषमाशङ्क्य तदुपासनाविषयैव प्रश्नः कृतः। १७-१९सर्वारम्भपरित्यागी शुभाशुभपरित्यागी इत्यादेः सामान्यविशेषव्याख्यान व्याख्येयभावेनापुनरुक्तिः। हर्षादिभिर्मुक्त इत्युक्ते कदाचित्कमपि भवतीति यो न हृष्यतीत्यादि। उपचारपरिहारार्थं पूर्वम्। आधिक्यज्ञापनाय भक्त्यभ्यासः। ''ये तु सर्वाणि कर्माणि'' इत्यादेः प्रपञ्च एषः। १७-१९पर्यन्त श्लोकतात्पर्येण आचार्येण एवं विचार्यते। -

''भक्तिं ज्ञानं च वैराग्यामृते यो नेच्छति क्वचित्
शुभाशुभपरित्यागी विद्वद्भिः कीर्तितो हि सः।
प्रायः सुखादिषु समः प्रायो हर्षादिवर्जितः।।''[१८८]

गुणत्रयविभागयोगे २६ तम श्लोकेन[१८९] भाष्ये ब्रह्मवद् प्रकृतिवत् भगवत्प्रियत्वं ब्रह्मभूयं न तु तावत् प्रियत्वम् किन्तु प्रियत्वमात्रम्। तात्पर्ये -

''लक्ष्म्यादिभिः कृतो बन्धो योऽनादिभिः पुरुषस्य तु
तमत्येतीह यो विद्वान् सः विज्ञेयो गुणात्ययी''।।

तत्कृतबन्धात्ययात् तदधिकविष्णुप्राप्तेश्च तदथीयित्युच्यते। यथा द्वारपालकमतीत्य राजानं गच्छति। ब्रह्मणि भूयं ब्रह्मभूयम्। ब्रह्मेति प्रकृता महालक्ष्मीः। अनन्तरं मोक्षसन्यासयोगे ५५,५६ तम श्लोकैः नैष्कर्म्यसिद्धिं प्राप्तो भूत्वा ब्रह्मणि भूयाय भवतीत्यर्थः[१९०]। विहितानि सर्वकर्माणि अपि मदुपाश्रयो भूत्वा सदा कुर्वाणः। न हि यथेष्ट चरणे तात्पर्यमत्र। तथासति विहिताकरणे समत्वात् मामनुस्मर युद्ध्य च ततः स्वधर्मं कीर्तिं च इत्यादि प्रस्तुतविरोधः। ६६ तम श्लोकेन अन्यधर्मान् सर्वान् परित्यज्येत्युक्तशेषत्वेनैव सर्वधर्मानिति वचनम्। अनादि जन्मकृतसर्वपापेभ्यो। अत्र प्राप्त्यभावात्। धर्मपरित्यागे पापपरित्यागस्य कैमुत्येनैव सिद्धत्वात्। सर्वोत्तमत्वविज्ञानपूर्वं तत्र मनः सदा। सर्वाधिकप्रेमयुक्तं सर्वस्यात्र समर्पणम्। अखण्डा

त्रिविधा पूजा तद्रत्यैव स्वभावतः। रक्षतीत्यैव विश्वासस्तदीयोऽहमिति स्मृतिः।
शरणागतिरेषास्याद् विष्णौमोक्षफलप्रदा।।[१९१]

मध्व दर्शनानुसारेण *भगवद्गीता* भक्तिशास्त्रमिति कथ्यते। अनेनोपदेशेन व्यक्तौ निक्षिप्त कर्तव्येषु तत्करणीयसमये भगवद् भक्त्या युक्तो भूत्वा करणीयमिति [१९२]। गीताशास्त्रे व्यक्तीनां कर्तव्यनिर्वहणे भक्तिप्रधानम् अतीव वर्तते। भक्तिः वैकारिकरीत्या जात भावं नास्ति। सर्वेष्वपि चराचरेषु ईश्वराशमिति। भक्तिः त्रिप्रकारेण यथा –पक्वभक्तिः, परिपक्वभक्तिः, अतिपरिपक्वभक्तिः इति। एषां नामस्तु साधनाभक्तिरिति। अनेन मुक्तिः प्राप्तुं चेदपि भक्तिः पुनरपि करणीयमेव। जीवेश्वरयोर्सम्बन्धः बिम्ब-प्रतिबिम्बवत् इत्यपि मतम्। भक्तिविषये गीतासिद्धान्तस्ते ज्ञानयुक्त भक्त्याः एवात्र प्रामाणिकता।(मोक्षपदं प्राप्तुं शक्यते )। अर्थात् न केवलं प्रेमभावादिकं ज्ञानरहित भक्त्या न वर्तयितुं शक्यते।

"स्वतन्त्रं परतन्त्रं च द्विविधं तत्वमिष्यते।
स्वतन्त्रो भगवान्विष्णुनिर्दोषोऽशेषसद्गुणः।।"[१९३]

### ५.५.३ रामानुजभाष्ये भक्तिः

अस्य *भगवद्गीतायाः* भाष्ये सप्तमाद्यायस्यभाष्ये एवं विशदयति। *भगवद्गीतायाः* आद्य अध्यायषट्केन परमप्राप्यभूतस्य परमात्मनः निरवद्यस्य जगत्कारणभुतस्य सर्वज्ञस्य श्रीनारायणस्य प्राप्त्युपायभूतं तदुपासनं वक्तुम् आत्मज्ञानपूर्वककर्मानुष्ठानमेव प्राप्तः प्रत्यगात्मनो यथात्म्यदर्शनमुक्तम् [१९४]। अनन्तरं मध्यमेन षट्केन 'परब्रह्मभूतपरमपुरुषस्वरुपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते। तदर्थमस्य गीताशास्त्रस्य (१८-४६,५३,५४) श्लोकाः प्रामाणिकरूपेण स्वीक्रियते [१९५]। उपासना नाम भक्तिरुपापन्नम् एव परमप्राप्त्युपायभूतम् ' इति वेदान्तवाक्यसिद्धम्। तदेव *श्वेताश्वतरोपनिषदातिषु*[१९६] ध्यान-उपासना शब्दवाच्यम् इति समानार्थत्वेनोपयुज्यते। अन्यरीत्या भक्तिः- परेणात्मना करणीयताहेतुभूतं स्मर्यमाणविषयस्य अत्यर्थप्रियत्वेन स्वयमपि अत्यर्थप्रियरुपं स्मृतिसन्तानमेव उपासनाशब्दवाच्यमेव भक्ति

इति[१९७]। स्नेहपूर्वमनुध्यानं भक्तिः इत्युच्यते पुराणे [१९८]। अतस्तमेवं विद्वानमृत इह भवति। "नाऽन्यः पन्था विद्यतेऽयनाय " इति। गीताशास्त्रे सप्तमाध्यायस्य षोटशश्लोके भक्तानां विभागवर्णितम् -

"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुना।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।"७.१६।

पुण्यकर्मणा भगवन्तं शरणं प्राप्तवन्तारैः तेषां पुण्यकर्मापेक्षया आर्त्तः - प्रतिष्ठाहीनो भ्रष्टैश्वर्यः पुनः तत्प्राप्तिकाम, अर्त्थार्थी -अप्राप्तैश्वर्यतया एश्वर्यकामः, जिज्ञासुः - प्रकृतिवियुक्त आत्मस्वरुपावाप्तीच्छुः, ज्ञानमेवास्य स्वरूपमिति जिज्ञासुः उक्तम्।। अभिहितभगवच्छेषतैकरसात्मस्वरुपवित् प्रकृतिवियुक्तकेवलात्मनि अपर्यवसन् भगवन्तं प्रेप्सुः भगवन्तं परमप्राप्यं मन्वानः [१९९]। अस्मिन् श्लोके एषु चतुर्षु ज्ञानिरेव विशिष्यते। तत् कुतः इति चेत् – " यावत्स्वाभिलषितप्राप्तिं मयायोगः तथा ज्ञानिनो मयि एकस्मिन् एव भक्तिः इतरयोः तु स्वाभिलषिते तत्साधनत्वेन मयि च अतः स एव विशिष्यते "। एवमेव अत्यर्थ शब्देन अभिधेयवचनानन्तरम् उक्तेषु ज्ञानी प्रहलादः -" स त्वासक्तिमतिः कृष्णे दृश्यमानो महोरगैः। न विवेकात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः "। अनन्तरं २१ तम श्लोकेन -

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलं श्रद्धां तमेव विदधाम्यहम्।।"७.२१।

अत्र व्याख्याने (बृहदारण्यके)" य आदित्ये तिष्ठन्यमादित्ये न वेद यस्यादित्यः शरीरम् "[२००]। इत्यादिना अनेन श्रुत्या प्रतिपादिताः सर्वे देवताः मम शरीरे वर्तते। विषयोऽयम् अजानतः इन्द्रादिदेवान् अर्चयितुम् इच्छति। अनेन स्वीयशरीरं प्रति इति विजिन्त्य अर्चयति। ततः परं तारकब्रह्मयोगे दशमश्लोकस्याशयस्तु सर्वज्ञं पुरातनम् विश्वस्य प्रशासितारं जीवाद् अपि सूक्ष्मतरं सर्वज्ञस्य स्त्रष्टारं सकलेतर विश्वासजातीयस्वरुपम् अहरहः

अभ्यस्यमानभक्तियुक्तं तं श्रीनारायणं भ्रुवोर्मध्ये दिव्यं रूपं यः अनुस्मरणीयम् इति तात्पर्यः[२०१]। अत्र अनेन [२०२] श्लोकस्य भाष्ये सर्वाणि अपि च परेण पुरुषेण अनन्य भक्त्या मत्स्थानं प्राप्तुं शक्यते इति अनेनोद्दिश्यते। ९.१४ [२०३] अनेन श्लोकेन भगवदा नारायणस्य भक्तिरहितो भूत्वा अत्र क्षणार्धमपि जीवितुं न शक्यते। भगवद् भक्त्याः देवतां श्रीरामं, नारायणं, श्रीकृष्ण वासुदेवम् इति बहुनाम्नया कीर्तनादिकं करोति।

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।" ९.२२।

अनन्य प्रयोजना मच्चिन्तनेन विना आत्मधारणालाभात् मच्चिन्तनैकप्रयोजनाः तादृशभक्तजनाः महात्मनाः कल्याणगुणान्वितं सर्वविभूतियुक्तं मां परितोपासते मयि नित्याभियोगं कांक्ष्यमाणानां मत्प्राप्तिलक्षणम् योगम् एवम् अपुनरावृत्तिरूपं क्षेमं य वहति अस्मिन्नेवाध्याये पञ्चविंशति तम श्लोकेन

"यान्ति देवव्रता देवान्पितृन्यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्।।९.२५।
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।"९.२६।

अनाभ्यां श्लोकाभ्यां विचारयन्तश्चेत् प्रथमश्लोकेन कर्मणा देवतादीन् पूजयति ते इन्द्रादिदेवान् यान्ति, पितृयज्ञादिना पितृपूजकाः ते पितॄन्यान्ति, ये यज्ञादिना देवपितृभूतशरीरकं परमात्मानं भगवन्तं वासुदेवं यजामः। देवतादि व्रतेन देवादीन् प्राप्य तत्र परिमित भोगमेव भुक्त्वा तद्देवतादीनां विनाशकाले तेषां साकं नश्यति, तद् एवं चेत् मद्भक्ताः सर्वज्ञं सत्यसङ्ल्पम् अतिशयसंख्यकल्याणगुणगणमहोदधिं च तं प्राप्य न पुनः निवर्तन्ते। द्वितीयेन श्लोकेन भगवता सर्वेश्वरो निखिल जगदुदयविभवलयशीलः

अवाप्तसमस्तकामः सत्यसङ्कल्पः अनवधिकातिशयासख्ये कल्याणगुणगणः आनन्दस्वानुभवे वर्तमाने अपि मनोरथपथदूरवर्ति प्रियं प्राप्यैव अश्नाति। त्वमपि ज्ञानी भूत्वा पूर्वोक्त भक्तिलक्षणतया आत्मीयं कीर्तनयतनार्चन प्रमाणादिकं लौकिक-वैदिककर्माणि [२०४] कुरु इत्याशयः।

“समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।।९.२९।
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।।”९.३१।

एषु श्लोकद्वयेषु प्रथमश्लोकेन देवतिर्यङ्मनुष्यस्थावरात्मनेषु अत्यन्तोत्कृष्टापकृष्टरुपेण वर्तमानेषु सर्वभूतेषु अहं समभावेन तिष्ठति। एवमेव आत्मधारणलाभात् मद्भजनैकप्रयोजना ये मां भजन्ते ते जायादिभिः उत्कृष्टा अपकृष्टा वा मत्समानगुणवद्यथासुखं मयि वर्तन्ते। मद्भक्तौ उपक्रान्तौ विरोध्याचारमिश्राः अपि न नश्यति, अपि तु मद्भक्तिमाहात्म्येन सर्वं विरोधिजातं नाशयित्वा शाश्वतीं विरोधिनिवृत्तिम् अधिगम्यक्षिप्रं परिपूर्णभक्तिः भविता [२०५]।

“किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।।९ ३३।
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणाः।।”९.३४।

पुण्ययोनयो ब्राह्मणाः, राजर्षादयश्च मद्भक्तिराश्रिताः अतः नाशसहितं तापत्रयाभिहिततया असुखं च इमं लोकं वर्तमानो मां भजस्व। अस्मिन्नध्यायस्यान्तिमश्लोकेन भाष्ये सर्वस्वामिनं तैलधारावत् अविच्छेदेननिविष्टमनाभव।अनवधिकातिशयप्रियमदनुभवकारितमद्यजनपरोभव।

यजनं नाम परिपूर्णशेषवृत्तिः। तादृशपुरुषोत्तमं विना आत्मधारणासम्भावनाया मदाश्रया इत्यर्थः। आत्म शब्दः अत्र मनोविषय सम्बन्धः च। एवं रुपेण मनसा मां ध्यात्वा मां अनुभूय माम् इष्ट्वा मां नमस्कृत्य मत्परायणो माम् एव प्राप्स्यति[२०६]। विश्वरूपदर्शनयोगे ५४,५५ तम श्लोकैः[२०७] अनन्यया तु या भक्त्या तत्वतः शास्त्रैः ज्ञातुं तत्वतः साक्षात्कर्तुं तत्वतः प्रवेष्टुं च शक्यः। अस्योपस्थापनत्वेन *कठोपनिषदि* –

" नायमात्मा प्रवचनेन लभ्यो न मेधसा न बहुना श्रुतेन

यमेवैषा वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्[२०८]"।

अग्रिमश्लोकेन वेदाध्ययनादिनी सर्वाणि कर्माणि मदाराधनरूपाणि इति यः करोति स मत्कर्मकृत् मत्परमः -सर्वेषामारम्भणमाह एव परमोद्दोश्यो य स समत्परमः -मद्भक्तस्तु - अत्यर्थमतिप्रियत्वेन मत्कीर्तनस्तुतिध्यानार्चनप्रमाणादिभिः विना आत्मधारणमलभमानो मदेक प्रयोजनतया यः, सततं तानि करोति। सङ्गवर्जितः -मदेकप्रियत्वेन इतरसङ्गम् असहमानः। मत्सश्लेषवियोगैकसुखदुखस्वभावत्वात् सुख-दुखस्य स्वभावत्वात् सुखदुखस्य स्वापराधनिमित्तत्वानुसन्धानात् च सर्वभूतानां परमपुरुषपरतन्त्रत्वानुसन्धानात् च सर्वभूतेषु वैरनिमित्ताभावात् तेषु निर्वैरः।[२०९] अनेन अविद्यादिना दोषेण युक्तस्य कृते मत् प्राप्तुं न शक्यते इत्युद्देश्यः। अनन्तरं द्वादशाध्याये भक्तियोगे –पूर्वमुपोद्घातभाष्यरूपेण किञ्चित् विषयोऽयं उपवर्ण्यते। ब्रह्मणः श्रीनारायणस्य निरङ्कुशैश्वर्यं साक्षात्कर्तुकामी अर्जुनः इति व्याख्यायति। भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात् सुखोपादानत्वात् च श्रेष्ठत्वाम्।

अस्याध्यायस्य प्रथमश्लोकेन[२१०] निरन्तर ध्यानादिना भगवता एव परमप्राप्यम् इति विजिन्त्य सकलविभूतियुक्तं सत्यसङ्कल्पादि गुणादिना वर्णितं भगवन्तमुपासते। एतेषु योगवित्तमाः के इत्यादि अर्जुनेन अपृच्छत्। अस्योत्तररूपेण अनन्तरश्लोकाः भगवता उपदिश्यन्ते।

“ये तु सर्वाणि कर्माणि मयि संन्न्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्तमुपासते।।१२.६।
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात्पार्थ मय्यावेशतचेतसाम्।।१२.७।
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः।।”१२.८।

अत्रत्य आद्यश्लोकद्धयेन अस्मान् लोकानन्तरलोकानां गमनादि विषयान् उद्दिश्य क्रियमाणानि वैदिककर्मादीनि एवं शरीरपोषणादीन् उद्दिश्य क्रियमाणानि कर्माणि च सन्यस्य भगवद् पदमेव, पुरुषोत्तममेव प्राप्यस्थानमिति मनसि निधाय ध्यायन्तः उपासते। मत्प्राप्ति विरोधितया मृत्युभूतात् संसाराख्यात् सागरात् अचिरेणैव कालेन समुद्धर्तुरुपेण भगवता भवति। भगवन्तं मनःसमाधानं, कुरु, बुद्धिं च। श्रीनारायण एव परमप्राप्ता इति अध्यवसायमनोनिवेशानन्तरमेव निवसिष्यसि त्वम् इत्यर्थः [२११] । १२अध्यायस्य १४,१५,१६,१७,१८,१९,२० एतैः श्लोकैः [२१२] यदृच्छोपनतेन येन केनापि देहधारण द्रव्येण सन्तुष्टः सततं प्रकृति वियुक्तात्मानुसन्धानपरः नियमितेन रीत्या मनोवृत्तिः कृतवन्तः अध्यात्म शास्त्रेषु अर्थेषु दृठनिश्चयः भगवता विष्णौ वासुदेवौ एवमनभिसंहितफलेन अनुष्ठितेन कर्मणा आराध्यते आराधितश्च आत्मापरोक्ष्यं साधयिष्यति एवम्भूतो मद्भक्तो एवरीत्या कर्मयोगेन च मां भजमानो यः स च मम प्रियः। अग्रिम श्लोकेन कञ्चन प्रतिहर्षेण कञ्चन प्रति अमर्षेण कञ्चन प्रति भयेन,कञ्चन प्रति उद्वेगेन मुक्तः एवम्भूतः यः सः अपि मे प्रियः। आत्मव्यतिरिक्ते कृस्त्ने वस्तुनि अनपेक्षः, शास्त्रविहितद्रव्यवर्धितकायः शास्त्रीयक्रियोपादानसमर्थः एवम् अवर्णनीयशीतोष्णपुरुषस्पर्शादि दुखेषु व्यथारहितः तादृशयुक्तो मद्भक्तः स मे प्रियः। मनुष्याणां हर्षनिमित्त भार्या वित्तादि तादृशम् अप्राप्तं च न कांङ्क्षति एवमेव पापवत् पुण्यस्य अपि बन्धहेतुत्वाविशेषाद् उभयपरित्यागी एवम्भूतो

भक्तिमान् स मे प्रियः। आत्मनि स्थिरमतित्वेन निकेतनादिषु असक्तः तत एव मानापमानादिषु अपि समः यः एवम्भूतो भक्तिमान् स मे प्रियः [२१३]। अस्मात् आत्मनिष्ठात् मद्भक्तियोगनिष्ठस्य श्रेष्ठयं प्रतिपादनीयन् यथोपक्रम् उपसंहरति।

"ये तु धर्म्याऽमृतमिदं यथोक्तं पर्युपासते।

श्रद्धधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः।।" १२.२०।

क्षत्र-क्षेत्रज्ञविभागयोगे दशमश्लोकेन

"मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।

विविक्तदेश सेवित्वमरतिर्जन संसदि।।"१३.१०।

सर्वेश्वरे च एकान्तिकयोगेन स्थिर भक्तिः जनवर्जितदेशवासित्वं जनसंसदि च अप्रीतिः।। गुणत्रयविभागयोगे षट्विंशति तम श्लोकेन

" मां च योऽव्यभिचारेण भक्तियोगेन सेवते।

स गुणान्समतीत्यैतान्ब्राह्मभूयाय कल्पते।।"१४.२६।

अनादि कालप्रवृत्तविपरीतवासनाबाध्यत्वसम्भवात् सत्यसङ्कल्पं परमकारुणिकंम् आश्रितवात्सल्यजलधिम् एकान्त्य विशिष्टेन भक्तियोगेन यः सेवते सः एतान् सत्वादीन् गुणादीन् दुरत्ययान् अतीत्य ब्रह्मभावयोग्यो भवति। यथावस्थितम् आत्मानममृतम् अव्ययं प्राप्नोति[२१४]। अवसाने मोक्षसन्यासयोगे ५४,५५ तम श्लोकैः

"ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।

समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्।।१८.५४।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतः।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।"१८.५५।

मयि सर्वेश्वरे निखिलजगदुद्भवस्थितिप्रलयलीले निरस्तसमस्तहेयगन्धे अनवधिकातिशयसङ्ख्येयकल्याणगुणगुणैकताने लावण्यामृतसागरे श्रीमत् पुण्डरीकनयने स्वस्वामिनी अत्यर्थप्रियानुरूपं परां भक्तिं लभते। अनन्तरश्लोकेन स्वरूप स्वभावगुणविभूतिदर्शनोत्तरभाविन्या अनवधिकातिशयभक्त्या मां प्राप्नोति। अत्र इति प्राप्ति हेतुतया निर्दिष्टा भक्तिः [२१५]। अत्यर्थ प्रियमदाराधनं नाम परिपूर्णशेषवृत्तिः। यस्य मयि अति मात्रप्रीतिः वर्तते ममापि तस्मिन् अ्तिमात्रप्रीतिः भवति इति तद्वियोगमसहमानः अहं तं मां प्रापयामि अतः सत्यम् एव प्रतिज्ञातं ममैव एष्यसि। अनन्तरश्लोकेन [२१६] भक्तियोगारम्भविरोध्यनादिकालसञ्चितनाना विधानन्तपापानुगुणान् तत्प्रायश्चित्तरूपान् कृच्छ्रचान्द्रायणकूष्माण्डवैश्वानर प्राजापत्य व्रतपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान् नानाविधानन्तान् त्वया परिमितकालवर्तिना दुरनुष्ठानान् सर्वधर्मान् परित्यज्य भक्तियोगारम्भसिद्धये माम् एकं परमकारुणिकम् अनालोचित विशेषशेषलोकशरण्यम् आश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच। ततः ६७ तम श्लोकेन न च अश्रूषवे भक्तायापि अश्रूषवे न वाच्यं न च मां यः अभ्यसूयति मत्स्वरूपे मदैश्वरेये मद्गुणेषु च कथितेषु यो दोषमाविष्करोति न तस्मै वाच्यम्। असमान विभक्ति निर्देशः तस्यात्यन्तपरिहरणीयता ज्ञापनाय। अनन्तर श्लोकेन इदं परमं गुह्यं मद्भक्तेषु यः अभिध्यास्यति सः मयि परमां भक्तिं कृत्वा मामेव एष्यति नास्ति तत्र सन्देहः [२१७]।

## ५.५.४. मध्व-रामानुजयोः भक्तिविषये सारुप्य वैरूप्याणि

भक्ताचार्याणां मतेन *भगवद्गीता* भक्तिशास्त्रमिति इति गण्यते। दुखमयात् संसारान् मुक्तये एकं सरलं साधनं भक्तिः। वैष्णवानां चतुःसम्प्रदाय्यां कर्म-ज्ञानादीनाम् अधिकं भक्तेः प्राधान्यं ददाति। अत्र भक्तिविषये गीताभाष्यकारः रामानुजं श्रीसम्प्रदायी च विशिष्टाद्वैतवादी एवं *गीताभाष्यं गीतात्पर्यम्* इति भाष्यद्वययोः द्वैतसिद्धान्तस्याचार्यः मध्वाचार्यः तयोः मतभेदस्य सारुप्य वैरूप्याणि अत्र निरुप्यते।

रामानुजमतेभक्तिःनाम निरतिशयानन्दप्रियानन्यप्रयोजनसकलेतरवैतृष्ण्यवज्ज्ञानविशेष एव " तत्सिद्धिश्च विवेकादिभ्यो भवतीति वाक्यकारेणोक्तम्– तल्लब्धिविवि विवेकविमोकाभ्यासाक्रियाकल्याण अनवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति [२१८]। द्वैतदर्शने श्रीमध्वेन महाभारततात्पर्यनिर्णये -

"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तस्तयामुक्तिर्न चानन्यथा।।"[२१९]

भक्तिः एवम् उपासना च सामान्येन समानार्थकत्वेन प्रयुज्यते। यः उपासनाम् अनुष्ठीयते सः ईश्वरसाक्षात्कारं सिद्ध्यति। उपासनायाः प्रकारत्रयं तत्र वर्ण्यते - अन्तरुपासना, बहिरुपासना, सर्वगतोपासना च इति [२२०]। रामानुजेन प्रस्थानत्रयाणां भाष्येण प्रतिपाद्यं भक्तिरिति संस्थापयितुमेव भाष्यमलिखत् [२२१]। मोक्षपरो द्विविधः - भक्तः प्रपन्नश्चेति। प्रपन्नो द्विविधः एकान्ती परमैकान्ती चेति[२२२]। भक्ताः पुनरधीतसाङ्गशिरस्कवेदः। पूर्वोत्तरमीमांसापरिचयात् चिदचिद्विलक्षणम् अनवधिकातिशयानन्दस्वरुपं निखिलहेयप्रत्यनीकं समस्तकल्याणगुणात्मकं ब्रह्मावधार्य तत्प्राप्त्युपायभूतं साङ्गभक्तिं स्वीकृत्य तयामोक्षं प्राप्तुकामाः अनुभवति स्म[२२३]। भक्तिः द्विविधाः: साधनाभक्तिनिष्ठाः साध्यभक्तिनिष्ठाः च। व्यासादयः साधनभक्तिनिष्ठाः श्रीपराङ्कुशादयः साध्यभक्तिनिष्ठा। विशिष्टाद्वैतदर्शनग्रन्थेषु व्याख्यातं चतुर्व्यूहसिद्धान्तं गीताशास्त्रे नास्ति। तत्र व्यूहो नाम परैवोपासनार्थं जगत्सृष्ट्याद्यर्थं च वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धभेदेन चतुर्द्धावस्थितः। तत्र षट्गुणपूर्णः श्रीवासुदेवः। ज्ञानबलाभ्यां सङ्कर्षणः,एश्वर्यवीर्याभ्यां प्रद्युम्नः, शक्तितेजोभ्याम् अनिरुद्धः च [२२४]।

इतः परं द्वैतदर्शनमधिकृत्य विजिन्त्यते चेत् श्रीनारायणः एवोत्कृष्टः, प्रपञ्चं यथार्थमेव। जीवात्मानाः परस्परभिन्नाः ते च उत्तममध्यमादि अवस्थाभेदयुक्तास्च। स्वसुखानुभवमेव मोक्षम् तदर्थं निर्मलभक्तिरेव मोक्षसाधन हेतुः। गीताशास्त्रे पुरुषोत्तमयोगे -

"यस्मातक्षरमतीतोऽहं अक्षरादपि चोत्तमः।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।।"१५.१८।

व्यक्तीनां स्वकीयकर्तव्यानि भगवद्भक्तिपूर्वं करणीयमिति मध्वमतम् [२२५]। मध्वमते भक्त्याः प्रकाराः -पक्वभक्तिः,परिपक्वभक्तिः, अतिपरिपक्वभक्तिः इति नाम्ना सन्ति [२२६]। भगवद्प्रेम्णा ज्ञानेन विना भक्ति सफलीकर्तुं न शक्यते [२२७]। भक्तेः एकैकसोपानानि उपरिगच्छति चेत् अस्य विस्तृतिः वर्धयति। साधनाभक्तिः मुक्तिप्राप्तेः अनन्तरमपि अनुकरणीयमेव। मुक्त्यवस्थानां भक्तिः साध्यभक्तिः इति नाम्ना वर्तते। अतः एव गीतातात्पर्ये उपोद्घाते सर्वस्मात् भगवतो भेदः सर्वस्य तदधीनत्वम् अस्य अनन्याधीनत्वं सर्वोत्तमत्वं, सर्वगुणपूर्णत्वं, सर्वशास्त्राणां तत्परत्वं तथा तज्ज्ञानादेव मोक्षैः। अनेन द्वैत-विशिष्टाद्वैतयोर्मध्ये प्रधानभेदाः केचनाः अत्र उपसंहरति यथा —जीवात्मानाः स्वकीयस्वाभाविक तत्वेषु समानाः इति विशिष्टद्वैते —द्वैते जीवान्मानाः भेदयुक्ताः इति चिन्तयन्ति। ब्रह्म समवायि कारणमिति रामानुजः अङ्गीकरोति मध्वस्तु तत् निषेधति। रामानुजस्तु ईश्वरशरीरैव। जगत् एवं चेत् मध्वमते जगद् ईश्वरशरीरं न। विशिष्टाद्वैते मोक्षाय अनर्हाः आत्मानाः नास्ति, तेषां मुक्तात्माना आनन्दानुभवे च भेदश्च नास्ति इति। माध्वमते जीवात्मानः शेषाः मोक्षसंङ्कल्पाः धर्मार्थकामान् त्यक्त्वा वैकुण्ठं प्राप्य भगवतः अनुचराः एतदेव मोक्षम्। विशिष्टाद्वैतीनां जीवात्मपरमात्म सम्बन्धः शेषशेषि सम्बन्धः [२२८]।

## ५.६. भक्तिसमर्थने भगवद्गीतायाः प्रमाणम् आचार्यत्रयेषु

कर्म-ज्ञान-भक्ति-योगादि विषयानां प्रामाणिकत्वं स्थापयितुं *भगवद्गीतायाः* प्रामाणिकत्वं प्राचीनकालात् एव आरभ्य इतः प्रभृतीं पुरोगच्छति। अतः एव पुनः भाष्याणां रचनया भाष्यकाराः च उद्दिश्यते। अतैव मनोवैज्ञानिक विषये, आत्मतत्वविषये, भोजनविषये, दाने, सात्विकादि भेदे अगण्यमानाः विषयेषु गीताप्रामाण्यं सुदृढमेव। अत्र भक्तिसमर्थने आचार्यत्रयाः कीदृशं *भगवद्गीतायाः* प्रमाणत्वम् अकरोत् इति विचारयाम।

अद्वैतपक्षे श्रीशङ्करः स्वीयभाष्ये स्वसैद्धान्तिकरीत्यायेव भाष्यामकरोत्। किन्तु तस्यानन्तरकालेऽव गीतायाः *गूढार्थदीपिका* नाम व्याख्यानेन श्रीमधुसूदनसरस्वतिना शङ्करापेक्षया इतोपि भक्तिविषये प्राधान्यं दत्तवान्। श्रीशंङ्करेण स्वीयभाष्ये यत्र ज्ञानविषयं विस्तरति तत्र शास्त्ररीत्या व्याख्यायति। एवं चेद् भक्तिविषये केवलभाष्यमेव ध्यानयोगो नाम षष्ठाध्यायस्यान्तिमश्लोकेन भगवान् वासुदेवे अन्तकरणेन श्रद्धायुक्तो भूत्वा भजति चेत् अतिशय युक्तयोगी भवितुं शक्यते। ज्ञानविज्ञानयोगे (७.१६),श्लोकस्य एवं (७.१७) श्लोकैः चतुर्णां मध्ये ज्ञानी तत्वविद् भगवदः तत्वं ज्ञात्वा भगवन्तं लीयते अतः भाष्ये अहमात्मा ज्ञानिनः अतः अस्याहं प्रियः। लोके आत्मा प्रियो भवति अतः ज्ञानी मम वासुदेवस्य आत्मैव इति ममात्यर्थं प्रियः। तारक ब्रह्मयोगे २२ तम श्लोकेन परमात्मा अनन्यया भक्त्या आत्मविषयज्ञानरुपभक्त्या प्राप्तुं शक्यते। राजविद्याराजगुहययोगे १४ तम श्लोकस्य व्याख्यानावसरे इन्द्रियोपसंहारशमदमदयाहिंसादि लक्षणैः धर्मैः प्रयत्नः भगवन्तं भक्त्या उपासते। द्वादशे भक्तियोगे यथा शास्त्रम् उपास्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यद् आसनं तद् उपासनमाचक्षते[२२९]। सम्यग् भक्ति अस्मान् मुक्तिं प्रयच्छति। भगवतायेव --

"भक्त्या मामभिजानाति यावान् यश्चास्मितत्वतः।
ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्।।"१८.५५।

एवमेव ---

"पत्रं पुष्पं फलं तोयं योमे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।"९.२६।

अवसाने मोक्षसन्यासयोगे ६६ म श्लोकभाष्यावसरे यथा---

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच।।"१८.६६।

अस्य श्लोकभाष्यावसरे सिद्धान्तपक्षरीत्या एव व्याख्यायति, किन्तु तत्र भक्तिविषयं न चर्चयति। कर्म-ज्ञानयोः मध्ये परं निश्रेयससाधनं निश्चितं किं ज्ञान किं कर्म वा आहोस्विद् उभयम्। इति पूर्वपक्षिणां प्रश्नोत्तर रूपेण अत्यधिकं विस्तरति। अत्र परमनिश्रेयसं कर्मणा वा ज्ञानेन इत्यत्र तत्र चर्चा पुरोगच्छति। न तत्र भक्तिविषयं चर्चयति।

माध्वाः गीताशास्त्रं भक्तिशास्त्रमिति विवक्षया पश्यति। अतः मानवाः स्वीयकर्तव्यनिर्वहणावसरे भक्त्या करणीयमिति द्वैतमतम्। तारकब्रह्मयोगे २२ श्लोकेन

"पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि योन सर्वमिदं ततम्।।"८.२२।

भक्त्यायेव मां प्राप्तुं शक्यते इति यथा ---

"अनन्याश्रिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।९.२२।
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।।९.२९।

एवमेव——

"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्तैवमात्मानं मत्परायणः।।"१८.६५।

१८/६५ द्वितीयपंक्तौ समानरीत्यायेव -मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे माध्वदर्शनानुसारेण ९/३४,१८/६५,१०/१० एषां श्लोकानामाशयानुसारेण भक्त्या अस्मान् ज्ञानं कारुण्यं च प्राप्स्यति। अस्य दर्शनानुसारेण ज्ञानरहितो भूत्वा भक्त्याः स्थायीभावत्वमपि अवश्यमेव। अतैव द्वैतसिद्धान्तानुसारेण ज्ञानयुक्तभक्त्यैव परमपदं अथवा श्रीनारायणं प्राप्तुं

शक्यते। अतैव मध्वाचार्येण भगवता गीतम् इदं शास्त्रस्योपरि गीताभाष्यं, गीतातात्पर्यं च लिखित्वा स्वमतस्थापनमपि अकरोत्।

श्रीलक्ष्मीनारायण इष्टदेवतारूपेण रूपेण (परमात्म) च विशिष्टाद्वैतदर्शने निरूपयति। अत्र श्रीनारायण चरणकमले आत्मसमर्पणं सर्वोत्तमं साधनमस्ति। अत्रैव मर्कटकिशोरवद्, मार्जारकिशोरवद् च द्विधा शरणागतिः च वर्तन्ते। भगवच्चणापन्नो जनः स्वशक्त्या भगवच्चरणशरणेन सर्वविघ्नं निवारयति। द्वितीयरीत्या मार्जारबालो मातुराश्रये एव तिष्ठति। माता स्वेच्छया तं निधाय रक्षति। तादृशस्य श्रीनारायणस्य सर्वोत्तमत्वं स्थापयितुमेव गीताशास्त्रस्योपरि श्रीरामानुजेन भाष्यं विलिख्य विशिष्टाद्वैतदर्शनस्य संस्थापने भागं गृहीतः। अत्र गीताशास्त्रं षट्कत्रयेण विभज्य आद्य षट्केन श्रीनारायणस्य प्राप्त्युपायभूतं वक्तुं ज्ञानपूर्वककर्मानुष्ठानसाध्यं प्राप्तुमुपायः अरचयन् ततः परं भक्तिं विस्तरति। अत्र भाष्यकारेण सप्तमाध्यायस्यारम्भे भक्तिविषयं विस्तरति। तत्र परमपुरुषस्य प्राप्त्यर्थं अस्य स्वरुपं भक्ति शब्देन व्याख्यायते।

"यतः प्रवृत्तिभूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवाः"।

भगवतः भक्तिः कथं करणीयमित्यत्र ११/५३,५४ श्लोक साहाय्येन विषयोपस्थापनं करोति। रामानुजेन विषयोपस्थापनाय अधिक रुपेण गीताश्लोकान् एव आश्रित्य एवं भाष्यं अग्रे लिखित्वा गच्छति।

" यः स सर्व भूतेषु नश्यत्सु न विनश्यति।
अव्यक्तो ऽक्षर इत्युक्तस्तमाहुः पराम गतिम्।।" १८.५५।

श्लोकस्य व्याख्यानावसरे च गीतायाम् ११-५४ श्लोके " भक्त्या त्वनन्यया शक्यः " इत्युपयुज्य व्याख्यायति। एवमेव १८-६५ श्लोकस्य भाष्यावसरे ७-१७ श्लोके " प्रियो हि

ज्ञानिनोऽत्यर्थमहं स च मम प्रियः “ केषां कृते भगवद्प्रीतिः इत्योपस्थापनाय पूर्वश्लोकांशमुपयुक्तम्। एवं रूपेण बहुवारं श्रीरामानुजेन पूर्वश्लोकांशान् एवोपयुज्य भक्तिविषयस्योपस्थापं समीचीनया रीत्या सैद्धान्तिकरीत्या कृतमिति भाष्यपठनेन ज्ञातुं शक्यते।।

**५.७ अध्यायोऽपसंहारः**

मोक्षो हि त्रिविधा निष्ठा दृष्टाऽन्यै मोक्षवित्तमैः। ज्ञानं लोकोत्तरं यच्च सर्वत्यागश्च कर्मणाम्। ज्ञाननिष्ठा वदन्त्येक मोक्षश्स्त्रविदोजनाः। कर्मनिष्ठा तथैवान्यो यतयः सूक्ष्मदर्शिनः। प्रहायो भयमप्येवं ज्ञानं कर्म च केवलम्। तृतीयेवं समाख्याता निष्ठा तेन महात्मना । *भगवद्गीतायाः* बहवः आचार्याः विविधयारीत्या भाष्यरचना ,स्वमतस्थापनं , स्वतन्त्रव्याख्या च कृता । अत्र विचारितशंङ्कर-मध्व-रामानुजभाष्याणामपि अर्वाचीनानि बहूनि व्याख्यानानि सन्ति । गूढार्थदीपिका ज्ञानेश्वर इत्यादीनि अद्वैतमतानुसारेण भक्त्याः प्राधान्याधिक्येन कृतानि व्याख्यानानि । अध्याये अस्मिन् भगवद्गीतायां भक्त्याः स्वरुपं कीदृशमिति परिशोधयितुं प्राचीन भाष्यत्रयाणां चिन्तनमेव अकरोत् । तत्र प्रथमं सूत्ररूपेण नारद-शाण्डिल्य द्वाचार्यैः कीदृशं प्रतिपादितमिति विवृणोति । पुनः कर्म-ज्ञान-भक्तियोगानां तुलनात्मकमध्यनम् ,आचार्यत्रयाणां मते भक्तिः इति च प्रतिपादयति । आचार्यत्रयेषु मध्व-रामानुजौ भक्त्याः प्राधान्यं शंङ्करापेक्षया अधिकं ददाति । अतः भक्तिविषये तयोः सारूप्यवैरूप्याणि भक्तिविषयस्योपस्योपस्थापनाय भगवद्गीतायाः प्रमाणम् इत्यादिकमत्र विचारितम् । भगवद्गीता भक्तिशास्त्रग्रन्थमिति भक्तिमार्गावलम्बिनः चिन्तयति । अतः तेषां मतानुसारेण भगवद्गीता हरिगीता इति च प्रथिता ।

## अध्यायटिप्पणि

1. श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् १०.२५ ,२५४ पुटे
2. श्रीमद्भागवतम्, श्रीधरस्वामि विरचितया भावार्थबोधिनी नाम्नयासंस्कृतटीकया समुपेतम्, मोतिलाल् बनारसीदास , पुटे ३२०
3. नारदभक्तिसूत्रम्, नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम्, गीताप्रेस गोरखपूर् १९पुटे
4. *Ibid* ., नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम्, १,१० पुटेषु
5. अष्टादशपुराणपरिचयः, श्रीकृष्णमणित्रिपाठी , कृष्णदास संस्कृत सीरीस चौखाम्बा सुरभारती, वारणासि पुटे १०९
6. *Op. cit* श्रीमद्भागवतम् श्रीधरस्वामि पुटे ३२९
7. *Op. cit* अष्टादशपुराणपरिचयः चौखाम्बा २०९ पुटे
8. *Op. cit* नवधा भक्तिः पुटे ३१
9. *Op. cit* नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम्, १७ पुटे
10. *Op. cit* अष्टादशपुराणपरिचयः, १११पुटे
11. एतन्निर्विद्यमानानमिच्छतामकुतो भयम्। योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्।। अन्ये त्वमेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।। *Ibid* ., ११३पुटे
12. संकीर्त्यमानो भगवाननन्तः श्रुत्वानुभवो व्यसनं हि पुंसः। प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः।। *Ibid* ., ११३ पुटे
13. अविस्मृतिः कृष्णापदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च। सत्वस्य शुद्धि परमात्मभक्तिम् ज्ञानं च विज्ञानविरागयुक्तम्।। *Ibid* ., ११४पुटे
14. यत्पादसेवाभिरूचिस्तपस्विनामशेषजन्मोपचितं मलं धियः। सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिः सृता सरित्।। *Ibid* .,११४ पुटे
15. श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नराः भुवि। ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम्।। *Ibid* ., ११६ पुटे
16. ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम्। भृत्यार्तिहं प्रणत पालभवाब्धिपोतं वन्दे महापुरुष ते चरणारणारविन्दम्।। *Ibid* .,116
17. न वासुदेवात्परमस्ति मङ्गलं न वासुदेवात्परमस्ति पवनम्। न वासुदेवात्परमस्ति दैवतं तं वासुदेवं प्रणमन्नसीदति।। *Ibid* .,११६ पुटे
18. पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रूवन्। हरये नमः इत्युच्चैर्मुच्यते सर्वपातकात्।। *Ibid* .,११७ पुटे
19. मर्त्यो यदा त्यक्तसमस्तकर्मा निव्रेदतात्मविधि कीर्तितो मे। तदामृतत्वं प्रतिपद्यमानो मयात्मभूताय च कल्पते वै।। स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने। करौ हरे मन्दिरमार्जारादिषु श्रुति चकारच्युत सत्कथोदये।। मुकुन्द लिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शऽङ्गसङ्गमम् ।घ्राणञ्च तत्पादसरोजसौरभे श्रीमत्तुलस्यां रसना तदर्पिता।।पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपादाभिवन्दने। कामं च दास्ये नतु कायकाभ्यया यथोत्तमश्लोकजनाश्रया रतिः ।। *Ibid* .,११७ पुटे
20. *Op. cit* नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम्, १७ पुटे
21. *Op. cit* नवधाभक्तिः २७ पुटे
22. *Loc. Cit*, २७ पुटे
23. *Loc. Cit*, २७ पुटे
24. *Ibid* ., २८ पुटे
25. *Loc. Cit*, २८ पुटे

26. *Loc. Cit,* २८ पुटे
27. *Loc. Cit,* २८ पुटे
28. *Ibid .,* २९ पुटे
29. *Loc. Cit,* २९ पुटे
30. *Ibid .,* ३० पुटे
31. विष्णुपुराणं १.२०.१९, ९४ पुटे
32. *Ibid .,* नारदभक्तिसूत्रम् एवं शाण्डिल्यभक्तिसूत्रम् ११ पुटे
33. *Ibid .,* अष्टादशपुराणपरिचयः श्रीकृष्णमणित्रिपाठी , पुटे ११०,१११
34. *Loc. Cit,* ११ पुटे
35. संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम् ८६ पुटे
36. अध्यात्मरामायणम् आरण्यसर्ग १०,११२-११८ पुटेषु
37. ऋग्वेदं ६.१२.२
38. ऋग्वेदं १.१५४.२, १.२२.१७, १.१५६.३
39. *Ibid .,* अष्टादशपुराणपरिचयः श्रीकृष्णमणित्रिपाठी , पुटे ११०
40. शब्दकल्पद्रुमम् , वाजस्पत्ये ४६१८-४६३० पुटेषु
41. The Ashtaadhyayi of Panini, vol -1, Srisa Chandra vasu,motilal banarsidass,p 781
42. *Ibid .,* ,p 782
43. वाजस्पत्यम्, ४६२१-२५
44. *Loc. Cit,* 1 पुटे
45. *Ibid .,* अष्टादशपुराणपरिचयः श्रीकृष्णमणित्रिपाठी , पुटे १११
46. शब्दकल्पद्रुमम्
47. Vivekacudamani with English Translation, Bharatiya vidya Bhavan p 46
48. *Ibid .,* p 47
49. श्रीमद्भागवतम् ३.२९.१२
50. सर्वदर्शनसंग्रहः माधवाचार्यकृतः ,डा उमा शंङ्कर शर्म ऋषि , चौखाम्बा विद्याभवन् वारणासि , पुटे २०४
51. महाभारततात्पर्यनिर्णयम् १.१.०७, ८ पुटे
52. ऋग्वेदं ७.८६.७
53. ऋग्वेदं ८.६८.११
54. ऋग्वेदं ७.३२.१६
55. ऋग्वेदं १.७५.४ , १०६ पुटे
56. ऋग्वेदं ६.१२.२, २भागः, १५ पुटे
57. अथर्व वेदं ६.७६.३
58. *Op. cit* अष्टादशपुराणपरिचयः श्रीकृष्णमणित्रिपाठी , पुटे ११
59. *Ibid .,* पुटे ११५
60. अध्यात्मरामायणम्, गीताप्रेस् गोरखपूर् आरण्यसर्ग १० २२-२८ , १४७ पुटे

61. योगवासिष्ठं(उपोद्घातः), प्रो. जि बालकृष्णन् नायर्, केरला भाषा इन्स्टिट्यूट् ९३, ९४ पुटेषु
62. महाभारतम् , गीताप्रेस् गोरखपूर् २.६८.४२, ९०२ पुटे
63. श्रीमद्भागवतम् ११.२०, १०९१पुटे
64. पद्मपुराणं (श्रीमद्भागवतमाहात्म्यम् ) २.४, २.१८
65. रामरहस्योपनिषद् २२
66. श्रीमद्भागवतम् १.७.१०, २०पुटे
67. विष्णुपुराणम् १.२०.२७, १०० पुटे
68. पुराणपर्यालोचनम् ७२,७३ पुटे
69. विष्णुपुराणम् १.२०.२६ , १०० पुटे
70. स्कन्दपुराणम् ५.९८
71. स्कन्दपुराणम् ७४.६०
72. पद्मपुराणम् ८०.१६
73. पद्मपुराणम् ८०.६७
74. ब्रह्मवैवर्तपुराणम् २७.२३०
75. *Op. cit* श्रीमद्भागवतम्, श्रीधरस्वामि , पुटे ३२०
76. *Ibid* ., १२.४.३६, ३.२५.२४
77. *Ibid* ., ३.२९.११,१२
78. *Loc. Cit*, पुटे १
79. *Ibid* ., 5 पुटे
80. *Ibid* ., 9 पुटे
81. *Ibid* ., 10 पुटे
82. *Ibid* ., 11 पुटे
83. *Ibid* ., 14 पुटे
84. *Ibid* ., 17 पुटे
85. *Ibid* ., 19 पुटे
86. *Ibid* ., 22 पुटे
87. *Ibid* ., 25पुटे
88. *Ibid* ., 27 पुटे
89. *Ibid* ., 30 पुटे
90. *Ibid* ., 30 पुटे
91. *Ibid* ., 30 पुटे
92. *Ibid* ., 38 पुटे
93. *Ibid* ., 40 पुटे
94. *Ibid* ., 43 पुटे
95. *Ibid* ., 48 पुटे
96. *Ibid* ., 5 4, 53 पुटे

97. *Ibid* ., 56 पुटे

98. श्रीनारायणगुरु ओरु समग्रपठनम् पुटे ४५८

99. बृहदारण्यकोपनिषद् अध्यायः ४, ब्राह्मणं ५, मन्त्रं ६, श्रीरामकृष्ण मठ, मैलापूर् मद्रास्,३८६,३८७ पुटे

100. *Op. cit* श्रीमद्भगगद्गीता मोतिलाल् बनारसीदास ११५,११६ पुटे

101. *Ibid* ., १२१ पुटे
102. *Ibid* ., १२२ पुटे
103. *Ibid* ., १२३ पुटे
104. *Ibid* ., १२९ पुटे
105. *Ibid* ., १३३,१३४ पुटे
106. *Ibid* ., १४१,१४२ पुटे
107. *Ibid* ., १४४ पुटे
108. *Ibid* ., १४५ पुटे
109. *Ibid* ., १४६,१४७ पुटे
110. *Ibid* ., १४८ पुटे
111. *Ibid* ., १७९ पुटे
112. *Ibid* ., १८६ पुटे
113. *Ibid* ., १८७ पुटे
114. *Ibid* ., २०० पुटे
115. *Ibid* ., २२६,२२७ पुटे
116. *Ibid* ., २८७, २८८ पुटे
117. *Ibid* ., २८८ पुटे
118. *Ibid* ., २९७ पुटे
119. भारतीयदर्शनम् .एस् राधाकृष्णन्, ६६५ पुटे

120. भारतीय चिन्ता के दामोदरन् पुटे ३६५
121. अद्वैतधर्मम्, के एन् नीलकण्ठन् इळयत्, पुटे ६१

122. श्रीमद् भगवद्गीतारहस्यं, बालगंङ्गाधर तिलकः, (विवर्तनम् ) नरेन्द्रभूषण्, ४५७ पुटे
123. संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम् ८६ पुटे
124. भारतीयदर्शनम् .एस् राधाकृष्णन्, ७०० पुटे

125. अद्वैतधर्मम्, के एन् नीलकण्ठन् इळयत्, पुटे ८५

126. *Op. cit* श्रीमद्भगगद्गीता मोतिलाल् बनारसीदास, ९७ पुटे
127. श्रीमद् भागवतपुराणम् ३ ३३.३२
128. भारतीयदर्शनम् .एस् राधाकृष्णन्, ४७७ पुटे
129. श्रीमद् भगवद्गीतारहस्यं, बालगंङ्गाधर तिलकः, (विवर्तनम् ) नरेन्द्रभूषण्, ४३३ पुटे
130. अस्य समानश्लोकमेव श्रीमद् भागवतपुराणे १० स्कन्धे ८ अध्याये ८० श्लोकम्, एवं शिवगीतायाम् च १२.४ रूपेण च भवति।

131. भक्तिरसायनम्,मधुसूदनसरस्वति विरचितं पुटे

132. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (तैत्तिरीयोपनिषद् सत्यं ज्ञानं अनन्तं ब्रह्म २ .१.१), ५५ पुटे

133. तैत्तिरीयोपनिषद् ३.१ , ५८ पुटे
134. ब्रह्मसूत्रशंङ्करभाष्यम् १.१.४,११-२४ पुटौ, ३.४.५२ ४५८ पुटे
135. वेदान्तसारः सदानन्दः
136. छान्दोग्योपनिषद् ३.१८.१
137. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (छान्दोग्योपनिषद् ३.१९.१), १०७ पुटे, ब्रह्मसूत्रशंङ्करभाष्यम् ४.१.३,चौखाम्बा सुरभारती प्रकाशन् ४६३ पुटे
138. ब्रह्मसूत्रशंङ्करभाष्यम् ४.१.३, ४६३ पुटे,
139. श्रीमध्वाचार्यर् जीवितवुं दर्शनवुम् पुटे ६५
140. संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम् ८६ पुटे
141. भारतीयदर्शनम् .एस् राधाकृष्णन्, ६७० पुटे
142. भारतीयदर्शनम् .एस् राधाकृष्णन्, ६८१ पुटे
143. यतीन्द्रमतदीपिका
144. Sri-Bhashya of Ramanujacharya , Vasudev Sastri Abhvankar , Govt. central press Bombay २.२.४०, २५७ पुटे
145. भारतीयदर्शनम् .एस् राधाकृष्णन्, ६८१ पुटे
146. अद्वैतधर्मम्, के एन् नीलकण्ठन् इळयत्, पुटे १२,१३,४७
147. श्रीमद् भगवद्गीताभाष्यम् (४.२)१०७पुटे , ब्रह्मसूत्रशंङ्करभाष्यम् (२.३.४१), २९५,२९६ पुटे
148. चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुनः। आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।७.१६।२०८ पुटे
149. *Op. cit* श्रीमद्भगवद्गीता शाङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २०३ पुटे
150. *Ibid* ., ३२० पुटे
151. *Op. cit* श्रीमद्भगवद्गीता , ३९२,३९३ पुटे
152. *Ibid* ., ३९४ पुटे
153. कठोपनिषद् चौखाम्बा सुरभारती प्रकाशन्। १.२.१५., ६२ पुटे
154. *Op. cit* श्रीमद्भगवद्गीता श्रीमधुसूदनसरस्वतीकृता ४२६ पुटे
155. *Ibid* ., ४४४, ४४५ पुटे
156. *Ibid* ., ४५३ पुटे
157. *Ibid* ., ४५५ पुटे
158. *Ibid* ., ४५६ पुटे
159. *Ibid* ., ४५८,४५९ पुटे
160. *Ibid* ., ४६० पुटे
161. *Ibid* ., ५१६ पुटे
162. *Ibid* ., ५२५,५२६ पुटे
163. *Ibid* ., ५३४,५३५ पुटे
164. *Ibid* ., ७२४ पुटे
165. *Ibid* ., ७२५ पुटे
166. *Ibid* ., ७३८ पुटे
167. प्रेमामृतरसायनम् ६१
168. *Op. cit* महाभरततात्पर्यनिर्णयम् १.१.०७
169. अनुव्याख्यानं ३.४ पुटे ५
170. श्रीमध्वाचार्यर् जीवितवुं दर्शनवुम, आर् वासुदेवन् पोट्टि पुटे ९५

171. वैष्णवम् सुकृतीन्द्र ओरियन्डल् इन्स्टिट्यूट्, पुटे ३१
172. *Op. cit* सर्वमूलग्रन्थाः ३५,३६ पुटे
173. योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।।६.४७। १९५
174. *Op. cit* सर्वमूलग्रन्थाः १३६,१३७ पुटे
175. *Ibid* ., १४४ पुटे
176. महाभारतम् १२.३३४.३
177. ब्रह्मवैवर्ते २१,२२,२३
178. *Op. cit* सर्वमूलग्रन्थाः १५८,१५९ पुटे
179. *Ibid* ., १६२,१६३ पुटे
180. *Ibid* ., १७२ पुटे
181. *Ibid* ., १७८ पुटे
182. *Ibid* ., २१३ पुटे
183. *Ibid* ., २१४ पुटे
184. महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः।। १.अध्यायं, ३वल्ली, ११मन्त्रं कठोपनिषद् चौखाम्बा सुरभारती प्रकाशन्। १७९ पुटे
185. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २१४,२१५ पुटे
186. *Ibid* ., २१८,२१९ पुटे
187. *Ibid* ., २२२ पुटे
188. *Ibid* ., २२४ पुटे
189. बहिरन्तश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दुरस्थं चान्तिके च तत्।।१३.१६। ३२९पुटे
190. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २९३ पुटे
191. *Ibid* ., २९६ पुटे
192. *Ibid* ., ३५ पुटे
193. सर्वदर्शनसंग्रहः २१२ पुटे
194. *Op. cit* श्रीमद्भगवद्गीता २२७ पुटे
195. यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।१८.४६ ।४३७ पुटे ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम।।१८.५४ ।४५१ पुटे
196. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (श्वेताश्वतरोपनिषदि ३.८)२८९ पुटे
197. *Op. cit* श्रीमद्भगवद्गीता २२७ पुटे
198. लिङ्गपुराणम् उत्तर खण्डम्
199. *Op. cit* श्रीमद्भगवद्गीता २४३ पुटे
200. अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम् (बृहदारण्यकोपनिषद् ३.७.९) २२२ पुटे
201. प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव* भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्।।८.१०। *Op. cit* श्रीमद्भगवद्गीता २६५,२६६ पुटे
202. पुरुषः सः परः पार्थः भक्त्या लभ्यस्त्वनन्यया। यस्यान्तः स्थानि भूतानि येन सर्वमिदं ततम्।।८.२२।। *Ibid* ., २७५,२७६ पुटे

203. सततं कीर्तयन्तो मां यतश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।९.१४। *Ibid* ., २९४ पुटे

204. *Ibid* ., ३०४-३०६ पुटे

205. *Ibid* ., ३०९,३१२ पुटे

206. *Ibid* ., ३१३,३१४ पुटे

207. भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनः। ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परन्तप।।११.५४।२८३ पुटे
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव।।११.५५।२८४ पुटे

208. *Op. cit* १.अध्यायं, २वल्ली, २३मन्त्रं कठोपनिषद् चौखाम्बा सुरभारती प्रकाशन्, ७३पुटे ।

209. *Op. cit* श्रीरामानुज-भाष्य ३१९,३२० पुटे

210. एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः।।१२.१।२८५ पुटे

211. *Op.* इत्य श्रीरामानुज-भाष्य ३९७,३९८ पुटे

212. सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः समे प्रियः।।१२.१४।२९४ पुटे
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।१२.१५।२९४
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।।१२.१६।२९५
यो न हृष्यति न द्वेष्टि न शोचति न कांङ्क्षति।शुभाशुभपरित्यागो भक्तिमान् यः स मे प्रियः।।१२.१७।
२९५ पुटे
समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुखेषु समः सङ्गवर्जितः।।१२.१८।२९६ पुटे
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियोनरः।।१२.१९। २९६पुटे
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते। श्रद्धधाना मत्परमा भक्तास्ते अतीव मे प्रियाः।।१२.२०। २९७पुटे

213. *Op. cit* श्रीरामानुज-भाष्य ४०४-४०७ पुटे

214. *Ibid* ., ४७९ पुटे

215. *Ibid* ., ४८७,४८८ पुटे

216. मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽस्मि मे।।१८.६५।४५८ पुटे
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच।।१८.६६।४५९-४७५ पुटेषु
इदं ते नातपस्काय नाभक्ताय कदाचन। न चाशुश्रूषवे वाच्यं न च मां
योऽभ्यसूचयति।।१८.६७।४७६पुटे
य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति। भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः।।१८.६८।४७७ पुटे

217. *Op. cit* श्रीरामानुज-भाष्य ५९५-६०० पुटे

218. *Op. cit* सर्वदर्शनसंग्रहः २०४ पुटे

219. *Op. cit* श्रीमध्वाचार्यर् जीवितवुं दर्शनवुम, आर् वासुदेवन् पोट्टि पुटे ९४

220. *Ibid* ., पुटे १०५

221. *Op. cit* भारतीयदर्शनम् .एस् राधाकृष्णन्, ६६५ पुटे

222. यतीन्द्रमतदीपिका पुटे ४

223. *Ibid* ., पुटे ११३

224. *Ibid* ., पुटे १३५

225. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् *Introduction* ३५पुटे

226. *Ibid* ., Indruduction ३६पुटे

227. *Ibid* ., Indruduction ३७पुटे
228. *Op. cit* श्रीमध्वाचार्यर् जीवितवुं दर्शनवुम, आर् वासुदेवन् पोट्टि पुटे ६२
229. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २८४ पुटे
230. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे १३
231. *Ibid* ., १४,१५
232. *Ibid* ., पुटे १६
233. *Ibid* ., पुटे १७
234. *Ibid* ., पुटे २१,२२
235. *Ibid* ., पुटे २४
236. *Ibid* ., पुटे २३
237. *Ibid* ., २४,२५
238. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १९,२० पुटे
239. *Ibid* ., २२ पुटे
240. *Ibid* ., २४-३१ पुटे
241. *Ibid* ., ३२ पुटे
242. *Ibid* ., ३३ पुटे
243. *Ibid* ., ३४-३९ पुटे
244. *Ibid* ., ४० पुटे
245. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ३६,३७पुटे
246. *Ibid* ., ३९-४१पुटे
247. *Ibid* ., ४३पुटे
248. *Ibid* ., ४५पुटे
249. *Ibid* ., ४८पुटे
250. *Ibid* ., ४९पुटे
251. *Ibid* ., ५०,५१पुटे
252. *Op. cit* श्रीरामानुज-भाष्य ५४पुटे
253. *Op. cit* श्रीमद् भगवद् गीता, पुटे २५०
254. *Op. cit* सर्वमूलग्रन्थाः, २६८,२६९ पुटे
255. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५३२,५३३पुटे
256. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे ५०
257. *Ibid* ., पुटे ५१
258. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् ८० पुटे
259. *Ibid* ., ८१,८२ पुटे
260. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् १०६,१०७पुटे
261. *Ibid* ., १०८,१०९पुटे

Subrahmanian M. “ Śaṅkara-madhva-rαmαnujαcαryāṇāṃ Śrīmad Bhagavadgītα Vyαkhyαnαni - Ekaṃ tulanαtmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# षष्ठोऽध्यायः
# भगवद्गीतायाम् अन्येषां योगानां निरूपणम्


६.० उपोद्घातः

६.१ अन्ये योगाः

६.१.१ आत्मस्वरूपम्

६.१.२ यज्ञचक्रम्

६.१.३ सन्यासम्

६.१.४ ध्यानम् योगञ्च

६.१.५ देवयान-पितृयान विचारौ

६.१.६ दैवी-आसुरी स्वभावौ

६.१.७ वर्णाश्रमधर्मादिनिरूपणम्

६.२ सात्विक-राजस-तामसभेदाः

६.२.१ तपः

६.२.२ दानम्

६.२.३ त्यागम्

६.२.४ कर्त्ता

६.२.५ बुद्धिः

६.२.६ धृतिः

६.२.७ सुखम्

६.२.८ भोजनविचारः

६.३ विभूतियोगम्

६.४ विश्वरूपदर्शनयोगम्

६.५ प्रकृति-पुरुषयोगम्

६.६ उपसंहा

## ६.० उपोद्घातः

शङ्कर-मध्व-रामानुजाचार्याणां भगवद्गीताव्याख्यानेषु कर्म-भक्ति-ज्ञानविषयेषु तेषां मतं कीदृशमिति पूर्वाध्यायेषु विचारः क्रियते। प्रस्थानत्रयेषु *भगवद्गीतायाः* प्राधान्यं शंङ्करभाष्ये स्पष्टतया उक्तमेव। अनेन भाष्यकारेण उक्तविषयादेव अस्य प्राधान्यं द्योतयति। अतः एव अत्र कर्म-ज्ञान-भक्त्यादीन् अतिरिच्य अन्य विषयाः लघुपरिचयमेव अनेनाध्यायेन उद्दिश्यते। एवं विचार्यते चेत् गीताशास्त्रे विषयदौर्लभ्यं नास्ति च। गीताशास्त्रे बहुवारं विचारितविषयाः योगं, ध्यानं, सन्यासम्, आत्मस्वरुपविषयं, सात्विक-राजस-तामस भेदाः, यज्ञचक्रविचारः, विश्वरूपदर्शनयोगः, विभूतियोगः इत्यादि विषयाः निबध्यत। इयं गीताशास्त्रं तक्रकुंभवदेव कियदधिकं मद्नाति तावदधिकं फलं प्राप्तुं शक्यते। पूर्वत्र सूचित विषयेष्वुपरि आचार्यत्रयैः भाष्यसारांशमेव विजिन्त्य अध्यायोपसंहारं करोति।

## ६.१ भगवद्गीतायाम् अन्ये योगाः

अत्र भगवद्गीतायां कर्म-ज्ञान-भक्तियोगात् अन्ययोगमधिकृत्य विचारः क्रियते। गीताशास्त्रे अध्यायनामोऽपि ध्यानयोगं कर्मसन्यासयोगं ज्ञानकर्मसन्यासयोगम् इत्यादि अध्यायनामान्तर्गतं भवति सन्यासमिति पदमधिकृत्य बहुवारं विचारितम्। ध्यानयोगमिति षष्ठाध्याये ध्यानमिति विषयमधिकृत्य विचारं कृतं वा न वा इत्यादिकम् अस्मिन्नध्याये विचारयति। आद्य अध्यायादारभ्य अध्यायनामानाम् अन्ते योगशब्दं प्रयुज्यते। अतः एवं वक्तुं शक्यते गीताशास्त्रे अष्टादशयोगाः सन्ति। अर्जुनविषादयोगात् आरभ्य मोक्षसन्यासपर्यन्तम् अत्रोक्ताः योगशब्दमपि उपयुक्तमेव एतादृश बहवः सविशेषता गीताशास्त्रे वर्तते। तद् एव प्रस्थानत्रये अन्यश्रुतिप्रस्थानात् (उपनिषद्) सूत्रप्रस्थानात् (ब्रह्मसूत्रात्) च सविशेषता। अतैव प्रस्थानत्रये, *भगवद्गीतायाः* महत्वम्, अथवा अद्यापि नूतन व्याख्याकाराः व्याख्यायति। नूतनभाषाभिः अपि भाषान्तराणि, व्याख्यानानि आगच्छति इत्येतत् अद्यतनकालीन समाजे अस्य प्रसक्तिं द्योतयति। दार्शनिकतले गीताशास्त्रे उक्तात्मस्वरूपादिकमेव अन्यशास्त्रेषु

उक्तरीत्या इतोऽपि सुस्वीकार्यम्। एवं यज्ञचक्रस्य वर्णना इत्यादिकं सुस्पष्टमेव। अध्यायेषु अन्यप्रस्थानत्रये न पश्यति विश्वरूपदर्शनादिकम्। एतादृशविषयाः अध्यायेऽस्मिन् विचार्यते।

### ६.१.१. आत्मस्वरूपानुसन्धानम्

गीताशास्त्रे द्वितीयाध्याये सांख्ययोगे त्रयोदशतम श्लोके आत्मनः स्वरूपादि विषयाणि विचारयति।

" देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति । २.१३।
नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः। २.१६।
अन्तवन्त इमे देहे नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत।। २.१८।
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते।२.१९।
न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।२.२०।
वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।२.२२।
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।२.२३।
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।।२.२४।
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।

तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि।।२.२५।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।

तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।२.२७।

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।

तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि।।"२.३०।

अत सातत्यगमने इति धातोः मनिण् प्रत्ययेन निष्पन्नोऽयं शब्दः। अस्य विषयस्योपरि जीवात्म-परमात्मनोः ऐक्यत्ववादिनः अद्वैतीनां मतः कीदृशः इति अत्र विचारयति (२.१३) तम श्लोकानुसारेण देहे हेन प्रकारेण कौमारं, यौवनं, जीर्णावस्था, एताः तिस्राः अवस्था अन्योन्यविलक्षणाः। तासां प्रथमावस्थानाशे न नाशो द्वितीयावस्थोपजनने न उपजननम् आत्मनः, किं तर्हि अविक्रियस्य एव द्वितीयतृतीयावस्थाप्राप्तिः आत्मनो दृष्टा। तद्वत् एव देहाद् देहान्तरप्राप्तिः। यद्यपि आत्मविनाशनिमित्तो मोहो न सम्भवति नित्य आत्मा इति विजानतः तथापि शीतोष्णसुखदुखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते, सुखवियोगनिमित्तो दुखसंयोगनिमित्तः च शोक[१] इति एतद् अर्जुनस्य वचनम्। (२.१६) तम श्लोकेन यथा त्वंमपि तत्वदर्शिनां दृष्टिम् आश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियतरुपाणि द्वन्दानि विकारः अयम् असन् एव मरीचिजलवत् मिथ्या अवभासते इति मनसि निश्चित्य तितिक्षस्व इति भाष्यस्याशयः[२]।(२.१८) तम श्लोकस्य भाष्यसारांशरुपेण शोकमोहादिसंसारकारणनिवृत्यर्थं गीताशास्त्रं न प्रवर्तकंमिति एतस्य अर्थस्य साक्षिभूते ऋचौ आनिनाय भगवान्। यत् तु मन्यसे युद्धे भीष्मादयो मया हन्यते अहम् एव तेषां हन्ता इति एषा बुद्धिः मृषा एव ते। अग्रिमश्लोकेन हन्ता अहं हतः अस्मि अहम् इति देहहननेन आत्मानं यौ विजानीयः तौ आत्मस्वरुपानभिज्ञौ इत्यर्थः[३]। यस्माद् आत्मा न हननक्रियायाः कर्त्ता भवति नच कर्म भवति अविक्रियत्वात्। (२.२०) यद्यपि आद्यन्तयोः विक्रिययोः प्रतिषेधे सर्वो विक्रियाः प्रतिषिद्धा भवन्ति तथापि मध्यभाविनीनां विक्रियाणां स्वशब्दैः एव तदर्थैः प्रतिषेधः कर्तव्य इति अनुक्तानाम् अपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्याद् इति

आह शाश्वत इति अपक्षयलक्षणा विक्रिया प्रतिषिध्यते शश्वद्भवः शाश्वतः। अस्मिन् मन्त्रे षट् भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यते। सर्वप्रकार क्रियारहित आत्मा इति [४]। अग्रिम श्लोकेन वस्त्राणि दुर्बलतां गतानि लोके परित्यज्य अभिनवानि उपादत्ते पुरुषः अन्यानि तद्वद् एव सङ्गच्छति आत्मा पुरुषवद् अविक्रिय एव इत्यर्थः। प्रकृतं देहिनं निरवयवत्वात् न अवयवविभागं कुर्वन्ति शस्त्राणि। अग्निः अपि न भस्मीकरोति। एवमपां हि सावयवस्य वस्तुन आर्द्रीभावकरणेन अवयवविश्लेषापादने सामर्थ्यं तद् न निरवयवे आत्मनि सम्भवति। मारुतेनापि शोषयितुं न शक्यते। अतः अन्योन्यनाशहेतुनि भूतानि एनम् आत्मानं नाशयितुं नोत्साहन्ते [५]। अतः आत्मा नित्यः। (२४) तमश्लोकेन नित्यत्वात् सर्वगतत्वात् स्थाणुः इव स्थिरइति एतत्। स्थिरत्वात् अचलः अयम् आत्मा अतः चिरन्तनो न कारणात् कुतश्चित् निष्पन्नः अभिनवः इति भाष्यम्। दुर्बाधत्वात् आत्मवस्तुनः पुनः पुनः प्रसङ्गम् आपाद्य शब्दान्तरेण तद् वस्तु निरुपयति। अव्यक्तं तत्वं बुद्धिगोचरताम् आपन्नं सत् संसारनिवृत्तये। अनन्तर श्लोकेन अयमात्मा अनिन्द्रियगोचरत्वात् अचिन्त्यः, न विकारीनिरवयवत्वात् च अविक्रियः, न हि निरवयवं किञ्चित् विक्रियात्मकं दृष्टम्। अविक्रियत्वात् अविकार्यः अयम् आत्मा तम् आत्मानं विदित्वा त्वं न [६]अनुशोचितुम् अर्हसि। (२७)तम श्लोकेन लब्धजन्मनो ध्रुवः अपरिहार्याः अयं जन्ममरणलक्षणः अर्थः अतः न त्वं शोचितुमर्हसि [७]। कार्यकारणसङ्घातात्मकानि अपि भूतानि उद्दिश्य शोको न युक्तः। (३०) अनेन श्लोकेन शरीरी सर्वदा सर्वावस्थासु निरवयवत्वात् नित्यत्वात् च तत्र अवध्यः शरीरे सर्वस्य सर्वगतत्वात् स्थावरादिषु स्थितः अपि। प्राणिजातस्य देहे वध्यमाने अपि अयं देही न वध्यो यस्मात् भीष्मादीनि उद्दिश्य। इह परमार्थतत्वापेक्षायां शोको मोहो वा न सम्भवति। न केवलं परमार्थतत्वापेक्षायाम् एव [८]। एवं भवति आत्मस्वरूपविषये शंङ्करभाष्यानुसारेण अद्वैतमतम्।

द्वैतमतानुसारेण (२.१३) अस्य श्लोकस्य भाष्यस्य कौमारादिशरीरभेदेऽपि देही तदिक्षिता सिद्धः, एवं देहान्तरप्राप्तावपि ईक्षितृत्वात्। नहिजडस्य शरीरस्य कौमाराद्यनुभवः

सम्भवति। मृतस्य वाय्वाद्यपगमादनुभवाभवः अहं मनुष्य इत्याद्यनुभवाच्चैतत् सिद्धमिति चेत् न । सत्येवाविशेषे देहे सुप्त्यादौ ज्ञानादिविशेषादर्शनात्। समश्चाभिमानो मनसि। नह्यपौरुषेये पौरुषेयज्ञानादयः कल्पयितुं शक्याः। विना च कस्यचित् वाक्यस्यापौरुषेयत्वं सर्वसमयाभिमतधर्माद्यसिद्धिः। सर्वाभिमतस्य प्रमाणं विना निषेद्धुमशक्यत्वात्। सर्वाभिमतेरेव प्रमाणत्वात्। न च येन केनचिदपौरुषेयम् इत्युक्तमुक्तवाक्यसमम्। अनादिकालपरिग्रहसिद्धत्वात्। अतः प्रामाण्यं श्रुतेः। अतः कुतर्कैः धीरस्तत्र न मुह्यति। अस्य तात्पर्यरूपेण यथा-मम स्वकीयदेहान्तरप्राप्तिरपि नास्तीति दर्शयितुं देहिन इति विशेषणम्। भवदादीनां सा भविष्यतीत्यपि शोको न कर्तव्यः [९]। देहस्येदानीमप्यन्यथात्वदर्शनात्। (१६) तम श्लोकस्य तात्पर्ये न च युद्धात्परलोकदुःखमिति शोकः। असत्कर्मणः सकाशाद्भावो नास्ति।

सत्कर्मणः सकाशादभावो नास्तीति नियतत्वात्। सन्निति व्यवह्रियमाणमेव पदार्थस्वरूपमुत्पत्तेः प्राङ् नाशोत्तरं च नास्तीति सर्वलोको व्यवहरति। न च सदसद्विलक्षणं किञ्चिदस्तीति किञ्चिन्मानम्। न चासतः ख्यात्ययोगात्सतो बाधायोगादुभयविलक्षणम् भ्रान्तिविषयम्। असतः ख्यात्ययोगादिति वदतोऽसतः ख्यातिरभूत् न वा। यदि नाभून्नतत्ख्यातिनिराकरणम्। यद्यभूत्तथापि। न चासतोऽसत्वेन भान्तौ सत्वेन च ख्यातिर्नास्तीत्यत्र किञ्चिन्मानम्। असद्व्यवहारलोपप्रसङ्गाच्च। यदविद्यमानं रूपं तस्य सत्वेन प्रतीतिरेव भ्रान्तित्वाच्च। अनिर्वचनीयत्वपक्षेऽपि सदिदं रजतमित्यविद्यमानसत्वप्रतीतिं विना नहि भान्तित्वम्। भान्तिसत्वाङ्गीकारेऽप्यभ्रान्तं सदिदं [१०] रजतमित्यविद्यमानसत्वप्रतीतौ हि प्रवर्तते। (२.१८) श्लोकस्य तात्पर्यरूपेण शरीरिणां तु देहहान्यादिनाशो विद्यत एव। " येन सर्वमिति ततमिति " तस्यैव लक्षणकथनात्। न जीवानां देशतो गुणतश्च पूर्णता। अनिच्छया देहहान्यादेरेव दुखावाप्तिः सिद्धा। तस्मादनाशिनोऽप्रमेयस्य विष्णोः पूजनार्थं युध्यस्व। तत्प्रसादाधीनत्वादुखनिवृत्तेः सुखस्य च। जीवपक्षे नित्यस्योक्ता इत्युक्तत्वादनाशिन इति पुनरुक्तिः। अविनाशि येन सर्वमिदं ततमित्युक्तस्यैवानाशिनोऽप्रमेयस्येति प्रत्यभिज्ञानाच्च। इमे देहा इति विशेषणान्नित्यश्चिदानन्दात्मकः

स्वरूपभूतो देहो मुक्तानामपि विद्यत इति ज्ञायते। मिथ्याविशेषोक्तौ चाप्रामाण्यं श्रुतेः। मिथ्यात्वं च मिथ्यैव तेषाम्। अतः सत्यत्वं सत्यं स्यात्।। उपाधिकृतभेदेऽप्युपाधेर्मिथ्यात्वे त्वप्राप्तमेवोपाधिभेदं प्रापयित्वा पुनर्निषिध्यत इति स एव दोषः। सत्योपाधिपक्षेपि हस्तपादाद्युपाधिभेदेऽपि भोक्तुरेकत्वदृष्टेरेकेनैवेश्वरेण सर्वोपाधिगतं सुखं दुखं भुज्येतेत्येवमादयो दोषाः समा एव। अचेतनानामनुभवाभावान्न तत्साम्यम्।[११] अतो जीवेश्वरयोर्भेद एवेति। अग्रिम श्लोकतात्पर्यरूपेण य एनं जीवं वेत्ति हन्तारं स्वातन्त्र्येण। अन्यथा मया हतांस्त्वं जहीत्यादिविरोधः। चेतनं प्रति य एनमिति परमात्मनोऽपि समम्। (२.२०) जीवेश्वरयोर्नित्यत्वे मन्त्रवर्णोऽप्यस्तीत्याह। न जायते म्रियत इति।अयं ना परमपुरुषो भूत्वा विद्यमान एव देहसम्बन्धरूपेणापि भविता न। मरणं तु देहवियोग इति प्रसिद्धमेव। न हि घटादीनां मरणव्यवहारः। स्वरूपानाशः कैमुत्येनैव सिद्धः।[१२] अयं जीवोऽप्यजो नित्यश्च।(२.२२) श्लोकस्य तात्पर्यरूपेण जीवस्यापि शरीरसंयोगवियोगावेव जनिमृति यतस्ततो न दुखकारणमित्याह। अनन्तरश्लोकेन स्वतः प्रायो निमित्तैश्चाविनाशिनोऽपि केनचिन्निमित्तविशेषेण स्यात्, ककच्छेदवत्[१३], इत्यतो विशेषनिमित्तानि निषेधति। (२.२४) श्लोकस्य तात्पर्यरूपेण अच्छेद्यत्वादिकं जीवस्यापि तत्सममित्याह। नित्यं सर्वगते स्थितः अणुश्चायमिति सर्वगतस्थाणुः। सर्वगतो विष्णुस्तदधीनत्वादिकं तत्स्थत्वम्। हेतुतोऽपि तत्स्थत्वान्न चलतीत्यचलः। न तेन शब्देन सह वर्तमान इति सनादन एव सनातन। अच्छेद्योऽयमित्यादिपुनरुक्तिश्चान्चथा। यस्मिन्नयं स्थितः सोऽव्यक्ताचिन्त्यादिरूपः। एवं ज्ञातः परमेश्वरः सर्वदुखनाशं करोतीति नानुशोचितुमर्हसि[१४]। (२.२५) सर्वगतश्चेत्परमात्मा किमिति तथा न दृश्यत इत्यतो वक्ति। न च सा शक्ति कदाचिदन्यथा भवति। यानि यान्यस्य रूपाणि तानि सर्वाण्यपेयेवं भूतानीति दर्शयितुमेनमयमित्यादिपृथग्वचनम्[१५]। जीवे तु सर्वजीवेष्वनुगमार्थम्। (२.३०) तम श्लोकस्य यस्मादयमीश्वरः सर्वस्य जीवस्य सूक्ष्मे स्थूले च देहे रक्षकत्वेनावस्थितः अत एवावध्यः। नस्वसामर्थ्यं कस्यापि। एवं भवति द्वैतसिद्धान्तानुसारेण आत्मस्वरूपम्।

अत्र आत्मनः स्वरूपादि विषये विशिष्टाद्वैतदर्शनानुसारेण रामानुजभाष्ये कथं विवृणोति इति अत्र विस्तरति। (२.१३) आत्मनां नित्यत्वाद् आत्मनो न शोकस्थानम्। एतावत् अत्र कर्तव्यमात्मानं नित्यानाम् एव अनादिकर्मवश्यतया तत्तत्कर्मोचितदेहसंस्पृष्टानां तैरेव देहैः बन्धनिवृत्तये शास्त्रीयं स्ववर्णोचितं युद्धादिकम्। अनभिसंहितफलं कर्म कुर्वताम् अवर्जनीयतया इन्द्रियैः इन्द्रियार्थस्पर्शाः शीतोष्णादिप्रयुक्तसुखदुखदा भवन्ति, ते तु [१६]यावच्छास्त्रीयकर्मसमाप्ति क्षन्तव्या। (२.१६) अस्य भाष्ये देहस्य अचिद्वस्तुनः असत्वम् एव स्वरूपम्, आत्मनः चेतनस्य सत्वम् एव स्वरूपम्, इति निर्णयो दृष्टः। विनाशस्वभावो हि असत्वम्, अविनाशस्वभावश्च सत्वम्। तदेव सत्वासत्वव्यपदेशहेतुः इति गम्यते। अत्र तु सत्कार्यवादस्य असगङतत्वात् न तत्परोऽयम्। देहात्मस्वभावाज्ञानमोहितस्य तन्मोहशान्तये हि उभयोः नाशित्वानाशित्वरूपस्वभावविवेक [१७] इति। (२.१८) अस्य श्लोकस्य भाष्ये न च अनेकोपचयात्मक आत्मा उपलभ्यते। सर्वत्र देहे अहम् इदं जानामि इति देहात् अन्यस्य प्रमातृतया एकरूपेण उपलब्धेः। न च देहादेः इव प्रदेशभेदे प्रमातुः आकारभेद उपलभ्यते, अत एकरूपत्वेन अनुपचयात्मकत्वात् प्रमातृत्वाद् व्यापकत्वात् च आत्मा नित्यः। देहः तु उपचयात्मकत्वात् शरीरिणः कर्मफलभोगार्थत्वाद् अनेकरूपत्वाद् व्यापकत्वात् च विनाशी। देहस्य विनाशस्वभावत्वाद् आत्मनो नित्यस्वभावत्वात् आत्मनो नित्यस्वभावत्वात् च उभौ अपि न शोकस्थानम्। शस्त्रपातादिपरुषस्पर्शान् अवर्जनीयान् स्वगतान् अन्यगतांश्च धैर्येण सोढ्वा अमृतत्वप्राप्तये अनभिसंहितफलं युद्धाख्यं[१८] कर्म आरभस्व।(२.१९) उक्तैः एव हेतुभिः नित्यत्वाद् अपरिणामित्वाद् आत्मनो जन्ममरणादयः सर्वा एव अचेतनदेहधर्मा न सन्ति।(२.२०)अतः सर्वदेहगत आत्मा अजः अत एव नित्यः शाश्वतः प्रकृतिवदविशदसततपरिणामैः अपि न अन्वीयते। अतः पुरातनः अपि नवः, सर्वदा अपूर्ववद् अनुभाव्य। अतः शरीरे हन्यमाने अपि न[१९] हन्यते अयम् आत्मा। (२.२२) धर्मयुद्धे शरीरं त्यजतां त्यक्तशरीराद् अवगम्यते। कल्याणानि वासांसि गृह्णताम् इव हर्षनिमित्तम्। (२.२३,२४) शास्त्राग्न्यम्बुवायवः छेदनदहनक्लेदनशोषणानि आत्मानं प्रति कर्तुं न शक्नुवन्ति।

सर्वगतत्वाद् आत्मनः सर्वतत्वव्यापकस्वभावतया सर्वेभ्यः तत्वेभ्यः सूक्ष्मत्वात् अस्य तैः व्याप्त्यनर्हत्वाद् व्याप्यकर्तव्यत्वात् च छेदनदहनक्लेदनशोषणणानाम् [२०] । अतः आत्मा स्थिरस्वभावःअप्रकम्प्यः पुरातनः च। (२.२५) सर्ववस्तुविजातीयत्वेन तत्तत्स्वभावयुक्ततया चिन्तयितुम् अपि न अर्हः। अतः च विकारानर्हः।[२१] उक्तलक्षणम् आत्मानं विदित्वा तत्कृते न अनुशोचितुम् अर्हसि। (२.२७) उत्पन्नस्य विनाशो अवर्जनीय उपलभ्यते। तथा विनष्टस्य अपि जन्म अवर्जनीयम्। मृद्द्रव्यस्य पिण्डत्वघटत्वकपालत्वचूर्णत्वादिवत् परिणामिद्रव्यस्य परिणामपरम्परा अनिर्वजनीया। तत्र पूर्वावस्थस्य द्रव्यस्य उत्तरावस्थाप्राप्तिः विनाशः सा एव तदवस्थस्य उत्पत्तिः [२२] । एवम् उत्पत्तिविनाशाख्यपरिणामपरम्परा परिणामिनो द्रव्यस्य अपरिहार्य इति न तत्र। (२.३०) देवादिदेहिनो वध्यमाने अपि अयं देही नित्यम् अवध्य। देवादि स्थावरान्तराणि विषमाकाराणि अपि उक्तेन स्वभावेन स्वरूपतः समानानि नित्यानि च। देहगतं तु वैषम्यम् अनित्यत्वं च। ततो देवादीनि सर्वाणि भूतानि उद्दिश्य न केवलं भीष्मादीन् प्रति[२३]। एवमुक्त्वा अनेनाचार्येण कृत भाष्ये आत्मविषयम् उपसंहरति।

### ६.१.२ यज्ञचक्रम्

अत्र यज् (इज्यते देवता अत्र इति वा )धातोः (यजयाचयतविच्छप्रच्छ-रक्षो नङ् इति पाणिनीय( ३.३.९०) सूत्रानुसारेण नङ् प्रत्ययं युज्य शब्दनिष्पत्तिः। तृतीयाध्याये कर्मयोगे कर्मानुष्ठानस्य प्राधान्यं भगवता विस्तरति। तस्मिन्नावसरे देवान् अनेन यज्ञेन भावयत, देवाः वृष्ट्यादिना युष्मान् भावयन्तु एवं परस्परं भावयन्तः। अनेन श्रेयः परं मोक्षलक्षणं ज्ञानप्राप्ति क्रमेण अवाप्स्यथा। अत्र गीताशास्त्रे यज्ञस्य त्रैविध्यत्वं विचारयति। तत्रसात्विक-राजस-तामसादि भेदेन भेदत्वं तद् श्रद्धात्रयविभागो नाम सप्तदशमाध्याये ११,१२,१३तमश्लोकैः-

"अफलाकांङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्विकः।।१७.११।
अभिसन्धाय तु फलं दंभार्थमपि चैव यत्।

इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।। १७.१२।

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।

श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।।"१७.१३

अत्राद्यं यज्ञस्य सात्विक-राजस-तामस भेदं कथमिति अद्वैतभाष्यानुसारेण विचारयति। "न अनेन पुरुषार्थो मम कर्तव्यः " इत्येवं निश्चित्य अफलार्थिभिः यज्ञो विधिदृष्टः शास्त्रचोदनादृष्टो यो यज्ञः निवर्तयते। यज्ञस्वरुप निवर्तनमेव कार्यमिति मनःसमाधाय यज्ञं करोति सः यज्ञः सात्विकः उच्यते। राजसं नाम अभिसन्धाय उद्दिश्य फलं दम्भार्थमपि च एव यत् इज्यते तत्। यदा चोदितविपरीतम् असृष्टान्नं मन्त्रहीनम् अदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते [२४]।

यज्ञचक्रस्य निरुपणसमये निश्चयेन यज्ञं किमिति वक्तव्यमेव। अत्र द्वैतमतानुसारेण सात्विकादि यज्ञे कीदृशमिति निरूप्य यज्ञचक्रस्य च विषये मध्वानां मतं कीदृशमिति विचारयति। श्रद्धात्रयविभागयोगो सप्तदशाध्याये एकादशम आरभ्य त्रयोदशतम श्लोकैः विचारयति अस्य श्लोकेषु भाष्ये किमपि न उक्तम्।अस्य तात्पर्ये यामान्तरितपाकं तु यातयाममुदीर्यते। क्वचिच्च गतसारं स्यान्नियम्यं यातमस्य यत्। इति च पूर्वं स्वादुपश्चादन्यथाजातं गतरसम्। शुद्धभागवतानां तु स्वभावापेक्षयैवतु। स्वादुत्वादि विजानीयात् पदार्थानां न चान्यथा इति। १२,१३ श्लोकानां तात्पर्यरूपेण यथा सूदशास्त्रे - यागात्तु राजसात् स्वर्गः साङ्कल्पिक उदाहृतः। लोकः स दीनदेवानां सनाम्ना वासवादिभिः। विष्णावश्रद्धयाऽयोग्यकामच्चैषां पुनर्भवेत्। नरकं च विना यज्ञं राजसा नरलोकगाः। निषिद्धकर्म कुर्युश्चेदीयुस्तेनरकं ध्रुवम्। कदाचित् सात्विकाः कुर्युः कर्मराजसतामसम्। एतावत्पर्यन्तं यज्ञं किमिति उक्तम्, अर्थात् अस्य सात्विकादि भेदमुक्तम्[२५]।

अत्र यज्ञचक्रविषये विशिष्टाद्वैतदर्शनानुसारेण कथं भवति तेषां मतमिति विचारयत्यत्र। अत्राद्यं यज्ञस्य सात्विकादि भेदम् एवं वर्ण्यते। (११)फलाकांक्षारहितैः पुरुषैः

शास्त्रदृष्टः मन्त्रद्रव्यक्रियादिभिः युक्तः भगवदाराधनत्वेन स्वयं प्रयोजनतया यष्टव्यमिति मनः समाधाय यो यज्ञ करोति स सात्विकः। राजसं नाम फलाभिसन्धियुक्तैः दम्भगर्भो यशः फलं च यः यज्ञ इज्यते तं यज्ञं राजसमिति। तमसस्तु ब्राह्मणोक्त विधिहीनं सदाचारयुक्तैः विधिविद्भिः ब्राह्मणैः यजस्व इति उक्तिहीनम् मन्त्रहीनम् अदक्षिणं श्रद्धाविरहितं च यज्ञं अचोद्तव्यं च यज्ञं तामसमिति परिचक्ष्यते [२६]।

इत्युक्तम् अनन्तरं तृतीयाध्याये कर्मयोगे चतुर्दशतमश्लोकेनारभ्य श्लोकत्रयेण यज्ञचक्रमधिकृत्य विस्तरति।

"अन्नाद्‌भवन्ति भूतानि पर्जन्यादन्नसंभवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।३.१४।
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।।३.१५।
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति।।" ३.१६।

तृतीयाध्यायस्य चतुर्दशतमश्लोकभाष्ये भुक्तात् अन्नात् लोहितरेतः परिणतात् प्रत्यक्षं जायन्ते भूतानि। पर्जन्यात् वृष्टेः अन्नसम्भवः, यज्ञात् भवति पर्जन्यः। य़ज्ञः अपूर्वं स च यज्ञः कर्मसमुद्भवः ऋत्विग्यजमानयोः च व्यापारः कर्मः ततः समुद्भवो यस्य यज्ञस्य सः यज्ञः कर्मसमुद्भवः [२७]। अनन्तरश्लोकस्य व्याख्याने कर्म ब्रह्मोद्भवं ब्रह्मवेदः स उद्भवः कारणं यस्य तत् कर्मब्रह्मोद्भवं विद्धि, विजानीहि। यस्मात् साक्षात् परमात्माख्यात् अक्षरात् पुरुषनिश्वासवत् समुद्भूतं ब्रह्म तस्मात् सर्वात्थप्रकाशकत्वात् सर्वगतम्। सर्वगतमपि सत् नित्यं सदा यज्ञविधिप्रधानत्वात् यज्ञे प्रतिष्ठितम्। अन्तिमश्लोकेन इत्थम् ईश्वरेण वेदयज्ञपूर्वकं जगत्चक्रं प्रवर्तितं न अनुवर्तयति। इहलोके यः कर्मणि अधिकृतः सन् अघायुः पापजीवनः इति यावत् इन्द्रियारामः मोघं वृथा हे पार्थ सः जीवति [२८]।

अनन्तरं यज्ञचक्रविषये द्वैतिनां मतं किमिति विचारयति। तृतीयाध्याय(कर्मयोग)स्य १४तम श्लोकभाष्ये यज्ञः पर्जन्यान्नत्वात् तत्कारणमुच्यत्। पूर्वयज्ञविवक्षायां चक्रप्रवेशो न भवति। तद्ध्यापाद्यं कर्मविधये। न तु सामान्यमात्रेणाणेदानीं कार्यम्। मेधचक्राभिमानी च पर्जन्यः। तच्च यज्ञात् भवति। अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठति। आदित्याज्जायते वृष्टि वृष्टेरन्नं ततः प्रजाः।। इति स्मृतौ उभयवचनादित्यात् समुद्राच्चाविरोधः। अतश्च यज्ञात् पर्जन्योद्भवः सम्भवति। यज्ञो देवतामुद्दिश्य द्रव्यपरित्यागः [29]। ३.१५ अस्य श्लोकस्य बृहत् भाष्यमेवाकरोत्। कर्म ब्रह्मणो जायते। " एष ह्येव साधु कर्म कारयति " बुद्धिर्ज्ञानमित्यादि न च मुख्ये सम्भाव्यमाने पारम्पर्येण औपचारिकं कल्प्यम्। न च जडानां स्वतः प्रवृत्तिः सम्भवति। जीवस्य च प्रतिबिम्बस्य बिम्बपूर्वैव चेष्टा। अक्षराणि ह्यभिव्यज्यते परं ब्रह्म न हि एकशब्देन द्विरुक्तेन भेदश्रुतिं विना वस्तुद्वयं कुत्रचिदुच्यते। अक्षराणि नित्यानि। अस्योपस्थापनाय श्रुतिस्मृतिभगवद्वचन सहायेन च। न हि अस्वातन्त्र्येण कर्तुः प्राधान्यम्। अस्वातन्त्र्यं च तदमति पूर्वकत्वेन भवति। उत्पत्तिवचनान्यभिव्यक्त्यर्थान्यभिमानिदेवता विषयाणि च। अभिव्यञ्चके कर्तृ वचनं चास्ति। " कृत्स्नं शतपथं चक्रे" इति कथमादित्यस्था वेदास्तेनैव क्रियते। वचनमात्रात् च निर्णयात्मकशारीरकोक्तं बलवत्। शास्त्रं योनिः यस्येति तु शास्त्रयोनित्वम्। जन्माद्यस्य यतः इत्युक्ते प्रमाणं हि तत्रापेक्षितम्। न तु तस्य जातत्वं वेदकारणत्वं वा, न हि वेदकारणत्वं जगत्कारणत्वहेतुः। तस्मात् वेदप्रमाणकत्वमेवात्र विवक्षितम्। अतो नित्यान्यक्षराणि, यत एवं परम्परया यज्ञाभिव्यङ्ग्यं ब्रह्म तस्मात् तन्नित्यं यज्ञे प्रतिष्ठितम्। तानि च अक्षराणि भूताभिव्यङ्ग्यानीति चक्रम्। १६ तम श्लोकस्य भाष्ये तदेतत् जगत्चक्रं यो न अनुवर्तेति स तद्विनाशकत्वादघायुः पापनिमित्तमेव यस्याऽयुः सोऽघायुः [30]। एवं भवति द्वैतमतानुसारीययज्ञचक्रविचारः।

इतः परं (३.१४) यज्ञचक्रविषये चिन्तयति। सर्वाणि सर्वलोकसाक्षिकम्। यज्ञात् पर्जन्यो भवति इति च शास्त्रेण अवगम्यते। इत्यादिना यज्ञः द्रव्यार्जनादि कर्तृपुरुषव्यापाररूपकर्मसमुद्भवः अनन्तरश्लोकेन अत्र च ब्रह्मशब्दनिर्दिष्टं

प्रकृतिपरिणामरूपशरीरम् इति ब्रह्मशब्देन प्रकृतिः निर्दिष्टा। अतः कर्मब्रह्मोद्भवमिति प्रकृति परिणामरूपशरीरोद्भवं कर्म इत्युक्तं भवति। अक्षरशब्दनिर्दिष्टो जीवात्मा अन्नपानादिना तप्ताक्षराधिष्ठितं शरीरं कर्मणो प्रभवति इति कर्मसाधनभूतं शरीरम् अक्षरसमुद्भवम्। तस्मात् ब्रह्मसर्वाधिकारिगतं शरीरं नित्यं यज्ञ[३१] प्रतिष्ठितम्। (१६) इत्यस्य भाष्ये परमपुरुषेण प्रवर्तितमिदं चक्रम् "अन्नात् भवन्ति भूतानि "इत्यत्र भूतशब्दनिर्दिष्टानि सजीवानि शरीराणि। पर्जन्यादन्नं यज्ञात् पर्जन्यः यज्ञश्च कर्तृव्यापारानुरूपात् कर्मणः कर्म स सजीवः शरीरात् सजीवं शरीरं च पुनरन्नात् इति अन्योन्यकार्यकारणभावेन चक्रवत् परिवर्तमानम्। इह साधने वर्तमानो यः कर्मयोगाधिकारी ज्ञानयोगाधिकारी वा न प्रवर्तयति यज्ञशिष्टेन देहधारणम् अकुर्वन् सः अघायुः भवति। अतः एव इन्द्रियारामो भवति, नात्मरामः इन्द्रियाणि एवास्य उद्यानानि भवन्ति। अयज्ञशिष्टवर्धितदेहमनस्त्वेन उद्रिक्तरजस्तमकः आत्मावलोकेन विमुखतया विषयभोगैकरतिः भवति[३२]। अतो ज्ञानयोगः द्वौ यतमानः अपि निष्फलप्रयत्नतया मोघं पार्थ स जीवति।।

## ६.१.३ सन्यासयोगम्

सम्, नि उपसर्गद्वयपूर्वक अस् धातोः घञ् प्रत्ययेन निष्पन्नोऽयं शब्दः। अस् धातोः अस् क्षेपणे, अस् भुवि, अस् उपवेशने इत्यादिभिः च सन्यासशब्दं जायते। सन्यासम् आश्रमधर्मेषु चतुर्थाश्रमम् (ब्रह्मचर्य, गार्हस्थ्यं, वानप्रस्थ, सन्यासम्) अथवा अन्तिममेव। सम्यक् न्यासः सन्यासः, अस्य प्रधानेन द्वौ भेदौ स्तः यथा विद्वत् सन्यासं, विविदिषा सन्यासञ्च। विविदिषा सन्यासं ब्रह्मचर्यादिषु आश्रमेषु चतुर्थाश्रम् विद्वत् सन्यासस्तु ज्ञानयोगेन लभ्यमान सन्यासमेव (ज्ञानयोगयुक्तञ्च )। सन्यासं विना ज्ञानयोगम् अनुष्ठातुं न शक्यते इति *अद्वैतधर्ममिति* ग्रन्थकारस्य मतम्। अस्य विषयस्योपरि वैदिककालात् आरभ्य पन्थानद्वयौ स्तः। शङ्करादिवत् ब्रह्मचर्याश्रमात् साक्षात् सन्यासप्रवेशः। अन्यत् ब्रह्मचर्य, गृहस्थ, वानप्रस्थ एवं क्रमेण गत्वा सन्यासं प्राप्य मुक्तिपदमाप्नोति। अनेन मार्गेण

याज्ञवल्क्यादयः मुक्तिपदं प्राप्तवन्ताराः च। बृहदारण्यकोपनिषदि ४.४.२२ ( स वा एष महानज आत्माऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय) "तमेदं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन, दानेन तपसाऽनाशके तौ तमेव विदित्वा मुनिर्भवति। एतमेव प्रव्रचिनो लोकमिच्छन्तः प्रव्रजन्ति" [३३]। इत्यादिभिः श्रुतिः च याज्ञवल्क्यमधिकृत्य न केवलं बृहदारण्यके छान्दोग्यादिषु उपनिषत्सु अपि तं ब्रह्मयज्ञमधिकृत्य विचार्यते। वैदिककालीनाः मुनयः यथा - आरुणिः, श्वेतकेतुः, एतादृशाः बहवः सन्ति। अद्वैतमतप्रचारकः श्रीशङ्करस्य कृते सन्यासी परम्परा वर्तते। अस्य परमगुरुः, गुरुः, श्रीशङ्करः, शङ्करस्य चत्वारो शिष्याः पश्चिममठस्य अधिपतिः पद्मपादः, पूर्वमठस्य अधिपतिः हस्तामलकः, दक्षिणमठस्य अधिपतिः सुरेश्वरः, उत्तरमठस्य अधिपतिः तोटकः इत्यादि क्रमेण अग्रे चलति। सन्यासविषयस्य चर्चा न केवलं वैदिकग्रन्थेषु। पुराणेषु, उपपुराणेषु, इतिहासौ, स्मृतौ, धर्मसूत्रादि ग्रन्थेषु च सन्यासिनः लक्षणादिकं जीवनं, व्यवहारं, तेषां प्रवृत्तयः, समाजाय तेषां योगदानम् इत्यादिकं विचारितमेव। जनकमहाराज्ञः सदसि याज्ञवल्क्यः गार्गी इत्यादीनां प्रसिद्धानां स्थानम् आर्षग्रन्थेषु उक्तमेव। सम्यङ् नित्यमास्ते यस्मिन् यद् वा सम्यङ् न्यस्यन्ति दुखकर्माणि येन सः सन्यासः स प्रशस्तो विद्यते यस्य सा सन्यासी अन्यथा वदति चेत् मोहादि आवरणादिकं वा पक्षपातादिकं च त्यक्त्वा विषयेषु विरक्तो भूत्वा भूमौ परोपकारार्थम् इति विचारेण अथवा सम्यक् न्यस्यन्त्य धर्माचरणानि येन वा, सम्यक् नित्यं सत्कर्म स्वास्ते उपदिशति स्थिरीभवति येन ससन्यासो विद्यते, यस्य ससन्यासी। तदेव बृहदारण्यके " ते ह स्म पुत्रैषणायाश्च, वित्तैषणायाश्च, लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति " इति अत्र गीताशास्त्रे सन्यासविषयस्य वीक्षणादिकं वक्तव्यमेव। केवलसन्यासपदं, एवमन्यपदैः साकं च सन्यासपदस्य प्रयोगाः गीताशास्त्रे बहुधा वर्णितो वर्तन्ते। अस्य श्लोकस्योपरि आचार्यत्रयाणां मतं कीदमिति विचारः एवात्र क्रियते।

"यं सन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।

न ह्यसंन्यस्त संकल्पो योगी भवति कश्चन।। ६.२।

सन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।

योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति।।५.६।

ज्ञेयः स नित्यसन्यासी यो न द्वेष्टि न कांक्षति।

निर्द्वन्तो हि महाबाहो सुखं बन्धात् प्रमुच्यते।। ५.३।

यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।

एकं सांख्यं च योगं च यः पश्यति स पश्यति।। ५.५।

काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः।

सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।"१८.२।

अत्रास्य विषयस्योपरि पञ्चमाध्याये द्वितीयश्लोकस्य शंङ्करभाष्ये सन्यासः कर्मणां परित्यागः, कर्मयोगः च तेषामनुष्ठानम्। तौ उभौ अपि निश्रेयसकरौ मोक्षप्राप्त्यर्थं हेतुः च [३४]। तृतीयश्लोकेन (३) अस्य व्याख्याने यः न द्वेष्टि किञ्चित् न कांक्षति सुखं दुखं वातत्साधनं च एवं विधः यः कर्मणि वर्तमानः अपि स नित्यसन्यासी इति ज्ञातव्यः[३५]।षष्ठ (६) श्लोकस्य व्याख्याने ज्ञानापेक्षः तु सन्यासः सांख्यमिति। यत् ज्ञाननिष्ठैः सन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तद् योगैः अपि ज्ञान्प्राप्त्युपायत्वेन ईश्वरे समर्प्य कर्माणि आत्मनः फलमनभिसन्धाय अनुतिष्ठन्ति। ये ते योगाः योगिनः तैः अपि परमार्थज्ञानसन्यासप्राप्तिद्वारेण गम्यते। अग्रिमश्लोकव्याख्याने सन्यासः तु पारमार्थिकः विना सन्यासमाप्तुं दुष्करमेव। परमात्मा ज्ञाननिष्ठा लक्षणत्वात् प्रकृतः सन्यासः परमार्थसन्यासम् अथवा परमार्थज्ञाननिष्ठा लक्षणं न चिरेण क्षिप्रमेवाधिगच्छति। श्रुतिस्मृतिविदः योगं कर्मानुष्ठानलक्षणं तं परमार्थसन्यासं विद्धि इति। एवं कर्मानुष्ठानलक्षणयुक्तं तद्। परमार्थसन्यासे सः व्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं सङ्कल्पं प्रवृत्तिहेतुः कामकारणं सन्यस्यति [३६]।

अन्तिमे मोक्षसन्यासयोगे द्वितीयेन श्लोकेन सन्यासं नाम काम्यानाम् अश्वमेधादीनां कर्मणां परित्यागं सन्यासमिति। अन्ये केचना पण्डिताः अनुष्ठितत्वेन प्राप्तस्य अननुष्ठानमिति च वदति [३७]।

अस्य विषयस्योपरि द्वैतदर्शनप्रवर्तको श्रीमध्वाचार्येण कृत *गीताभाष्ये, गीतातात्पर्ये* च किमुक्तमिति विचारयति। ध्यानयोगस्य (६) द्वितीयश्लोकस्यभाष्ये सन्यासोऽपि योगान्तर्भूत इत्याह – यं सन्यासमिति कामसङ्कल्पाद्यपरित्यागे कथमुपायवान् स्यादित्याशयः। योगविशेष एव सन्यास इत्यर्थः [३८]। अनन्तरं पञ्चमे कर्मसन्यासयोगे प्रधानेन श्लोकत्रयैः अमुं विषयमधिकृत्य विचारयति। (५.६) अस्य भाष्ये इतश्च सन्यासात् योगो वर इत्याह - सन्यासस्त्विति। योगाभावे मोक्षादि फलं न भवति। अतः कामजयादि दुखमेव तस्य मोक्षाद्येव हि फलम्। अन्यत् तत्फलमल्पत्वादफलमेवेत्याशयः पद्मपुराणे च यथा "विना मोक्षं फलं यत्तु न तद् फलमुदीर्यते " यत्तु महत्फलयोग्यं तस्याल्पं फलमेव न भवति। तथा पद्मपुराणस्य तण्डुलमुष्टिः। महाफलश्च योगयुक्तश्चेत् सन्यास इत्याह योगयुक्त इति। मुनिः सन्यासी। " स हि लोके मुनिर्न्नाम यः कामक्रोधवर्जितः " विष्ण्वर्पितत्वादि योगरूपत्वं विना केवलकर्मत्यागो नरकफलैव। " यं सन्यासमिति प्राहुर्योगं तं विद्धि पाण्ड्व " इति। योगविशेषत्वान्न्यासस्य पृथगुक्तिः। अस्य श्लोकस्योपरि तात्पर्यं - मोक्षोपायो योग इति तद्रूपो न्यास एव तु। विष्ण्वर्पिततया भद्रो नान्यो न्यासः कथञ्चने।। इत्याग्नेय पुराणे। [३९] (५.३) अस्य भाष्ये सन्यास शब्दार्थमाह –ज्ञेय इति। सन्यासस्य निश्रेयस्करत्वं ज्ञापयितुं तच्छ्बार्थं स्मारयति ज्ञेयइति। अस्य तात्पर्यस्तु द्वेषादि वर्जनमेव सन्यास शब्दार्थो न यत्याश्रमोऽत्राभिप्रेत इत्याह – ज्ञेय इति।न च काम्यानां कर्मणां न्यासमित्यनेन विरोधः। तेनापि सहितस्य न्यासत्वात् न च त्यागस्य पृथक् वचनादि विरोधः। कुरु-पाण्डवन्न्यासावन्तरभेदत्वात्यागस्य [४०]। (५.५) भाष्यरुपेण एकमपि इत्यस्याभिप्रायमाह- यत् सांख्यैरिति योगिभिरपि ज्ञानद्वार ज्ञानफलं प्राप्यत इत्यर्थः । अस्य तात्पर्यरुपेण तस्माद् ज्ञानिनां कर्माप्यनुष्ठेयम्। कर्मिणामपि

गृहस्थानां ज्ञातव्यो भगवान्। न हि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति [४१]। (१८.२) अस्य भाष्यावसरे फलनिच्छायाऽकरणेन वा काम्यकर्मन्यासः सन्यासः, त्यागस्तु फलत्याग एव। तथा हि प्राचीन शालश्रुतिः - अनिच्छया अकर्मणा वापि काम्यन्यासो न्यासः फलत्यागस्तु त्यागः इति । अस्य तात्पर्यरूपेण सर्वाध्यायोक्त धर्मस्य समासतो निर्णयात्मको अनुक्त त्रैगुण्यवादि चाऽयम् [४२]। इत्येवमुक्त्वा ध्यानविषये द्वैताचार्यः श्रीमध्वाचार्य प्रणीतोऽयं गीताभाष्यं गीतातात्पर्यं च अत्र उपसंहरति।

सन्यासविषयस्योपरि रामानुजप्रणीत विशिष्टाद्वैतभाष्ये (६.२) श्लोकभाष्ये आत्मयाथात्मयानुसन्धानेन अनात्मनि प्रकृतौ आत्मसंङ्कल्पः सन्यस्तः परित्यक्तौ येन सन्यस्तसङ्कल्पः अनेवभूतो यः सः असन्यस्तसङ्कल्पः। न हि उक्तेषु कर्मयोगेषु अनेवम्भूतः कश्चन कर्मयोगी भवति। कर्मयोग एव अप्रमादेन योगं साधयति [४३]। अनन्तरं पञ्चमाध्याये कर्मसन्यासयोगस्य षष्ठश्लोकेन ज्ञानयोगः कर्मयोगात् ऋते प्राप्तुम् अशक्यः। कर्मयोगयुक्तः स्वयमेव आत्ममननशीलः सुखेन कर्मयोगं साधयित्वा एव अल्पकालेन एवात्मानं प्राप्नोति। ज्ञानयोगयुक्तः तु महता दुःखेन ज्ञानयोगं साधयति, दुखसाध्यत्वात् दुखप्राप्यत्वात् आत्मानं चिरेण प्राप्नोति [४४] इत्यर्थः। (५.३) कर्मयोगी तदन्तर्गतात्मानभवतृप्तः तदव्यतिरिक्तं किमपि न कांक्षति तत एव किमपि नद्वेष्टि तत एव द्वन्द्वसहः नित्यज्ञाननिष्ठा इति। स हि सुकरकर्मयोगनिष्ठतया सूखं बन्धात् प्रमुच्यते [४५]। (५.५) सांख्यैः(ज्ञाननिष्ठैः) आत्मावलोकेन रूपफलं प्राप्यते, तद् एव कर्मयोगनिष्ठैः अपि प्राप्यते। एवम् एकफलत्वेन एकं वैकल्पिकं सांख्यं योगं च यः पश्यति सः पण्डितः इत्यर्थः [४६]।(१८.२) केचन विद्वांसः स्वरूपत्यागं केचित् च नित्यानां नैमित्तिकानां काम्यानां च सर्वेषां कर्मणां फलत्याग एव मोक्षशास्त्रेषु त्यागशब्दार्थः। तत्रशास्त्रीयः त्यागः काम्यकर्मस्वरुपविषयः सर्वकर्मफलविषयः इति विवादं प्रदर्शयन् एकत्र सन्यासशब्दम् इतरत्र त्यागशब्दं प्रयुक्तवान् अतः त्यागसन्यासशब्दयोः एकार्थत्वात् अङ्गीकृतमिति ज्ञायते।परस्परपर्यायतादर्शनात् च तयोः एकार्थत्वं प्रतीयते[४७]।

## ६.१.४ ध्यानम्

मन्त्रयोगो लयश्चैव हठोऽसौ राजयोगतः (योगतत्वोपनिषद् ) योगस्य अवस्था चतुष्टयमारभ्य घटं परिचयं निष्पत्तिः।। ध्यै धातोः भावार्थे ल्युट् निष्पन्नोऽयं शब्दः। अनेन चिन्तने, परमात्मचिन्तनं। वाजस्पत्ये ध्यानशब्देन विख्याता परमानन्ददायिनी इत्यर्थः अन्यत् रीत्या चिन्ता तद् विषया ध्यानम् एवं तत्र प्रत्यैयैकतानता ध्यानमिति पातञ्जलीयसूत्रः। तत्र तस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य एकतानताविसदृश परिणाम परिहारेण यदेव धारणायामवलम्बनीकृतं तदालम्बनतयैव निरन्तरमुत्पत्तिः स ध्यानमुच्यते। अस्य ध्यानस्य सगुणं, निर्गुणमिति द्वैविध्यं वर्तते। सगुणं मन्त्रभेदेन, निर्गुणं केवलमिति मतम्। अन्यरीत्या सरुपारुपाभेदेन च द्वैविध्यम्। अस्य विषयस्योपरि वैदिकग्रन्थेषु एवं पुराणादिषु च बहुधा उक्तम्, *अग्निपुराणे, गरुडपुराणे,* स्मृतिषु योगशास्त्रेत्यादिषु विषयोऽयमुपवर्णितञ्च। अर्जुनं निमित्तीकृत्य भगवता उपदिष्टा गीताशास्त्रे ध्यानमित्यस्य कीदृशं वीक्षणमिति अत्र पर्यालोचयति।

> ‘‘योगी युञ्जीत सततमात्मानं रहसि स्थितः।
> एकाकी यतचित्तात्मा निराशीरपरिग्रहः।।६.१०।
> शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
> नात्युच्छीतं नाति नीचं चैलाजिनकुशोत्तरम्।। ६.११।
> श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
> ध्यानात् कर्मफलत्यागस्त्यागाच्छन्तिरनन्तरम्।।१२.१२।
> ध्यानेनात्मनि पश्यन्ति केचिदात्मनमात्मना।
> अन्ये सांख्येन योगेन कर्मयोगेन चापरे।। १३.२४।
> नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
> न चाति स्वप्नशीलस्य जाग्रतो नैवचार्जुन।। ६.१६।

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।।"६.४१।

(६.१०) अस्याद्वैतभाष्ये योगी अथवा ध्यायी सर्वदा रहसि एकान्ते गिरिगुहादौ स्थित्वा आत्मानं रहसि सन् एकाकी असहायः। अनन्तरं भाष्ये रहसि स्थितः एकाकी च इति विशेषणात् सन्यासं कृत्वा इत्यर्थः। अत्रयतचित्तात्मा -अन्तकरणम् आत्मा देहः च संयतौ यस्य सः [४८]। अनन्तरं योगं युञ्जानस्य आसनम्, आहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः प्राप्तयोगलक्षणम् इत्यादिकं विशदयति। ( ६.११) श्लोकभाष्ये नशुद्धे देशे तत्र शुद्धित्वं संस्कारतः वा प्रकृत्या वा तत्र आत्मानमचलं प्रतिष्ठाप्य अचलमासनं नात्युच्छ्रितं नातिनीचं च चैलाजिनकुशोत्तरं पीठक्रमात् विपरीतः।अत्र क्रमः चैलादीनामिति। तत्र एव मुपविश्य मनः सर्वविषयेभ्यो उपसंहृत्य एकाग्ररूपेण स्थित्वा योगं युञ्ज्यात्। तत्र शरीरस्य धारणं कथमिति एवं वर्ण्यते [४९]।

"समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।

संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चावलोकयन्।।"६.१३।

आत्मानं सर्वविषयेभ्यो उपसंहर्तुम् आद्यं बाह्येन्द्रियाणि एवं शरीरस्य धारणं कथमित्यस्य उत्तररूपेण भवति अयं श्लोकः। कायः, शिरः, ग्रीवाश्च अचलं समं धारयन्न् तं स्थिरोभूत्वा आत्मनि मनसः समाधानं वक्ष्यति इति [५०] अस्य योगिनः भोजनादि/आहारादि नियमाः उच्यन्ते।

"नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।

न चातिस्वप्नशीलस्य जाग्रतो नैवचार्जुन।।६. १६।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।

युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।"६.१७।

अत्यश्नतः आत्मसंमितम् अन्नपरिमाणम् अतीत्य अश्नतः अत्यश्नतो न योगः अस्ति च एकान्तम् अनश्नवतो योगः अस्ति। अतः योगी आत्मसम्मितात् अन्नात् अधिकं न्यूनं वा अश्नीयात्। अति स्वप्नशीलस्य योगो न भवति, [५१] एव च अति मात्रं जाग्रतो योगो भवति। अनन्तरश्लोकेन

"श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।

ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्।।"१२.१२।

श्लोकव्याख्याने अविवेकपूर्वकात् अभ्यासात् ज्ञानं विशिष्यते, ज्ञानात् ज्ञानपूर्वकं ध्यानं विशिष्यते [५२]। (१३.२४) अस्य भाष्ये उपमोपादानात् तैलधारावत् सन्ततः अविच्छिन्नः प्रत्ययो ध्यानम्। तेन ध्यानेन आत्मनि बुद्धौ आत्मानं पश्यन्ति अन्ये सांख्येन योगेन, अन्ये कर्मयोगेन च [५३]। योगिनः आत्मना स्वेनैव प्रत्यक् चेतनेन ध्यानसंस्कृतेन अन्तकरणेन तादृशयोगेन मरणानन्तरं किं भवति इति (६,४१) श्लोकेन योगमार्गेण

प्रवृत्तः सन्यासी अश्वमेधादि याजिनां लोकान् तत्र च उषित्वा शाश्वती नित्याः समाः संवत्सरान् तद् भोगक्षये शुचीनां विभूतिमतां गेहे अभिजायते [५४]। तस्य योगिनः समाहितचित्तं कथं भवेत् इति उच्यते –

"यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।

योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।।"६.११।

योगं ध्यानम् इत्यादि विषयेष्वुपरि अद्वैतमतं कीदृशमिति पूर्वोक्तम्। इतः परम् अस्यविषयस्योपरि द्वैतमताम् अनुसृत्य गीताभाष्ये एवं गीतातात्पर्ये किमुक्तमिति विचारयति। ध्यानयोगे दशम, एकादशम, त्रयोदश, षोडश, सप्तदश, एकचत्वारिंशत् तमश्लोकैः विचारयति। (१०-११) तम श्लोकैः समाधियोगप्रकारमाह -योगी युञ्जीतेत्यादिना।

युञ्जीतसमाधियोगयुक्तं कुर्यात् [५५] । आत्मानं मनः।(१६) तमस्य भाष्ये अनशनादि निषेधोऽशक्तस्य। उक्तं हि नारदीयपुराणे-

"निद्राशनभयश्वासचेष्टातन्द्रयादि वर्जनम्।

कृत्वा निमीलताक्षस्तु शक्तोध्यायन् प्रसिद्धयति" ।।[५६]

अनन्तरश्लोके (१७) युक्ताहारविहारस्य सोपायाहारादेः। यावताश्रमाद्याभावो भवति तावदाहारादेरित्यर्थः।(१२)भक्तियोगश्लोकेस्मिन् अज्ञानपूर्वाभ्यासाज्ञानमात्रमेव विशिष्यते। ज्ञानमात्रात् स ज्ञानध्यानम्। तथा च सामवेदे "आनभिम्लातशाखायाम्- अधिकं केवलाभ्यासाज्ज्ञानं तद्सहितं ततः। ध्यानं ततश्चाऽपरोक्ष्यं ततः शान्तिर्भविष्यति"।।[५७]

इति ध्यानात् कर्मफलत्यागः इति स्तुतिः। अन्यथा कथमसमर्थोऽसि इत्युच्येत ? "तयोस्तु कर्मसन्यासात् कर्मयोगो विशिष्यते" इति चोक्तम्। सर्वाधिकं ध्यानमुदाहरन्ति ध्यानाधिके ज्ञानभक्तीपरात्मन्।कर्माफलाकाङ्क्षमथो विरागस्त्यागश्च नध्यानकलार्हः। (*काषायणशाखायाम्*) [५८] वाक्समेप्यसमर्थविषयत्वोक्तेः तात्पर्याभावः इतरत्र प्रतीयते। ध्यानादि प्राप्तिकारणत्वाच्च त्यागस्तुतिर्युक्ता। केवलाद् ध्यानात् फलत्यागयुक्तं ध्यानमधिकम्। ध्यानयुक्तस्त्यागः एव च अत्रोक्तः। यथा *गौपवनशाखायां*- ध्यानात्तु " केवलात् त्यागयुक्तं तदधिकं भवेत् " इति। न हि त्यागमात्रानन्तरमेव मुक्तिर्भवति [५९]। अनेन युक्तो जेता नान्यथा क्षेत्रक्षेत्रज्ञविभागयोगेपञ्चविंशति तमश्लोकेन सांङ्ख्येन वेदोक्तभगवत्स्वरूपज्ञानेन। कर्मिणामपि श्रुत्वा ध्यात्वा दृष्टिः। श्रावकाणां च ज्ञात्वा ध्यात्वा सांख्यानां च ध्यात्वा। तथा च गौपवनश्रुतिः - कर्मकृच्यापितं श्रुत्वा ज्ञात्वा ध्यात्वाऽनुपश्यति। श्रावकोऽपि तथा ज्ञात्वा ध्यात्वा ज्ञान्यपि पश्यति इति। अन्यथा तस्य दृर्ष्टिहिकथञ्चिन्नोपजायते इति [६०] । *गीतातात्पर्ये* च यथा - ऋषयः केचिदृषयो नारदाद्या बहिस्त्वपि। देवा विष्णुप्रसादेन लब्दसत्प्रतिभावलात्। सर्वं क्रमेण विज्ञाय प्रतिभास्पष्टता क्रमात्। पश्यन्ति बहिरन्तश्चविष्णुं

ध्यानमृतेऽपितु । येषां ध्यानमृते दृष्टिस्तेषां ध्यानेऽपि दर्शनम्। स्यादेव सांङ्ख्ययोगस्तद्देवाब्रह्माऽधिकोऽत्र च। एवमुक्त्वा मध्वभाष्ये विषयोऽयम् उपसंहरति।

इतःपरं ध्यानविषये विशिष्टाद्वैतीनां मतं कीदृशमिति विचारयति। ध्यानयोगे (६) दशमश्लोकादारभ्य अत्र विचारयति। उक्तप्रकारकर्मयोगनिष्ठः अहरहः योगकाले आत्मानं युक्तं कुर्वीत। स्वदर्शनं निष्ठां कुर्वीत इत्यर्थः। जनवर्जिते निशब्दे देशे तत्रापि न अद्वितीयः, तत्रापि यतचित्तमनस्कः आत्मव्यतिरिक्ते कृत्स्ने वस्तुनिरपेक्षः तदव्यतिरिक्ते कस्मिंश्चिदपि ममतारहितः[६१]। (११) तम श्लोकेन अशुचिभिः पुरुषैः अनधिष्ठिते अपरिगृहीते च अशुचिभिः वस्तुभिः अस्पष्टे च पवित्रीभूते देशे दार्वादि निर्मितं तस्मिन् मनःप्रसादकरे समाश्रये योगैकाग्रमव्याकुलं सर्वात्मना उपसंहृता चित्तेन्द्रियक्रियः बन्धविमुक्तये आत्मावलोकनं कुर्वीत[६२]। (१३) तम श्लोकेन सापाश्रयतया अत्यन्तनिर्वृतमनाः ब्रह्मचर्ययुक्तो अवहितो मामेव चिन्तयन् आसीत्। १६,१७तम श्लोकैः अत्यशनानशने योगविरोधिनी अतिविहारविहारौच तथात्मात्र स्वप्नजागर्ये तथा च अत्ययासानायासौ। मितायासस्य मितस्वप्रावबोधस्य सकलबन्धनाशनो सम्पन्नौ योगः भवति [६३]। ४१ तम श्लोकभाष्ये यज्जातीयभोगाभिकांक्षयान् योगात् प्रच्युतः अयं मति प्राप्यान् तज्जातीयान् अति कल्याणभोगान् ज्ञानोपाययोगमाहात्म्यात् एव भुञ्जानो यावत् तद्भोगतृष्णावसानं तत्र उषित्वा भोगे वितृष्णः। योगोपक्रमयोग्यानां कुले योगोपक्रमे भ्रष्टे योगमाहात्म्यात् जायते [६४]। भक्तियोगे द्वादशतम श्लोकेन अत्यर्थप्रीति विरहितात् कर्कशरूपात् स्मृत्यभ्यासात् अक्षरयाथात्म्यानुसन्धानपूर्वकं तदा परोक्ष्य एव आत्महितत्वे विशिष्यते, आत्मापरोक्ष्य अपि अनिष्पन्नरूपात् तदुपायभूतात्मा एव आत्महितत्वे अपि अनिष्पन्नरूपात् तदुपायभूतं फलत्यागेन अनुष्ठितं कर्मैव विशिष्यते। अनभिसंहितफलात् अनुष्ठितात् कर्मणः एव निरस्तपापतया मनसः शान्तिः भविष्यति। शान्ते मनसि आत्मध्यानं सम्पत्स्यते। ध्यानात् ज्ञानं, ज्ञानात् तदापरोक्ष्यं, तदापरोक्ष्यात् पराभक्तिः [६५]भक्तियोगाभ्यासशक्तस्य आत्मनिष्ठा एव श्रेयसी (१३.२४)निष्पन्नयोगशरीरे अवस्थितं, मनसा भक्तियोगेन च अनिष्पन्नयोगाः। ज्ञानयोगेन योगयोग्यं मनःकृत्वा आत्मानं पश्यन्ति।

योगादिषु आत्मावलोकनसाधनेषु अनधिकृताये ज्ञानयोगानधिकारिणः तदधिकारिणः च सुखरुपायसत्ता व्यपदेशाः अन्तर्गतज्ञानेन मनसा योगयोग्यता आपाद्य आत्मानं पश्यन्ति [६६]। ध्यानविषये एवं भवति वैष्णवसम्ब्रदायेषु श्रीसम्ब्रदायिनः रामानुजभाष्यम्।

## ६.१.५ देवयान-पितृयानविचारौ

क्षराक्षरब्रह्मयोगनाम्नि अष्टमाध्याये एष एव विषयः चर्चितः। तत्र त्रयोविंशश्लोके कृष्णः योगिनां मृत्योः ऊर्ध्वं गतिमधिकृत्य मार्गद्वयं विवृणोति। केचन योगिनः पुनर्जन्म स्वीकृत्य इहलोके भूयः भविष्यति[६७]। अपरे तु अनावृत्य ब्रह्मयेव प्राप्यन्ते। अस्य मार्गद्वयस्य आधारस्तु कालयेव अतः तत्कालभेदाः अत्र विवृणोति।

"अग्निज्योतिरहः शुक्लः षण्मासा उत्तरायनम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।" ८-२४।

योगिनः समानकाले मृत्युं प्रापयति चेदपि तेषामयनं द्विविधा एव। ओं कारोपासकाः /ब्रह्मोपासकाः उत्तरायण मार्गेण गच्छन्ति। मृतास्ते प्रथमम् अग्न्यभिमानिदेवतया,ज्योतिरभिमानीदेवतया, अहर्देवतया, शुक्लपक्षदेवतया, उत्तरायणदेवतया, संवत्सरदेवतया एवं देवताभिः यथाक्रमम् ब्रह्म एव नीयमन्ते।

"धूमोरात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चन्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।।" ८-२५।

ये योगिनः पुण्यकामिनः भूत्वा स्वर्लोकादि प्राप्त्यर्थं यागादिकं कृत्वा मृताः ते धूमाभिमानिनीं देवतां, रात्र्यभिमानिनीं देवतां, कृष्णपक्षदेवतां च प्राप्यन्ते। एवं देवताभिः नीत्वा चन्द्रमसं प्राप्य कर्मफलं भूक्त्वा तस्मिन् क्षीणे सति इह एव पुनः निवर्तन्ते [६८]। तदेव गीतायां (९-२१) *कठोपनिषदि*[६९] च " क्षीणे पुण्ये मर्त्यलोकं विशन्ति " इति उच्यते।

"शुक्लकृष्णे गतीह्येते जगतः शाश्वते मते।

एकया यात्यनावृत्तिमन्ययावर्तते पुनः।।" ८ -२६।

एतौ मार्गौ शुक्लकृष्णस्वभावौ कुतः इति चेत् प्रपञ्चस्य सर्वस्यैवासंभवतः। जगतः नित्यत्वात् [७०]एव अतः एतौ द्वौ सृती यः जानाति सः अत्र प्रपञ्चे प्रापञ्चिकविषयेषु न मुह्यति। मृतस्य ऊर्ध्वगतिमधिकृत्य गीतायां यत् विचारितं, तत्र भाष्यकाराणामपि मतभेदः न दृश्यते। तत्र श्रीशङ्करः स्वस्य गीताभाष्ये अग्निः, ज्योतिः, इत्यादि शब्दात् कालाभिमानि देवतारुपेण व्याख्यायते [७१]। अहः, शुक्लः, उत्तरायनम् इत्यादि कालवाचकशब्दाः अपि देवताः एव सूचयन्ति इति तस्य मतम्। किन्तु अत्र कालशब्दः उत्तरायणादि कालं न सूचयति। ताः देवतास्तु जीवस्य मार्गलक्षणभूताः[७२] एव। एतत्सर्वम् (ब्रह्मसूत्रम् ४-३-४ )इति सूत्रव्याख्यानावसरे आचार्येणैव स्पष्टीकृतम्। एवं च उत्तरायनादिकालेषु ये योगिनः मृताः ते एव ब्रह्माधिगच्छन्ति इति न मन्तव्यम्। किन्तु ये योगिनः तपसा अथवा पञ्चाग्नि दर्शनेन च परं ब्रह्म उपासन्ते तान् अग्न्यादि देवताः मार्गलिङ्गाः भूत्वा ब्रह्मपदं प्रापयन्ति इति कृतान्तः। रामानुजस्याप्यत्र मतभेदो नास्ति, किन्तु तेन स्पष्टतया एवमुच्यते। " अत्र कालशब्दः मार्गस्य अहः प्रभृति संवत्सरान्तकालाभिमानिदेवताभूयः तया मार्गोपलक्षणार्थाः [७३] "इति। अत्र उत्तरायणमार्गेण ये जीवाः प्रयाताः ते न पुनरावर्तन्ते। पुण्यकर्माण्यनुष्ठीयमानः धूमादिदेवताभिः दक्षिणायनमार्गं नीताः सन् इह पुनरावर्तन्ते इत्याशयः। एवं च शुक्लकृष्णे इति श्लोकव्याख्यानावसरे श्रीशङ्करः एवं विवृणोति उत्तरायनमार्गस्य शुक्लगतिः इति नाम तस्य ज्ञानसहकारित्वात् [७४], ज्ञान असहकारित्वात् कृष्णत्वं धूमादिगतेः इति। ते गतीशाश्वते भवतः संसारस्य नित्यत्वात् इति च तस्य विवरणम् [७५]। रामानुजस्तु तौ शुक्लकृष्णमार्गौ ज्ञानिनां पुण्यकर्मणां च शाश्वतायेव [७६] इत्यभिप्रैति। किन्तु तयोः मार्गयोः श्रुतौ नित्यत्वमेवाङ्गीकरोति। अतः देवयानेनैव अथवा अर्चिरादिगतिनैव योगिना प्रयाण काले गन्तव्यम् इति तस्य मतम् [७७]। मध्वाचार्यस्तु एवमेव अभिप्रैति। सः पुराणेभ्यः अपि प्रमाणादिकं[७८] स्वीकृत्य शुक्लगतिरेव प्रामुख्यं साधयति।

### ६.२.६ दैवी-आसुरीस्वभावौ

पुरुषोत्तमयोगस्य विस्तरणानन्तरं गीताशास्त्रे षोडशाध्याये दैवासुरसम्पद्विभागयोगे दैवीसम्पदः, अनन्तरम् आसुरीसम्पद् इत्यादिकमधिकृत्य विचारयति। -

"अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।१६.१।
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्द्दवं ह्रीरचापलम्।।१६.२।
तेजः क्षमा धृतिः शौचमद्रोहो नाऽतिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत।।"१६.३।

अत्र श्लोकत्रयाणामपि दैवीसम्पद् कीदृशरूपेण अद्वैतभाष्ये विचारितमिति निरुपयति। सत्वस्य अन्तःकरणस्य संव्यवहारेषु परवञ्चनमायानृतादि परिवर्जनं स्वात्मसंवेद्यतापादनं योगः तयोः ज्ञानयोगः, यथा शक्ति संविभागः अन्नादीनां दानं, ब्रह्मकारणानाम् उपशमः अन्तकरणस्य उपशमं शान्तिं वक्ष्यति, श्रौतः अग्निहोत्रादि स्मार्तः च देवयज्ञादिः, स्वाध्यायं ऋग्वेदाद्यध्ययनम् अदृष्टार्थं तपोवक्ष्यमाणं शरीरि आर्जवम् ऋजुत्वं सर्वदा। अहिंसा प्राणिनां पीडावर्जन् - अहिंसा, अप्रियानृतवर्जितं यथा भूतार्थवचनं सत्यं, परैः आकृष्टस्य अभिहतस्य वा प्राप्तस्य क्रोधस्य उपशमनम् अक्रोधः सन्यासः पूर्वं दानस्य उक्तत्वात् शान्तिः - त्यागः अन्तकरणस्य उपशमः शान्तिः, परस्मै परधनप्रकटीकरणात् पैशुनं तद्भावः अपैशुनम्। कृपाभूतेषु दुखितेषु —दया, इन्द्रियाणां विषयसन्निधौ अविक्रिया- अलोलुपत्वं, मार्द्दवं- मृदुता अक्रौर्यं असति प्रयोजने वाक्पाणिपादादीनाम् अव्यापारयितृत्वम् अचापलम्। तेजः- प्रागल्भ्यं न त्वया दीप्तिः, क्षमा आकृष्टस्य ताडितस्य वा अन्तर्विक्रियानुत्पत्तिः, धृतिः- देहेन्द्रियेषु अवसादं प्राप्तेषु, येन उत्तंभितानि करणानि देहः च न

अवसीदन्ति च मनोबुद्ध्योः नैर्मल्यम्। अत्यर्थमानः अतिमानः सः यस्य विद्यते सः अतिमानी आत्मनः पूज्यतातिशय भावनाभावः इत्यर्थः। इत्येदे गुणाः दैवीसम्पदानां गुणाः[७९]। इतः परम् आसुरीसम्पदी जातानां गुणाः। लक्षणानि अत्र व्याख्यायति।

दैवीसम्पद् कीदृशमिति मध्वमतानुसारेण कीदृशमिति अत्र विचारयति। तपो ब्रह्मचर्यादिकं तपः इतिह्यभिधानम्। द्वितीयश्लोकेन पैशुनं परोपद्रवनिमित्तदोषाणां राजादेः कथनं- रोपद्रवहेतूनां दोषाणां पैशुनं वचः। राजादेस्तु मदाद् भीतेरदृष्टिदर्प उच्यते इति ह्यभिधानम्। लौल्यं रागः परागो लौल्यं तथा रक्तिः इत्यभिधानम्। अचापलं स्थैर्यं चपलश्च लोऽस्थिरः इत्यभिधानम्। तृतीयेन श्लोकेन क्षमा तु क्रोधभावेन सहापकर्तुरनपकृतिः अक्रोधोऽदोषो कृच्छत्रोः क्षमावान् स निगद्यते इत्यभिधानम्[८०]।

दैवीसम्पद्विषयस्योपरि विशिष्टाद्वैतदर्शन भाष्ये कीदृशमिति अत्र निरूपयति। दत्तेषु प्रथमश्लोकेन इष्टानिष्टवियोगसंयोगरूपस्य दुखस्य हेतुदर्शनजं दुखं भयं तन्निवृत्तिः अभयम्। सत्वसंशुद्धिः सत्वस्यान्तकरणस्य रजस्तमोभ्यम् असंस्पृष्टत्वम्। ज्ञानयोगव्यवस्थितिः - प्रकृति वियुक्तात्मस्वरुप विवेकनिष्ठा। दानं न्यार्जितधनस्य पात्रे प्रतिपादनं, दमः मनसोविषयौ न्मुख्यनिवृत्तिसंशीलनम्। यज्ञः फलाभिसन्धिरहित भगवदाराधनरुपमहायज्ञाद्यनुष्ठानम्। स्वाध्यायः सविभूतेः भगवतः तदाराधनप्रकारस्य च प्रतिपादकः, तपः कृच्छ्रचान्द्रायणद्वादश्युपवासादेः भगवत्प्रीणनकर्मयोग्यतापादस्य करणम्। आर्जवं - मनोवाक् कायकर्मवृत्तीनाम् एकनिष्ठता परेषु [८१]। अनन्तरं द्वितीयेन श्लोकेन सत्यं – यथादृष्टार्थगोचरभूतहितवाक्यम्। अहिंसा – परपीडावर्जनं, परपीडाफलचित्तविकाररहित वाक्यम्। त्यागः - आत्महितप्रत्यनीकपरिग्रहविमोचनम्। शान्तिः- इन्द्रियाणां विषयप्रावीण्यनिरोधसंशीलनम् अपैशुनं– परानर्थकरवाक्यनिवेदनाकरणम्। दयाभूतेषु सर्वेषु दुखासहिष्णुत्वम्, अलोलुप्तम्– विषयेषु निःस्पृहत्वम्।मार्दवम्- साधुजनसंश्लेषाहा, अचापलं- स्पृहणीयविषयसन्निधौ अचलत्वम् [८२]। तृतीयेन श्लोकेन तेजः-दुर्जनैः अनभिभवनीयत्वम्,

क्षमा-परनिमित्तपीडानुभवे अपि परेषु तं प्रति चित्तविकाररहितता। धृतिः- महत्याम् अपि आपदि कृत्यकर्तव्यतावधारणम्। शौचं- बाह्यान्तः करणानां कृत्ययोग्यता शास्त्रीया। अद्रोहः - परेषु अनुपरोधः। नातिमानिता- अस्थाने गर्वः अतिमानित्वम् [८३]। एते गुणाः दैवीसम्पन्धिनी सम्पत्, भगवदाज्ञानुवृत्तिशीलाः इत्येतदेव दैवीसम्पदानां स्वभावः।

"दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।।१६.४।
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चापारो न सत्यं तेषु विद्यते।।१६.७।
असत्यमप्रतिष्ठितं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम्।।१६.८।
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद्गृहीत्वासद्ग्राहान्प्रावर्तन्तेऽशुचिव्रताः।।१६.१०।
चिन्तामपरिमेयं च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः।।१६.११।
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायोनार्थसञ्चयान्।।१६.१२।
अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ।।१६.१६।
आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाऽविधिपूर्वकम्।।१६.१७।
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।।१६.१८।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।
क्षिपाम्यजस्त्रमशुभानासुरीष्वेव योनिषु।।"१६.१९।

आसुरीसम्पद् कीदृशमिति अद्वैतभाष्यानुसारेण विशदयति। दंभोधर्मध्वजित्वं दर्पोविद्याविधानस्वजनादिनिमित्तउत्सेकः क्रोधश्च पारुष्यमेव च पुरुषवचनम् अज्ञानं च अविवेकज्ञानं कर्तव्याकर्तव्यादिविषयमिथ्याप्रत्ययः[८४]। यस्मिन्पुरुषार्थसाधने कर्तव्ये प्रवृत्तिस्तां प्रवृत्तिः एतद्विपरीतां निवृत्ति, जना आसुरा न विदुर्नजानन्ति। न केवलं प्रवृत्ति निवृत्ति एवते न विदुः। अशौचा अनाचारा, मायाविनः अनृतवादिनो ह्यसुराः [८५]। अपरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपुरुषयोरन्यान्यसंयोगाज्जगत्सर्वं संभूतम्। किमन्यत्काममहैतुकं कामहेतुकमेव धर्माधर्मादि कारणान्तरं विद्यते जगतः काम एव प्राणिनां कारणमिति चार्वाकमतम् [८६]। काममिच्छाविशेषमाश्रित्यावष्टभ्यदुष्टुरमशक्यपूरणं दंभमानमदान्विता। मोहादविवेकतो गृहीत्वोपादाय असद् ग्राहानशुभनिश्चयान्प्रवर्तन्ते। मरणान्तामुपाश्रिताः सदाचिंता परा कामोपभोगपरमाः एव परमपुरुषार्थो यः कामोपभोग इत्येवं निश्चितात्मानः आसुरीप्रवृत्ताः। कामभोगार्थेकामभोगप्रयोजनाय न धर्मार्थे कामभोगप्रयोजनाय न धर्मार्थे अर्थसंचयनार्थ प्रचयान् अन्यानेव परस्वापहरणादिवेत्यर्थः [८७]। कामभोगेषु तत्रैव निषण्णाः सन्तः तेनोपचितकल्मषाः पतन्ति नरकेऽशुचौ वैतरण्यादौ। धननिमित्तोमानो मदश्च ताभ्यां धनमानमदाभ्यामान्विताः यजन्ते नाम यज्ञैः नाम मात्रैः यज्ञस्तेदंभेन धनध्वजितया अविधिपूर्वकं विधिविहितांगेति कर्तव्यतारहितम्। मामीश्वरमात्मपरदेहेषु स्वदेहे परदेहेषु च तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषतो मच्छासनातिवर्तितं प्रद्वेषस्तु कुर्वन्तोऽभ्यसूयकाः सन्मार्गस्थानां गुणेष्वसहमानाः। सर्वान्सन्मार्गप्रतिपक्षभूतान्साधुद्विषिणो द्विषतश्च क्रूरान्संसारेष्वेव अनेकनरकसंसरणमार्गेषु नराधमान् अधर्मदोषत्वात्क्षिपामि, प्रक्षिपामि अजस्रं संततमशुभानशुभकर्मकारिणः [८८] आसुरीष्वेव क्रूरकर्मप्रायसुव्याघ्रसंहादियोनिषु क्षिपामित्यनेन संबन्धम्।

इतः परः आसुरीसम्पदानां विषये द्वैतभाष्ये किमुक्तमिति विचारयति। जगतः सत्यं प्रतिष्ठा ईश्वरश्च विष्णुः। तद्वैपरीत्येनेऽहुः तस्योपनिषत् सत्यस्य सत्यमिति। प्राणावै सत्यं तेषामेष सत्यम् इति हि श्रुतिः। द्वे वाव ब्रह्मणोरूपे मूर्तं चैवामूर्तं च स्थितं च सच्च त्यत् च

इति च। तस्योपनिषद् सत्यस्य सत्यमिति। एषह्यैवैतत् सादयति यामयति चेति इति च प्राचीनशालश्रुतिः अस्यविषयस्योपरि गीतातात्पर्येऽपि एवमुक्तं यथा - देवासुरनरत्वाद्याजीवानां तु निसर्गतः। निसर्गोनान्यथैतेषां केनचित् क्वचिदेव वा। देवाः शापबलादेव प्रह्लादादित्वमागताः। हेतुतः सोऽन्यथाभावो रक्ततास्फुटिके यथा। ततो नित्यश्च नाप्येष स्वभाव विनिवर्तकः। किञ्चाऽक्रम्यैव तं तिष्ठेत् देव सर्गस्ततो हि यः। अशोच्य एव विज्ञेयो मोक्षयोग्यो हरेः प्रियः।। [८९]

अनन्तरम् आसुरीसम्पदां स्वभावादिकं कीदृशमिति विशिष्टाद्वैतमते कीदृशमिति विचारयति। अत्र एतादृशानां स्वभावः दम्भः, दर्पः, अतिमानः, क्रोधः, पारुष्यम्, अज्ञातम्, एते स्वभावाः आसुरी सम्पदमभिजातस्य भवन्ति। ६ तम श्लोकेन अभ्युदयसाधनं मोक्षसाधनं च वैदिकं धर्ममासुरी न जानन्ति। शास्त्र सिद्धम् वैदिककर्मयोग्यत्वं तद् बाह्यम् आभ्यन्तरं च आसुरेषु न विद्यन्ते। एवं बाह्याभ्यन्तरशैचं येन सन्ध्यावन्दनादिना आचारेण जायते स अपि आचारः तेषु न विद्यते [९०]। अष्टमश्लोकेन असत्यं जगत् एतत् सत्यशब्दनिर्दिष्ट ब्रह्म कार्यतया ब्रह्मात्मकमिति न आहुः। अप्रतिष्ठितं तथा ब्रह्मणि प्रतिष्ठितमिति न वदन्ति। ब्रह्मणा अनन्तेन धुता पृथ्वी सत्यसङ्कल्पेन परब्रह्मणा सर्वेश्वरेण मया एतत् नियमितमिति च न वदन्ति। योषित्पुरुषयोः परस्परसम्बन्धेन जातमिदं मनुष्यपश्वादिकमुपलभ्यते। सर्वमिदं जगत् कामहेतुकमिति तात्पर्यम् [९१] । दशम श्लोकेन दुष्प्रापविषयं काममाश्रित्य तत्सिषाधयिषया अज्ञानात् अन्यायगृहीतात् असत्परिग्रहान् अशास्त्रविहितव्रतयुक्ताः इत्यर्थः। ११तम श्लोकेन श्वो वा मुमूर्षवः अपरिच्छेद्यां पाराकृतप्रलयावधिकालसाध्य विषयाम् उपाश्रिताः। तथा कामोपभोगपरमाः ते इतः अधिकः पुरुषार्थो न विद्यते इति सञ्जात निश्चयाः[९२]। १२तम श्लोकेन एवम् आशाख्यपाशशतैः बद्धाः कामक्रोधैकनिष्ठाः। कामभोगार्थम् अन्यायेव अर्थसञ्चयान् प्रति ईहन्ते। षोडश तम श्लोकेन अद्वेष्टेश्वरादि सहकारं श्रते स्वेन एव सर्वं कर्तुं शक्यम् इति कृत्वा एवं कुर्याम् एतत् च कुर्याम् अन्यत् च कुर्याम् इति अनेकचित्ततया विभ्रान्ताः एवं रूपेण मोहजालेन समावृताः कामभोगेषु प्रकर्षेण मध्ये मृताः अशुचौ नरके

पतन्ति। अनन्तर(१७) श्लोकेन आत्मना एव आत्मानं सम्भावयन्ति, परिपूर्णमन्यमाना न किञ्चित्कुर्वाणाः यज्ञैः तत् अपि दम्भेन हेतुना यष्टत्वख्यापनाय अयथाचोदनं यजन्ते। अष्टादशमश्लोकेन अनन्यापेक्षः अहमेव सर्वं करोमि इत्येवं रूपम् अहङ्काराश्रिताः तथा सर्वस्य करणे मद्बलम् एव पर्याप्तमिति च बलम्। अतो मत्सदृशो न कश्चित् अस्ति इति च दर्पम्। एवम्भूतस्य मम काममात्रेण सर्वं सम्पत्स्यते इति कामम् मम ये अनिष्टकारिणः तान् सर्वान् हनिष्यति। इति च क्रोधम्, एवमेतान् स्वदेहेषु परदेहेषु चावस्थितम्। सर्वस्य कारयितारं पुरुषोत्तमम्। कुयुक्तिभिः मत्स्थितौ दोषम् आविष्कुर्वन्तो माम् असहमानः अहङ्कारादिकान् संश्रिताः यागादिकं सर्वं क्रियाजातं कुर्वीतेत्यर्थाः अस्य विषयस्योपरि अनन्तर श्लोकेन ये एवं मां द्विषन्ति जन्मजरामरणादिरुपेण परिवर्तमानेषु सन्तानेषु तत्रापि आसुरीषु एव योनिषु क्षिपामि [९३] । मदानुकूल्य प्रत्यनीकेषु एवं जन्मसु क्षिपामि तत्तज्जन्मप्राप्त्यानुगुण प्रवृत्तिहेतु भूतबुद्धिषु क्रूरासु अहमेव संयोजयामि इत्युक्त्वा विषयोऽयम् उपसंहरति।

## ६.१.७ वर्णाश्रमधर्मादीनां निरूपणम्

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।।४.१३।
ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।१८.४१।
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम्।। १८.४२।
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाऽप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।१८.४३।
कृषि गौरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।।"१८.४४।

अद्वैतभाष्ये अस्य विषयस्योपरि यथा चातुर्वर्ण्यं चत्वारः एव वर्णाः ईश्वरेण सृष्टम् अत्र श्रुतौ " ब्राह्मणोऽस्य मुखमासीत्" इति पुरुषसूक्ते। गुणकर्मविभागशः कर्मविभागशः च गुणाः सत्वरजस्तमांसि। तत्र

सात्विकस्य सत्वप्रधानस्य ब्राह्मणस्य शमो दमः तपः इत्यादीनि कर्माणि सत्वोपसर्जन रजः प्रधानस्य क्षत्रियस्य शौर्य तेजः प्रभृतीनि कर्माणि तमोपसर्जन रजः प्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि, रजः उपासर्जनतमः प्रधानस्य शूद्रस्य शुश्रूषा एव कर्म। एतावत् पर्यन्त मुक्त्वा इदं चातुर्वर्णं न अन्येषु लोकेषु अतो मानुषे लोके इति विशेषणम्। अस्य समाधनरुपेण यद्यपि मायासव्यवहारेण कर्मणः सन्तं परमार्थतो अत एव असंसारिणं च मां विद्धि[९४]। मोक्षसन्यासयोगो नाम अष्टादशतमाध्याये (४१) श्लोकभाष्ये ब्राह्मणादीनां गुणादि विषयं पूर्वश्लोके उक्तसमानरीत्यायेव। तेन साकं जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेन अभिव्यक्तः स्वभावः स प्रभावो येषां गुणानां ते स्वभावप्रभवागुणाः। सत्वरजस्तमोभिः गुणैः स्वकार्यानुरुपेण शमादीनि कर्माणि प्रविभक्तानि। शास्त्रेणापि ब्राह्मणादीनां सत्वादि गुणविशेषापेक्षया एव शमादीनि कर्माणि प्रविभक्तानि [९५]। ४२ तम श्लोकेन ब्राह्मणस्य स्वाभाविककर्ममेव इति। तदनन्तर श्लोकेऽपि शौर्यं शूरस्य भावं, तेजः प्रागल्भ्यं, धृतिः धारणं सर्वावस्थासु अनवसादो भवति यया धृत्या उत्तम्भितस्य दाक्ष्यं – दक्षस्य भावः सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः। दानं देयेषु मुक्तहस्तता, ईश्वरस्य भावः प्रभुशक्तिप्रकटीकरणम् ईश्वितव्यान् प्रति। क्षत्रियस्य जातेः विहितं कर्म क्षत्रकर्म स्वभावजम्। अनन्तरं (४४) तम श्लोकेन वणिक्कर्म क्रयाविक्रयादि लक्षणं वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्मस्वभावजम्। परिचर्यात्मकं शुश्रूषास्वभावं कर्म शूद्रस्य अपि स्वभावजम्। एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः। अस्योपरि आपस्तम्बस्मृतौ च " वर्ण आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूयतमः

शेषेण विशिष्टदेशजातिकुलधर्मायुः श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यते “। अत्र पुराणेषु स्मृतिषु च वर्णीनाम् आश्रमिणां लोकफलभेदविशेषस्मरणात्[९६]।

अनन्तरं वर्णाश्रमधर्मादि विषये द्वैतमते *गीताभाष्ये, गीतातात्पर्ये* च किमुकेतमिति विचारयति। ४.१३ इत्यस्य भाष्ये किमुक्तमिति विचारयति। चतुर्वर्णसमुदायः सात्विको हि ब्राह्मणः सात्विकराजसः क्षत्रियः राजस तामसो वैश्यः तामसः शूद्रः इति गुणविभागः कर्मविभागस्तु शमोदम इत्यादिना वक्ष्यते। क्रियावैलक्षण्यात् कर्ताऽप्यकर्ता तथाहि श्रुतिः - विश्वकर्मा विमनाः इत्यादि। तनुर्विद्या क्रियाऽऽकृतिः इत्यादि च। अस्य तात्पर्यरुपेण एवं यथा - सत्वसत्वाधिकरजोभिस्तमसा तथा। वर्णा विभक्ताश्चत्वारः सात्विकएव वैष्णव। कर्मविभागं शमो दम इत्यादिना वक्ष्यति। वैष्णवाः सात्विका एव तामसा एव चापरे। दौर्लभ्य सुलभत्वेन तेषां वर्णादि भिन्नता। स्वाभाविको ब्राह्मणादिः शमाद्यैरेव भिद्यते। इति नारदीये

“ कर्ताऽपि भगवान्विष्णुरकर्तेति च कथ्यते।
तस्य कर्ता यतो नान्यः स्वतन्त्रत्वात्परात्मना।।”[९७]

अस्य विषयस्योपरि मोक्षसन्यासयोगे ४१ तम श्लोक्मारभ्य अत्र भाष्यमलिखत्। आद्यश्लोकस्य भाष्ये सत्वं जीवजातम्। मुक्तानां गुणातीतत्वात् “पृथिव्यां देवेषु “ इति विशेषः। विष्णौ किञ्चिदप्रीतियुक्तास्तामसमध्ये सात्विका नराधम इत्यर्थः। राजसानां मध्ये सात्विका एव भागवतविप्रादयः। राजसस्थासात्विकेष्वेव शुद्धसात्विकाः किञ्चिद्रजोयुक्तसात्विकाः समरजोयुक्तसात्विकाः सत्वात् किञ्चिदूनतमोयुक्तसात्विका इति वर्णभेदः। सत्वप्रधानत्वादेव तानारभ्योत्तरोत्तरं सर्वेऽपि मोक्षयोग्याः। “सत्वात् सञ्जायते ज्ञानम् “ इत्यादेः। एवं यथा -

"सत्वाधिको मोक्षयोग्यो योग्योऽन्धतमसस्तथा।

तमउत्तरो रजोभूयान् समो वा सृतिपात्रकः।।"[९८]

अग्रिमश्लोकेन(४२) " ब्रह्मकर्मस्वभावजम् " इत्यस्य तात्पर्यरुपेण एवं भाष्ये किमपि नोक्तं किन्तु गीतात्पर्ये यथा-

"अधिका वा ब्राह्मणेभ्यः केषुचिच्चक्रवर्तिषु।

ऋषयस्त्वेव विज्ञेयाः कार्तवीर्यादयो नृपाः।।"

अनन्तर श्लोकस्य तात्पर्ये यथा वैश्य-शूद्रादीनां कर्म किमिति विस्तरति। यथार्थत्वनियमाभावो राजस्याः अन्यथा तामस्या भेदाभावात्। अनन्तरं स्वकर्मणा तमभ्यर्च्य इति वचनाद् च क्षत्रियादिष्वपि शमाद्यनुवृत्तिर्ज्ञायते। न हि शमादिकं विना तस्याभिमतोऽर्चनं भवति। सम्यक् शमादिभिरर्चनं ह्यभ्यर्चनं न च शमादीन् विना सिध्दिं विन्दति। यज्ञदानतपः कर्म न त्याज्यम् इत्युक्त्वा च शमो "मन्निष्ठता बुध्देर्द्धम इन्द्रियनिग्रहः " इति भागवते। न च क्षत्रियादिभिरपि शौचतपः क्षमादिर्भिहीनैर्भाव्यमिति तत्तध्दर्मेषुच्यते। युक्ताह्येतैः सर्वगुणैर्जनकतुलाधरादयः अतो युध्देऽपलायनमैश्वर्यं च क्षत्रियस्य विशेषगुणौ। तौ कृष्यादयः, जीवनार्थं शुश्रूषा याजनं जीवनार्थं प्रतिग्रहश्चेत्येव एवान्येषां परधर्माः। एवं भवति द्वैतमतानुसारेण वर्णाश्रमधर्मौ ब्राह्मणादीनां धर्माः [९९]।

अस्य विषयस्योपरि विशिष्टाद्वैतभाष्ये यथा चातुर्वण्यप्रमुखं ब्रह्मादिस्तम्ब पर्यन्तं कृत्स्नं जगत् सत्वादिगुणविभागेन तदनुगुणशमादिकर्मविभागेन च प्रविभक्तम्। सृष्टिग्रहणं प्रदर्शनार्थं मया एव रक्ष्यते मया एव च उपसंह्रियते विचित्रसृष्ट्यादे कर्ता अपि अकर्ता मां विध्दि[१००]। १८.४१ अस्य श्लोकस्य भाष्ये ब्राह्मण-क्षत्रिय-वैश्यादीनां स्वकीयो भावः स्वभावः इत्यर्थः ब्राह्मणादि जन्महेतुभूतं प्राचीनं कर्म इति। ब्राह्मणस्य स्वभावप्रभवो रजस्तमोऽभिभवेन उद्भूतः सत्वगुणः क्षत्रियस्य स्वभावप्रभवः सत्वतमसोऽभिभवेन उद्भूतो रजो गुणः वैश्यस्य

स्वभावप्रभवोसत्वरजोऽभिभवेन अल्पोद्रिक्तः तमोगुणः शूद्रस्य स्वभावप्रभवः तु रजः सत्वादि भवेन अत्युद्रिक्तः तमो गुणः। ब्राह्मणदया एवं गुणकाः तेषां च तानि कर्माणि वृत्तयः च शास्त्रेषु विभज्य प्रतिपादयन्ति[१०१]। अनन्तरश्लोकेन (४२) शमः -बाह्येन्द्रियनियमनम्, दमः - अन्तकरणनियमनम्, भोगनियमनरूपः शास्त्रसिद्धः कायक्लेशतपः। शौचं - शास्त्रीयकर्मयोग्यता, परैः पीड्यमानस्य अपि अविकृतचित्तता- क्षान्तिः, आर्जवं– परेषु मनोऽनुरूपं बाह्यचेष्टा प्रकाशनम्। परावरतत्वयाथात्म्यज्ञानं, विज्ञानं परतत्वगतसाधारण विशेषणविषयं ज्ञानम्। आस्तिक्यं वैदिकार्थस्य कृत्स्नस्य सत्यता निश्चयः प्रकृष्टः केनापि हेतुना चालयितुमशक्या। वैदिककर्म सर्वमपि भगवता वासुदेवाधारभूतमेव। अथवा सः एव प्रवर्तयिता तदाराधनभूतं च कृत्स्नं वैदिकं कर्म। तैः आराधितो धर्माथकाममोक्षाख्यं फलं प्रयच्छति [१०२] । शेषश्लोकेन (४३) क्षत्रियस्य कर्मणः स्वभावं विशदयति -शौर्य निर्भयप्रवेशसामर्थ्यं, तेजः परैः अनभिभवनीयता, धृतिः- आरब्धे कर्मणि विघ्नोपनिपाते अपि तद् समापनसामथ्यम्। दाक्ष्यं- सर्वक्रियानिवृत्ति सामर्थ्यं, दानम् -आत्मीयस्य द्रव्यस्य परस्वत्वापादान पर्यन्तः त्यागः। क्षत्रियस्य स्वभावकर्मस्वव्यतिरिक्तसकलजननियमनसामर्थ्यम्। वैश्य-शूद्रकर्मस्वभावौ (४४) श्लोकेन भाष्यते। कृषिः-सस्योत्पादनकर्षणं, पशुपालनगोरक्ष्यं, धनसञ्जयहेतुभुतं क्रयविक्रयात्मकं कर्म एतत् वैश्यस्य स्वभावजं कर्म। शूद्रस्य स्वभावजं कर्म पूर्णवर्णत्रयपरिचर्यारुपम्। यज्ञादयो हि त्रयाणां वर्णानां साधारणाः शमदमादयः अपि त्रयाणां वर्णानां मुमुक्षूणां साधारणाः। ब्राह्मणस्य सत्वोद्रेकस्य स्वाभाविकेन शमदमादयः सुखोपादानाः शमादयः स्वभावजं कर्म इत्युक्तम्। ब्राह्मणकर्म याजनाध्यापनप्रतिग्रहाः, क्षत्रियस्य जनपथपरिपालनं, वैश्यस्य कृष्यादयः कर्माः शूद्रस्य तु पूर्णवर्णत्रयपरिचर्या [१०३] एव इति रामानुजभाष्यम्।

### ६.२ सात्विक-राजस-तामस गुणनिरुपणं गीतायाम्

"आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।

यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु।।"१७.७।

सात्विकादीनां गुणानां निरुपणं गीताशास्त्रे सप्तदशमे (१७) श्रद्धात्रयविभागयोगो नामाध्याये एवमन्तिमे अष्टादशमे (१८) मोक्षसन्यासयोगे च विचारयति। अत्राद्यं भोजनं, तपः, दानम्, इत्यादीनि सप्तदशमे निरुपयति। अन्तिमाध्याये त्यागं, कर्म, बुध्दिः, धृतिः, सुखम् इत्यादीनि विषयाणि मोक्षसन्यासयोगे च प्रतिपादयति। एषु भोजनविषयं ६.२.२ रुपेण विचारयति।

#### ६.२.१ तपः

"श्रद्धया परया तप्तं तपस्त्रिविधं नरैः।

अफलाकाङ्क्षिभिर्युत्कैः सात्विकं परिचक्षते।।१७.१७।

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।

क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्।।१७.१८।

मूढग्राहेणात्मनाो यत्पीडया क्रियते तपः।

परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्।।"१७.१९।

शरीरतपमित्यनेन देवः, ब्राह्मणः, गुरुः बुध्दिमान् इत्यादीनां पूजनं शौचम् आर्जवं, ब्रह्मचर्यम्, अहिंसा, इत्यादिकं शरीर निर्वर्त्यं कार्यकारणैः कर्तृादिभिः साध्यं शरीरम् तप उच्यते। यत् सत्यं वाक्यम् अनुद्वेगकरम् प्रियहितं च यत् तत् परमं तपो वाङ्मयम्। यथा शान्तो भव वत्स स्वाध्यायं योग च अनुतिष्ठ तथा ते श्रेयो भविष्यति तद् वाङ्मयं तपः उच्यते। मानसतपं नाम मनसः प्रशान्तिः सौमनस्यं वाक्संयमः भावसंशुध्दिः परैः अमायावित्वं भावसंशुध्दिः तदेव। कायिकं, वाचिकं, मानसं, च तपः तप्तैः नरैः सत्वादिभेदेन त्रिविधमिति

अनन्तरं विचार्यते। सात्विकतपः नाम आस्तिक्यबुद्ध्या प्रकृष्टया अनुष्ठितं प्रकृतं त्रिप्रकारम् अधिष्ठानमनुष्ठातृभिः फलाकांङ्क्षा रहितैः यद् तपः तत्। सत्कारमान पूजार्थं दम्भेन च एव यत् क्रियते तपः तत् राजसमिति। अविवेकनिश्चयेन आत्मनः पीडया क्रियते यत् तपः परस्य उत्सादनार्थं वा तत् तामसतप इत्युच्यते[१०४]।

अस्य विषये द्वैतमतानुसारेण एवं श्लोकसंग्रहरूपेण यथा प्रीतिरन्तरिका हृद्यत्वं दर्शने। स्थिराश्च न तदैव पक्ता भवन्ति तथाह्याज्यादयः। १७.१९ तम श्लोकै यथा भाष्यं सौम्यत्वमक्रौर्यम् अक्रूरः सोम्य उच्यते इति ह्यभिधानम्। मौनं मननशीलत्वं बाल्यं च पाण्डित्यं च निर्विद्याथमुनिः इति हि श्रुतिः। एतेन हिदं सर्वं मतम्। यदनेनेदं सर्वं मतं तस्मान्मुनिस्तन्मुनिरित्याचक्षते इति हि भाल्लवेयश्रुतिः। एवं भवति द्वैतमते अस्यमते अभिप्रायः [१०५]।

विशिष्टाद्वैतमतानुसारेण १७ अध्याये १७-१९ तम श्लोकैः फलाकांक्षारहितैः परमपुरुषाराधनरूपमिदं चिन्तायुक्तैः यत् कायवाङ्मनोभिः तप्तं तत् सात्विकं तप। मनसा आदरः सत्कारः वाचा प्रशंसामानं शारीरो नमस्कारादिः पूजा फलाभिसन्धिपूर्वकं सत्काराद्यार्थं हेतुनं स्वर्गादि फलसाधनत्वेन स्थिरत्वात् चलत्वं पातभयेन चलनहेतुत्वम् अध्रुवत्वं क्षयिष्णुत्वम्। अविवेकिनः मूढैः कृतेन अभिनिवेशेन शक्त्यादिकम् अपरीक्ष्य आत्मपीडा च यत् तपः क्रियते तत् तामसमुदाहृतम् [१०६]।

## ६.२.२ दानम्

अनन्तरं दानविषये च सात्विकादि भेदं निरुपयति यथा –

"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम्।।१७.२०।
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।

दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।।१७.२१।

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।

असत्कृतमवज्ञातं तत्तामसमुदाहृतम्।।"१७.२२।

दान विषये अद्वैतभाष्यानुसारेण एवं विस्तरति यथा दातव्यमित्येवं मनः कृत्वा यद्दानं दीयते अनुपकारिणे प्रत्युपकारासमर्थाय समर्थायापि निरपेक्षं दीयते, देशे पुण्ये कुरुक्षेत्रादौ, काले संक्रान्त्यादौ पात्रे च षडंगविद्वेदपारंग इत्यादौ तद्दानं सात्विकम्। यद्दानं प्रत्युपकारार्थं काले त्वयं मां प्रत्युपकरिष्यतीत्येवमर्थे फलं वास्य दानस्य मे भविष्यत्यदृष्टमिति तदुद्दिश्य पुनर्दीयते च परिक्लिष्टं खेदसंयुक्तं तद्दानं राजसम्। तामसस्तु म्लेच्छाशुच्यादि संकीर्णे अकाले पुण्यहेतुत्वेनाप्रख्याते संक्रान्त्यादि विशेषरहिते, अपात्रेभ्यश्च मूर्ख-तस्करादिभ्यो, देशादि संपत्तौ वा असत्कृतं प्रियवचनपादप्रक्षालनपूजादि रहितमवज्ञातं पात्रपरिभवयुक्तं च यद्दानं तत्तामसमुदाहृतम् [१०७]।

दानविषये प्रत्येकतया द्वैतभाष्ये भाष्यं नास्ति, गीतातात्पर्ये युक्तैः भगवदर्पणादि योगयुक्तैः। युक्तैरिति दानादिषु सर्वत्र समम्। विशिष्टाद्वैतमते फलाभिसन्धिरहितं दातव्यम् इति देशे, काले, पात्रे च अनुपकारिणे यद् दानं दीयते तद् दानं सात्विकं, प्रत्युपकारकटाक्षगर्भं फलमुद्दिश्य च परिक्लिष्टम् अकल्याणद्रव्यकं यद् दानं दीयते तद् दानं राजसम्। पादप्रक्षालनादि गौरवरहितम् अवज्ञातं सावज्ञम्, अनुपचारयुक्तं यद् दीयते तत् तामसम्। एवं वैदिकानां यज्ञतपोदानानां सत्वादि गुणभेदेन भेदः उक्तः[१०८]।

## ६.२.३ त्यागम्

गुणानुसारेण विभक्तेषु अनन्तरं मोक्षसन्यासयोगे ७,८,९ श्लोकैः त्यागमधिकृत्य विचारयति। तत्रापि सात्विकादिकं च भेदवर्तते तद् यथा-

नियतस्य तु सन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः।।१८.७।।
दुःखमित्येव यत्कर्म कायक्लेशभयात्येजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।।१८.८।।
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः।।१८.९।।

आद्यं तामसत्यागं यथा मोहादज्ञानात्तस्य नियतस्य परित्यागः नियतं चावश्यं कर्तव्यं त्यज्यते चेति विप्रतिषिद्धम् अतो मोहनिमित्तः परित्यागः तामसत्यागः इति। राजसं यथा दुःखमित्येव यत्कर्म कायक्लेशभयाच्छरीर दुखभयात्यजेत् परित्यजेत् स कृत्वा राजसं रजोनिवृत्ये त्यागं नैव त्यागफलं ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं न लभेनैव लभेत। सात्विकं यथा यद्यपि फलं न श्रूयते नित्यस्य कर्मणः तथापि नित्यं कर्मकृतम् आत्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मानम्। तामपि कल्पनां निवारयति फलं त्यक्त्वा इत्यनेन। तादृशत्यागो नित्यकर्मसु संगफलपरित्यागः सात्विकः सत्वनिर्वृत्तो मतोऽभिमतः [१०९] । त्यागविषये द्वैतभाष्ये सङ्गफलत्यागमृते स्वरुपत्यागः कार्य इति मिथ्याज्ञानाख्यमोहात्। स्वयज्ञादीन् परित्यज्य निरयं यात्यसंशयम्। अष्टम, नवम, श्लोकैः मोहं विना दृष्टदुखमित्येव। दुखशब्देन केवलमानसम्। कायक्लेशस्य पृथगुक्तेः -

दुखं तु मानसं ज्ञेयमायासो बाह्य उच्यते।
विशेषस्य विवक्षायामन्यथा सर्वमेव तु।।[११०]

१८.७ अस्य विषयस्य विशिष्टाद्वैतभाष्ये यथा ज्ञानोत्पादिनः कर्मणो बन्धकत्वमोहात् तामसः परिकीर्तितः। तमो मूलः त्यागः तामसः तमः कार्याज्ञानमूलत्वेन त्यागस्य तमोमूलत्वम्। तमो हि अज्ञानस्य मूलम्। अज्ञानं तु ज्ञानविरोधि विपरीतज्ञानम्। अतो नित्यनैमित्तिकादेः कर्मणाः त्यागो विपरीतज्ञानमूलेत्यर्थः। यद्यपि परम्परया मोक्षसाधनभूतं तथापि

दुखात्मकद्रव्यार्जनसाध्यत्वात् बह्वायासरूपतया करत्वात् च मनसः अवसादकरम् इति तद्भीत्या योगनिष्पत्तये ज्ञानाभ्यास एव यतनीय इति यो महायज्ञाद्याश्रमकर्म परित्यजेत्, स रजोमूलं तदा अयथावस्थितशास्त्रार्थरूपमिति नित्यनैमित्तिकमहायज्ञादि वर्णाश्रमविहितं कर्ममदाराधनरूपतया स्वयम्प्रयोजनम्, इति मत्वा कर्मणि ममताां स सत्वमूलं यथावस्थितशास्त्रज्ञानमूलमित्यर्थः[१११]।

## ६.२.४ कर्त्ता

अत्र मोक्षसन्यासयोगे विचारित सात्विकभेदविषयेषु कर्ता इत्यस्य भेदाः विचारयति। अस्मिन्नेवाध्यायान्तर्गतविषयाः कर्म, ज्ञानमित्यादिकं प्रबन्धे तृतीयचतुर्थाध्यायेषु विचारितम्। अतः पुनः तत् विषयं न विचारयति। भाष्यान्तर्गत सात्विकादि भेदमत्र निरुपयति। यथा

मुक्तसङ्गोऽनहं वादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते।।१८.२६।
रागी कर्मफलप्रेप्सुर्लब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः।।१८.२७।
अयुक्तः प्राकृतं स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामसमुच्यते।।१८.२८।

मुक्तः परित्यक्तः संगं येन सः मुक्तसंगं, न अहंवदनशीलो, धृतिर्धारणमुत्साह उद्यमस्ताभ्यां समन्वितः संयुक्तो धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्ययोः क्रियमाणस्य कर्मणः फलसिद्धौ असिद्धौ च सिद्ध्यसिद्ध्ययोर्निर्विकारः केवलं शास्त्रप्रेमेण प्रयुक्तः न फलादिना यः स निर्विकारः उच्यते। तादृशकर्ता यः स सात्विकः उच्यते। कर्मफलार्थी लुब्धः परद्रव्योषु संजाततृष्णः तीर्थादौ स्वद्रव्यापरित्यागी वा हिंसात्मकः परपीडाकरस्वभावः, अशुचिब्रह्मान्तः शौचवर्जितो हर्षशोकान्वितः इष्टप्राप्तौ हर्षोऽनिष्टप्राप्तौ इष्टवियोगे च शोकस्ताभ्यां

हर्षशोकाभ्यामन्वितः संयुक्तः तस्यैव च कर्मणः संपत्तिविपत्तिभ्यां हर्षशोकौ स्यातां ताभ्यां संयुक्तो यः कर्ता स राजसः। तामसी कर्ता नाम प्राकृतोऽत्यंतासंस्कृतबुद्धिर्बालसमः स्तब्धो दंडवन्ननमति कस्मैश्चित्। शठो मायावी शक्तिगुहनकारी नैकृतिकः परवृत्तिच्छेदनपरः अलसो अप्रवृत्तिशीलः कर्तव्येष्वपि विषादी सर्वदावसन्नस्वभावो दीर्धसूत्री च कर्तव्यानां दीर्घप्रसारणे सर्वदा मंदस्वभावः यदद्य श्वो वा कर्तव्य तन्मासेनापि न करोति यश्चैव भूतः स कर्ता तामस उच्यते [११२]। कर्तुविषये द्वैतभाष्ये सर्वस्य भगवदधीनत्वनिश्चयादेवानहंवादी, तामसकर्तु विषये परकृतं दोषं दीर्घकालकृतमप्यनुचितं यः सूचयति स दीर्घसूत्री-

परेण यः कृतो दोषो दीर्घकालकृतोऽपि वा।
यस्तस्य सूचको दोषात् दीर्घसूत्री स उच्यते।।[११३]

विशिष्टाद्वैतमतानुसारेण फलसंङ्गरहितः कर्तृत्वाभिमानरहितः आरब्धे कर्मणि यावत्कर्म समाप्य वर्जनीयदुःखधारणं धृतिः, उत्साह उद्युक्तचेतस्त्वं, ताभ्यां समन्वितः, युद्धादौ कर्मणि तदुपकरणभूतद्रव्यार्जनादिषु च सिद्ध्यसिद्ध्योः अविकृतः चित्तः कर्ता सात्विकः। यशोऽर्थी कर्मफलार्थी कर्मापेक्षित द्रव्यव्ययस्वभावरहितः परान् पीडयित्वा तैः कर्मकुर्वाणः कर्मापेक्षित शुद्धिरहितः युद्धादौ कर्मणि जयादि सिद्ध्यसिद्ध्ययोः हर्षशोकान्वितः कर्ता राजसः। शास्त्रीयकर्मयोग्यः विकर्मस्थः अनधिगतविद्यः अनारम्भशीलः शठः अभिचारादि कर्मरुचिः वाञ्चनपरः आरब्धेषु अपि कर्मसु मन्दप्रवृत्तिः। अतिमात्रावसादशीलः अभिचारादि कर्मकुर्वन् परेषु दीर्घकालात्यर्थपर्यालोचनशीलः एवम्भूतो यः कर्ता स तामसः[११४]।

## ६.२.५ बुद्धिः

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी।।१८.३०।।
यया धर्ममधर्मं च कार्यं चाकार्यमेव च।

अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी।।१८.३१।।

अधर्मं धर्ममिति या मन्यते तमसावृता।

सर्वार्थान्विपरितांश्च बुद्धिः सा पार्थ तामसी।।१८.३२।।

अस्यविषयस्योपरि अद्वैतभाष्ये यथा कर्ममार्गः शास्त्रविहितविषयः बंन्धमोक्षसमानवाक्यत्वात्प्रवृत्ति निवृत्ति कर्मसन्यासमार्गः, विहितप्रतिषिद्धे लौकिके वैदिके वा शास्त्रबुद्धेः देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणां बिभेत्यास्मादिति भयं न भयमभयं दृष्टादृष्टविषययोर्भयाभययोः कारणे। बंन्धं सहेतुकं मोक्षं च सहेतुकं या वेत्ति विजानाति बुद्धिः स पार्थ सात्विकी। राजसबुद्धिः यया धर्म शास्त्रचोदितम् अधर्म च तत्प्रतिषिद्धं कार्यं चाकार्यमेव च पूर्वोक्ते एव कार्याकार्ये अयथावन्न यथावत्सर्वतो निर्णयेन न प्रजानाति बुद्धिः तदेव। अधर्मं प्रतिषिद्धं धर्मविहितमिति या मन्यते जानाति तामसा आवृता सति सर्वार्थान्वानेव ज्ञेयपदार्थान्विपरीतांश्च विपरीतानेव विजानाति बुद्धिः सा पार्थ तामसी च [११५]।

बुद्धिः विषये माध्वमते तेषां मतं किमिति विचारयति। अत्र सात्विकस्य तात्पर्यरुपेण यथा –

"भगवद्भक्तिसामर्थ्यात् प्रकृष्टो न कृतो हि यः।

स प्राकृतो दीर्घसूत्री कुर्या पश्चादिति स्मरन्।।"

प्राप्तकालस्य कर्मणो दीर्घकालेनैव कृतिं सूचयन् दीर्घसूत्रीत्यर्थः।

"अलसो दीर्घसूत्री च सत्वयुक् तामसो मतः।

अयुक्तो राजसः स्तब्धः प्राकृतो निकृतिः शठ।।

एकैकेनैव दोषेण प्रोक्तस्तामस तामसाः।

दुर्नरत्वं च तिर्यक्त्वं तमश्चैतत्फलं क्रमात्।।"

३१,३२ तम श्लोकस्य तात्पर्यरूपेण यथा

"किञ्चित् यथावद् धर्मादीन यथा पश्यति।

यया बुद्ध्या राजसी सा मिथ्यादृक् त्वेन तामसी।।" [११६]

मोक्षसन्यासयोगे ३०,३१,३२ तम श्लोकैः सात्विकाबुद्धिः प्रवृत्तिः अभ्युदयसाधनभूतो धर्म तौ उभौ यथावस्थितौ सर्ववर्णानां प्रवृत्ति निवृत्ति धर्मयोः अन्यतरनिष्ठानां देशकालावस्था विशेषेषु इदं कार्यम् इदमकार्यम् इति च या वेत्ति शास्त्रात् निवृत्तिः भयस्थानं तदनुवृत्तिः अभयस्थानं संसारयाथात्म्यं तद्विगमयाथात्म्यं च बुद्धिः। पूर्वोक्तं द्विविधं धर्मतद्विपरीतं च तन्निष्ठानां देशकालावस्थादिषु कार्यं च अकार्यं च यथावत् न जानाति सा राजसी। तामसी बुद्धिः तमसा आवृता सति सर्वार्थान् विपरीतान् मन्यते धर्मंमधर्मं सन्तं च अर्थम् असन्तम्। असन्तं च अर्थं सन्तं परं च तत्वम् अपरं च तत्वं परम् एवं सर्वं विपरीतं मन्यते [११७]।

## ६.२.६ धृतिः

अत्र मोक्षसन्यासयोगे ३३, ३४, ३५ तमश्लोकैः धृतीनां सात्विकादि भेदं निरुपयति यथा-

"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।

योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी।।१८.३३।।

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन।

प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी।।१८.३४।।

यया स्वप्नं भयं शोकं विषादं मदमेव च।

न विमुञ्चति दुर्मेधा धृतिः सा तामसी मता।।"१८.३५।।

सात्विकादिधृतिः कीदृशमिति अद्वैतभाष्यानुसारेण विचारयति तद् यथा- अव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रिया धार्यमाणा योगेन धारयतीति। या एवं लक्षणा धृतिः सा पार्थ सात्विकी। धर्मकामार्थास्तान् धर्मकामार्थान्धृत्या यया धारयते मनसि

नित्यकर्तव्यरुपानवधारयति हे अर्जुन प्रसंगेन यस्य धर्मादेधारणप्रसंङ्गस्तेन तेन प्रसंङ्गेन फलाकांक्षि च यः पुरुषः तस्य धृतिर्या सा पार्थ राजसि। मनसि नित्यमेव कर्तव्यरुपतया कुर्वन् न विमुंचति धारयत्येव दुर्मधाः कुत्सितमेधाः पुरुषो यः तस्य धृतिर्या सा तामसीमताः [११८]।

अस्य विषयस्योपरि माध्वमते वैष्णवो भक्तियोगो यस्तद्युक्ता सात्विकी धृतिः इति च। विहितविषयैवेत्येव्यभिचारिणी। तामसधृति विषये स्वप्नं भयम् इत्यादि सर्वनिषिद्धो फललक्षणम्। तत्तत् सात्विकमेव स्याद् यद्याद् वृद्धाः प्रचक्षते [११९]। निन्दन्ति तामसं तत्तद् रजसं तदुपेक्षितम् इति भागवते।

रामानुजमतानुसारेण अस्य मते योगो मोक्षसाधनभूतं भगवदुपासनं योगेन प्रयोजनभूतेन अव्यभिचारिण्या योगोद्देशेन प्रवृत्ताः तत्साधनभूता मनः प्रभृतीनां क्रियाः यया धृत्या धातयते सा सात्विकी धृती इति। राजसस्तु पुरुषः प्रकृष्टधर्मकामार्थ शब्देन तत्साधनभूता मनः प्राणेन्द्रियक्रिया लक्ष्यते। फलाकांक्षी इति अत्रअपिफलशब्देन रजसत्वात् धर्मकामार्थे एव विवक्षिता। अतो धरमकामार्थापेक्षया मनः प्रभृतीनां क्रियाः यया धृत्या धारयते स एव। विषयानुभवजनितं मदं स्वप्नमदौ उद्दिश्य प्रवृत्ताः मनः प्राणादीनां क्रियाः धारयति। भयशोकविषादशब्दाः च भयशोकादि दायिविषयपराः। तत्साधनभूताः च मनः प्राणादि क्रियाः यया धारयते सा तामसी [१२०]।

## ६.२.७ सुखम्

सात्विकादि गुणानुसारेण विभक्तविषयेषु अन्तिमरूपेण भवति सुखमित्यस्य भेदं निरुपयति। तद् ३७,३८,३९ तम श्लोकैः अत्र विस्तरति।

“यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजम्।।१८.३७।।

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम्।

परिणामे विषमिव तत्सुखं राजसं स्मृतम्।।१८.३८।।

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।

निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्।।"१८.३९।।

अद्वैतभाष्ये सात्विकसुखमित्यनेन प्रथमसंनिपाते ज्ञानवैराग्य ध्यान समाध्यारंम्भेऽत्यंतायासपूर्वकत्वाद्विषमिव दुखात्मकं भवति। परिणामे ज्ञानवैराग्यादि परिपाकजं सुखममृतोपमं तत्सुखं सात्विकं प्रोक्तं विद्वद्भिः। विषयेन्द्रियसंयोगाज्जायते यत्सुखं तत्सुखमग्रे प्रथमक्षणेऽमृतोपमममृतसमं परिणामविषमिव बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानि हेतुत्वात् अधर्मतज्जनितनरकादि हेतुत्वात् च परिणामे तदुपभोगपरिणामान्ते विषमिव तत्सुखं राजसं स्मृतम्। यदग्रे च अनुबन्धे च अवसानोत्तरकाले सुखं मोहनं मोहकरमात्मनो निद्रालस्य प्रमादोत्थं निद्रा च आलस्यं च प्रमादश्च तेभ्यः समुत्तिष्ठतीति निद्रालस्य प्रमादोत्थं तत्तामसमुदाहृतम् [१२१]।

द्वैतभाष्ये विष्णोः प्रसादात् स्वात्मनः प्रसादात् सात्विकं सुखम् [१२२]। रामानुजमतानुसारेण योगोपक्रमवेलायां बह्वायाससाध्यत्वात् विविक्तस्वरूपस्य अननुभूतत्वात् च दुखम् इव भवति। परिणामे विपाके अभ्यासबलेन विविक्तात्मस्वरूपाविर्भावे अमृतोपमं भवति तत् च आत्मविषया बुद्धिः तस्याः निवृत्तसकलेतर विषयत्वं प्रसादः निवृत्तसकलेतरविषयबुद्ध्या विविक्तस्वभावात्मानुभवजनितं सुखं अमृतोपमं भवति। अनुभववेलायां अमृतम् इव भवति विपाके विषयाणां सुखता निमित्तक्षुधादौ निवृत्ते तस्य च सुखस्य निरयादिनिमित्तत्वात् पीतं भवति तद् राजसम्। अनुभववेलायां विपाके च मोहहेतुः भवति मोहः अत्र यथावस्थितवत्स्वकाशः अभिप्रेतः। निद्रालस्य प्रसादजनितम् निद्रादयो हि अनुभववेलायां अपि मोहहेतवः। निद्रया मोहहेतुत्वं स्पष्टमालस्यम् इन्द्रियव्यापारमान्द्यम्। इन्द्रियव्यापारान्द्ये च ज्ञानमाद्यं भवति एव प्रमादः कृत्यानवधानरूप इति अत्रापि ज्ञानमाद्यं

भवति। ततः च तयोः अपि मोहहेतुत्वं, सुखं अतो मुमुक्षुणा रजस्तमसी अभिभूय सत्वमेव उपादेयम् इति उक्तं भवति [१२३]।

### ६.२.१ भोजनविचारः

“आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।।१७.७।

आयुः सत्वबलारोग्यसुखप्रीतिविवर्धनाः।

रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः।।१७.८।।

कट्वम्ललवणात्युष्णतीक्ष्णरुक्षविदाहिनः।

आहारा राजसस्येष्टा दुखशोकामयप्रदाः।।१७.९।

यातयामं गतरसं पूति पर्युषितं च यत्।

उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।१७.१०।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।

युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।”६.१७।

आयुश्च सत्वं च बलं च आरोग्यं च सुखं च प्रीतिश्च आयुः सत्वबलारोग्यसुखप्रीतयः तासां विवर्धना आयुः सत्वबलारोग्य सुखप्रीतिविवर्धनाः ते च रस्याः रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराश्चिरकालस्थायिनो देहे हृद्या हृदयप्रिया आहारःसात्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरुक्षविदाहिनः। तेन च आहाराराजसस्येष्टा दुखशोकामयप्रदाः। गतरसं रसवियुक्तं पूतिदुर्गन्धं पर्युषितं च पक्वं सद्रात्र्यंतरितं च यत्, उच्छिष्टमपि च भुक्तशिष्टमपि अमेध्यमयज्ञार्हं, भोजनमीदृशं तामसप्रियम् [१२४]। एवं भवति आहारविचारे अद्वैतमतम्।

आहारविषये माध्वदर्शनानुसारेण कथं भवति तेषां विचारः इति अत्र व्याख्यायति। अष्टमश्लोकेन यथा स्थिराः स्थिरगुणाः घृतादयः।

कट्वादीनांमप्यारोग्यरसाद्यर्थत्वेन सात्विकत्वमेव। रस्यादीनामपि राजसत्वमनारोग्यादि हेतुत्वे दुखशोकामयप्रदाः इत्युक्तेः। सत्वं साधुभावः भवति हि सोऽपि शुच्यन्नात् –

"हृद्यं पश्चान्मनोहारी प्रियं तत्कालसौख्यदम्।
सुखदं दिर्घसुघदं रस्यमभ्याससौख्यदम्।।"

नवम श्लोकस्य तात्पर्ये रुक्षं नीरसम् तीक्ष्णं सर्षपादि [१२५]।

अस्यविषये रामानुजमतानुसारेण सत्वगुणोपेतस्य सत्वमयाः आहाराः प्रियाः भवन्ति। सत्वमयाः च आहाराः आयुर्विवर्धकाः पुनः अपि सत्वस्य विवर्धकाः। सत्वमन्तकरणम् अन्तकरणकार्यज्ञानम् इह सत्वशब्देन उच्यते। सत्वस्य ज्ञानविवृद्धि हेतुवचनात्। आहारः अपि सत्वमयो ज्ञानविवृद्धि हेतुः। तथापि विवर्धनाः, परिणामकाले स्वयम् एव सुखस्य विवर्धनाः तथा प्रीतिहेतुभूतकर्मारम्भद्वारेण प्रीतिवर्धनाः। मधुररसोपेताः स्नेहयुक्ताः स्थिरपरिणामः रमणीयवेषः एवं विधाः सत्वमया पुरुषस्य प्रियाः। ९ तम श्लोकेन कटुरसाः अम्लरसाः लवणोत्कटा अत्युष्ण अतितीक्ष्ण रुक्षाः विदाहिनः च इति। अतिशैत्यातितैक्ष्ण्यादिना दुरुपयोगाः तीक्ष्णाः शोषकराः रक्षूाः तापकराविदाहिनः एवं विधाः ते च रजोमयत्वाद् दुखशोकामयत्वाद् दुखशोकामयवर्धनाः रजोवर्धनाः। तामसभोजनं नामचिरकालावस्थितम् त्यक्तस्वाभाविकरसम्, दुर्गन्धोपेतम् कालातिपत्या रसान्तरापन्नम् गुर्वादिभ्यः अन्येषां भुक्तशिष्टम् अयज्ञार्हम् अयज्ञशिष्टम् इत्यर्थः। एवं विधं तमोमयं भवति। भुज्यते इत्याहार एव भोजनम् पुनश्च तमसो वर्धनम्। अतो हितैषिभिः सत्ववृद्धये सात्विकाहार एव [१२६]।

## ६.३ विभूतियोगम्

"यो मामजमनादिं च वोत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते।।१०.०३।
महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।

मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।।१०.०६।

एतां विभूतिं योगं च मम यो वेत्ति तत्वतः।

सोऽविकम्पेन योगेन युज्यते नात्र संशयः।।१०.०७।

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।

इति मत्वा भजन्ते मां बुधा भावसमन्विताः।।"१०.०८।

अस्य गीताशास्य दशमाध्यायो भवति विभूतियोगः, तत्र भगवता विभूतिविषये अद्वैतभाष्यानुसारेण कथं भवति एवं कथं व्याख्यायति इति विशदयति। यः माम् अजम् अनादिं च यस्मात् अहमादिः देवानां महर्षीणां च न मम अन्यः आदिः विद्यते। तादृशं अनादिं च मां वेत्ति लोकमहेश्वरं लोकानां महान्तम् ईश्वरं तुरीयम् अज्ञानतत्कार्यवर्जितम्, असम्मूढः सम्मोहवर्जितः सः मर्त्येषु मनुष्येषु सर्वपापैः मतिपूर्वामतिपूर्वकृतैः प्रमोक्ष्यते[१२७]। (६) भृग्वादयः सप्तमहर्षिषु एवं चत्वारो मनवः . ते च मद्भावाः मद्भावनाः वैष्णवेन सामर्थ्येन उपेताः मानसाः मनसा एव उत्पादिताः मया जाता उत्पन्नाः येषां मनूनां महर्षीणां च सृष्टिः लोके इमाः स्थावरजङ्गमलक्षणाः प्रजाः [१२८]। (७,८) योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं योजगं योगः उच्यते भगवता मदीयं योगं यो वेत्ति तत्त्वतः। अविकंम्बेन अप्रचतितेन योगेन सम्यग्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते। परमं ब्रह्म वासुदेवाख्यं सर्वस्य जगतः प्रभवः मत्तः एव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं सर्वं जगत् प्रवर्तते। एवं मत्वा मां भजन्ते अवगतपरमार्थतत्वाः भावसमन्विताः भावः परमार्थतत्त्वाभिनिवेशः तेन समन्विताः इत्यर्थः[१२९]।

विभूतियोगविषयेद्वैतमतानुसारेण सप्तमश्लोकतात्पर्यरूपेण युज्यते येन योगोऽसावुपायः शक्तिरेववा इति च। विशिष्टभवनं विभूतिः। महत्वम्। विविधभवनं वा। योगः सामर्थ्यम्। अष्टमश्लोकस्य तात्पर्ये भजन्ते माम् इत्यनेन जीवेश्वरैक्याशङ्कां निवर्तयति[१३०]।

रामानुजमतानुसारेण विभूतियोगमधिकृत्य एवं विशदयति। तद् यथा (३) संसारिचेतनस्य हि कर्मकृताऽचित्संसर्गो जन्म। इतरसजातीयतया एकीकृत्य मोहः सम्मोहः तद्रहितोऽसम्मूढः मद्भक्त्युत्पत्तिविरोधिभिः सर्वैः पापैः प्रमुच्यते। लोके मनुष्याणां राजा इतरमनुष्यसजातीयः केनचित् कर्मणा तदाधिपत्यं प्राप्तः, तथा देवानाम् अधिपतिः अपि तथा ब्रह्माण्डाधिपतिः अपि इतरसंसारिसजातीयः तस्यापि भावनात्रयान्तर्गतत्वात् [१३१]। षष्ठश्लोकस्य भाष्ये विशेषतया किमपि नोक्तं। सप्तमश्लोकस्य मद्विभूतिविषयं कल्याणगुणविषयं च ज्ञानं भक्तियोगवर्धनम् इति स्वयम् एव द्रक्ष्यसि इत्यभिप्रायः। अष्टमश्लोकस्य विचित्र चिदचित्प्रपञ्चस्य उत्पत्तिकारणम् एव प्रवर्तते। इदं मम स्वाभाविकं निरङ्कुशैश्वर्यं सौशील्यसौन्दर्यवात्सल्यादिकल्याणगुणगणयोगं च ज्ञानिनो सर्वकल्याणगुणान्वितं। भावो मनोवृत्तिविशेषः मयि स्पृहयालवो मां भजन्त इत्यर्थः।

"अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च।।१०.२०।
आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी।।१०.२१।
वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना।।"१०.२२।

(२०) अनेन श्लोकेन सर्वेषां भूतानां आशये अन्तर्हृदि स्थितः नित्यं ध्येयः। तदशक्तेन च उत्तरेषु भावेषु चिन्त्यः यस्मात् अहमेव आदिः भूतानां कारणं तथा मध्यं च स्थितिः अन्तः प्रलयं च। (२१) आदित्यानां द्वादशानां विष्णुः नाम आदित्यः अहं, ज्योतिषां रविः, मरीचिः नाम मरुतां मरुद्देवताभेदानां अस्मि नक्षत्राणाम् अहं शशी चाहमेव। (२२) वेदानां मध्ये सामवेदः, रुद्रादित्यादीनां देवानां वासवः अस्मि, इन्द्रियाणां मनः चास्मि भूतानाम् अस्मि चेतना।

"रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्।।१०.२३।
पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः।।१०.२४।
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः।।१०.२५।
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः।।"१०.२६।

(२३) रुद्राणां एकादशानां शंकरः चास्मि, कुबेरो यक्षरक्षसां च मध्ये, वसूनां पावकः च अस्मि अग्नि मेरुः शिखरिणां शिखरवताम् अहम्[१३२]। (२४) राजपुरोहितानां मुख्यं प्रधानं मां विद्धि, सेनापतीनाम् अहं स्कन्दः यानि देवखातानि सरांसि तेषां सरसां सागरः अस्मि। (२५) महर्षीणां भृगुः गिरां वाचां पदलक्षणानाम् एकमक्षरम् ओंकारः अस्मि, यज्ञानां जपयज्ञः, स्थावराणां हिमालयश्च।(२६) अश्वत्थः सर्ववृक्षाणां, देवाः एव सन्तः ऋषित्वं प्राप्ताः मन्द्रदर्शित्वात् ते देवर्षयः तेषु अहं नारदः, गन्धर्वाणां चित्ररथः, धर्मज्ञानवैराग्यातिशयं प्राप्तानां सिद्धानां कपिलो मुनिः तं मां विद्धि।

"उच्चैः श्रवसमश्वानां विद्धि मामृतोद्भवम्।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम्।।१०.२७।
आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः।।१०.२८।
अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितृणामर्यमा चास्मि यमः संयमतामहम्।।१०.२९।
प्रहलादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्।।"१०.३०।

(२७) उच्चैःश्रवसम् अश्वानां, गजेन्द्राणाम् ऐरावतं, नराणां च राजानं मां विद्धि[१३३]। (२८) आयुधानाम् अहं वज्रं, दोग्ध्रीणाम् अस्मि कामधुक्, प्रजनयिता अस्मि कन्दर्पः, सर्पाणां सर्पराजः (वासुकिः)।(२९) नागविशेषाणां नागरजः अनन्तश्च, वरुणोयादसम् अहमब्धेवतानां राजा अहं पितूणाम् अर्यमा(पितृराजः) संयमताम् अहं यमः च। (३०) प्रह्लादो नाम चास्मि दैत्यानां, कालः कलयतां गणनं कुर्वतां, मृगाणां च सिंहः व्याघ्रो वा अहं, वैनतेयः च गुरुत्मान् पक्षिणाम्।

२६-३० भाष्ये सुखरुपः पाल्यते लीयते च जगदनेनेति कपिलः -प्रीतिः सुखं कमानन्दः इत्याद्यभिधानात्। प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म इति च। ऋषि प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्। सुखादनन्तात् पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ति इति च बाभ्राव्यशाखायाम् [१३४]।

"पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्त्रोतसामस्मि जाह्नवी।।१०.३१।
सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्।।१०.३२।
अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः।।१०.३३।
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा।।"१०.३४।

(३१) पवनो पवतां पावयितृणां, रामः शस्त्रभृतां दाशरथि रामः अहं, झषाणां मकरो नाम जातिविशेषः अहं, स्रोतसामस्मि जाह्नवी [१३५]। (३२) सृष्टीनां सर्गाणाम् आदिः अन्तः च मध्यं चाहमेव। अध्यात्मविद्या विद्यानां मोक्षार्थत्वात् प्रधानमस्मि। वादः अर्थनिर्णयहेतुत्वात् प्रवदतां प्रधानम्। (३३) वर्णानाम् अकारो वर्णः अस्मि, समाससमूहेषु द्वन्दसमासः अहमेव

अक्षयः अक्षीणः कालः कर्मफलस्य विधाता सर्वजगतो सर्वतोमुखः [१३६]। (३४) प्रलये सर्वहरणात् सर्वहरः सः अहमेव। कीर्तिः, श्रीः, वाक् च नारीणां, स्मृतिः, मेधा, धृतिः, क्षमा इति एताः उत्तमाः श्रीणाम् अहमस्मि। (३१-३६) आनन्दरूपत्वात् पूर्णत्वात् लोकरमणाच्च रामः आनन्दरुपो निष्परीमाण एष लोकश्चैतस्माद् रमते तेन रामः इति शाण्डिल्यशाखायाम्।

"बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतुनां कुसुमाकरः।। १०.३५।
द्युतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्वं सत्ववतामहम्।।१०.३६।
वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः।।१०.३७।
दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्।।१०.३८।
यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।।"१०.३९।

(३५) बृहत्साम तथा साम्नां प्रधानम् अस्मि, ऋचां गायत्री ऋक् अहमस्मि, मासानां मार्गशीर्षः, ऋतूनां कुसुमाकरो वसन्तः। (३६) द्युतम् अक्षदेवानादिलक्षणं छलयताम् अस्मि, तेजस्विनां तेजः अहमेव व्यवसायः अस्मि व्यवसायिनां सत्त्वं सत्त्ववतां सात्विकानां अहम्[१३७]। (३७) वृष्णीनां वासुदेवः अस्मि, पाण्डवानां धनञ्जयः, सर्वपदार्थज्ञानीनाम् अपि अहं व्यासः, कवीनां क्रान्तदर्शिनाम् उशना कविः अस्मि। (३८) दण्डः दमयतां दमयितृणाम् अस्मि अदान्तानां दमकारणं, नीतिः अस्मि जिगीषतां जेतुम् इच्छतां मौनं च एव अस्मि, गुह्यानां ज्ञानं ज्ञानवतां अहम्। (३९) यत् चापि सर्वभूतानां बीजं प्ररोहकारणं तत् अहं, चरमचरं वा

मया विना यत् स्यात् मया अप्रकृष्टं परित्यक्तं निरात्मकं शून्यं हि तत् स्यात् अतो मदात्मकं सर्वमित्यर्थः[१३८]।

(३७,३८) आच्छादयति सर्वं वासयति च वसति च सर्वत्रेति वासुः देवशब्दार्थम् उक्तः पुरस्तात्। विशिष्टः सर्वस्मादा समन्तात् स एवेति व्यासः। तथाचाऽग्रेयशाखायाम् स व्यासो वीति तमब्वै वि सोऽधस्तात् स उत्तरतः स पश्चात् स पूर्वस्मात् स दक्षिणतः स उत्तरत इति। (३९,४०) मया विना यद् भूतं

विंशति (२०) आरभ्य(४०) चत्वारिंशत् पर्यन्त श्लोकैः शङ्करभाष्यवदेव मध्व रामानुजभाष्येषु विशेषतया प्रत्येकया च किमपि नोक्तम् [१३९]।

"नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्मयो मया।।"१०.४०।

## ६.४ विश्वरूपदर्शनयोगम्

"अनेकवक्त्रनयनमनेकाद्भूतदर्शनम्।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।।११.१०।
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्।।११.११।
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः।।११.१२।
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा।।११.१३।
ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत।।"११.१४।

विश्वरूपदर्शनयोगे अद्वैतभाष्येण श्रीशङ्कराचार्यः कथं भाष्यमलङ्कृतवानिति अत्र विशदयति। यथा दशम श्लोकेन अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनं तथा अनेकदिव्याभरणं, दिव्यानेकोद्यतायुधं दर्शयामास। (११) एवं दिव्यमाल्याबरधरं, दिव्यगन्धानुलेपनम्, सर्वाश्चर्यमयं विश्वतोमुखं सर्वभूतात्मभूतत्वात् तं दर्शयामास अथवा अर्जुनो ददर्श [१४०]। (१२) दिवि अन्तरीक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्र या युगपत् उत्थिता भाः सा यदि सदृशी स्यात् तस्य महात्मनो विश्वरूपस्य एव भासः यदि वा न स्यात् ततः अपि विश्वरूपस्य एव भाः अतिरिच्यते। (१३) तत्र विश्वरूपे एकस्मिन् विश्वरूपे एकस्मिन् स्थितम् एकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा देवपितृमनुष्यादि भेदैः अपश्यत् दृष्टवान् देवदेवस्य हरेः शरीरे पाण्डव इति। (१४) तदा विश्वरूपं दृष्टा विस्मयेन आविष्टो हृष्टरोमा च अभवत् धनञ्जयः, प्रणम्य प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृताञ्जलिः संपुटीकृतहस्तः सन् अभाषत[१४१]।

द्वैतमतानुसारेण विश्वरूपदर्शनं कथं भाष्यरचना अकरोत् इति अत्र विवृणोति। १०,११ श्लोकेषु भाष्यं नास्ति। द्वादशतमश्लोकस्य भाष्ये सहस्रशब्दो अनेकवाची। तदपि पाकशासनविक्रमः इत्यादिवत् प्रत्यायनार्थमेव। तथाहि ऋग्वेदखिलेषु -अनन्तशक्ति परमोऽनन्तवीर्यः सोऽनन्ततेजाश्च ततस्ततोऽपि इति। महातात्पर्यञ्च बाहुल्यम्। न च परिमाणोक्त्या किञ्चित् प्रयोजनम् [१४२]। १३,१४ श्लोकैः आत्मानमव्ययम् परमं रुपमैश्वरम् सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् इत्यादिरुपविशेषणाच्च रुपस्येश्वरसाक्षात्स्वरूपत्वं नित्यत्वं तत एव चिदानन्दाद्यात्मकत्वं च सिद्धम्। मम देहे इत्युक्तत्वाच्चाऽदित्यादीनां भेदः सिद्धः। अचिन्त्यशक्तित्वादीश्वरस्य। अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् इति *श्रीविष्णुपुराणे*। नैषा तर्केण मतिरापनेया इति च श्रुतिः। अतिप्रसङ्गस्तु महातात्पर्यवशाद् वाक्यबलाच्चापनेयः। नहि घटवत् कश्चिदपि पदार्थो न दृष्ट इत्येतवता प्रमाणदृष्टः स निराक्रियते। केषुचित् पदार्थेषु वाक्यव्यवस्तु अचिन्त्यशक्तित्वाभावादङ्गीक्रियते। स विश्वरूपोऽनूनरूपो यतोऽयं सोऽनन्तो नहि नाशोअस्तितस्य इति शाण्डिल्य शाखायाम् [१४३]।

अर्जुन उवाच

“पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।

ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्।।११.१५।

अनेकबाहुदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्।

नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप।११.१६।

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।

पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्।।११.१७।

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।

त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे।।११.१८।
अनादिमध्यन्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्।

पश्यामि त्वां दीप्ताहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्।।”११.१९।

(१५) हे देवान् तव देहे सर्वान् देवान् पश्यामि। तथा भूतविशेषसंघान् ब्रह्मणां चतुर्मुखम् ईशं प्रजानां कमलासनस्थं पृथ्वीपद्ममध्ये मेरुकर्णिकासनस्थ ऋषीन् च वसिष्ठादीन्, उरगान् च पश्याम्यहम्। (१६) अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वत्र अनन्तरूपं नान्तं न मध्यं न पुनः आदिं पश्यामि हे विश्वेश्वर विश्वरूप। (१७) किरीटिनं तथा गदिनं तथा चक्रिणं तेजोराशीं सर्वतोदीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं समन्तात् दीप्तानलार्कद्युतिं अप्रमेयं च [१४४]। (१८) त्वमक्षरमिति ब्रह्म ज्ञातव्यं मुमुक्षुभिः त्वमस्य विश्वस्य समस्तस्य जगतः परं प्रकृष्टं निधानं निधीयते शाश्वतधर्मगोप्ता सनातनः चिरन्तनः त्वं पुरुषः परो मतः। (१९) अनादिमध्यान्तम् अनन्तवीर्यं तथा अनन्तबाहुः शशिसूर्यनेत्रं चन्द्रादित्यनयनं पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्।

(११-१९) तम श्लोकभाष्ये द्वैतमतानुसारेण मध्वाचार्येण शशिसूर्यनेत्रमित्यपि अहं क्रतुः इत्यादिवत्। तदङ्गजाः सर्वसुरादयोऽपि तस्मात् तदङ्गेत्यृषिभिः स्तुतास्ते

इत्यृग्वेदखिलेषु। चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत इति। बहुरूपत्वात् बह्वङ्गत्वं च तेषां युक्तम्। विंशति (२०) तम श्लोकस्य भाष्ये मातापित्रोरन्तरगः स एकरूपेण चान्यैः सर्वगतः स एकः इति वारुणश्रुतेरेकेन रूपेण द्यावापृथिव्योरन्तरं प्राप्तो भाति। पश्य मे पार्थ रूपाणि इति हि बहूनि हि रूपाणि इति बहूनि हि रूपाणि प्रतिज्ञातानि। माता पितरौ च पृथिवीद्यावौ - मा नो माता पृथिवी दुर्मतौ घात् मधु द्यौरस्तु नः पिता इत्यादि प्रयोगात्। न तु नियमतो भयप्रदं तत्स्वरूपम्। नारदस्य तदभावात्। केषाञ्चित् तथा दर्शयति भगवान्। प्रीयन्ति केचित् तस्य रूपस्य दृष्टौ बिभेति कश्चिदभ्यस्तो सर्वतृप्तिः इति हि वारुणशाखायाम्। न तु तं सर्वे पश्यन्ति अदृष्ट्वा अपि तन्निरूप्य भये द्रष्टुस्तथा प्रतिभाति[१४५]।

"द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाद्भूतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्।।११.२०।
अमी हि त्वा सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्चलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः।।११.२१।
रुद्रादित्या वसवो ये च साध्याविश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घावीक्षन्ते त्वां विस्मिताश्चैव सर्वे।।११.२२।
रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहुरुपादम्।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्।।११.२३।
नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो।।"११.२४।

(२०) द्वावापृथिव्योः इदमन्तरं हि व्याप्तं त्वया एकेन विश्वरूपधरेण दिशः च सर्वाः व्याप्ताः दृष्ट्वा उपलभ्य अद्भुतं विस्मापकं रूपं तव उग्रं क्रूरं लोकत्रयं प्रव्यथितं भीतं प्रचलितं वा महात्मन् अक्षुद्रस्वभाव [१४६]। (२१) भगवतः तादृशरूपं दृष्ट्वा युद्ध्यमानः

योद्धारः, सुरसंघाः, वस्वादिदेवसंघाः, प्रविशन्तो दृश्यन्ते। तत्र केचित् भीताः प्राञ्जलयो स्तुवन्ति। अन्ये पलायने अपि असक्ताः सन्तः। (२२) रुद्रादयोगणाः विश्वदेवाः पितरो गन्धर्वयक्षासुरसिद्धसंघाः गन्धर्वाः यक्षाः कुबेरप्रभृतयः असुराः विरोचनप्रभृतयः कपिलादयः सिद्धाः, ते विस्मयमापन्नाः यस्मात्।(२३) रूपं महत् अतिप्रमाणं ते बहुवक्त्रनेत्रं हे महाबाहो बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा ईदृशं लोकाः भयेन प्रचलिताः तथा अहमपि। (२४) नभस्पृशं प्रज्वलितं अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं दृष्ट्वा प्रव्यथितान्तरात्मा न लभे शमं च उपशमं मनस्तुष्टीं हे विष्णो कस्मात्।

"दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास।।११.२५।
कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः।।११.३२।
तस्मात्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्।
मयैवेते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्।।"११.३३।

(२५) दंष्ट्राकरालानि तव मुखानि दृष्ट्वा एव कालानलसन्निभानि तत्सदृशानि दिशः पूर्वापरविवेकेन न जाने दिङ्मूढो जातः अस्मि अतः न लभे च न उपलभे च शर्म सुखम् अतः प्रसीदो भव देवेश जगन्निवासः[१४७]।(३२) कालः अस्मि लोकक्षयकृत् प्रवृद्धो वृद्धिं गतः, लोकान् समाहर्तुम् अस्मिन् काले प्रवृत्ते ऋते अपि विना त्वां न भविष्यति। तवाशङ्क्या प्रत्यनीकेषु योधाः यस्मात् एवम् । (३३) तस्मात् त्वमुत्तिष्ठ अतिरथाः इति यशो लभस्व केवलं पुण्यैः हि तत् प्राप्यते। जित्वा राज्यं समृद्धम् असपत्नकं मया एव एतेनिहताः पूर्वमेव प्राणैः निश्चयेन हताः त्वं निमित्तमात्रं भव [१४८]।

"कस्माच्च ते न नमेरान्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ।।११.३७।

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।

नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते।।११.३९।

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।

तेनैव रुपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्तो।।"११.४६।

(३७) यतो ब्रह्मणो हिरण्यगर्भस्य अपि आदिकर्त्ता, हे जगन्निवास त्वमअक्षरं तत् परं यत् वेदान्तेषु श्रूयते। सत् विद्यमानम् असत् च यत्र नास्ति इति बुद्धिः। ते उपधानभूते सदसती इति उपचर्यते। सदसतः परं तत् अक्षरं यत् वेदविदो विदन्ति तत् त्वम् एव न अन्यत् । (३९) त्वमेव वायुः, यमः, अग्निः, वरुणः, शशाङ्गः, प्रजापतिः त्वं कश्यपादिः प्रपितामहः ब्रह्मणः अपि पिता बहुशो नमस्कारक्रियाभ्यासवृत्तिगणनं कृत्वा सुचा उच्यते। श्रद्धाभक्त्यतिशयात् अपरितोषम् आत्मनो दर्शयति इत्युक्त्वा विश्वरूपदर्शनयोगे भगवतः विश्वरुपस्य अद्वैतभाष्यानुसारेण कृत भाष्यविवरणम् उपसंहरति[१४९]।

मुक्ताः सुरसङ्गाः विशन्ति। प्रवेशो निर्गमश्चैव मुक्तानां स्वेच्छया भवेत् इति हि ब्रह्माण्डे। (३२) तम श्लोकेन कालशब्दो जगद्बन्धनच्छेदनज्ञानादिसर्वभगवद्धर्मवाची। कल बन्धने कल च्छेदने कल ज्ञाने कल कामधेनुः इति हि पठन्ति प्रसिद्धश्च स शब्दो भगवति। इति हि मोक्षधर्मे विष्णुना बद्धो बलिर्वक्ति। विष्णौ चाधीश्वरे चित्तं धारयन् कानविग्रहे इति हि श्रुतिः। एतन्महद् भूतमनन्तम् इति च। प्र विष्णुरस्तु तवसस्तवीयान् त्वेषां ह्यस्य स्थविरस्य नाम इति च। लोकान् समाहर्तुमिह विशेषेण प्रवृत्तः। भ्रात्रादींश्चर्त इत्यपि शब्दः। प्रत्यनीकत्वं तु परस्परतया। सर्वे हि न भविष्यन्ति [१५०] । अनन्तरं (३७) भाष्ये पूर्णश्चासौ आत्माचेति महात्मा। आत्मशब्दश्चोक्तो भारते

"- यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।

यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यते।।"

तत्परं सदसतोः परम्। असञ्च सञ्चैव च यद् विश्वं सदसतः परम् इति च भारते। इत्येवमुक्त्वा अस्य विषयस्योपरि मधावाचार्यकृत *गीताभाष्यं, गीतातात्पर्यं* च समापयति।

*भगवद्गीतायां* विश्वरूपदर्शनयोगे विशिष्टाद्वैतदर्शनानुसारेण कथं भवति अस्य विषये तेषां मतमिति अत्र विचारयति। ११,१२,१३ श्लोकेषु अन्यभाष्यकारेषु व्याख्यानवदेव। एवमेव १४,१५,१६,१७ श्लोकार्थमेव, अन्यत् किमपि नास्ति। (१८) अस्य भाष्ये शाश्वतस्य नित्यस्य वैदिकस्य धर्मस्य एवमादिभिः अवतारैः त्वमेव गोप्ता सनातनपुरुषः। त्वमेव इति मे मतो ज्ञातः यदुकुलतिलकः त्वमेवम्भूत इदानीं साक्षात्कृत मया इति भाष्यम् [१५१]। (१९) श्लोके विशेषतया एकस्मात् कटिप्रदेशात् अनन्तपरिमाणात् ऊर्ध्वमुद्गता यथोदितदिव्यादिव्योदरादयः, अधश्च यथोदितदिव्यपादाः तत्र एकस्मिन् मुखे नेत्रद्वयम् इति च न विरोधः। शेषं २०, २१, २२, २३, २४, अद्वैतभाष्यवदेव। (२५) अस्य श्लोकभाष्ये सर्वस्य जगतः स्वायत्तस्थितिप्रवृत्तित्वं दर्शयन् पार्थसारथी राजवेषच्छद्मना अवस्थितानां धार्त्तराष्ट्राणां यौधिष्ठिरेषु अनुप्रविष्टानां च असुरांशांनां संहारेण भूभारावतरणं स्वमनीषितं स्वेन एव करिष्यमाणं पार्थाय दर्शयामास। स च पार्थो भगवतः स्रष्ट्रत्वादिकं सर्वैश्वर्यं साक्षात्कृत्य तस्मिन् एव भगवति सर्वात्मनि धार्तराष्ट्रादीनाम् उपसंहारम् अनागतम् अपि तत्प्रसादलब्धेन दिव्येन चक्षुषा पश्यन्[१५२]। (३७) अस्य श्लोकस्य भाष्ये सद् असत् च त्वम् एव, सदसच्छब्दनिर्दिष्टं कार्यकारणभावेन अवस्थितं प्रकृतितत्वम् नाम रूपविभागवत्तया कार्यावस्थं सच्छब्दनिर्दिष्टं तदनर्हतया कारणावस्थम् असच्छब्दनिर्दिष्टं च त्वमेव तस्मात् प्रकृतेः प्रकृतिसम्बन्धिनः च जीवात्मनः परम् अन्यद् मुक्तात्मतत्वं यत् तद् अपि त्वमेव। (३८) तम श्लोकभाष्ये त्वयि विश्वम् इति त्वम् अस्य विश्वस्य परं निधानम् विश्वस्य शरीरभूतस्य आत्मतया परमाधारभूतः त्वमेव। जगति सर्वो वेदिता सर्वं त्वम् एव एवं सर्वात्मतया अवस्थितः त्वम् एव [१५३]। त्वया आत्मत्वेन विश्वं चिदचिन्मिश्रं जगत् ततं व्याप्तम् इत्युक्त्वा अस्य विषये भाष्यमुपसंहरति।

## ६.५ प्रकृतिपुरुषविचारः गीताशास्त्रे

> "प्रकृतिं पुरुषं चैव विद्ध्यनादि उभावपि।
>
> विकारांश्च गुणांश्चाव विद्धि प्रकृतिसम्भवान्।।१३.१९।
>
> कार्याकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते।
>
> पुरुषः सुखदुखानां भोक्तृत्वे हेतुरुच्यते।।"१३.२०।

प्रकृतिपुरुषविचार विषये अद्वैतमतानुसारेण तेषां मतं कीदृशमिति अत्र विचारयति। दत्तेषु आद्य श्लोकेन नित्येश्वरत्वाद् ईश्वरस्य तत्प्रकृतयोः अपि युक्तं नित्यत्वेन भवितुम्। अस्य ईश्वरत्वं नाम प्रकृतिद्वयत्वम्। याभ्यां प्रकृतिभ्याम् ईश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुः ते द्वे अनादि सत्यौ संसारस्य कारणम्। यदि पुनः प्रकृतिपुरुषौ एव नित्यौ स्यातां तत्कृतम् एव जगद् न ईश्वरस्य जगतः कर्तृत्वम्। प्रकृतिः ईश्वरस्य विकारकारणशक्तिः त्रिगुणात्मिका माया, सा संभवो येषां विकाराणां गुणानां च तान् विकारान् गुणान् च विद्धि प्रकृतिसंभवान् प्रकृतिपरिणामान्[१५४]। (२०) देहस्य आरंभकाणि भूतानि पञ्चविषयाः च प्रकृतिसंभवाः विकाराः पूर्वोक्ताः इह कार्यग्रहणेन गृह्यन्ते गुणाः च प्रकृतिसंभवाः सुखदुखमोहात्मकाः करणाश्रयत्वात् करणग्रहणेन गृह्यन्ते। कार्यकरणकर्तृत्वेन संसारस्य कारणं प्रकृतिः। षोडशविकाराः कार्यं सप्त प्रकृतिविकृतयः कारणं तानि एव कार्यकारणानि उच्यन्ते। पुरुषोजीवः क्षेत्रज्ञः भोक्ता इति पर्यायः सुखदुखानां भोग्यानां भोक्तृत्वे उपलब्धृत्वे हेतुः उच्यते। कार्यकारणसुखदुखरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वेन अविद्यारुपः संयोगः स्यात् तदा संसारः स्यात्[१५५] ।

अस्य विषयस्योपरि द्वैतमतसिद्धान्तानुसारेण भाष्यं विलिख्य स्वमतस्थानमकरोत् श्रीमध्वाचार्यः। एषु आचार्यत्रयेषु मध्वाचार्यभाष्ये अन्यद् विशेषो वर्तते, एषैव अस्याध्यायस्य प्रथमश्लोकम् अर्जुन प्रश्नेन आरभ्यते। अद्वैत-विशिष्टाद्वैतेषु भाष्येषु श्लोकोऽयं नास्ति च। अतः अत्र भाष्यावसरे श्लोकसंख्याविषये मतभेदः च सन्ति। (१३.२०) अस्य भाष्ये यतश्च

यदिति वक्तुं प्रकृतिविकारपुरुषान् सङ्क्षिप्याऽह। गुणाः सत्वादयः। तेषामत्यल्पो विशेषो लयात् सर्ग इति विकाराः पृथगुक्ताः। कार्याकार्या गुणस्तिस्रो यतस्त्वल्पोद्भवो जनौ इति। अस्य तात्पर्यरूपेण प्रकृतिं पुरुषं च इत्यत्र पुरुषशब्देन जीवपरयोः प्रकृतिशब्देन चेतनाचेतनप्रकृत्योः स्वीकाराय उभावपीति। विकाराणां सत्वादीनां चोपादानत्वविव भया प्रकृतिसम्भवत्वम्। स्वातन्त्रं तु परमस्यैव। उपद्रष्टाऽनुमन्ता च इत्यादि वक्ष्यमाणत्वात्। गुणानां च विकारत्वेऽप्यधिकविकारत्वविवक्षयाऽन्येषां विकारांश्च इति पृथगुक्तिः[१५६]।

प्रकृतिपुरुषविषये विशिष्टाद्वैतदर्शनानुसारेण प्रकृतिपुरुषौ अन्योन्यसंसृष्टौ इति(१९)। बन्धहेतुभूतान् इच्छाद्वेषादीन् अमानित्वादिकान् मोक्षहेतुभूतान्। पुरुषेण संसृष्टा इयम् अनादिकालप्रवृत्ता क्षेत्राकारपरिणता प्रकृतिः स्वविकारैः इच्छाद्वेषादिभिः पुरुषस्य बन्धहेतुः भवति। सा एव अमानित्वादिभिः स्वविकारैः पुरुषस्यापवर्गहेतुः भवति[१५७]। (२०) कार्यं शरीरं कारणानि ज्ञानकर्मात्मकानि समनस्कानि इन्द्रियाणि तेषां क्रियाकारित्वे पुरुषाधिष्ठिता एव पुरुषाधिष्ठितक्षेत्राकारपरिणतप्रकृत्याश्रया भोगसाधनभूता क्रिया। पुरुषस्य तु अधिष्ठातृत्वम् एव तदपेक्षया अधिकमित्यादिकमुक्तम्। शरीराधिष्ठानप्रयत्नहेतुत्वम् एव हि पुरुषस्य कर्तृत्वम्। प्रकृतिसंसृष्टः सुखदुखानुभवाश्रयः।
पुरुषः प्रकृतिस्थो हि भुङ्के प्रकृतिजान्गुणान्।

"कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।१३.२१।
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः।।१३.२२।
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते।।"१३.२३।

पुरुषो भोक्ता प्रकृतिस्थः प्रकृतौ अविद्यालक्षणायां कार्यकरणरूपेण परिणतायां स्थितः प्रकृतिस्थः। सद्योनयोः देवादियोनयः असद्योनयः पश्वादि योनयः सामर्थ्यात् सदसद्योनयो

मनुष्ययोनयः अपि अविरुद्धाः द्रष्टव्यः। अग्रिमश्लोकेन उपद्रष्टा, अनुमन्ता, आत्मा इत्यादिकं किमिति विवृणोति। कार्यकरणव्यापारेषु अव्यापृतः अन्यो तद् विलक्षणः तेषां कार्यकरणानां सव्यापाराणां सामीप्येन द्रष्टा उपदृष्टा एवं यज्ञोपदृष्टवत् सर्वविषयीकरणात्। अनुमन्ता कार्यकरणप्रवृत्तिषु स्वयमप्रवृत्तः अपि प्रवृत्तः इव तदनुकूलो विभाव्यते सः, प्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतः कदाचित् अपि न निवारयति इत्यनुमन्ता। देहेन्द्रियमनोबुद्ध्यादीनां संहतानां चैतन्यात्मपारमार्थ्येन निमित्तभूतेन चैतन्याभासैनां यत् स्वरुपधारणं तत् चैतन्यात्मकृतम् एव इति आत्मा उच्यते। प्रकृतिं च यथोक्तानाम् अविद्यालक्षणां गुणैः स्वविकारैः सह निवर्त्तिताम् अभावापादितां विद्यया सर्वधा सर्वप्रकारेण वर्त्तमानः अपि सः भूयः पुनः पतिते अस्मिन्विद्वच्छरीरे देहान्तराय न अभिजायते नोत्पद्यते देहान्तरं न गृह्णाति। अनन्तरं ज्ञानोत्पत्या एव पुनर्जन्म भवति इत्यादि विषये चर्चा भवति अत्र पूर्वपक्ष समाधानरुपेण शास्त्रीयरीत्या एव भाष्यं पुरोगच्छति [१५८]।

कार्यं शरीरं, शरीरं कार्यमुच्यते इति ह्यभिधानम्। करणानि इन्द्रियाणि भोगोऽनुभवः स हि चिद्रूपत्वादनुभवति। प्रकृतिश्च जडत्वात् परिणामिनी। श्लोकस्यास्य तात्पर्यरुपेण परमेश्वरस्यैव सर्वकर्तृत्वेऽपि भोक्तृत्वदाने देव्या अल्पप्रवृत्तिरिति दर्शयितुम् उच्यते इति स्थानद्वयेऽप्युक्तम्। कर्तृत्वेऽपि स एव मुख्यहेतुः। तथाऽपि भोक्तृत्वापेक्षया तस्या अधिकप्रवृत्तिरिति कर्तृत्वे हेतुः प्रकृतिरुच्यते इति सर्वहेतुत्वेऽपि विष्णोः प्रकृतेर्जीवं प्रति भोक्तृत्वदानेऽल्पप्रवृत्तिरिति पुरुषो भोक्तृत्वे हेतुरुच्यते इति विशेषहेतोरेवमुच्यत एव [१५९]। मुख्यतस्तु सर्वहेतुत्वं विष्णोरिति भावः(१३.२२) अस्य श्लोकस्योपरि भाष्यं नास्ति, किन्तु तात्पर्ये यथा पुरुषः प्रकृतिस्थः इत्यत्र पुरुषशब्दो जीवे। उभयोरपि पुरुषशब्देन पूर्वं प्रस्तुतत्वात्। यथायोग्यमुपपत्तेः। कार्यकरणसम्बन्धं भोगं च मिथ्येति वदतां निवारणायाऽह। पुरुषः प्रकृतिस्थो हि इत्यनुभवविरोधं दर्शयति तेषाम्।

न हि. ज्ञानाज्ञानसुखदुखादिविषयस्याऽन्तरानुभवस्य भ्रान्तित्वं क्वचिद् दृष्टम्। नचास्य मिथ्यात्वे किञ्चिन्मानम्। शरीरमारभ्यैव ह्यपरोक्षभ्रमो दृष्टः। तत्रापि बलवत्प्रमाणविरोधादेव भ्रान्तित्वं कल्प्यम्। साक्षिसिद्धस्यापि भ्रान्तित्वाङ्गीकारे येन सर्वस्य भ्रान्तित्वाङ्गीकारे येन सर्वस्य भ्रान्तित्वमभ्रान्तित्वं चाऽत्मनोऽवगतं तदपि प्रमाणमात्मैव। व्यवहारतोऽप्यस्तीत्यत्रप्रमाणाभावात् भ्रान्तिरभ्रान्तिर्वा न किञ्चित् सिद्धयति। अनुभवो भान्त इत्युक्ते भ्रान्तित्वे प्रमाणं तत्प्रामाण्यं च कुतः सिद्ध्येत्, व्यवहारतः सर्वमङ्गीकुर्म इत्युक्ते व्यवहारो व्यवहर्ता च कुतः सिद्धः, प्रतीतित इत्युक्ते सैव कुतः स्वत इत्युक्ते स्वस्याभ्रान्तत्वे प्रतीतिं विनैव प्रतीतिरस्तीति भ्रान्तिः स्यात्। स्वाभावोऽपि स्यात्। स्वयमस्तीति च भ्रमः स्यात्। निरालम्बनो भ्रमो नोपपद्यत इत्यस्यापि भ्रमत्वोपपत्तेः। तत्प्रमाणमप्यप्रमाणमेव। प्रमाणत्वभ्रममिति न सिद्धमिति नकिञ्चित् सिद्ध्यति। सुखदुःखादिविषयं ज्ञानमात्मस्वरुपमेवेति तस्य भ्रमत्वे छद्मना विनैव शून्यवादो भवति।

न हि वृत्तिज्ञानविषयमज्ञानादिकं तेषामपि। भ्रमस्य चाविद्याकार्यत्वाङ्गीकारात्। आत्मस्वरुपस्याप्यविद्याकार्यत्वं स्यात्। दुर्घटत्वं भूषणमित्युक्ते दुर्घटत्वं सुघटत्वं चोभयं भूषणमस्माकमित्युत्तरम्। नहि प्रमाणसिद्धस्य दुर्घटत्वे सुघटत्वे वाऽपवादो दृष्टः। दुर्घटत्वं भूषणमिति वदद्भिरात्मनोऽप्यविद्यात्वमङ्गीकृतम्। तदयुक्तमित्युक्ते तत्रापि भूषणत्वं किमिति नाङ्गीक्रियते। अति सुकरत्वात्। नचाऽत्मनोऽप्यविद्यात्वं वदतस्तेषामुत्तरम् [१६०] । अतो अनन्ददोषत्वाद्धीति प्रसिद्ध्यैव भगवता निराकृतः। (२३) अस्य श्लोकस्य भाष्ये यतश्च यदित्याह उपद्रष्टेति। अनुमन्ता अन्वनु विशषतो निरुपकः। अस्य तात्पर्ये अस्य जीवस्य सदसद्योनिजन्मसु कारणं सत्वादिगुणसङ्गः। स्वतन्त्रकारणं तु परम परमेश्वर एवेत्याह उपद्रष्टाऽनुमन्तेति। (२४) पुरुषः सुखदुःखानामिति जीव उक्तः। पुरुषं प्रकृतिं चेति जीवेश्वरौ सहैवोच्येते। अतो युक्तिभिरप्येतदपलापो न युक्तः। अतो यया युक्ताऽविद्यमानत्वादि कल्पयति साऽप्याभासरूपेति सदेव माहात्म्यं वेदैरुचयत इति सिद्धयति। अवान्तरं चतात्पर्यं तत्रास्ति । उक्तं च तत्रैव अवान्तरं तत्परत्वं च सत्वे महद् वाऽप्येकत्वात्तुतयोरनन्ते इति।

श्यामत्वाद्यभिधानाञ्च। युक्तं च पुरुषमतिकल्पितयुक्त्यादेराभासत्वम् अज्ञानसम्भवात्। न तु स्वतः प्रमाणस्य वेदस्याऽभासत्वम्। अदर्शनं च सम्भवत्येव पुंसां बहुनामप्यज्ञानात्। तर्ह्यस्मदनधीतश्रुत्यादौ विपर्ययोऽपि स्यादिति च न वाच्यम्। यतस्तत्रैवाह नैतद्विरुद्धा वाचो नैतद्विरुद्धा युक्तय इति ह प्रजापतिरुवाच इति। तद्विरुद्धं च जीवसाम्यम्। आभास एव च इति चोक्तम्। न चैतत् सर्वं स्वप्नेन्द्रजालादिवत्। न च स्वप्नवदेकजीवकल्पितत्वे मानं पश्यामः। उक्तं चाऽयास्यशाखायाम् स्वप्ने हवा अयं चञ्चतत्वान्नच स्वप्नो नहि विच्छेद एतदिति इति नहीश्वरस्य जीवैक्यमुच्यते, जीवस्य हीश्वरैक्यमिति ध्येयम्। अतो नप्रतिबिम्बत्वविरोध्यैक्यम्। तद्वशत्वात्तु सोऽस्मीति भृत्यैरेव न तु स्वतः इति। प्रातिबिम्ब्येन सोऽस्मि भृत्यश्चेति भवति [१६१]। प्रतिबिम्बं च सादृश्यमेव। एवमुक्त्वा द्वैतभाष्यं समापयति।

विशिष्टाद्वैतमतानुसारेण स्वकार्येषु औपचारिकः स्वतः स्वानुभवैकसुखः प्रकृतिसंसृष्टः प्रकृतिसंसर्गोपाधिकान् सत्वादिगुणकार्यभूतान् सुखदुखादीन् भुङ्क्ते अनुभवति। प्रकृतिसंसर्गहेतुम् नाम पूर्वपूर्वप्रकृतिपरिणामरुपदेवमनुष्यादियोनिविशेषेषु सुखदुखादिषु सक्तः तत्साधनहेतुभूतेषु पुण्यपापकर्मसु प्रवर्तते। ततः तत्पुण्यपापफलानुभवाय सदसद्योनिषु जायते। ततः च कर्म आरभ्यते। ततः च जायते यावद् अमानित्वादिवत् आत्मप्राप्तिसाधनभूतान् गुणान् न सेवत् तावत् एव संसरति [१६२]।(२२)यथा देहे अवस्थितो अयं पुरुषो देहप्रवृत्त्यनुगुणसङ्कल्पादिरुपेण देहस्य भवति, तथा देहस्य भर्ता च भवति तथा देहप्रवृत्तिजनितसुखदुखयोः च भवति।एवं देहनियमेनेन देहभरणेन देहशेषित्वेन च देहेन्द्रियमनांसि प्रति भवति। अस्मिन्देहे देहेन्द्रियमनांसि प्रति परमात्मा इति चोक्तम्। देहे मनसि च आत्मशब्दः अनन्तरम् एव प्रयुज्यते। अपरिच्छिन्नज्ञानशक्तिः अयं पुरुषः अनादिप्रिकृतिसम्बन्धकृतगुणसङ्गान् एतद्देहमात्रमहेश्वरो देहमात्रपरमात्मा च भवति। अन्तिमश्लोकेन (२३) यथा उक्तस्वभावं वक्ष्यमाणस्वभावयुक्तैः सत्वादिभिः यथावत् विवेकेन जानाति देवमनुष्यादिदेहेषु अतिमात्रक्लिष्टप्रकारेण न भुयः प्रकृत्या संसर्गमर्हति [१६३]।

अपरिच्छिन्नज्ञानलक्षणम् अपहतपातपाम्पानमात्मानं तद्देहावसानसमये प्राप्नोति इत्युक्त्वा विषयोऽयमत्र उपसंहरति[१६४] ।

### ६.६ उपसंहारः

आचार्यत्रयाणां *भगवद्गीताभाष्याणां* तुलनम् अधिकृत्य विचिन्त्यते चेत् न केवलं कर्म-ज्ञान-भक्तियोगानां पठनेन समाप्तिं याति। अतः अस्मिन्नध्याये गीतायां विविधेषु अध्यायेषु प्रतिपादितानि विषयाणि अधिकृत्य आचार्यत्रयाणां मतभेदाः विचिन्तिताः । एतेषु अध्यायेषु इतरशास्त्रग्रन्थापेक्षया आत्मस्वरुपादि विषयाः सुव्यक्ततया उपवर्णिताः । एवं तपः, दानमित्यादीनां सात्विक-राजस-तामसभेदं, दैवी-आसुरीस्वभावौ, विभूतियोगम् इत्यादिविषयाः विशदीकृताः । समुद्रे रजतादीनां लाभाय कियदधिकम् अधः गच्छति तावदधिकं प्राप्तुं शक्यते । एवं गीतायामपि अधिकाधिकं पठति तावदधिकं तत्वानि अवगन्तुं शक्यते ।

## अध्यायटिप्पणि

1. बृहदारण्यकोपनिषद्
2. श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् १४८पुटे
3. *Ibid* ., १४८ पुटे
4. *Ibid* ., १५१ पुटे
5. *Ibid* ., ४०५ पुटे
6. सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १५८,१५९ पुटे
7. *Ibid* .,११३ पुटे
8. *Ibid* ., १११ पुटे
9. *Ibid* ., ११३ पुटे
10. *Ibid* ., २७४ पुटे
11. श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् १९४,१९५ पुटे
12. *Op. cit* १७४ पुटे
13. *Ibid* ., १७२ पुटे
14. *Ibid* ., १७३ पुटे
15. *Ibid* ., ५४५,५४६ पुटे
16. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य १७८ पुटे
17. *Ibid* ., १७८ पुटे
18. *Ibid* ., १७९ पुटे
19. *Ibid* ., १७९ पुटे
20. *Ibid* ., १८१,१८२ पुटे
21. *Ibid* ., २९१ पुटे
22. *Ibid* ., ।।१३.२४, ३४० पुटे ।, *Ibid* ., २९१ पुटे
23. *Ibid* .,१९२,।।६.४१। *Ibid* ., १९२ पुटे
24. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १२८ पुटे
25. *Ibid* ., १२९ पुटे
26. *Ibid* ., २२१ पुटे
27. *Ibid* ., २२१ पुटे
28. *Ibid* ., २२२ पुटे
29. *Ibid* ., २३६ पुटे
30. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं, १९४,१९५ पुटे

31. *Ibid* ., २०१,२०२ पुटे

32. *Ibid* ., २०४ पुटे

33. *Ibid* ., २१९ पुटे

34. *Ibid* ., ४०१,४०२ पुटे

35. *Ibid* ., ४५१ पुटे

36. श्रीमद् भगवद्गीता, गीताप्रस्,गोरखपूर् पुटे २२४

37. *Ibid P* 238

38. कठोपनिषद् पुष्पा गुप्ता, पुटे २५

39. श्रीशङ्कराचार्यग्रन्थावलि २ (श्रीमद् भगवद् गीता, मोतिलाल्,बनारस् दिल्ली ) पुटे १३५

40. *Ibid* P 134

41. ब्रह्मसूत्रशाङ्करभाष्यम्, वासुदेव शर्मा, चौखाम्बा सुरभारति प्रकाशन् पुटे ४९३

42. *Op. cit* श्रीमदभगवद्गीता रामानुजभाष्यं , पुटे २७८

43. *Op. cit* श्रीशङ्कराचार्यग्रन्थावलि २ , पुटे १३५

44. *Ibid P* 135

45. *Ibid P* 135

46. *Op. cit* ,ब्रह्मसूत्रशाङ्करभाष्यम्, पुटे ४९०

47. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यं,गीतात्पर्यं पुटे १६५

48. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्य समेता पुटे २३८,२३९

49. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २६० पुटे

50. *Op. cit* श्रीरामानुज-भाष्य ५०४,५०५पुटे

51. *Ibid* ., ५०६,५०७पुटे

52. *Ibid* ., ५०७,५०८ पुटे

53. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः पुटे २३९

54. *Ibid* ., पुटे २४१

55. *Ibid* ., पुटे २४१

56. *Ibid* ., पुटे २४२,२४३

57. *Ibid* ., पुटे २४३,२४४

58. *Ibid.*, पुटे २६०-२६४

59. *Op. cit* श्रीरामानुज-भाष्य ५१० पुटे

60. *Ibid.*, ५१२ पुटे

61. *Ibid.*, ५१४ पुटे

62. *Ibid.*, ५१७,५१८ पुटे

63. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः पुटे ६५

64. *Ibid.*, पुटे २७३

65. *Ibid.*, पुटे २७४

66. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १००,१०१ पुटे

67. *Ibid.*, २८७,२८८ पुटे

68. *Ibid.*, २८८-२९१ पुटे

69. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं १४६ पुटे

70. *Ibid.*, ५७६,५७७ पुटे

71. *Ibid.*, ५७७,५७८ पुटे

72. *Ibid.*, ५७९-४८१ पुटे

73. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २४१,२४२

74. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८०,२७१ पुटे

75. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५३५-५३६ पुटे

76. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २५२,२५३

77. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५३७-५३८ पुटे

78. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २५९,२६०

79. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८६ पुटे

80. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५४९-५५२ पुटे

81. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २३८

82. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८३ पुटे

83. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५६६-५६८ पुटे

84. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २७०

85. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८४,२८५ पुटे

86. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ५६९,५७० पुटे

87. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २७१

88. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८५ पुटे

89. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर्५७१,५७२ पुटे

90. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २७२

91. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८६, पद्मपुराणम् ३७-३९

92. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर्५७४,५७५ पुटे

93. *Op. cit* श्रीमद् भगवद् गीता, शाङ्करभाष्यसमेता २ भागः मोतिलाल् बनारस् दिल्लि पुटे २४९

94. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २६७,२६८ पुटे

95. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर्५२९-,५३२ पुटे

96. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २४६ पुटे

97. *Ibid.*, २४७ पुटे

98. *Ibid.*, २४८ पुटे

99. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १८२ पुटे

100. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर्३२०,३२१ पुटे

101. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २५३ पुटे

102. *Ibid.*, २५४ पुटे

103. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १८४ पुटे

104. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २५५ पुटे

105. *Ibid.*, २५६ पुटे

106. *Ibid.*, २५७ पुटे

107. *Ibid.*, २५८ पुटे

108. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १८८,१८९ पुटे

109. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ३३९-३४६ पुटे

110. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २६३ पुटे

111. *Ibid .,* २६४ पुटे

112. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् १९४,१९५ पुटे

113. *Ibid .,* १९६-२०० पुटे

114. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २६५ पुटे

115. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २०१ पुटे

116. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् २६६,२६७ पुटे

117. *Ibid .,* २६८-२७० पुटे

118. *Ibid .,* २७२ पुटे

119. *Ibid .,* २७५-२७७ पुटे

120. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २०४-२०६ पुटे

121. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर्३६१ पुटे

122. *Ibid .,* ३६७ पुटे

123. *Ibid .,* ३७८,३७९ पुटे

124. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् ३३१,३३२ पुटे

125. *Ibid .,* ३३२,३३३ पुटे

126. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २३१ पुटे

127. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर्४४६ पुटे

128. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं, गीताप्रेस्, गोरखपूर् ३३४,३३७ पुटे

129. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २३२ पुटे

130. *Ibid .,* २३३ पुटे

131. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २३४,२३५पुटे

132. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ४४६-४४८ पुटे

133. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं,गीताप्रेस् गोरखपूर् ४४९,४५० पुटे

134. *Op. cit* श्रीमद्भगगद्गीता मोतिलाल् बनारसीदास , ४९ पुटे

135. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् ७९ पुटे

136. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं ,गीताप्रेस् गोरखपूर् १०१ पुटे

137. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं ४२४,४२५ पुटे

138. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २८२-२८३ पुटे

139. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं ,गीताप्रेस् गोरखपूर् ५६३-५६५पुटे

140. *Op. cit* श्रीमद्भगवद्गीता शांङ्करभाष्य हिन्दी अनुवादसहितं , गीताप्रेस् , गोरखपूर् ३६५,३६६ पुटे

141. *Op. cit* सर्वमूलग्रन्थाः गीताभाष्यम्, गीतातात्पर्यम् २५२,२५३ पुटे

142. *Op. cit* श्रीरामानुज-भाष्य हिन्दी अनुवादसहितं ,गीताप्रेस् गोरखपूर् ४८३,४८४ पुटे

Subrahmanian M. “ Śaṅkara-madhva-rᾱmᾱnujᾱcᾱryᾱṇᾱṃ Śrīmad Bhagavadgītᾱ Vyᾱkhyᾱnᾱni - Ekaṃ tulanᾱtmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# सप्तमोऽध्यायः

## उपसंहारः

मोक्षार्जनाय पृथक् पन्थाः भारतीयदर्शनेन मानवानां पुरतः आविष्कृताः वर्तन्ते। तेषु भक्ति-कर्म-ज्ञानयोगानां अधिकं प्राधान्यं वर्तते च। एते पन्थानः मोक्षशास्त्रविचारितग्रन्थेषु मुख्यतमे गीतायां उपवर्ण्यन्ते । एवं विविधानां मार्गाणां सामञ्जस्यत्वात् बहूनां व्याख्यानानां अवसरः च अस्यां दृश्यते । स्वधर्मानुसारं शंङ्कर-मध्व-रामानुजाचार्याः गीताव्याख्यानं कृताः दृश्यन्ते । वैदिक-दार्शनिकानि तत्वानि एकस्मात् ग्रन्थात् एव आविष्कृतवन्तः एते आचार्याः इति विषयस्यास्य प्राधान्यम् । अतः प्रथमाध्याये भगवद् गीतायाः विविधाः विषयाः, घटना, महाभारते अस्य प्राधान्यं, भगवद्गीतायाः उद्भवः, उपनिषदादि वैदिकचिन्तायाः स्वाधीनं गीतायां, प्रस्थानत्रये भगवद्गीतायाः प्राधान्यं, भगवद्गीता अन्याश्च गीताः इत्यादि विषयाः विचारिताः। द्वितीयोऽध्याये शङ्कर-मध्व-रामानुजानां त्रयाणाम् आचार्याणां जीवितांशाः दर्शनं च सामान्येन विचारयति। भगवद्गीतायाः अष्टादशाध्यायेषु आद्येषु षट्सु अध्यायेषु कर्मयोगस्य प्राधान्यम् विव्रियते इत्यतः प्रबन्धस्य तृतीयाध्याये कर्मयोगविषये आचार्यत्रयाणां मताः निरूप्यन्ते। वेद-इतिहासादिषु कर्मणः प्राधान्यं, एवं प्रस्थानत्रये कर्मविचिन्तनम्, आचार्यत्रयाणां कर्मसङ्कल्पः, ज्ञानयोग-भक्तियोग-सन्यासयोगापेक्षया कर्मयोगस्य प्राधान्यं च अध्याये*f*स्मिन् निरुपयति। कर्मयोगविषये आचार्यत्रयाणां मतानां सामञ्जस्यं वैरुध्यं च अत्र विचिन्त्यते।

चतुर्थाध्याये ज्ञानयोगमधिकृत्य विचारयति। मोक्षोपायेषु अतिप्राधान्यमावहति ज्ञानमिति तत्वम्। अतः मोक्षशास्त्रग्रन्थेषु ज्ञानस्य महत्वं वर्तते च। अध्यायेऽस्मिन् ज्ञानस्य विभागः, वैशिष्ट्यम्, प्रस्थानत्रये ज्ञानस्य प्राधान्यादिकं विचार्यते। ज्ञानकर्मसमुच्चयवादः, तस्य निरासः, अस्मिन् विषये शङ्कर-मध्व-रामानुजानाम् आचार्यत्रयाणाम् मतम् , तेषां मतानां तुलनात्मकमध्यनम् इत्यादि विषयाः प्रतिपाद्यन्ते। पञ्चमाध्याये भक्तियोगमधिकृत्य विचारयति। भक्त्याः स्वरूपं विकासश्च निरुप्य भक्तिलक्षणं, वेदेतिहासपुराणादिषु नारदीय-शाण्डिल्यभक्तिसूत्रेषु च भक्त्याः निरूपणं इत्यादयो विषयाः अस्मिन्नध्याये निरुप्यन्ते। ततः परं

प्रायोगिकवेदान्ते भक्तिः, आचार्यत्रयाणां भक्तिविषयचिन्ता अपि संविचारयति अत्र । शंङ्कराचार्यापेक्षया मध्व-रामानुजाचार्येषु भक्तिभावस्य प्राधान्यमधिकं दृश्यत इति तेषां भक्तिविषये प्रामुख्यम् च अनेनाध्यायेन अवगन्तुं शक्यते। न केवलं कर्म-ज्ञान-भक्तियोगानाम् अपि च अन्येषां भगवद्गीतात्मकानां योगानां परिचिन्तनम् आचार्यत्रयाणां मतानां विमर्शने प्राधान्यं आवहति इत्यतः षष्ठाध्याये ते योगाः विचार्यन्ते। तद् यथा ध्यानयोगः, संन्यासयोगः, आत्मस्वरुपयोगः, यज्ञचक्रं, देवपितृयानविचारः, दैवी-आसुरी स्वभावाः, वर्णाश्रमादयः विषयाः अत्र निरुप्यन्ते। एवम् अष्टविषयेषु सात्विक-राजस-तामसभेदाः, विभूतियोगः, विश्वरूपदर्शनयोगः, प्रकृतिपुरुषयोगः च विचिन्त्य अध्यायोऽयम् उपसंहरति ।

अस्मिन्नन्तिमाध्याये विषयस्यास्य निष्कृष्टनिरुपणेन अधोनिर्दिष्टानि निगमनानि उपलभ्यन्ते। तानि यथाक्रमं निरुप्यन्ते।

- भारतीयवेदान्तसंप्रदायेषु प्रमुखस्थानेषु विराजमानाः सिद्धान्ताः अद्वैत-द्वैत-विशिष्टाद्वैताः; तेषां आचार्याश्च यथाक्रमं शङ्कर-मध्व-रामानुजाः। एते स्वमतानां स्थापनार्थं प्रचरणार्थं च भगवद्गीतायाः भाष्याणि रचितानि। अत एव एतेषां भाष्येषु मतभेदाश्च सन्ति।
- प्रबन्धेऽस्मिन् भगवद्गीतायाः शंङ्कर-मध्व-रामानुजाचार्याणां भाष्याणां मिथः तुलनात्मकमध्यनमेव कृतम्। शंङ्कराचार्यः अद्वैतसिद्धान्तानुसारं भाष्यरचना अकरोत्। मध्वाचार्यस्तु द्वैतमतानुसारेण गीताभाष्यं, गीतातात्पर्यं च अलिखत्। रामानुजाचार्यः विशिष्टाद्वैतमतानुसारेण भाष्यरचनाविन्यासः च अकरोत्। एषु आचार्यत्रयेषु रामानुजाचार्यः स्वीयभाष्ये सर्वेषां श्लोकानां भाष्यरचना अकरोत्। शंङ्कराचार्येण द्वितीयाध्यायस्य दशमश्लोकपर्यन्तं भाष्यरचना न कृता दृश्यते। अत्र भाष्ये शास्त्ररीत्या पूर्वपक्ष-सिद्धान्तपक्षरीत्या सिद्धान्ताः निरुपिताः। भाष्यरचनारंम्भे उपोद्घातभाष्यमिति नाम्ना विषयप्रवेशः अनेन कृतम्।

- मध्वभाष्ये सर्वेषां श्लोकानां भाष्यं न लभ्यते; परन्तु अनेन चयनरूपेण स्वीयसिद्धान्तानुसारं युक्तश्लोकानामेव भाष्यरचना कृता। शंङ्करवदेव प्रथमम् उपोद्घातं च दृश्यते। द्वितीयाध्याये एकादशश्लोकादारभ्य भाष्यं करोति। एतेषां श्लोकानां (२.३१-३७, ३.१०-१३,२१-२६, ४.२-५,३६-४२, ६.१२-१४,३७-४३,८.१८-२०,९.३१-३४,१०.९-१५,२१-३०,३१-३६,१.१-११,२१-३०, १२.६-१०, १४.९-१८, १६.१-९,१०-२४, १७.८-१५,१६-२२,२३-२८,१८.४४-४८,५३-५६,६२-७८) प्रत्येकं भाष्याणि नास्ति।
- रामानुजभाष्ये प्रथमाध्यायस्स्य कानिचन श्लोकानामेव भाष्याणि द्रष्टुं शक्यते । द्वितीयाध्यायस्य पञ्चमश्लोकात् आरभ्य सर्वेषां श्लोकानां कृते भाष्यरचना कृता च।
- एते आचार्याः स्वमतस्थापनाय सामान्येन उपनिषदादीन् प्रमाणत्वेन स्वीकृतवन्ताः। तेषु शंङ्कराचार्यः उपनिषदां प्रामाणिकता अधिकतया स्वीकृतवान्। मध्वाचार्यः मुख्यतया भागवतपुराणादि-व्यासस्मृति-महाभारततात्पर्यनिर्णयादयः प्रमाणरूपेण स्वीकरोति। रामानुजाचार्यः उपनिषदादीन्, ब्रह्मसूत्र-योगसूत्रादिग्रन्थान् च प्रमाणत्वेन अङ्गीकुर्वन्ति। शंङ्कराचार्यः उपनिषत्सु अभेदश्रुतीनां प्रामाणिकत्वं स्वीकृतम्। मध्व-रामानुजौ वैदिकप्रयुक्त भेदश्रुतीनां प्रामाणिकत्वं स्वीकृतम्।।
- अत्रायं विषयः चिन्तनीयः-

"प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।
एतत् वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव "(१३.१)

एष श्लोकः मध्वभाष्ये एवास्ति, अन्यभाष्ययोः न स्वीक्रियते। अत एव श्लोकसंख्याविषये मध्वमते ७०१ इति प्रमाणीकरोति , शंङ्कर-रामानुजयोः मतानुसारेण श्लोकसंख्या ७०० इति च द्रष्टुं शक्यते। विषयश्चायं अस्य प्रबन्धस्य प्रथमाध्याये निरुपितम्।

स्वीयसिद्धान्तानुकूलभागेषु बृहत् भाष्यं विलिख्य प्रतिकूलभागेषु पदानुपदव्याख्यान एव कृतः एतैराचार्यैः।

अस्मिन् प्रबन्धे प्रधानतया कर्म-ज्ञान-भक्ति विषयाणामेव तुलनात्मकमध्यनं कृतम्। अत्र त्रयाणां आचार्याणां मतभेदान् विशदीकृत्य कार्याणि प्रस्तौति ।

- अद्वैतमतानुसारेण कर्माणि प्रायेण स्वर्गादि अल्पफलसाधकानि। कर्मयोगमनुसृत्य चित्तशुद्धिरेव निष्कामकर्मणः प्रयोजनम्। अनेन मोक्षं वा परमपदादिकं वा न प्राप्तुं शक्यते। मध्वमतानुसारेण दशपदार्थेषु एकं भवति कर्मम् । मोक्षोपार्जनाय वैराग्यं, माहात्म्यज्ञानं, भक्ति, निष्कामकर्म, ज्ञानयोगः, इत्यादीनि आवश्यकानि। आचार्यो*f*यं भक्तिविषये अधिकं प्राधान्यं ददाति। विशिष्टाद्वैतानुसारेण कर्म एव दुखस्य कारणम्। कर्मणा अविद्यया च आत्मनः पतनं भविष्यतीति तेषां सिद्धान्तः। ईश्वर एव कर्मणां फलदाता । स एव पुण्यपुरुषाणां कृते पुरस्कारः, दुश्चिन्तकानां दण्डादयश्च ददाति। कर्मफलविषये एषां मतमेवं भवति - सात्विककर्मणां फलं सुकृतमेव, राजसकर्मणां दुःखं, तामसकर्मणाम् अज्ञानञ्च। ज्ञानकर्मसमुच्चयवादस्तु एते आचार्याः निरसन्ति। अत्रोदाहरणन्तु-

    यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
    तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ।।३.९।

अस्य श्लोकस्य अद्वैतभाष्ये "यज्ञार्थादिति । यज्ञो वै विष्णुः (तैत्तिरीय संहिता-१.७.४) इति श्रुतेर्यज्ञ ईश्वरस्तदर्थं यत्क्रियते तद्यज्ञार्थं कर्म, तस्मात्कर्मणोऽन्यत्रान्येन कर्मणा लोकोऽयमधिकृतः कर्मकृत्कर्मबंन्धनः लोको न तु यज्ञार्थात् । अतस्तदर्थं यज्ञार्थं कर्म कौन्तेय मुक्तसंङ्गः कर्मफलसंगवर्जितः सन्समाचर निवर्तय[१]" इति ।

मध्वभाष्यानुसारेण कर्मणा बध्यते जन्तु इति कर्म बन्धकं स्मृतमित्यत आह – "यज्ञार्थादिति । कर्म बन्धनं यस्य लोकस्य स कर्मबन्धनः । यज्ञो विष्णुः । यज्ञार्थं सङ्गरहितं कर्म न बन्धकमित्यर्थः। मुक्तसङ्ग इति विशेषणात् । कामान् यः कामयते इति श्रुतेश्च । अनिष्टमिष्टम् इति वक्ष्यमाणत्वाच्च। एतान्यपि तु इति च। तस्मान्नेष्टियाजुका स्यात् इति च। विशेषवचनत्वे समेऽपि विशेषणं परिशिष्यते[२]"इति।

रामानुजपक्षे "यज्ञादि शास्त्रीयकर्मशेषभूताद् द्रव्यार्जनादेः आत्मीयप्रयोजनशेषभूते कर्मणि क्रियमाणे अयं लोकः कर्मबन्धनो भवति । अतः त्वं यज्ञाद्यर्थं द्रव्यार्जनादिकं कर्म समाचर । यत्र आत्मप्रयोजनसाधनतया यः सङ्गः तस्मात् सङ्गात् मुक्तः सन् समाचर । एवं मुक्तसङ्गेन यज्ञाद्यर्थतया कर्मणि क्रियमाणे यज्ञादिभिः कर्मभिः आराधितः परमपुरुषः अस्य अनादि कालप्रवृत्तकर्मवासनां समुच्छिद्य अव्याकुलात्मावलोकनं ददाति[३]" इति।

- ज्ञानविषये*f*पि एतेषां मतभेदाः दृश्यन्ते। अद्वैतमतानुसारेण अज्ञाननाशेनैव ज्ञानार्जनम्। इदञ्च ज्ञानं श्रवण-मनन-निदिध्यासनादिना अथवा साधनचतुष्टयसम्पत्या च आर्जितुं शक्यते। अतः ज्ञानादेव कैवल्यम् नान्यमार्गेण।
  द्वैते मोक्षकारणेषु प्रधानं भवति ज्ञानं, किन्तु ज्ञानं मोक्षस्य आत्यन्तिकं कारणं नास्ति। केवलेन ज्ञानेन मोक्षं प्राप्तुं न शक्यते किन्तु भक्ति-ज्ञानयोगयोः परस्परपूरणेन अथवा संयोगेन मोक्षप्राप्तिः इति तेषां मतम्।
  विशिष्टाद्वैतदर्शनानुसारेण मोक्षप्राप्तये भक्तिरेव प्रधानमार्गः। ज्ञानं, कर्म च भक्त्याः आर्जनार्थं प्रयोजकमिति तेषां सिद्धान्तः। सत्कर्माचरणेन ज्ञानं लभते, ज्ञानलाभेन अन्तःकरणस्य शुद्धीकरणम्, अनेन भक्तिः च लभ्यते ।
- अथ ज्ञानस्य सात्विक-राजस-तामसभेदाः गीतायां प्रामुख्येन निरुप्यन्ते। तत्र श्रीशङ्करः "ईक्षते पश्यति येन ज्ञानेन तं च भावमविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मवस्तु। तदात्मवस्तु व्योमवत् निरन्तरं च, तज्ज्ञानं साक्षात्

सम्यग्दर्शनम् अद्वैतात्मविषयं  तद्विद्धि सात्विकम्। पृथकत्वेन पृथग्विधान् नाना भावान् सर्वेषु भूतेषु यत् ज्ञानं वेत्ति तत् ज्ञानं विद्धि राजसम्। प्रतिशरीरेषु भिन्नरीत्या येन ज्ञानेन भिन्नप्रकारैः येन ज्ञानेन सर्वभूतान् जानाति तत् ज्ञानं राजसमिति विदुः। एकस्मिन् कार्ये कृत्स्नवत् सक्तम् अहैतुकमतत्वार्थवत् अल्पं च यत् ज्ञानं तत् तामसमिति। तामसानां हि प्राणिनामविवेकिनामीदृशं ज्ञानं दृश्यते''[4] इति ।

मध्वभाष्ये तु ''सात्विकज्ञानेन सर्वजीवानां अस्तित्वकारणं विष्णुरेव, विष्णोः सम्यक् ज्ञानपूर्वकम् तादृश्यज्ञानं सात्विकज्ञानमिति। विष्णोः अन्यविषययथार्थज्ञानमिति ज्ञानं राजसमिति। अन्यथा भाष्ये सर्वगतमेकमीश्वरं न जानातीत्येतावतैव राजसत्वम्, एकस्य कृत्स्नवज्ज्ञानमेव तामसम्। एकजीवात् अन्यत् किमपि नास्तीति अहैतुकं ज्ञानं सर्वमपि तामसम्। सदसद्वैलक्षण्याद्यन्यथाकल्पनायुक्तमेव तामसम्[५]। अन्यत् अल्पज्ञानमपि तामसम्। एकस्मिन् सर्ववज्ज्ञान कार्ये जीवे पूर्णब्रह्मेति सक्तं ज्ञानं निर्युक्तिकं चात्नप्कार्थकल्पना युक्तमल्पज्ञानं च पृथक् पृथगपि तामसानीति च''।

रामानुजभाष्ये ''व्ययस्वभावयुक्तं ब्राह्मणादि शरीरेषु अव्ययम् अविकृतं फलादिसङ्गानर्हं च कर्माधिकारवेलायाम् ईक्षते तत् ज्ञानं सात्विकमिति। राजसन्तु सर्वष्वपि भूतेषु ब्राह्मणादिषु ब्राह्णाद्याकारपृथक्तत्वेन आत्माख्यमपि भावान् नानाभूतान् सितदीर्घादिपृथक्वेन च पृथग्विधान् फलादिसंयोगयोग्यान् कर्माधिकारवेलायां यद् ज्ञानं वेत्ति तत् ज्ञानं राजसमिति। तामसज्ञानं नाम एकस्मिन् कर्तव्यकर्मणि प्रेतभूतगणाद्याराधनरूपे अत्यल्पफले अकृस्नफलवत्तया तथाविधाङ्गहेतुरहित पूर्वदेवात्मनि पृथक्वादियुक्ततयामिथ्याभूतार्थ विषयमत्यल्पफलं च प्रेतभूताद्याराधनरूपविषयत्वात् तद् ज्ञानं तामस ज्ञानमिति''[६]।[१]

- भक्तिविषये*f*पि मतभेदाः दृश्यन्ते। अद्वैतमते आत्मविषयज्ञानरूपभक्तिः विशिष्यते। इन्द्रियोपसंहारशमदमाद्यहिंसाादि लक्षणैः  धर्मः प्रयत्नः भगवन्तं भक्त्या उपासते ।

---
1

शास्त्रं उपास्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तद् उपासनमाचक्षते । अपराभक्ति ईश्वरं प्रति प्रेमभावश्चेत् पराभक्ति ज्ञानमेव । भक्त्याः फलं ज्ञानमेव, भक्तिः ज्ञानसाधनायेव न अन्तिमलक्षणम्। द्वैतदर्शनानुसारेण ज्ञानयुक्तभक्त्या एव परमपदं अथवा श्रीनारायणं प्राप्तुं शक्यते । अनेन दर्शनानुसारेण प्रकारत्रयं पक्वभक्तिः, परिपक्वभक्तिः, अतिपरिपक्वभक्तिः इति । स्वसुखानुभवमेव मोक्षम् तदर्थं निर्मलभक्तिरेव मोक्षसाधनहेतु । भक्तेर्व्यतिरिक्तं मोक्षसाधनं नास्ति । विशिष्टाद्वैतमतानुसारेण श्रीनारायण चरणकमले आत्मसमर्पणं सर्वोत्तमसाधनमिति । मोक्षहेतौ प्रधानकारणं भक्तिरेव । अत्र भक्त्याः प्रकारद्वयं मर्कट किशोरवत् , मार्जारकिशोरवत् इति द्वैविध्यं च निरूप्यते । अनेनदर्शनानुसारेणैव पञ्चरात्रसिद्धान्तं, व्यूहसिद्धान्तं च वर्तते ।

- भगवद्गीतायाः श्लोकानां स्वस्वसिद्धान्तानुसारिव्याख्याः एतैराचार्यैः कृताः। तत्र दृष्टान्तमिदम्-

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदविद् (१५-१)

श्रीशङ्करस्त्वेवं विशदयति - “ऊर्ध्वशब्दस्य महत्वं कारणत्वं नित्यत्वं सूक्ष्मत्वं इत्याद्यर्थाः। तं ऊर्ध्वमूलं संसारं मायामयं वृक्षमाहुः। अधः शाखाः महदहङ्कारतन्मात्रादयः। संसारस्य यथार्थरूपं ज्ञातुं वृक्षकल्पनया विशदयति। अनादिकाल प्रवृतत्वाद् अव्ययः भवति संसारवृक्षः। संसारवृक्षस्य स्वरूपं यः जानाति सः सर्ववेदार्थविद् सर्वज्ञश्च भवति[७]”।

अस्यैव श्लोकस्य मध्वभाष्यं यथा – “ऊर्ध्वो विष्णुः । ऊर्ध्वः उत्तमः सर्वतः। अधो निकृष्टम्। शाखा भूतानि । श्वोऽप्येकप्रकारेण न तिष्ठतीत्यश्वत्थः । तथाऽपि न

प्रवाहव्ययः । पूर्णब्रह्मकाले यथा स्थितिस्तिथा सर्वत्रापीत्यव्ययता । फलकारणत्वाच्छन्दसां पर्णत्वम् । न हि कदाचिदप्यजाते पर्णे फलोत्पत्तिः [८]"।

रामानुजमते "सप्तलोकोपरिनिविष्टचतुर्मुखादित्वेन तस्य ऊर्ध्वमूलत्वम् पृथ्वीनिवासिसकल-नरपशुमृगपक्षिकृमिकीटपतङ्गस्थावरान्ततया अधः शाखायाम् , असङ्गहेतुभूताद् आसम्यम् ज्ञानोदयात् प्रवाहरूपेण अच्छेद्यत्वेन अव्यत्वम् । श्रुत्यादिभिः प्रतिपादितैः काम्यकर्मभिः विवर्धते अयं संसारवृक्षः इति छन्दांसि एव अस्य पर्णानि पत्रैः हि वृक्षः वर्धते । एवम्भूतम् अश्वत्थं स वेदो हि संसारवृक्षस्य छेदोपायं वदति , छेद्यस्य वृक्षस्य स्वरुपज्ञानं छेदनोपायोगि इति वेदविद् इति उच्यते [९]।

अनेन पठनेन भगवद्गीतायाः शंङ्कर-मध्व-रामानुजाचार्याणां भाष्ययोः तुलनात्मकमध्यनमेव कृतम्। शंङ्करानन्तरं अद्वैते बहवः आचार्याः गीताभाष्यमकरोत् दैवज्ञपण्डित, हनुमद्पैशाचभाष्यं, मधुसूदनसरस्वति, नीलकण्ठ, शंङ्करानन्द, श्रीधर, वेङ्किकडनाथ इत्यादयः स्वतन्त्रभाष्याणि वा, शंङ्करभाष्यस्य अनुवादरीत्या वा कृतानि। अपि च भाषान्तरीकरणरूपेण च भाष्याणि आगतानि। द्वैतसिद्धान्तेषु मध्वभाष्यानन्तरं जयतीर्थ-राघवेन्द्रादयः भाष्याण्यरचयत्। रामानुजस्य विशिष्टाद्वैतानुसारेण वेङ्किकडनाथादयः भाष्याणि कृतवन्तः। एवमेव भारते प्रादेशिकभाषासु, वैदेशिकभाषासु च भाषान्तरीकरणमपि गीतायाः उपलभ्यन्ते। प्रत्येकतया अद्वैत-द्वैत-विशिष्टाद्वैतानुसारेण दर्शनानां अनुसारेण च पठितुम् अवसरः इतोऽपि अधिकं वर्तते। एवं बहुविधरीत्या शोधकार्यं कर्तुं अनेन पठनेन मार्गमुद्घाटयतु, अनेन पठनेन साहाय्यं भवतु इति विचिन्त्य विषयोऽयम् उपसंहरति ।

Subrahmanian M. “ Śaṅkara-madhva-rāmānujācāryāṇāṃ Śrīmad Bhagavadgītā Vyākhyānāni - Ekaṃ tulanātmaka pathanam”. Thesis.Department of Sanskrit, University of Calicut, 2020

# BIBLIOGRAPHY

## English

A Study of the Vedanta in the Light of Brahmasutras, Shailja bapat , new bharatiya book corporation delhi y 2004

Abhinav Guptha's Commentary on the Bhagavatgita, Boris Marjanovic, indic Publications., New Delhi, 2004.

Advaitadharmam, (mal), Nilakandan Elyath K N , State Institute of Languages kerala, Thiruvananthapuram , 1992

Amarakosham *Paarameswarivyakhyanam* , Parameswaranmoosad, Kerala Sahitya Akademi , Thrissur , 2008

Bhagavad gita palakaalam palakazhchakal, (mal) (Editor)Somasekharan,Sign books, Thiruvananthapuram, 2009

Bhagavad Gitayute thatvasastram(mal) *(The Philosophy of Bhagavad Gita , subba Rao*), Nair MG K, (Transalator), D C Books Kottayam,2010Ɛ

Bharatheeya darsana sangraham(mal),(Outlines of Indian Philosophy) Hiriyanna.M , parvathidevi R,( Transalator ) State Institute of Languages kerala, Thiruvananthapuram -3, 2014

Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-1, Radhakrishnan S , Narayanan nambissanT(Transalator), The Mathrubhumi press, Calicut,1975.

Bharatheeya darsanam (mal) (*Indian Philosophy*), vol-2, Radhakrishnan S , Narayanan nambissanT(Transalator), The Mathrubhumi press, Calicut,1978.

Bharatiya chinta (mal) (Indian Thought), Damodaran K, State Institute of Languages kerala, Thiruvananthapuram -3 , 1973.

Bharattiyadarsanangal , (mal)Vasudevan bhattatiri, C .V , N B S Kottayam ,1986

Bhooshan(Transalator), The Mathrubhumi press, Calicut,1989

Chandogya Upanisad , Swami Swahanada , Sri Ramakrishna math mylapore, , Madras , 1956

Complete Works of Sri Sankaracharya Vol-4 , Board of Editorieales , S S U S Kalady , 2012

Critical word ibdex to the Bhagavatgita, Rao Bahadoor Prahlad C. Divanji, Munshiram Manohar ram Publications.

Dars anika Nighandu ,( Mal) Prasad C , Sky Book Publishers Mavelikkara, 2011

Dhanurvedam; Purathanabharathathinte Ayodanasastharam , (mal) , Ramankutty P V, Kanippayur Sankaran Namboodiripad Granthasala, kanippayur,Thrissur ,2014

Dvaita Vedanta Darsana of Sri Madhvacharya , Pandurangi, Rashtriya Sanskkrit Sansthan New Delhi , 1995

Fundamentals of Visistadvaita Vedanta, S. M. Srinivas Chari, Motila Banarsidass, 1988.

Gita and its Commentators, S. h. Jhabwala, Popular Prakashan Pvt. Ltd. Bombay, 1960

Gitaas in the Mahabharatha & The puranas, Dr. R. Neelakandan, nag Publishers, Delhi, 1989.

History of Visistadvaita Literature, V.K.S.N. Raghavan, Ajantha Publications, 1979.

Jnaneshwari(mal)(*Interpretation of Bhagavad geetha by Jnaneshwar*) , Chandrasekharan Pillai (Transalator) , Jnaneshwari geetha pracharana prathishtan Anandashramam, Kanhangad, 1994

Keraliyasamskrita sahityacharitram( A history of kerala Sanskrit Literature) ,(mal) ,Vadakkumkur Rajarajavarma Raja, Sree Sankaracharya University of Sanskrit , kalady, kerala, 1997

Modern Indian interpreters of the Bhagavatgita Ed. Robert N. Miner, Sri Sadguru Publications, new Delhi, 1991.

Mysticism in Bhagavatgita by Mhendranath Sirkar, Cosmo Publications, New Delhi, 2003.

Navadhabhakthi ,(mal) ,Chidananda puri swami, Sanathanadharma seva trust , Kolathuor, 1994

Philosophy of the Bhagavatgita by Chhaganla G. Kaji, Vol. 1. Cosmo Publications, New Delhi, 2007.

Prapancharooparekha Geethayilninnu, ( mal) , Harisena varma M , D C Books Kottayam , 2006

Sanatanadharmaparicayam,(mal), Chidanandapuri swami, sanatana-dharmapedham,Calicut University , 2015

Sankaracaryar , ( mal) ,Mahadevan T M P , National books, 1971

Sastravadavali(mal),Vasudevan potti R, Sukrtindra Oriental Institute,kuthapady,Thammanam, Kochi, 2008

Sreemad Bhagavadgeetharahasyam, (mal) Lokmanya Bal Gangadar tilak,Narendra

Sri Madhvacharya his Life, Religion Ɛ philosophy,Tapsyananda , Sri Ramakrshna math , mylapore, Madras

Sri Madvacaryar; jivitavumDarsanavum (mal) Sukrtindra Oriental Institute,kuthapady,Thammanam, Kochi, 2006

Sri Ramanuja His life Religion Ɛ Philosophy , Swami Tapasyananda Sri Ramakrshna math , mylapore, Madras

Sri sankara sarasarasvam vol-1,Dasopanishad Sankara Bhashyam , Narayanapilla.P.K, RamanpillaN, Arsha vidyaPrathishtanam , Rameswaram, Amaravila, 2016

Sri-Bhashya of Ramanujacharya , Vasudev Sastri Abhvankar , Govt. central press Bombay 1916

Srimad Bhagavad Gita ,Sivaravindam,(Mal), Mahabhashyam, Balakrishnan Nair G , State Institute of Languages kerala, Thiruvananthapuram -3 , 1995

Srimad Bhagavad gita athava Jnanayogam , kalady, 1990

Srisankaracharyar (mal), Kunjunni Raja K , Department of cultural Publications, Govt of Kerala , 1994

Swami Vivekanandanum Bhagavad Geethayum, (mal) Lakshmikumari M, Kurukshethera Prakasan, Kaloor,Kochi , 2011

Tattvaditrayam ( mal)(srimad Ananda Tirtha Virachitam), Vasudevan potti R , Sukrtindra Oriental Institute,kuthapady,Thammanam, Kochi, 2006

Ten Principal Upanisads , with sankarabhasya , Motilal Banarsidass Delhi , 1964

Ten Principal Upanisads with sankarabhashya , works of sankaracarya in orginal Sanskrit , Vol 1, Motilal Banarsidass , Delhi, 1964

The Ashtaadhyayi of Panini, vol -1, Srisa Chandra vasu,motilal banarsidass,p

The Brhadararanyka Upanisad , (Sanskrit text with English translation), Sri Ramakrshna math , mylapore, Madras ,1945

The epistemology of Visistadvaita, Vedavalli Narayanan, Munshiram Manohar ram Publications, 2008.

The Garuda Mahapuranam (*Sanskrit text with English Translation Ɛ notes* )Vol- 1 , M N Dutt, New Bharayiya Book Corporation , Delhi,2016

The Geeta and its culture, R. K. Chatterjee, Sterling Publishers Pvt. Ltd., New Delhi, 1987.

Upadesa sahasri , Adi Sankaracharya , Narasimhan (*English rendering with comments*) Bharatiya Vidya Bhavan , Bombay , 1996

Vivekananda sahitya sarvaswam-4 ,(mal) , ( Tattvanveshanam ), *Translation of the complete Works Swami Vivekanaanda from orginal English ,Bengal, Ɛ Sri Sanskrit*, Ramakrishna math, Puranattukara Trichur, kerala, 1963

Vivekananda sahitya sarvaswam-7 ,(mal) , ( Mahacharitangalum kavitaklum mattum ), *Translation of the complete Works Swami Vivekanaanda from orginal English ,Bengal, Ɛ Sri Sanskrit*, Sri Ramakrishna math, Puranattukara Trichur, kerala, 1963

Yatindramatadipika, (Sanskrit text with English translation) Srinivasadasa, Sri Ramkrishna math ,mylapore, madras ,1978

Yogeswaranaya Sreekrishan (mal), Acharya Narendrabhooshan, D C Books Kottayam , kerala ,1975

**संस्कृतम्**

कठोपनिषद् ,( हिन्दी व्याख्या सहितम् ), डा पुष्पा गुप्ता, चौखाम्बा सुरभारती प्रकाशन्, वारणासि

सर्वदर्शनसंग्रहः माधवाचार्यकृतः ,डा उमा शंङ्कर शर्म ऋषि , चौखाम्बा विद्याभवन् वारणासि , २०१२

उपनिषत्सु कर्मवादः , जातवेद त्रिपाठी परिमल् पब्लिकेशन् दिल्ली १९८९

तैत्तिरीयोपनिषद् , सानुवाद शाङ्करभाष्य सहित ,गीताप्रेस, गोरखपूर, १९९३

महाभारतं,(भीष्मपर्वम्), डा श्रीपाद दामोदर सातवलेकर , स्वाध्याय मण्डल् ,पारडी, १९७२

सर्वमूलग्रन्थाः *,प्रथमं सम्पुटम्* ,गीताभाष्यम् , गीतातात्पर्यम् , प्रो.पाण्डुरंङ्गि, Dvaita Vedanta studies and research foundation , Bangalore, 1993

वेदान्दसारः, सदानन्दः श्री , भावबोधिनी संस्कृत व्याख्यानसहिता, चौखाम्बा सुरभारती विद्याभवन् वारणासि ,२०१६

अष्टादश-उपनिषदः , (गांन्धि-स्मारकभूतं संस्करणम्) प्रथमः खण्डः ,वैदिक-संशोधन-मण्डल, पुण्यपत्तनम्, १८८०

ब्रह्मसूत्रभाष्यम्, श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं, श्रीमज्जयतीर्थ-व्यासतीर्थ-राघवेन्द्रतीर्थानां टीकाभिः समलङ्कृतम्, प्राच्यविद्यासंशोधनालयः मैसूर , १९११

श्रीमद् भगवद्गीता रामानुज-भाष्य हिन्दी अनुवादसहित श्रीहरिकृष्ण गोयन्दक गीता प्रेस् गोरख् पूर्

श्रीभाष्यम् ,श्रीरामानुजाचार्यकृतं,(द्वितीयखण्ड), निम्बार्काचार्य श्री ललितकृष्ण गोस्वामि ,श्री निम्बार्काचार्य पीठ ,प्रयाग ,

मानमेयोदयः ,नारायणद्धयीप्रणीतः , चौखाम्बा विद्याभवन्, वारणासि,२०१३

दर्शनशास्त्रस्येतिहासः , डा शशिबालागौडः, चौखाम्बा सुरभारती प्रकाशन् ,२०१२

ब्रह्मसूत्रशाङ्करभाष्यम् सटिप्पनं ,मूलमात्रम्, वासुदेवशर्मणा, चौखाम्बा विद्याभवन्, वारणासि १९९८

श्रीशंकङरात्प्रागद्वैतवादः, श्रीमुरलीधरपाण्डेयः, भारतीय विद्या प्रकाशन् दिल्ली

महाभारतं तृतीयखण्डं , अनुवाकं, पण्डित रामनारायणदत्त शास्त्री, गीताप्रेस् गोरखपूर् ,१९६५

संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम् ,डा कृष्णविहारिमिश्रः शास्त्रि , शिक्षा तथा समाजकल्याण मन्त्रालय भारत सर्वकार १९७८

उपनिषत्सु कर्मवादः , जातवेद त्रिपाठी परिमल् पब्लिकेशन् दिल्ली , १९८६

कूर्मपुराणं (ब्राह्मीसंहितासमेतम् ), श्रीमानमहर्षि ,गोपाल् प्रिन्टिङ् वर्क्स् ,कोल्कत्ता ,१९६२

महाभारतं,(वनपर्वम् ), द्वितीय खण्ड पण्डित , पण्डित रामनारायणदत्त शास्त्री पाण्डे, स्वाध्याय गीताप्रेस् गोरख् पूर् १९६५

विष्णुपुराणम् ,महर्षिवेदव्यासप्रणीतं ,(Translated ) H H . Wilson , Nag Publishers, Delhi

देवीगीता संस्कृत मूल हिन्दी अनुवाद सहितं , हनुमान् प्रसाद पोद्दार, चिम्मन् लाल् गोस्वामि , गीताप्रेस् गोरखपूर् १९६०

श्रीमद्भागवतपुराणम् (श्रीव्यासमहषि प्रोक्तम् ), श्रीधरस्वामिविरचितया भावार्थबोधिनी नाम्नी मोतिलाल् बनारसी दास, दिल्ली, १९८३

श्रीमद् भगवद्गीता, श्रीधर्मदत्तशर्मा , मुन्शीराम मनोहरलाल पब्लिशर्स प्रं लिं दिल्लि , १९७८

श्रीमचंछकराचार्यविरचितं श्रीमद्भगगद्गीता मोतिलाल् बनारसीदास दिल्ली

श्रीमद्भागवतम्, श्रीधरस्वामि विरचितया भावार्थबोधिनी नाम्नयासंस्कृतटीकया समुपेतम्, मोतिलाल् बनारसीदास

अष्टादशपुराणपरिचयः, श्रीकृष्णमणित्रिपाठी, कृष्णदास संस्कृत सीरीस चौखाम्बा सुरभारती, वारणासि

वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण ,तृतीयोभागः , चौखाम्बा संस्कृत आफीस्, वारणासि,१९६२

वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण ,तृतीयोभागः , चौखाम्बा संस्कृत आफीस्, वारणासि,१९६२

वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण ,द्धितीयोभागः , चौखाम्बा संस्कृत आफीस्, वारणासि,१९६२

वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण ,प्रथमोभागः , चौखाम्बा संस्कृत आफीस्, वारणासि,१९६२

वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण , चतुर्थीभागः , चौखाम्बा संस्कृत आफीस्, वारणासि,१९६२

वाजस्पत्यम् ,तारानाथ तर्कवाचस्पदि भट्टाचार्येण ,पञ्चमोभागः , चौखाम्बा संस्कृत आफीस्, वारणासि,१९६२

शब्दकल्द्रुमः प्रथम खण्डः मोत्तिलाल् बनारसी दास दिल्ली, १६६२

शब्दकल्द्रुमः द्वितीय खण्डः मोत्तिलाल् बनारसी दास दिल्ली, १६६२

शब्दकल्द्रुमः तृतीय खण्डः मोत्तिलाल् बनारसी दास दिल्ली, १६६२

शब्दकल्द्रुमः चतुर्थ खण्डः मोत्तिलाल् बनारसी दास दिल्ली, १६६२

शब्दकल्द्रुमः पञ्चम खण्डः मोत्तिलाल् बनारसी दास दिल्ली, १६६२

अष्टाध्यायिसूत्रपाठः धातुपाठश्च ,विनायकरजतः, वक्रतुण्डप्रकाशनम् ,शृङ्गेरि, २०११

Katyana sruauta sutra (text with English translation and notes) ) New Bharatiya book corporation Delhi, 2006

Reg veda samhita with commentary of sayanacarya vol 1 Mandala 1,1964

शतपथब्राह्मणम् Vol-4 ,Maitteyee Deshpande(Sanskrit Text With English Translaton) New Bharatiya book corporation Delhi

आपस्तम्बश्रौतसूत्रम् Thite(Ed) , (Sanskrit Text With English Translaton and Note), ) New Bharatiya book corporation Delhi, 2004

तैत्तिरीयब्राह्मणम् , Vol-2 श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् , गणेशउमाकान्त थिटे , New Bharatiya book corporation Delhi, 2012

कृष्णयजुर्वेदीय तैत्तिरीयसंहित, Vol-1, मैत्रयीदेशपांडे, New Bharatiya book corporation Delhi, 2012

अथर्ववेदसंहित(मूलमातम् ) , सुरेन्द्र प्रदीप्त नाग पब्लिशर्स ,२००१

कात्यायन श्रौतसूत्रम् , Vol-1, गणेशउमाकान्त थिट, , (Sanskrit Text With English Translaton and Note), New Bharatiya book corporation Delhi, 2006

ऋग्वेद संहित With the Commentry of Sayanacarya Vol 1,1972

ऋग्वेद संहित, विश्वबन्धुना होषियापूर् , विश्वेश्वरानन्द वैदितशोध संस्थानं पस्चिमबंङ्गाल् , १९६४

गौतमीयसूत्रप्रकाशः ,किशोरनाथ झा , मोतिलाल् बनारस् इलाहाबाद ,

तैत्तिरीयोपनिषद् , सानुवाद शाङ्करभाष्य सहित , गीताप्रेस् गोरखपूर, १९९३

पारस्कर गृह्यसूत्र , पण्डित् अनन्दशास्त्रि दोग्र , चौखाम्बा संस्कृत संस्थानं , वारणासि , १९७८

Vaisesika Sutra of Kanada P K Print World, New Delhi 2003

Eighteen Principal Upanisadas Vol -1 (श्वेताश्वतरोपनिषद् ) V P Limaye, R D Vadekar वैदिक संशोधन मण्डलं पूने , १९५८

श्रीमद्वाल्मीकिरामायणम् , बालकाण्डम् , चौखाम्बा सुरभारती प्रकाशन् , वारणासि , १९७७

मनूस्मृतिः (Sanskrit Textcommentery) कल्लूकभट्ट विरचित मोत्तिलाल् बनारसीदास दिल्ली वारणासि , १९८३

गोपाथब्राह्मणम् Univer of Terento, Asiatic Society of Bengal ,1872

श्रीमल् भगवल्गीता (mal) स गोपालन् नायर् पि १९५६

श्रीमद्भगवद्गीता Wasudevlaxman sastri pansikar, Munshiram Manohar Lal Publishers, p. 1,2

श्रीमद्भगगद्गीता शांङ्करभाष्यसमेता, मोतिलाल् बनारसीदास, १९२९

# APPENDIX 1

## अक्षौहिणी

अक्षौहिण्यामित्यधिकैः सप्तत्याह्यष्टभिश्शतैः संयुक्तानि सहस्राणि गजानामेकविंशतिः । एवमेव रथानान्तु संख्यानं कीर्त्तितं बुधैः । पञ्चषष्ठिः सहस्राणि षट्शतानि दशैव तु संख्यातास्तुरूगास्तज्ञैर्विनारथतुंरंगमैः नृणां शतसहस्रन्तु सहस्राणि नवैव तु शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः ।। अमरकोशे एवं विस्तरति । यथा - एके भैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका । पत्त्यं गैस्त्रिगुणैः सर्वैः क्रमाद्याख्या यथोत्तरम् ।। ८०। सेनामुखं गुल्मगणौ वाहिनी पृतना चमू । अनीकिनी दशामीकिन्यक्षौहिण्यथ संपदि ।।८१।

| | पत्तिः | सेनामुखं | गुल्मं | गणं | वाहिनि | पृतन | चमु | अनीकिनी | अक्षौहिणी | महाक्षौहिणी |
|---|---|---|---|---|---|---|---|---|---|---|
| गजः | १ | ३ | ९ | २७ | ८१ | २४३ | ७२९ | २१८७ | २१८७० | |
| रथं | १ | ३ | ९ | २७ | ८१ | २४३ | ७२९ | २१८७ | २१८७० | |
| अश्वाः | ३ | ९ | २७ | ८१ | २४२ | ७२९ | २१८७ | ६५६१ | ६५६१० | |
| नराः | ५ | १५ | ४५ | १३५ | ४०५ | १२१५ | ३६४५ | १०९३५ | १०९३५० | |
| आहत्य | १० | ३० | ९० | २७० | ८१० | २४३० | ७२९० | २१८७० | २१८७०० | १३२१२४९०० |

# APPENDIX II

| क्रम संख्या | पर्वाणि | अध्यायाः | श्लोकाः |
|---|---|---|---|
| ०१ | आदिपर्वम् | २२७ | ८८८४ |
| ०२ | सभापर्वम् | ७८ | २५५१ |
| ०३ | वनपर्वम् | २६९ | ११६६४ |
| ०४ | विराटपर्वम् | ६७ | २०५० |
| ०५ | उद्योगपर्वम् | १८६ | ६६९८ |
| ०६ | भीष्मपर्वम् | ११७ | ५८८४ |
| ०७ | द्रोणपर्वम् | १७० | ८९०९ |
| ०८ | कर्णपर्वम् | ६९ | ४९६४ |
| ०९ | शल्यपर्वम् | ५९ | ३२२० |
| १० | सौप्तिकपर्वम् | १८ | ८७० |
| ११ | स्त्रीपर्वम् | २७ | ७७५ |
| १२ | शान्तिपर्वम् | ३३९ | ४७३२ |
| १३ | अनुशसनपर्वम् | १४६ | ८००० |
| १४ | अश्वमेधपर्वम् | १०३ | ३३२० |
| १५ | आश्रमवासिकपर्वम् | ४२ | १५०६ |
| १६ | मौसलपर्वम् | ८ | ३२० |
| १७ | महाप्रस्थानिकपर्वम् | ३ | ३२० |
| १८ | स्वर्गारोहणपर्वम् | ५ | २०९ |
| १९ | हरिवंशम् | ३ | १२००० |